
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

M-2954

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विकम सवंत)	Additional Particulars / Remark
श्रीमद्भागवत अष्टमस्कंध	मुधो महादेव	पुराण	अपूर्ण	-	3/12	160	मोडी	कागद	10	69		

॥ सप्तमस्कंध ॥ ७

॥ मुधोमाहादेवस्पदंपुस्तकं ॥

ता॰ सं॰

१

॥श्रीगणेशाय नमः॥ ॥स्वभक्तपक्षपातेन तद्विपक्षविदारणं। नृसिंहमद्भुतं वंदे परमानंदविग्रहं॥ ऊतिः पंचदशाध्याये सप्तमे वर्ण्यतेऽधुना। ऊतिस्तु वासना प्रोक्ता तत्कर्मानुसारिणी॥ अशुभा च शु-
भा चेति द्विधा सा हेतुभेदतः। अशुभा महतां कोपाच्छुभा च महदनुग्रहात्। हरेर्वैरपयोर्यद्वद्वैकुंठे वसतोरपि। चतुःसनरुषा विष्णुद्वेषायाशुभ वासना। यथा हि दैत्यपालेऽपि प्रह्लादस्य सतः स्थिरा। ना-
रदानुग्रहादासीद्विष्णौ सद्भक्तिवासना। स्वभक्तं च सदा विष्णुर्द्विषंतमपि रक्षति। तृतीये यत्स्ववैज्ञाश्चावकरोदात्मसात्तु नः। अतो मनीषिणां यत्नः कार्यो महदनुग्रहे। इत्येतदर्थं मूर्तीनामत्र लक्षण-
मुच्यते। तत्रादौ दशभिर्दैत्यतत्त्वमतिभेदतः। महत्कोपात्तु कंपोद्भवासनाभेद उच्यते। सद्वासना चतुर्थेतकर्मभिः शुद्धचेतसः। परेषां पंचभिस्तस्माद्विक्रियते धर्मनिर्णयः। तत्र तु प्रथमेऽध्याये हि-

राजोवाच॥ ॥समः प्रियः सुहृद्ब्रह्मन् भूतानां भगवान् स्वयं। इंद्रस्यार्थे कथं दैत्यानवधीद्विषमो यथा॥१॥
न ह्यस्यार्थः सुरगणैः साक्षान्निःश्रेयसात्मनः। नैवासुरेभ्यो विद्वेषो नोद्वेगश्चागुणस्य हि॥२॥ ॥ ॥ ॥

रण्यकशिपोः स्तुते। विष्णुस्तत्कौ विरोधकृद्विप्रशापजः ईर्यते। यदुक्तं पूर्वं स्कंधे तेहतपुत्रा दितिः शक्रपार्ष्णिग्राहेण विष्णुना भ्रातृनाशोकदीनेन ज्वलंती पर्यचिंतयदिति। तत्कृत्वा [illegible]
रीक्षित्पृच्छति। सम इति त्रिभिः। नहि समस्य सुहृदः स्ववैषम्यं नाम प्राप्तिः। न च प्रियस्य प्रीतिकर्तृषु वैषम्यं युक्तमित्यर्थः॥१॥ किंच। यस्यैः प्रयोजनं सिद्ध्यति स तत्पक्षपाती भवति [illegible] वि-
त्ति तान् द्वेष्टि द्वेषेण हंति न तु तदत्रास्तीत्याह। न हीति निःश्रेयसं परमानंदरूपमात्मा स्वरूपं यस्य। असुरेभ्यश्चाद्वेगो भयं नास्ति। अतो विद्वेषोऽपि नास्त्येव। तत्र हेतुः॥ अगुणस्येति॥२॥ ॥

राम

१

श्रीनारायणस्य गुणान् अनुग्रहनिग्रहादीन् प्रति तत् तं संशयं ॥३॥ भागवतस्य प्रह्लादस्य माहात्म्यं ॥४॥ कृष्णाय व्यासाय कृष्णमुनिं नत्वेत्यर्थः ॥५॥ यस्मात् प्रकृतेः परः अतो निर्गुणः [illegible]
तएव अव्यक्तः रागद्वेषादिनिमित्तभूतदेहेंद्रियादिरहितः । सोपि स्वमायागुणं सत्वादिकं आविश्य आविश्य अधिष्ठाय बाध्यत्व बाधकत्वं तां गतः [illegible] नहि (?) [illegible]
पर्थः ॥६॥ तत्र गुणानां स्वीयत्वे सति प्राकृतवद्रूपवद् द्वेष मर्त्स्यात् । न तु तद् दर्शीत्याह । नात्मन इति । न तु स्वेच्छया गुणाधिष्ठानेनापि पक्षपातो वैषम्यं स्यादेव न तस्य कालकृतत्वादित्याह । [illegible] (?)

इति नः सुमहाभाग नारायणगुणान्प्रति । संशयः सुमहाञ्जातस्तद्भवांश्छेत्तुमर्हति ॥३॥ ॥श्रीशुक उवाच ॥ ॥साधु पृष्टं महाराज हरेश्चरितमद्भुतं ।
यद्भागवतमाहात्म्यं भगवद्भक्तिवर्द्धनं ॥४॥ गीयते परमं पुण्यमृषिभिर्नारदादिभिः । नत्वा कृष्णाय मुनये कथयिष्ये हरेः कथां ॥५॥ निर्गुणोपि ह्यजोऽव्यक्तो
भगवान् प्रकृतेः परः । स्वमायागुणमाविश्य बाध्यबाधकतां गतः ॥६॥ सत्वं रजस्तम इति प्रकृतेर्नात्मनो गुणाः । न तेषां युगपद्राजन् ह्रास उल्लास एव च ॥७॥
जयकाले तु सत्वस्य देवर्षीन् रजसोऽसुरान् । तमसो यक्षरक्षांसि तत्कालानुगुणोऽभजत् ॥८॥ ज्योतिरादिरिवाभाति संघातान्न विविच्यते ॥ ॥ ॥

ति साईन । उल्लासो वृद्धिः ॥७॥ सत्वस्य जयकाले देवादीनृषींश्च अभजत् । तत्तद्देहं प्रविश्य वर्द्धयतीत्यर्थः । रजसो जयकाले तमसो जयकाल इत्यन्वयः । तस्य कालस्यानुगुणः सन् ॥८॥ स
मस्यापि तिमिन्नस्नेहेन वैषम्ये दृष्टांतः । ज्योतिर्यथा काष्ठादिषु जलं यथा पात्रेषु आकाशं यथा घटादिषु तथा नानारूपः आभाति । नन्वेतर्हि तद्देवविवेके न प्रतीयेत तत्राह । संघातान्नृसु
रादिदेहात् न विविच्यते न पृथक्प्रतीयते ॥ ॥ ॥

तर्हितान्न भजतीति कुतो ज्ञायते तत्राह। विदंतीति। आत्मस्थं परमात्मानं कवयो निर्गुणाः मथित्वा कार्यदर्शन लिंगेन विचार्य जानंतीति। अत्र ततः स्वभावकर्मादिवादनिषेधेनाविदंतीति पाठे लालोपिज्ञान मेव। अत्रापि ज्योतिरादिरिवेति द्रष्टव्यं। यथा हि सूर्यकांतादौ दाहदर्शनात् ज्योतिर्ज्ञायते। यथा वा बांधदर्शनाद्दारुरि त्यादि॥ ९॥ तदेवं मायागुणावशेनेत द्वैषम्यं न स्वाभाविकमित्युक्तं। तर्हि गुणापारतंत्र्यादनीश्वरत्वमाशंक्याह। यदा त्मनो जीवस्य गोभाय भरः शरीराणि परः परमेश्वरः सिसृक्षुर्भवति। तदा साम्येन स्थितं रजः पृथक् सृजति विचित्रासु तासु पूर्षु रिरंसुः क्रीडितुमिच्छुः सत्वं पृथक् सृजति। शयिष्यमाणः संहरिष्यन् तमः पृथगीरयति प्रेरयति यदसिसृक्षुरित्यादिनिर्देशात् प्रतीतं कालपारतंत्र्यमपि वारयति। कालमितिहे नरदेव प्रधानपुंसोर्निमित्त सहायं स

विदंत्यात्मानमात्मस्थं मथित्वा कवयोऽततः॥ ९॥ यदा सिसृक्षुः पुर आत्मनः परो रजः सृजत्येष पृथक् स्वमायया। सत्वं विचित्रासु रिरंसुरीश्वरः शयिष्यमाणस्तमईरयत्यसौ॥ १०॥ कालं चरंतं सृजतीश आश्रयं प्रधानपुंभ्यां नरदेव सत्यकृत्। यएष राजन्नपि काल ईशिता सत्वं सुरानीकमिवैधयत्यतः। तत्प्रत्यनीकानसुरान् सुरप्रियो रजस्तमस्कान् प्रमिणोत्युरुश्रवाः॥ ११॥ अत्रैवोदाहृतः पूर्वमितिहासः सुरर्षिणा। प्रीत्या महाक्रतौ राजन् पृच्छतेऽजातशत्रवे॥ १२॥ ॥

त्कृत अमोघकर्तृ इश्वरस्तयोः सहकारित्वेनाश्रयभूतं चरंतं वर्त्तमानं कालं स्वयमेव सृजति। स्वचेष्टारूपत्वात्कालस्यनततपारतंत्र्यमित्यर्थः। तथापि प्रकृतेः किमायातं तत्राह। यएषकालःस सत्वमेधयति। अतो हेतोः ईशितापि ईश्वरोपि सत्वप्रधानं सुरानीकं देवसमूहमेधयतीत्यर्थः। तत्प्रत्यनीकान् सुरप्रतिपक्षान् प्रमिणोति हिनस्तीत्यन्वयः। उरुश्रवः कीर्तिर्यस्य सः कालशक्तिं त्कालितगुणानां वैषम्यं सन्निधिमात्रेणातदधिष्ठाता रिस्फुरतीति प्रकरणार्थः॥ ११॥ इदानीं तु तयोर्वधोन सुरपक्षपातेन किं तु ब्राह्मणशापेनासुरीयोनिं प्राप्तयोरनुग्रहार्थ एवेति [illegible] इह स उपाख्यायते। अत्रैवेति द्वेषादिरहितस्यापि दैत्यवधे॥ १२॥ ॥

शिशुपालवधस्य ७

दृश्यते सहितस्यापि दिशस्य चेदिभूभुजः ॥१३॥ एकांतलब्धा तामपि ज्वलंभा प्राप्य विविधिप्रो जातेत्येतदद्भुतं हि ॥१५॥ तस्य तु वेन वक्त्र एक पातपदो वोचितइत्याह । भगवन्निंद्ययो ...
॥१६॥ दमघोषस्य सुतः शिशुपालः कलत्राघ्राणात्बाल्ये कोमलभाषणामारभ्य संप्रति अधुनापि अमर्षी क्रोधी मत्सरी च ॥१७॥ श्वित्रः कुष्ठः ॥१८॥ दुःखया हंडः प्राप्य पंचाम बहु रूपयस्य ...

दृष्ट्वा महाद्भुतं राजा राजसूये महाक्रतौ । वासुदेवे भगवति सायुज्यं चेदिभूभुजः ॥१३॥ तत्रासीनं सुरर्षिं राजा पांडुसुतः क्रतौ । पप्रच्छ विस्मितमना मुनीनां शृण्वतामिदं ॥१४॥ ॥युधिष्ठिर उवाच॥ ॥अहो अत्यद्भुतं ह्येतद्दुर्लभैकांतिनामपि । वासुदेवे परे तत्वे प्राप्तिश्चैद्यस्य विद्विषः ॥१५॥ एतद्वेदितुमिच्छामः सर्व एव वयं मुने । भगवन्निंदया वेनो द्विजैस्तमसि पातितः ॥१६॥ दमघोषसुतः पाप आरभ्य कलभाषणात् । संप्रत्यमर्षी गोविंदे दंतवक्त्रश्च दुर्मतिः ॥१७॥ शपतोरसकृद्विष्णुं यद्ब्रह्म परमव्ययं । श्वित्रो न जातो जिह्वायां नांधं विविशतुस्तमः ॥१८॥ कथं तस्मिन्भगवति दुरवग्राह्यधामनि । पश्यतां सर्वलोकानां लयमीयतुरंजसा ॥१९॥ एतद्भ्राम्यति मे बुद्धिर्दीपार्चिरिव वायुना । ब्रूह्येतदद्भुततमं भगवांस्तत्र कारणं ॥२०॥ २
॥शुक उवाच॥ ॥राज्ञस्तद्वच आकर्ण्य नारदो भगवानृषिः । तुष्टः प्राह तमाभाष्य शृण्वत्यास्तत्सदः कथाः ॥२१॥ ॥ ॥

त्र लयं सायुज्यं ईयतुः । अस्तु तस्यापि इदं तवक्त्रलयस्य तस्मिन्त्र लयं सायुज्यं तत्र ज्ञातकथा मा एप नमिद्धवन्निर्देशः ॥१९॥ एतत्तदद्भुततमं हि अतएतत्प्रतिज्ञाम्यति । भगवान्
सर्वज्ञस्त्वं ब्रूहि ॥२०॥ आभाष्य संबोध्य सीदंति निषीदंत्यस्यामिति सत् सभा तस्याः सदसः शृण्वंत्याः सत्याः कथा इष्प्राहेत्यन्वयः ॥२१॥ ॥ ॥

भगवन्निंदकस्य नरकपातेन भाव्यमिति विद्वत्तम्मन्यको ऽतिप्रायः। भगवत्पीडाकरत्वेन वा। तदभावेपि सुरापानादिवन्निषिद्धनिंदाचरणाद्वा। तत्र तावद्देहाभिमानकृता निंदा॥
निमित्तत्वात्पीडाहेतूनां। भगवतश्च। अदभावात्पीडाशंकाम्नीत्याह। माहूर्तिकेति॥ निंदनं दोषकीर्तनं तम्यक्कारस्तिरस्कारः। निंदनसत्कारादिज्ञानार्थं प्रधानपुरुषयोरविवेकेन कलेवरं कल्पितं
रचितं॥२२॥ तदभिमानेन कृतानां यथा ममाहमिति वैषम्यं तत्कृतं हिंसादिकं च भवति। तथा न यस्योत्फन्तरेण चवधः। दंडस्ताडनं। पारुष्यं निंदा। तयोर्हेतुभूतयोर्हिंसा पीडा च भवति॥२३॥ यन्नि-

नारद उवाच॥ ॥ निंदनस्तवसत्कारन्यक्कारार्थं कलेवरं। प्रधानपरयो राजन्नविवेकेन कल्पितं॥२२॥ हिंसा तदभिमानेन दंडपारुष्ययोर्यथा। वैषम्यमिह भूतानां ममाहमिति पार्थिव॥२३॥ यन्निबद्धोभिमानोयं तद्वधात्प्राणिनां वधः। तथा न यस्य कैवल्यादभिमानोऽखिलात्मनः। परस्य दमकर्तुर्हि हिंसा केनास्य कल्प्यते॥२४॥ तस्माद्वैरानुबंधेन निर्वैरेण भयेन वा। स्नेहात्कामेन वा युंज्यात्कथंचिन्नेक्षते पृथक्॥२५॥ ॥

बद्धोयमभिमानः। तस्य देहस्य वधात्तद्वधश्च यथा तथा यस्याभिमानो नास्ति अस्य परमेश्वरस्य हिंसा केन हेतुना कल्पते। न केनापि। अभिमानाभावे हेतुः। कैवल्यात्। अद्वितीयत्वेन। नि-
मंतव्याभावात् वैषम्याभावे हेतुः अखिलात्मनः सर्वात्मन इति। तर्हि किमिति हंतीति तत्राह। परस्येति दमकर्तुः हितार्थं दंडं करोतीत्यर्थः॥२४॥ यस्माद्भगवतो निंदादिकृतं वैषम्यं नास्ति। तस्माद्ये-
न केनाप्युपायेन ध्यायतस्तेनैव निंदादिकृतपापस्यापि नाशात्सायुज्यं युक्तमित्याशयेनाह। तस्मादिति सप्तभिः। न अभिवैरेकेनापि यस्मिन्नपि तेन भक्तियोगेनेत्यर्थः। युंज्यात् [illegible]
स्मादेतैरुपायैः पृथक् न ईक्षेत॥२५॥ ॥ ॥

तेष्वपि वैरानुवंधः श्रेष्ठ इत्याह। यथेति। न तथा भक्तियोगेनापीति॥२६॥ अत्र दृष्टांतः। कीटः पेशस्कृता भ्रमरेण। संरंभो द्वेषः भयं च। भयद्वयोगस्तेन॥२७॥ वैरेणायामनुचिंतया तयैव पूतः पा
प्मा येषां ते तं प्रापुः॥२८॥ तदघं कामादिनिमित्तं पापं हित्वा॥२९॥३०॥ तर्हि वेनः किमिति नरके पातितः। तीव्रध्यानाभावात् पापमेव तत्र फलितमित्याह। कतमोपीति। पुरुषं श्रीहरिं प्रति पुरु

यथा वैरानुवंधेन मर्त्यस्तन्मयतामियात्। न तथा भक्तियोगेन इति मे निश्चिता मतिः॥२६॥ कीटः पेशस्कृता रुद्धः कुड्यायां तमनुस्मरन्। संरंभ
भययोगेन विंदते तत्स्वरूपतां॥२७॥ एवं कृष्णे भगवति मायामनुज ईश्वरे। वैरेण पूतपाप्मानस्तमापुरनुचिंतया॥२८॥ कामाद्द्वेषाद्भयात्स्नेहाद्यथा
भक्त्येश्वरे मनः। आवेश्य तदघं हित्वा बहवस्तद्गतिं गताः॥२९॥ गोप्यः कामाद्भयात्कंसो द्वेषाच्चै[द्या]दयो नृपाः। संबंधाद्वृष्णयः स्नेहाद्यूयं भक्त्या वयं वि
भो॥३०॥ कतमोपि न वेनः स्यात्पंचानां पुरुषं प्रति। तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत्॥३१॥ मातृष्वस्रेयो वश्चैद्यो दंतवक्त्रश्च पांडव। पा
र्षदप्रवरौ विष्णोर्विप्रशापात्पदच्युतौ॥३२॥ ॥युधिष्ठिर उ०॥ ॥कीदृशः कस्य वा शापो हरिदासाभिमर्शनः। अश्रद्धेय इवाभाति हरेरैकांतिनां भ
वः॥३३॥ ॥

षेषु उपस्यकामासंभवात् भयादिति श्चिंतयतां पंचानां मध्ये नैकतमोपीत्यर्थः॥३१॥ तदेवमितिहासप्रस्तावकथामुक्त्वा श्रीकृष्णे शिशुपालस्य वैरानुवंधे को हेतुरित्यपेक्षा
यां तमेवेतिहासं वक्तुमाह। मातृष्वस्रेय इति। यदा तौ वैकुंठात्प्रच्युतौ॥३२॥ हरिदासो अतिस्पर्शाति अभितिलवतीति तिरया। अश्रद्धेयः अतादृशाणामिव असंभवात् भवो जन्म॥

असंभवमेवाह। जन्महेतुत्वात् तैः प्राकृतैर्देहेंद्रियासुभिर्हीनानां। शुद्धसत्वमयदेहानामित्यर्थः। प्राकृतदेहसंबंधेन संबद्धमेतदाख्यानमाख्यातुमर्हसि॥३४॥ कथंभूताः पंचषड्वा हायनानि येषां ते अर्भका बालाः तद्वदाभा येषां ते। पूर्वेषां मरीच्यादीनामपि दिग्वाससः दिगंबराः। अतः शिशून् मत्वा॥३६॥ वासममपि नार्हथः कुतः। भिन्नसत्वेवामिति चिकारार्थः। हे बालिशौ अतो हेतोः आसु

देहेंद्रियासुहीनानां वैकुंठपुरवासिनां। देहसंबंधसंबद्धमेतदाख्यातुमर्हसि॥३४॥ नारद उवाच॥ ॥ एकदा ब्रह्मणः पुत्रा विष्णोर्लोकं यदृच्छया। सनंदनादयो जग्मुश्चरंतो भुवनत्रयं॥३५॥ पंचषड्ढायनार्भाभाः पूर्वेषामपि पूर्वजाः। दिग्वाससः शिशून् मत्वा द्वाःस्थौ तान् प्रत्यषेधतां॥३६॥ अशपन् कुपिता एवं युवां वासं न चार्हथः। रजस्तमोभ्यां रहिते पादमूले मधुद्विषः। पापिष्ठामासुरीं योनिं बालिशौ यातमाश्वतः॥३७॥ एवं शप्तौ स्वभवनात् पतंतौ तौ कृपालुभिः। प्रोक्तौ पुनर्जन्मभिर्वां त्रिभिर्लोकाय कल्पतां॥३८॥ जज्ञाते तौ दितेः पुत्रौ दैत्यदानववंदितौ। हिरण्यकशिपुर्ज्येष्ठो हिरण्याक्षोऽनुजस्ततः॥३९॥ हतो हिरण्यकशिपुर्हरिणा सिंहरूपिणा। हिरण्याक्षो धरोद्धारे बिभ्रता सौकरं वपुः॥४०॥ ॥ ॥

यातं॥३७॥ वां युवयोस्त्रिभिर्जन्मभिः लोकाय स्वस्थानप्राप्तये कल्पतां। तावता अयं शापः समाप्यतामिति पुनः प्रोक्तावित्यर्थः॥३८॥ ४०॥ धरोद्धारे निमित्ते तत्प्रतिघाती हतः॥ ४०॥

हिरण्यकशिपोर्वधकारणं सूचयति। हिरण्यकशिपुः पुत्रमिति। ४१। सर्वभूतानामात्मभूतं। कुतः समं ब्रह्मैव पश्यतीति तथा तं। अतः प्रशांतं द्वेषादिरहितं। अत एव भगवत्तेजसा स्पृष्टं अत्यन्तं
उद्यमैः शस्त्रप्रहारादिभिः। ४२। विश्रवसः सुतौ। ४३। न्यहनत्। हतवानित्यर्थः। तर्हि तस्यैव कथनीयमित्यत आह। रामवीर्यमिति। ४४। कृष्णचक्रेणाहतमंहो ययोस्तौ। तयोः पापमेव

हिरण्यकशिपुः पुत्रं प्रह्लादं केशवप्रियं। जिघांसुरकरोत्तानायातना मृत्युहेतवे॥४१॥ सर्वभूतात्मभूतं तं प्रशांतं समदर्शनं। भगवत्तेजसा स्पृष्टं ना
शक्नोद्धंतुमुद्यमैः॥४२॥ ततस्तौ राक्षसौ जातौ केशिन्यां विश्रवःसुतौ। रावणः कुंभकर्णश्च सर्वलोकोपतापनौ॥४३॥ तत्रापि राघवो भूत्वा न्यहनच्छाप
मुक्तये। रामवीर्यं श्रोष्यसि त्वं मार्कंडेयमुखात्प्रभो॥४४॥ तावेव क्षत्रियौ जातौ मातृष्वस्रात्मजौ तव। अधुना शापनिर्मुक्तौ कृष्णचक्रहतांहसौ॥४५॥ वैरा
नुबंधतीव्रेणाध्यानेनाच्युतसात्मतां। नीतौ पुनर्हरेः पार्श्वं जग्मतुर्विष्णुपार्षदौ॥४६॥ ॥युधिष्ठिर उवाच॥ ॥विद्वेषो दयिते पुत्रे कथमासीन्महात्मनि।
ब्रूहि मे भगवन्येन प्रह्लादस्याच्युतात्मता॥४७॥ ॥इति श्रीभागवते महापुराणे सप्तमस्कंधे नारदयुधिष्ठिरसंवादे प्रथमोऽध्यायः १॥ ॥ ॥

हतं न तु तावित्यर्थः। ४५। येन कारणेन प्रह्लादस्याच्युतात्मता अच्युतैकचित्तत्वं तदपि ब्रूहीति शेषः॥४७॥ ॥इति स० प्रथमोऽध्यायः १॥ ॥ ॥ ॥ श्रीराम॥॥

द्वितीयेविष्णुरोषेणालोकंविद्राव्यदानवैः।तद्भ्रात्रादीनितिहासैस्सांत्वयन्भगवतद्वेषएवतत्द्वेषेपिकारणमित्याशयेनाह।भ्रातरीत्यादिना।१।एवंदेवपक्षपातेनकोपेनउक्तअतिशये
नज्वलद्भ्यांकोपाग्निधूमैर्नैवधूम्रमंबरं।निरीक्षमाणः।२।करालदंष्ट्रा।तिर्यक्तयाउग्रदृष्ट्यादुष्प्रेक्ष्यंभ्रुकुटीयुक्तंमुखंयस्यसः।३।४।५।समेनापिउपधावनैर्भजनैःनिमित्तभूतैःपार्ष्णिग्राह

नारदउवाच॥ ॥भ्रातर्येवंविनिहतेहरिणाक्रोडमूर्तिना।हिरण्यकशिपूराजन्पर्यतप्यद्रुषाशुचा॥१॥आहचेदंरुषापूर्णःसंदष्टदशनच्छदःकोपोज्वलद्भ्यांचक्षुर्भ्यांनिरीक्षन्धूम्रमंबरं।२॥करालदंष्ट्रोग्रदृष्ट्यादुःप्रेक्ष्यभ्रुकुटीमुखः।शूलमुद्यम्यसदसिदानवानिदमब्रवीत्।३॥भोभोदानवदैतेयाद्विमूर्द्धंस्त्र्यक्षशंबर।शतबाहोहयग्रीवनमुचेपाकइल्वल॥४॥विप्रचित्तेममवचःपुलोमन्शकुनादयः।शृणुतानंतरंसर्वेक्रियतामाशुमाचिरं॥५॥सपत्नैर्घातितःक्षुद्रैर्भ्राताप्रेदयितःसुहृत्।पार्ष्णिग्राहेणहरिणासमेनाप्युपधावनैः॥६॥तस्यत्यक्तस्वभावस्यघृणेर्मायावनौकसः।भजंतंभजमानस्यबालस्येवास्थिरात्मनः॥ ॥७॥ ॥ ॥

णमता।६।एवंत्यक्तःस्वभावःस्वमहत्त्वंयेनतस्यघृणेःशुद्धतेजोमयस्यापिमाययावनौकसः।वाराहरूपस्यसतः।अस्थिरात्मनःअव्यवस्थितचित्तस्य।कुतः।योयोभजतितंभजमान
स्यअनुसरतः॥७॥ ॥

म २

तस्य रुधिरेण यावत्तर्पयिष्या मितावद्धूयं भुवं यातेति तृतीयेनान्वयः ॥८॥ ननु दैवैस्त्वद्वधः कारितः अतस्ते किं न हन्यन्ते तत्राह। तस्मिन्क्रूरे कपटेन अहिते प्रतिपन्ने क्रूरमीहितं यस्येति वा ॥ नष्टे भ्र
ष्टे सति देवाः शुष्यंति स्वयमेव नाशं यास्यंति। कुतः विष्णुरेव प्राणो येषां ते ॥९॥ तपो यज्ञादि युक्तान्नसूदयध्वं घातयत ॥१०॥ ननु तैः किमपराद्धं तत्राह। विष्णुरिति द्विजानां क्रिया अनुष्ठानं मूलं
यस्य सः। यतो सो यज्ञो धर्ममयः पश्चात् परायणं परमश्चाश्रयः अतो यज्ञरूपस्य विष्णोर्मूलत्वात्। मामनादृत्य तदाश्रयणाद्धेवेयध्याइति भावः ॥११॥ तस्मात्परमं मंत्रं शृणुतेत्याह यत्र यत्रेति। सं

मच्छलातित्रयीवस्य भूरिणा रुधिरेणावै। रुधिरप्रियं तर्पयिष्ये भ्रातरं मे मतद्व्यथः ॥८॥ तस्मिन्क्रूरे हितेन नष्टे कृत्तमूले वनस्पतौ। विटपा इव शुष्यंति विष्णुप्रा
णा दिवौकसः ॥९॥ तावद्यात शुवं यूयं विप्रहत्नत्रसमेधितां। सूदयध्वं तपो यज्ञस्वाध्यायव्रतदानिनः ॥१०॥ विष्णुर्द्विजक्रियामूलो यज्ञो धर्ममयः पुमान्।
देवर्षिपितृभूतानां धर्मस्य च परायणं ॥११॥ यत्र यत्र द्विजा गावो वेदा वर्णाश्रमाः क्रियाः। तं तं जनपदं यात संदीपयत हश्यत ॥१२॥ इति स्वभर्तृनिर्देशमा
दाय शिरसादृताः। तथा प्रजानां कदनं विदधुः कदनप्रियाः। पुरग्रामव्रजोद्यानक्षेत्रारामाश्रमाकरान्। खेटखर्वटघोषांश्च ददहुः पत्तनानि च ॥१३॥ ॥

दीपयत दहत हश्यत छेदं कुरुत ॥१२॥ पुरं हट्टादिमत्। ग्रामः हट्टादिहितः व्रजो गवां वासः। उद्यानं कृत्रिमं वनं। क्षेत्रं व्रीह्यादेः आरामोऽकृत्रिमं वनं आश्रम ऋषीणां स्थानं। आकरो रत्नादीनां
खेटः कृषीवलानां वासः। खर्वटो गिरिद्रोण्यां ग्रामः। घोषः आभीराणां वासः पत्तनं राजधानी ॥१३॥ ॥ ॥

स्रयो। १

स्वनिकेतैः वनं न साधनैः। आजीव्यान् शरणानि गृहाणि॥१४॥ विप्रकृते उपद्रुते। यज्ञभागानामभावात् दिवं परित्यज्य॥१५॥ तदेवं प्रजानां कदनं दानवेषु कुर्वत्सु स्वयं स्वर्गराज्यादि साधयितुं
तपस्तप्तुकामः प्रथमं यत्कृतवान् तदाह हिरण्यकशिपुरित्यादिना। कटोदकं प्रेताय प्रदेयमुदकं। आदिशब्दात्प्रेतश्राद्धं चाद्य॥१६॥ हे वध्व इति भ्रातृभार्यां संबोधयति॥१९॥ भवतु नाम तस्य श्ला

ति न

केचित्खनित्रैर्बिभिदुः सेतुप्राकारगोपुरान्। आजीव्यांश्छिच्छिदुर्वृक्षान्केचित्परशुपाणयः। प्रादहन्शरणान्येके प्रजानां ज्वलितोल्मुकैः॥१४॥ एवं वि
प्रकृते लोके दैत्येंद्रानुचरैर्मुहुः। दिवं देवाः परित्यज्य भुवि चेरुरलक्षिताः॥१५॥ हिरण्यकशिपुर्भ्रातुः संपरेतस्य दुःखितः। कृत्वा कटोदकादीनि भ्रातृपु
त्रानसांत्वयत्॥१६॥ शकुनिं शंबरं धृष्टं भूतसंतापनं वृकं। कालनाभं महानाभं हरिश्मश्रुमथोत्कचं॥१७॥ तन्मातरं रुषाभानुं दितिं च जननीं गिरा
श्लक्ष्णया देशकालज्ञ इदमाह जनेश्वर॥१८॥ ॥हिरण्यकशिपुरुवाच॥ ॥अंबांब हे वधूः पुत्रा वीरं मार्हथ शोचितुं। रिपोरभिमुखे श्लाघ्यः शू
राणां वध ईप्सितः॥१९॥ भूतानामिह संवासः प्रपायामिव सुव्रते। दैवेनैकत्र नीतानामुन्नीतां स्वकर्मभिः॥२०॥ ॥ ॥

नां

घ्यो वधः। तथा चास्माकं तावत्स्वर्गतिरेवेति चेत्तत्राह। भूतानामिति। दैवेन प्राचीनकर्मणा एकत्र नीतानां संयोजितानां पुनश्च स्वैः स्वैः कर्मभिरुन्नीतानां वियोजितानां
॥२०॥

एवं लोकदृष्ट्या शोकं निवार्य तत्त्वदृष्ट्या वारयति नित्य इति। नित्यः ध्वंसशून्यः। अव्ययः अपक्षयशून्यः। शुद्धः निर्मलः। सर्वगः सर्वगतः। सर्ववित् सर्वज्ञश्च सर्वत्र हेतुः परो देहादिव्यतिरिक्तः। अ-
तोऽहत इति क्लिश इति मलिन इति विभक्त इति अज इति शोको न कार्य इत्यर्थः। कथं तर्हि तस्य संसारः तत्राह धत्त इति। आत्मनो मायया स्वाविद्यया लिंगं धत्ते। गुणान् उच्चावचान् देहान् सुखदुःखादी-
न् वा विशेषेण सृजन् सुखी कुर्वन् लिंगं शरीरोपाधिः संसार इत्यर्थः।२१। एतत् सदृष्टांतं प्रपंचयति। यथेति चतुर्भिः। तरवः प्रति बिंबिताः उपाधिधर्माध्यारोपहिते लवंतीति दृष्टांतमुक्त्वा ग्राहकधर्माग्रहेप्येवं

नित्य आत्माऽव्ययः शुद्धः सर्वगः सर्ववित्परः। धत्तेऽसावात्मनो लिंगं मायया विसृजन्गुणान्॥२१॥ यथांभसा प्रचलता तरवोऽपि चला इव। चक्षुषा भ्रा-
म्यमाणेन दृश्यते चलतीव भूः॥२२॥ एवं गुणैर्भ्राम्यमाणे मनस्यविकलः पुमान्। याति तत्साम्यतां भद्रे ह्यलिंगो लिंगवानिव॥२३॥ एष आत्मविपर्या-
सो ह्यलिंगे लिंगभावना। एष प्रियाप्रियैर्योगो वियोगः कर्मसंसृतिः॥२४॥ संभवश्च विनाशश्च शोकश्च विविधः स्मृतः। अविवेकश्च चिंता च विवेकास्मृतिरे-
व च २५

तीति दृष्टांतमाह। चक्षुषेति।२२। अविकलः परिपूर्णोऽपि वा। तत्साम्यतां मनःसमतामित्यर्थः।२३। लिंगभावना देहाभिमानः एष आत्मनो विपर्यासः अन्यथाभावः तमेवाह। प्रियैर्वियोगः अप्रिये-
र्योगः स्वकर्मवसंसृतिश्च नानागर्भेषु प्रवेशः।२४। ततश्च संभव उत्पत्तिं विवेकस्याऽस्मृतिः अननुसंधानं॥ २५॥ ॥

अत्रापि शोकहेतुं विनाप्यर्थेवायं शोक इत्यस्मिन्नर्थे प्रेतस्य स्पृतस्य तस्यैवां धवाप्तेषां चाख्या॥ उपासततमसमीपे आवृत्य स्थिताः॥२७॥ विशीर्णरिन्नमयं कङ्कणं यस्याः विभ्रष्टानि आ
भरणानि स्रजश्च यस्याः। शरेण निर्भिन्नं हृदयं यस्याः। अस्रजा रक्तेन आविलं लिप्तं॥२८॥ प्रकीर्णाः केशा यस्य ध्वस्ते अग्निशीयस्य रभसा संरंभेण दष्टो दष्टच्छदस्तेन दष्टोष्ठेन। रजसा

अत्राप्युदाहरंतीममितिहासं पुरा॥ तं यमस्य प्रेतवधूनां संवादं तन्निबोधत॥२६॥ उशीनरेषु नृपो राजा सुयज्ञ इति विश्रुतः। सपत्नैर्निहतो युद्धे ज्ञात
यस्तमुपासत॥२७॥ विशीर्णरत्नकवचं विभ्रष्टाभरणस्रजं। शरनिर्भिन्नहृदयं शयानमसृगाविलं॥२८॥ प्रकीर्णकेशं ध्वस्ताग्निं रभसा दष्टदच्छदं। रजः
कुंठमुखांभोजं छिन्नायुधभुजं मृधे॥२९॥ उशीनरेंद्रं विधिना तथा कृतं पतिं महिष्यः प्रसमीक्ष्य दुःखिताः। हताः स्म नाथेति करैरुरो भृशं घ्नंत्यो मु
हुस्तत्पदयोरुपापतन्॥३०॥ रुदंत्य उच्चैर्दयितांघ्रिपंकजं सिंचंत्य अस्रैः कुचकुंकुमारुणैः। विस्रस्तकेशाभरणाः शुचं नृणां सृजंत्य आक्रंदनया विलेपिरे॥३१॥ अहो विधात्राकरुणेन नः प्रभो लोलवान्यस्त्वमनीतोद्य गोचरं दृशां। उशीनराणामसि वृत्तिदः पुरा कृतोधुना येन शुचां विवर्द्धनः॥३२॥ ॥ ॥ स्य

कुंठं आवृतं मुखांभोजं यस्य छिन्नमायुधं भुजश्च यस्य॥२९॥ तस्य पादयोरुपसमीपे आसमंतात् अपतत्॥३०॥ ३१॥ विलापमेवाह। अहो इति द्वाभ्यां। अकरुणेन त्वमेवाद्य दृशां गोचरां
दर्शायेन भवान् प्रणीतो नामितः। तेन विधात्रा त्वमधुना शुचां विवर्द्धनः कृतोसि त्वं वयः॥३२॥ ॥ ॥

त्वयासुहृत्तमेनविनावयंकथंस्यामभवेमजीवेम।अतःहेवीरयत्रत्वंयास्यसितत्रतेअनुयातंअनुगमनंतवपादयोःशुश्रूषांकुर्वतीनामस्माकंदिशदेहिहि॥३३॥निर्हारिसाहार्थेन
यन्तंअस्तंअस्मावलंपति॥३४॥परिदेवितंरोदनंस्वभ्युयमिवाक्रोश्यक्रंत्वा॥३५॥तत्रस्वयमेवोपागतोयमस्तानाह।अहोइत्यादिना।वयसाअस्मत्तोधिकानामपिलोकस्यादिर्दिष्टंज

त्वयाकृतज्ञेनवयंमहीपतेकथंविनास्यामसुहृत्तमेनते।तत्रानुयानंतववीरपादयोःशुश्रूषतीनांदिशयत्रयास्यसि॥३३॥एवंविलपतीनांवैपरि
गृह्यमृतंपतिंअनिच्छतीनांनिर्हारमर्कोस्तंसंन्यवर्तत॥३४॥तत्रहप्रेतबंधूनामाश्रुत्यपरिदेवितं।आहतान्बालकोभूत्वायमःस्वयमुपागतः॥३५॥ ॥
॥यमउवाच॥ ॥अहोअमीषांवयसाधिकानांविपश्यतांलोकविधिंविमोहः।यत्रागतस्तत्रगतंमनुष्यंस्वयंसधर्माअपिशोचन्त्यपार्थं॥३६॥अहोवयंध
न्यतमायदत्रत्यक्ताःपितृभ्यांनविचिंतयामः।अभक्ष्यमाणाअबलावृकादिभिःसरक्षितारक्षतियोहिगर्भे॥३७॥ ॥ ॥

न्ममरणादिविकारंविपश्यतामपिविमोहएवाह।यत्रयस्मात्।अव्यक्तादागतःतत्रैवगतमपार्थंशोचंति।तदुक्तंगीतासु।अव्यक्तादीनिभूतानिव्यक्तमध्यानिभारत।अव्यक्तनि
धनान्येवतत्रकापरिदेवनेति।किंच।स्वयमपिसधर्माःतेनसहमरणधर्माणोअपिस्वलक्षणोधर्मोयेषांतथाभूताअपि॥३६॥अबलादुर्बलाअपिवृकादिभिरभक्ष्यमाणावयंतत्रहेतुःयोगर्
भेरक्षतिसएवहिविश्वंरक्षितारक्षति॥३७॥ ॥ ॥

नजतस्परक्षणोकिंप्रयोजनंनकिंविदपि।किंतुंक्रीडैवकेवलमित्याह।यइदंविश्वंसृजतिरक्षतिसंहरतिवा।मोऽत्रबलाःतस्येशितुश्चराचरंक्रीडासाधनमाङ्गः

यइच्छयेशःसृजतीदमद्ययोयएवरक्षत्यपवलुंपतेचयश्च।तस्याऽवलाःक्रीडनमाङ्गरीशितु
श्चराचरंनिग्रहसंग्रहेप्रभुः॥३८॥पश्चिच्छतंतिष्ठतिदिष्टरक्षितंतंगृहेस्थितंतद्विहतंविनश्य
ति॥जीवत्यनाथोऽपितदीक्षितोवनेगृहेऽपिगुप्तोऽस्यहतोनजीवति॥३९॥ ॥ ॥

अतःसएवनिग्रहेसंहारेसंग्रहेपालनेचप्रभुः॥३८॥प्रश्चत्वमेवान्वयव्यतिरेकाभ्यांदर्शयिति।पथीति।दिष्टेनदैवेनईश्वरेणरक्षितं।तेनेश्वरेणविहितं।अस्यहतःत्तेनोपेक्षितः
३९॥॥

त्देवमात्मनोजन्ममरणादिकमंगीकृत्येश्वराधीनत्वात्त्वयोकःकार्यइत्युक्तं।इदानीं उदेहानामेवजन्मादिनत्वात्मनइत्याहत्रिभिः।भूतानितिदेहाःनिजयोनिःस्वकारणाभूतंलिंगंश
रीरंतन्निमित्तैःकर्मभिः।संभवंतिजायंतेनभवंतिनश्यंतिचसर्वशः।स्वास्विदेहाअपि।तत्रहतत्रापकृतौदेहेस्थितोप्यात्मातस्यागुणोदेहधर्मैर्जन्मादिभिर्नबध्यतेनयुज्यतेयतःअन्य
तमोदेहादत्यंतविलक्षणः।४०।।नत्वहंकृशःस्थूलइत्यादौनवैलक्षण्यंप्रतीयतेमत्राह।इदंमोहजंअविवेकाद्यात्मत्वेनजातं।वस्तुतःपृथगेवयत।तःईयतेदृश्यतेभौतिकंच
यथागृहमित्यत्वयत।अत्रैवंप्रयोगः।इत्थरभौतिकाद्वपुरुषात्शरीरंतित्रंदृश्यत्वात्भौतिकत्वाद्वयथाऽयंतविवेकिनःआत्मत्वेना[illegible]मतमपिगृहंततःपृथक्तद्दिति।भौतिक

नि

भूतानितैस्वैर्निजयोकर्मभिर्भवंतिकालेनसंवंतिसर्वशः।नतत्रहात्माप्रकृतावपिस्थितस्तस्यागुणैरत्यतमो निवध्यते।।४०।।इदंशरीरंपुरु
षस्यमोहजंयथापृथक्तलौतिकमीयतेगृहं।यथोदकैःपार्थिवतैजसैर्जनःकालेनजातोविकृतोविनश्यति।४१।।यथानलोदारुषुभातिन्नईयते
पृथग्निलोदेहगतःपृथक्स्थितःयथानतःसर्वगतंनसज्जतेतथाप्रमान्सर्वगुणाश्रयःपरः।।४२।। ।। ।।

ने

वानुभानंविहएवत्रात्मेति जन्माद्यभावमुपसंहरति।यथाओदकैःपरमाणुभिर्जातोवुद्बुदादिःयथावपार्थिवैजातोघटादिर्यथावतैजसैर्जातःकुंडलादिर्विनश्यति।त
थातैरेवत्रिविधैःपरमाणुभिःजातोजनोदेहएवविकृतःपरिणतःसन्विनश्यतिनत्वात्मेत्यर्थः।४१।।पृथगवस्थानाभावेऽपितित्रत्वेदृष्टांतद्वयमाह।यथा।नलोदारुषुवस्थितोपि
दाहकत्वेनभिन्नएवप्रतीयते।यथावदेहगतोऽप्यनिलोनासिकादिभिःपृथक्स्थितएवप्रतीयते।देहस्थोप्यात्मनस्तद्धर्मयोगाभावेदृष्टांतमाह।यथानभोनसज्जतेक्वापिसंगं
नप्राप्नोति।तथाप्रमानपिसर्वेषांगुणानांदेहेंद्रियादीनामाश्रयःतेषामधिष्ठितोवापरःपृथगेवेत्यर्थः।।४२।। ।। ।।

पिने

किंवा हे मूढाः यमनुशोचथ सोयंयुष्मत् भिन्नस्त्रियज्ञः शेते किमिति शोचथ। नन्वेतावंतं कालमसौ शृणोति अनंतरं प्रतिवक्ति च। इदानींतस्यादर्शनान्नष्टतइति शोचामइति चेत्।
सत्यं शोचंती योन त्नवति। प्राणापितस्यादर्शनादित्याह। यः श्रोतेति।४३। ननु सुखनासिकासंचारी प्राणः श्रोता वक्ता च दृष्ट एव। नासौ श्रोता वक्ता च। अचेतनत्वादित्याह। न श्रोतेति म
हान् सर्वेंद्रियचेष्टाहेतुः अत एव मुख्यः। प्राणो वै मुख्य इति श्रुतेः। कर्ता र्हि वक्ता श्रोता च तत्राह। यस्त्विह देहेंद्रियैस्तत्तदर्थं द्रष्टा आत्मा। स तु प्राणदेहाभ्यामचेतनाभ्यामन्य एव

शृण्वज्ञो नत्वयं शेते मूढा यमनुशोचथ। यः श्रोता योनु वक्तेह स न दृश्येत कर्हिचित्॥४२॥ न श्रोता नानुवक्तायं मुख्योप्यत्र महानसुः।
यस्त्विहेंद्रियवानात्मा स चान्यः प्राणदेहयोः॥४४॥ भूतेंद्रियमनोलिंगान्देहानुच्चावचान्विभुः। भजत्युत्सृजति ह्यन्यस्तच्चापि स्वेन तेजसा॥४५॥

सचेतनः॥४४॥ ननु चेतनत्वे अन्यत्वे च तस्याहं कृशः स्थूलः काणो बधिर इत्यादि देहधर्मोपलब्धिः कुतस्तत्राह। भूतेंद्रियमनो लिंगं प्रतेलक्ष्यंत इति तथा तान्देह। उते
स्पोन्यएव भजति अहमिति मन्यते तर्हि कथं मोक्षस्तत्राह। तच्च भजनं स्वेन तेजसा विवेकबलेन उत्सृजत्यपि हि इत्यपवर्गं भवं प्रमाणयति॥४५॥ ॥ ॥

ननु विवेकानंतरमप्याहारादिकर्मसु प्रवृत्तेर्बंधः स्यादेवेत्यत आह। यावल्लिंगशरीरेणान्वितः तदस्तिमानवानात्मा भवति तावदेवास्य तत्कर्मनिबंधनं बंधहेतुर्भवति। ततो विपर्यये देहधर्ममात्मकं कृतः क्ले
शश्चानुवर्त्तते। ननु लिंगाभिमाने निवृत्तेपि यतोऽयं मायायोगो विपर्ययादिमयि याज्ञत्पत्तइति तथा तत्परमार्थ इत्यर्थः। ४६। ननु सुखदुःखादीनां तत्साधनानां च सत्यत्वप्रतीतेः कुतो मायामयत्वं तथा
च बहवो वादिनः सत्यत्वमेव वदंतीति तत्राह। वितथो मिथ्याभूतोऽयमभिनिवेशः को सो गुणोद्भूततत्कार्येषु सुखादिष्वर्थः परमार्थ इति दृढज्ञानवत्वश्चेतियत्। कुत इत्यत आह। यथेति। ४७। उपसंहर

यावल्लिंगान्वितो ह्यात्मा तावत्कर्मनिबंधनं। ततो विपर्ययः क्लेशो मायायोगोऽनुवर्त्तते॥ ४६॥ वितथाभिनिवेशोऽयं यद्गुणेष्वर्थदृग्वचः। यथा मनोरथः स्वप्नः
सर्वमैंद्रियकं मृषा॥ ४७॥ अथ नित्यमनित्यं वा नेह शोचंति तद्विदः। नान्यथा शक्यते कर्तुं स्वभावः शोचतामिति॥ ४८॥ लुब्धको विपिने कश्चित्पक्षिणां निर्मि
तोंऽतकः। वितत्य जालं विदधे तत्र तत्र प्रलोभयन्॥ ४९॥ कुलिंगमिथुनं तत्र विचरत्समदृश्यत। तयोः कुलिंगी सहसा लुब्धकेन प्रलोभिता॥ ५०॥ ॥ ॥

ति। अथ तस्मात् नित्यमात्मानं अनित्यं देहं वा। तद्विदः नित्यमनित्यं च जानंतः न चैवमुपदेष्टारोपि शोचंतो दृश्यन्ते तत्राह। नान्यथेति। ज्ञानदार्ढ्याभावात् स्वभावो न निवर्त्तत इत्यर्थः। ४८। स्व
यं सधर्म्माप्यद्यापीतियदुक्तं तत्रेतिहासमाह। लुब्धक इत्यादिना। पक्षिणामंतकः ईश्वरेण निर्मितः सन्नद्धत्र यत्र तत्र तत्र तान्प्रलोभयन् जालं विस्तार्य विशेषेणाबद्धवान्। पाठांतरेण तेषामामिषा
दिभिः प्रलोभनं कृतवानित्यर्थः। ४९। कुलिंगः कंठभद्रीपक्षिविशेषः कुलिंगायोर्मिथुनं। ॥ ५०॥ ॥ ॥ ॥ ॥ ॥ ॥

हिरण्यपेण २

भा०स०

१०

शिवस्तांजालस्य सूत्रे सज्जातंबंधंप्राप ॥ आपन्नां आपदंप्राप्तां ॥५०॥ आकरुणाया सर्वतोनुकंपया ॥५१॥ आत्मनो देहस्य पार्श्वेनाविधुरा अश्रुमामायस्त्यजीवितेनानेन दुःखं यथा तवापेवंजीवता किंमेप्रयोजनं ॥ अतो मामपिकामंनय ॥ त्वित्यन्वयः ॥५३॥ नजाताः पक्षायेषां तान् कथं विभर्मि पोष्यामि मे प्रजा मातरं प्रतीक्षंते ॥५४॥ शाकुनिकः पक्षिहंता निलीनः सन् ॥५५॥ आत्मापायं स्वस्वं

सा सज्जंत शिवस्तत्यां महिषीं कालयंत्रिता ॥ कुलिंगस्तांतथापन्नां निरीक्ष्य भृशदुःखितः ॥ स्नेहादकल्पः कृपणाः कृपणां पर्यदेवयत् ॥५१॥ अहो अकरुणो देवः स्त्रियाकरुणया विभुः ॥ कृपणं मानुशोचंत्या दीनया किं करिष्यति ॥५२॥ कामं नयतु मां देवः किमर्द्धेनात्मनो हि मे ॥ दीनेन जीवता दुःखमनेन विधुरायुषा ॥५३॥ कथं त्वजातपक्षांस्तान् मातृहीनान् बिभर्म्यहं ॥ मंदभाग्याः प्रतीक्षंते नीडे मे मातरं प्रजाः ॥५४॥ एवं कुलिंगं विलपंतमारात्प्रियावियोगातुरमश्रुकंठं ॥ स एव तं शाकुनिकः शरेण विव्याध कालप्रहितो विलीनः ॥५५॥ एवं यूयमपश्यंत्य आत्मापायमबुद्धयः ॥ नैनं प्राप्स्यथ शोचंत्यः पतिं वर्षशतैरपि ॥५६॥ ॥हिरण्यकशिपुरुवाच॥ ॥बाल एवं प्रवदति सर्वे विस्मितचेतसः ॥ ज्ञातयो मेनिरे सर्वमनित्यमयथोत्थितं ॥५७॥ यम एतदुपाख्याय तत्रैवांतरधीयत ॥ ज्ञातयोपि सुयज्ञस्य चक्रुर्यत्सांपरायिकं ॥५८॥ ततः शोचत मा यूयं परं चात्मानमेव च ॥ क आत्मा कः परो वात्र स्वीयः पारक्य एव वा ॥ स्वपराभिनिवेशेन विनाज्ञानेन देहिनां ॥५९॥ ॥नारद उवाच॥ ॥इति दैत्यपतेर्वाक्यं दितिराकर्ण्य सस्नुषा ॥ पुत्रशोकं क्षणात्त्यक्त्वा तत्त्वे चित्तमधारयत् ॥६०॥ ॥इति श्रीभागवते महापुराणे सप्तमस्कंधे द्वितीयोध्यायः॥ ॥ ॥

॥५६॥ अयथोत्थितं मिथ्यैवाविर्भूतं ॥५७॥ सांपरायिकं परलोककृत्यं ॥५८॥ अशोचतेति पाठे अडागमश्चार्षः ॥ स्वः परः इत्यभिनिवेश एवाज्ञानं तेन विना ॥५९॥ [illegible] स्नुषया सहिता ॥६०॥ सप्तमे द्वितीयः॥ ॥ ॥

राम

१०

तृतीये तस्य तपसा तप्तं वीक्ष्य जगाद्दिदृक्षिः। आगत्य विस्मितस्तेन संस्तुतः स वरानदात्। तत्रैवं साधूनां कदनेन दानवानां दिश्य एवं धूनांशो कांतत्वनिरूपणेनापनीयप्रकृतवान्तदाह। हिरण्यकशि
रित्यादिना। अप्रतिद्वंद्वं प्रतिपक्षहीनं एकराजं एकमेव राजानं व्यधित्सत कर्तुमैच्छत्। १। ऊर्ध्वं बाहुर्यस्य तत्र भासमिद्दृष्टिर्यस्य। पादांगुष्ठेनाश्रिता अवनिर्येन। २। जटानां दीधितिभिः कान्तिभिः।

श्रीनारद उवाच॥ ॥ हिरण्यकशिपू राजन्नजेयमजरामरं। आत्मानमप्रतिद्वंद्वमेकराजं व्यधित्सत। १। स तेपे मंदरद्रोण्यां तपः परमदारुणं। ऊर्ध्वबा
हुर्नभोदृष्टिः पादांगुष्ठाश्रितावनिः॥ २॥ जटादीधितिभी रेजे संवर्तार्क इवांऽशुभिः। तस्मिंस्तपस्तप्यमाने देवाः स्थानानि भेजिरे। ३॥ तस्य मूर्ध्नः समुद्भू
तः सधूमोऽग्निस्तपोमयः। तिर्यगूर्ध्वमधो लोकानतपद्विष्वगीरितः। ४॥ चुक्षुभुर्नद्युदन्वंतः सद्वीपाद्रिश्चचाल भूः। निपेतुः सग्रहास्तारा जज्वलुश्च दिशो द
श॥ ५॥ तेन तप्ता दिवं त्यक्त्वा ब्रह्मलोकं ययुः सुराः। धात्रे विज्ञापयामासुर्देवदेव जगत्पते॥ ६॥ दैत्येंद्रतपसा तप्ता दिवि स्थातुं न शक्नुमः। तस्य चोपशमं
भूमन्विधेहि यदि मन्यसे। लोका न यावन्नंक्ष्यंति बलिहारास्तवाऽभिभो॥ ७॥ ॥ ॥

रा

अंशुभिः रश्मिभिः प्रलयकर्तार्क इव रेजे। पूर्वं ये प्रलजिताः ते पुनः स्थानानि भेजिरे। ३॥ विष्वगीरितः सर्वतः प्रसृतः सन्। ४॥ द्वीपैरद्रिभिश्च सहिता भूश्चलिता। ५॥ पा
तव बलिहाराः करप्रदाः पूजाकारिण इति वा। अभितो भवतीत्यभिभुः। हे अभिभो सर्वाधिपते। पाठांतरे भोः इति संबोधनं। अभितो यावन्न नंक्ष्यंतीति संबंधः॥ ७॥ ॥ ॥ ॥

ब्रह्मणाप्यस्मिन्नुद्देशे सत्यादयो नु तत्संकल्पमात्रेणैव तस्येति च तुर्तिः। अथाप्यस्मात्तन्निर्विविदितं त्वया श्रूयतां॥ ८॥ तपोयोगयोः समाधिना निश्चया सर्वविघ्नेभ्यः श्रेष्ठं निजासनं सत्यलोकं य
याञ्चध्यास्ते अधितिष्ठति॥ ९॥ तत्तथैवात्मनः साधयिष्यामि। ननु ब्रह्मणा अतिदीर्घविघ्ना तपस्तप्त्वा तत्साधितं अन्यः कुतस्तत्साधयेत्। तत्राह। कालात्मनो रिति। यद्यप्यायुषोऽल्पत्वेन देहो वा
रंस्त्रियेत। तथापि कालस्यात्मनत्त्वाति त्यत्वात्। वस्तुतिर्जन्मति स्वपस्तप्त्वा तत्साधयिष्याम्येवेति॥ १०॥ वर्द्धमानेनेतियदुक्तं तस्य फलमाह। अन्यथेति। सुरासुरादिव्यत्ययेन। अथवा पूर्ववत्पु॰ण

तस्यायं किल संकल्पश्चरतोऽद्दश्चरं तपः। श्रूयतां किं न विदितस्तवाथापि निवेदितं॥ ८॥ सृष्ट्वा चराचरमिदं तपोयोगसमाधिना। अध्यास्ते सर्व
धिष्ण्येभ्यः परमेष्ठी निजासनं॥ ९॥ तदहं वर्द्धमानेन तपोयोगसमाधिना। कालात्मनोश्च नित्यत्वात्साधयिष्ये तथात्मनः॥ १०॥ अन्यथेदं विधास्येहम
यथापूर्वमोजसा। किमन्यैः कालनिर्धूतैः कल्पांते वैष्णवादिभिः॥ ११॥ इति शुश्रूम निर्बंधं तपः परममास्थितः॥ विधत्स्वानंतरं युक्तं स्वयं त्रिभुवनेश्वर।
॥ १२॥ तवासनं द्विजगवां पारमेष्ठ्यं जगत्पते। भवाय श्रेयसे भूत्यै क्षेमाय विजयाय च॥ १३॥ इति विज्ञापितो देवैर्भगवानात्मभूर्नृप। परीतो भृगुदक्षाद्यैर्ययौ
दैत्येश्वराश्रमं॥ १४॥ ॥

पापादिव्यत्ययेन। इदं जगद्विधास्यामि। वैष्णवादिभिः ध्रुवादिपदैः किं प्रयोजनं अच्युतपदमेव साधयिष्यामि॥ ११॥ इति श्रुत्वा पदापहरणोत्तस्यानिर्बंधं शुश्रुम। आस्थाय क्वापि सोत्तपः परममास्थितः। कृतं युक्तांत
त्र्यनंतरमेव विधत्स्व॥ १२॥ अन्यथा तव स्थानभ्रंशे सति साधूनामनिष्टं स्यादिति शोचंत आहुः। तव पारमेष्ठ्यमिदमासनं द्विजानां गवां च। भवायोद्भवाय श्रेयसे सुखाय भूत्यै ऐश्वर्याय क्षेमाय पालना
पालनाय विजयायोत्कर्षाय॥ १४॥ ॥ ॥

वल्मीकादिति:प्रतिछन्नं प्रथमं नददर्श पश्चात्कथं विद्धिलक्ष्यतं प्राहेतिद्वयोरन्वयः। आवीर्णा समंताद्व्याप्तिं मेदस्त्वक्मांसशोणितं चयस्य सा॥१५॥ अभ्रैरापिहितं छन्नं रश्मि
वविलक्ष्मा॥१६॥१७॥ हत्सारं धैर्यं दंशोमक्षिकाविशेषैर्भक्षितो देहो यस्य सा॥१८॥ निरंबुःनि[illegible]मंबु येन सः। त्यक्तोदक इत्यर्थः॥१९॥ तेजसानेन व्यवसायेन वृतावजितोऽहं तपो

नददर्श प्रतिछन्नं वल्मीकात्तृणकीचकैः। पिपीलिकाभिराकीर्णमेदस्त्वङ्मांसशोणितं॥१५॥ तपंतं तपमालोकाद्यथा भ्रापिहितं रविं। विलक्ष्मावि
स्मितःप्राह प्रहसन्नु हंसवाहनः॥१६॥ ॥ब्रह्मोवाच॥ ॥उत्तिष्ठोत्तिष्ठ तद्भद्रं ते तपःसिद्धोसि काश्यप। वरदोहं तु प्राप्तो वियताभीप्सितो वरः॥१७॥ अद्राक्ष
महमेतत्ते हृत्सारं महदद्भुतं। दंशभक्षितदेहस्य प्राणा ह्यस्थिषु शेरते॥१८॥ नैतत्पूर्वर्षयश्चक्रुर्नकरिष्यंति चापरे। निरंबुर्द्धारयेत्प्राणान्को वै दिव्य
समाः शतं॥१९॥ व्यवसायेन तेऽनेन दुष्करेण मनस्विनां। तपोनिष्ठेन भवता जितोऽहं दितिनंदन॥२०॥ ततस्त आशिषः सर्वा ददाम्यसुरपुंगव। मर्त्यस्य
तेऽमर्त्यस्य दर्शनं नाफलं मम॥२१॥ ॥नारद उवाच॥ ॥इत्युक्त्वादिभवो देवो भक्षितांगं पिपीलिकैः। कमंडलुजलेनौक्षद्दिव्येनामोघराधसा॥२२
सतत्कीचकवल्मीकात्सहउजोबलान्वितः। सर्वावयवसंपन्नो वज्रसंहननो युवा। उत्थितस्तप्तहेमाभो विभावसुरिवैधसः॥२३॥ स निरीक्ष्यांबरे देवं हंसवा
हि. १
हमवस्थितं। ननाम शिरसा भूमौ तद्दर्शन महोत्सवः॥२४॥ ॥

निष्ठेन भवता उत्सुतरां जितः॥२०॥ अमर्त्यस्य मद्दर्शनमफलं न रवति॥२१॥ आदेभवतीत्यादिर्देवः उक्षन् तप्तोक्षितवान्॥२२॥ वज्रवत्संहननं अंगदार्ढ्यं यस्य। तप्तस्य हेम्न
इव आभा यस्य सः॥२३॥ तस्य दर्शनमेव महानुत्सवो यस्य सः॥२४॥ ॥

हर्षेणाश्रूणि पुलकोद्गेदश्च यस्याः ॥२५॥ अंधेनेति निविडेन तत्र हेतुः कालसृष्टेन प्रकृतिगुणरूपेण ध्वांतेन तमसावृतमिदं जगत् यः अस्मिन्नव्यक्तं अतिव्यक्तमकरोत् ॥२६॥
यश्च त्रिगुणेनात्मना इदं सृजति लुंपति च तस्मै रजःसत्वतमसां धाम्ने आद्याय महते पराय परमेश्वराय नम इति द्वयेनान्वयः ॥२७॥ अत्र च स्वप्रकाशकत्वं जगत्प्रका-
शकत्वं तत्कारणत्वं सृष्ट्यादिकर्तृत्वं महत्वं परमेश्वरत्वं चेति षड्विधत्वमुक्तं। तदेव प्रपंचयन्नमस्करोति। नम इति चतुर्भिः। बीजाय कारणाय तत्र हेतुः। आद्याय ज्ञानं ज्ञप्तिः
विषयाकारं ज्ञानं मूर्तिर्यस्य तस्मै। अनेन स्वप्रकाशत्वं जगत्प्रकाशकत्वं च दर्शितं। बीजायेति निमित्तत्वमुक्तं। उपादानत्वमाह। प्राणादयो ये विकारास्तैरूपैर्व्यक्तिं का-

उत्थाय प्रांजलिः प्रह्व ईक्षमाणो दृशा विभुं। हर्षाश्रुपुलकोद्भेदो गिरागद्गदयागृणात् ॥२५॥ ॥हिरण्यकशिपुरुवाच॥ ॥कल्पांते काल-
सृष्टेन योंधेन तमसावृतं। अभिव्यनक् जगदिदं स्वयंज्योतिः स्वरोचिषा ॥२६॥ आत्मना त्रिवृता चेदं सृजत्यवति लुंपति। रजःसत्वतमोधाम्ने प-
राय महते नमः ॥२७॥ नम आद्याय बीजाय ज्ञानविज्ञानमूर्तये। प्राणेंद्रियमनोबुद्धिविकारैर्व्यक्तिमीयुषे ॥२८॥ त्वमीशिषे जगतस्तस्थुषश्च
प्राणेन मुख्येन पतिः प्रजानां। चित्तस्य चित्तेर्मनइंद्रियाणां पतिर्महान् भूतगुणाशयेशः ॥२९॥ ॥ ॥

र्यकारं ईयुषे प्राप्तवते ॥२८॥ एवमात्मना त्रिवृता चेत्यनेनोक्तं कारणत्वं द्वेधा दर्शितं। महत्त्वमीश्वरत्वं चाह। त्वमेव जगतो जंगमस्य तस्थुषः स्थावरस्य च ईशिषे नियं-
ता भवसि। केन मुख्येन प्राणेन सूत्रात्मरूपेण अतस्त्वं प्रजानां पतिः। तासां चित्तस्य चित्तेश्च तत्परिणामभूताया श्चेतनायाः मनसश्च तन्नियम्यानामिंद्रियाणां च पतिः
त्वमेव महान् भूतानामाकाशादीनां तद्गुणानां शब्दादिविषयाणां आशयानां तद्वासनानामीशः ईशापतेनैव स्रष्टृत्वं दर्शितं ॥२९॥ ॥ ॥

च

इदानींयज्ञप्रवर्त्तकत्वेनांतर्यामित्वेनंजगत्पालकत्वमाह। त्वमेवसमस्तंतत्त्वज्ञअग्निष्टोमादियज्ञानुविस्तारयसि। कथं। त्रय्यातत्त्वावेदत्रयरूपेण। कथंभूतया। चरा
रोहेतारोयत्रतत्त्वात्तुहैत्रिकंकर्मतद्विषययाविद्यया। आत्मवतांप्राणिनामात्मभूतस्त्वमेवांतरात्मावक्ष्यंतर्यामी। कुतःकविः सर्वज्ञंतत्रकुतः। एकःअखंडःतत्रहेतुः
अनादिःअनंतपारश्चेति। अनस्तियतःकालतःपारंचदेशतोयस्यसः। ३०॥ कालरूपेणसंहर्तृत्वमाहत्वमेवेति। लवाद्यैरवयवैःक्षिणोषिक्षपयसि। तदेवंसृष्ट्यादिकर्तृ
त्वेऽपिनिर्विकारत्वमेवाह। कूटस्थइति। तत्रहेतवःआत्माज्ञानरूपःपरमेष्ठीपरमेश्वरः अजःजन्मशून्यःमहान्अपरिछिन्नः। किंच। जीवलोकस्यैवकर्मवशाज्जन्मादि

त्वंसमस्तंतत्त्वितनोषितत्वात्रय्याचतहैत्रिकविद्ययाच। त्वमेकआत्मात्मवतामनादिरनंतपारःकविरंतरात्मा॥ ३०॥ त्वमेवकालोऽ
निमिषोजनानांमार्ग्लैर्लवाद्यैरवयवैःक्षिणोषि। कूटस्थआत्मापरमेष्ठ्यजोमहांस्त्वंजीवलोकस्यचजीवआत्मा॥ ३१॥ त्वत्तःपरंनापरमप्य
नेजदेजच्चकिंचिद्व्यतिरिक्तमस्ति। विद्याकलास्तेतनवश्चसर्वाहिरण्यगर्भोऽसिबृहत्त्रिपृष्ठः॥ ३२॥ ॥

तिर्विक्रियते। त्वंतुतस्यजीवःजीवनस्यहेतुः। यतस्तस्यआत्मानियंता। ३१॥ तत्रकुतस्तत्राहत्वत्तइति। त्वत्तोव्यतिरिक्तंयदिकिंचिद्भवेत्तर्हितस्मात्तवजन्मादिक्रिया
सोनियम्यत्वादिकंवाभवेत्। त्वत्तःपरंकारणंअपरंकार्यंतत्रचेजत्जंगमं। अनेजत्स्थावरंचव्यतिरिक्तंनास्ति। बोधकंशास्त्रंव्यतिरिक्तमस्तीतिचेत्। नयतःविद्यावेदोप
वेदादिविद्यास्थानानिकलाश्चतुःषष्टिंगानि। तवैवैतास्तनवःनव्यतिरिक्ताः। तत्कुतःयतःत्वंबृहत्ब्रह्मैवासि। तदपिकुतः। तत्राह। हिरण्यरूपंब्रह्मांडंगर्भेयस्यसः। त्रिपृष्ठः
त्रिगुणात्मकस्यप्रधानस्यपृष्ठेपरतः। अक्षरात्परतःपरइत्यादिश्रुतेः। ३२॥ ॥

जीमस्य १

ननु ब्रह्माण्डशरीरस्यैव मम कुतो ब्रह्मत्वं कुतो वा ब्रह्माण्डगर्भत्वादिति तत्राह। व्यक्तं कार्यमिदं तव शरीरं व्यक्तं स्थूलमिति वा येन शरीरेण त्वमिंद्रियप्राणमनसां गुणान् वि
षयान् भुंक्षे किंच। पारमेष्ठ्ये परमैश्वर्यधामनि स्वरूपे स्थित एव भुंक्षे। ननु स्वरूपतिरोधानेन। अत आह अव्यक्त आत्मा निरुपाधिर्ब्रह्मैव पुराणः पुरुषश्चेत्यर्थः॥३३॥ न
नु ब्रह्मत्वं पुराणपुरुषत्वं च कथमेकस्य तत्राह। हे अनंत त्वया अव्यक्तेन मनोवचनागोचरेण रूपेण इदं विश्वं ततं व्याप्तं। तस्मै तुभ्यं भगवते अचिंत्यैश्वर्याय नमः॥ भग

व्यक्तं विभो स्थूलमिदं शरीरं येनेंद्रियप्राणमनोगुणांस्त्वं। भुंक्षे स्थितो धामनि पारमेष्ठ्ये अव्यक्त आत्मा पुरुषः पुराणः॥३३॥ अनंताव्यक्त
रूपेण येनेदमखिलं ततं। चिदचिच्छक्तियुक्ताय तस्मै भगवते नमः॥३४॥ यदि दास्यस्यभिमतान् वरान्मे वरदोत्तम। भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्मा
भून्मम प्रभो॥३५॥ नांतर्बहिर्दिवा नक्तमन्यस्मादपि चायुधैः। न भूमौ नांबरे मृत्युर्न नरैर्न मृगैरपि॥३६॥ व्यसुभिर्वासुमद्भिर्वा सुरासुरम
होरगैः। अप्रतिद्वंद्वतां युद्धे ऐकपत्यं च देहिनां॥३७॥ सर्वेषां लोकपालानां महिमानं यथाऽत्मनः। तपोयोगप्रभावाणां यन्न रिष्यति कर्हि
चित्॥३८॥ ॥इति श्रीभागवते महापुराणे सप्तमस्कंधे तृतीयोध्यायः॥ ॥ ॥ ॥

वद्धेहेतुः। चिच्छक्तिर्विद्या अचिच्छक्तिर्माया ताभ्यां युक्तायेति॥३४॥ अन्यस्मात्त्वत्सृष्टव्यतिरिक्तादपि। आयुधैर्मा भूत्॥३६॥ व्यसुभिः अप्राणैः असुमद्भिः सप्राणैश्च
यथा आत्मनस्तव महिमा तथा। अप्रतिद्वंद्वताद्विकं देहीति शेषः॥३७॥ तपसा योगेन च प्रभावो येषां तेषां यत् अणिमाद्यैश्वर्यं न रिष्यति न नश्यति तन्मे देहीत्यर्थः॥३८॥
सप्तमे तृतीयः॥

चतुर्थे तु वरान्लब्ध्वा विजित्याखिललोकपान्। विष्णुद्वेषेण तान्सर्वान्दैत्येंद्रः समपीडयत्॥ शतं तर्हि तद्ब्रह्मा॥१॥ मम मत्तः पदपि यद्यपि मे दुर्लभाः॥२॥ अमोघोऽनुग्र
होयस्या॥३॥ यदर्थं तपस्तप्तं तदाह। एवमित्यादिना॥४॥६॥ सर्वेषां सत्त्वानां प्राणिजातानां येयेपतयस्तान्॥७॥ त्रिविष्टपं स्वर्गं त्रिभ्यः सत्त्वम् अधिष्ठितवान्॥ तत्राहे

६

॥नारद उवाच॥ ॥एवं वृतः शतधृतिर्हिरण्यकशिपोरथ। प्रादात्तत्तपसा प्रीतो वरांस्तस्य सुदुर्लभान्॥१॥ ॥ब्रह्मोवाच॥ ॥तातेमे दु
र्लभाः पुंसां यान्वृणीषे वरान्मम। तथापि वितराम्यंग वरान्यद्यपि दुर्लभान्॥२॥ ततो जगाम भगवानमोघानुग्रहो विभुः। पूजितोऽसुरवर्येण स्तूय
मानः प्रजेश्वरैः॥३॥ एवं लब्धवरो दैत्यो बिभ्रद्धेममयं वपुः। भगवत्यकरोद्द्वेषं भ्रातुर्वधमनुस्मरन्॥४॥ स विजित्य दिशः सर्वा लोकांश्च त्रीन्महासु
रः। देवासुरमनुष्येंद्रान्गंधर्वगरुडोरगान्॥५॥ सिद्धचारणविद्याध्रानृषीन्पितृपतीन्मनून्। यक्षरक्षःपिशाचेशान्प्रेतभूतपतीनथ॥६॥ सर्व
सत्त्वपतीन्जित्वा वशमानीय विश्वजित्। जहार लोकपालानां स्थानानि सह तेजसा॥७॥ देवोद्यानश्रिया जुष्टमध्यास्ते स्म त्रिविष्टपं। महेंद्रभव
नं साक्षान्निर्मितं विश्वकर्मणा। त्रैलोक्यलक्ष्म्यायतनमध्युवासाखिलर्द्धिमत्॥८॥ यत्र विद्रुमसोपाना महामारकता भुवः। यत्र स्फाटिककुड्यानि
वैदूर्यस्तंभपंक्तयः॥९॥ यत्र चित्रवितानानि पद्मरागासनानि च। पयःफेननिभाः शय्या मुक्तादामपरिच्छदाः॥१०॥ कूजद्भिर्नूपुरैर्देव्यः शब्दयंत्य इतस्ततः।

इंद्रभवनमध्युवास अधिवसति स्म॥८॥ अखिलसमृद्धियुक्तत्वमेवाह। यत्रेति त्रिभिः॥९॥ मुक्तादामानि परिच्छदाः परिकरा यासां॥१०॥ ॥ ॥

सा॰स॰
१४

सुदतीः सुदत्यः ॥११॥ ऊर्जितमधिकं चंडं तीव्रं शासनं यस्य ॥१२॥ अंग हे राजन् ॥ उरुगंधिना उरुगंधेन मधुना सुरया मत्तं ॥ अत एव विवृत्ते विघूर्णिते ताम्रे अक्षिणी यस्य तं ॥ अशेषधिष्ण्यपाः सर्वलोकपालाः उपायनयुक्तैः पाणिभिरुपासत ॥ त्रिभिर्ब्रह्मविष्णुरुद्रैर्विना ॥ एवंभूतमयम्भूतं (?) ॥१३॥ उपासनप्रकारमाह जगुरिति ॥१४॥ दा ॥ ततएत्यो नयः गंधर्वाः

रत्नस्थलीषु पश्यंति सुदतीः सुंदरं सुखं ॥११॥ तस्मिन्महेंद्रभवने महाबलो महामना निर्जितलोक एकराट् ॥ रेमेऽभिवंद्यांघ्रियुगः सुरादिभिः प्रतापितैरू र्जितचंडशासनः ॥१२॥ तमंग मत्तं मधुनोरुगंधिना विवृत्तताम्राक्षमशेषधिष्ण्यपाः ॥ उपासतोपायनपाणिभिर्विना त्रिभिस्तपोयोगबलौजसां पदं ॥१३॥ जगुर्महेंद्रासनमोजसा स्थितं विश्वावसुस्तुंबुरुरस्मदादयः ॥ गंधर्वसिद्धा ऋषयोऽस्तुवन्मुहुर्विद्याधराश्चाप्सरसश्च पांडव ॥१४॥ स एव वर्णाश्रमिभिः क्रतुभिर्भूरिदक्षिणैः ॥ इज्यमानो हविर्भागानग्रहीत्स्वेन तेजसा ॥१५॥ अकृष्टपच्या तस्यासीत्सप्तद्वीपवती मही ॥ तथा कामदुघा द्यौस्तु नानाश्चर्यपदं नभः ॥१६॥ रत्नाकराश्च रत्नौघांस्तत्पत्न्यश्चोहुरूर्मिभिः ॥ क्षारसीधुघृतक्षौद्रदधिक्षीरामृतोदकाः ॥१७॥ शैला द्रोणीभिराक्रीडं सर्वर्तुषु गुणान्द्रुमाः ॥ दधार लोकपालानामेक एव पृथग्गुणान् ॥१८॥ ॥ ॥

वहंति स्म ॥ रत्नाकरानेवाह ॥ क्षारेति ॥१७॥ आक्रीडं क्रीडास्थानं गुणान् पुष्पफलादीन् च लोकपालानां पृथग्विधान् गुणान् वर्षणदहनशोषणादीन् एक एव बभार ॥१८॥

राम
१४

निर्जिताः ककुभो येन यथोपयोगं यथाप्रीति ॥१९॥ ३ ॥ अरूपा वक्ष्म रहिता ॥२४॥ मम दर्शनं श्रवणं सर्वेषां श्रेयसां उपपत्तये ॥२५॥ ७ ॥ ननु देवादिविद्वेषेप्य स्पर्धिता...

मद

स इन्द्रं निर्जितककुबेकराड्विषयान्प्रियान् । यथोपजोषं भुंजानो नान्वपद्यदजितेंद्रियः ॥१९॥ एवमैश्वर्यमत्तस्य दृप्तस्योच्छास्त्रवर्तिनः । कालो महान् ब
व्यतीयाय ब्रह्मशापमुपेयुषः ॥२०॥ तस्योग्रदंडसंविग्नाः सर्वे लोकाः सपालकाः । अन्यत्रालब्धशरणाः शरणं ययुरच्युतं ॥२१॥ तस्यै नमोस्तु काष्ठायै
यत्रात्मा हरिरीश्वरः । यद्गत्वा न निवर्तंते शांताः सन्यासिनोमलाः ॥२२॥ इति ते संयतात्मानः समाहितधियोमलाः । उपतस्थुर्हृषीकेशं विनिद्रा वायुभो-
जनाः ॥२३॥ तेषामाविरभूद्वाणी अरूपा मेघनिस्वना । संनादयंती ककुभः साधूनामभयंकरी ॥२४॥ मा भैष्ट विबुधश्रेष्ठाः सर्वेषां भद्रमस्तु वः । मद्द-
र्शनं हि भूतानां सर्वश्रेयोपपत्तये ॥२५॥ ज्ञातमेतस्य दौरात्म्यं दैतेयापसदस्य यत् । तस्य शांतिं करिष्यामि कालं तावत्प्रतीक्षत ॥२६॥ यदा देवेषु वेदे-
षु गोषु विप्रेषु साधुषु । धर्मे मयि च विद्वेषः स वा आशु विनश्यति ॥२७॥ निर्वैराय प्रशांताय स्वसुताय महात्मने । प्रह्लादाय यदा द्रुह्येत्तदा हनिष्ये-
पि वरोर्जितं ॥२८॥ ॥ नारद उवाच ॥ ॥ इत्युक्ता लोकगुरुणा तं प्रणम्य दिवौकसः । न्यवर्तंत गतोद्वेगा मेनिरे चासुरं हतं ॥२९॥ ॥ ॥ ॥

नास्ति ब्रह्मवरेणोर्जितत्वात्तत्राह । निर्वैरायेति । सर्वमहं सहे न तु सह्रादद्रोहमिति भावः ॥२८॥ असुरं हतं मेनिरे तदानीं तद्द्वेषस्य प्रवृत्तत्वादिति भावः ॥२९॥ ॥ ॥

ला०स०

१५

तमेवंदेवर्षिर्वक्तुमारब्धोसुतस्यमहत्त्वमाह।तस्येत्यादिना।गुणैर्महानद्भुत।गुणानेवाह।महदुपासकइत्यादिना॥३०॥सत्यासंधाप्रतिज्ञायस्य।एकएवप्रियश्चसुहृत्तमश्च।॥३१॥सम्यक्कृततान्श्चार्याणामंघ्रयोयेन।ईश्वरइतिभावनायस्य॥३२॥व्यसनेषुनोद्विग्नचित्तः।गुणेषुविषयेषुनिस्पृहः।यतस्तेषुअवस्तुदृक्।दांताइंद्रियादयोयस्य।रहितश्चासुरोभावोमत्सरादिर्यस्यसः।असुरोपिसन्॥३३॥अद्भुतापितेगुणानपिधीयंतेतिरोहितानभवंति॥३४॥साधुगाथासदसिसाधुकथाप्रसंगवत्यांसभायांप्रतिमानं

तस्यदैत्यपतेःपुत्राश्चत्वारःपरमाद्भुताः।प्रह्रादोभून्महांस्तेषांगुणैर्महदुपासकः॥३०॥ब्रह्मण्यःशीलसंपन्नःसत्यसंधोजितेंद्रियः।आत्मवत्सर्वभूतानामेकःप्रियसुहृत्तमः॥३१॥दासवत्सन्नतार्यांघ्रिःपितृवद्दीनवत्सलः।भ्रातृवत्सदृशेस्निग्धोगुरुष्वीश्वरभावनः।विद्यार्थरूपजन्माढ्योमानस्तंभविवर्जितः।नोद्विग्नचित्तोव्यसनेषुनिस्पृहःश्रुतेषुदृष्टेषुगुणेष्ववस्तुदृक्।दांतेंद्रियप्राणशरीरधीःसदाप्रशांतकामोरहितासुरोसुरः॥३३॥यस्मिन्महद्गुणाराजन्गृह्यंतेकविभिर्मुहुः।नतेषुनापिधीयंतेयथाभगवतीश्वरे॥३४॥यंसाधुगाथासदसिरिपवोपिसुरानृप।प्रतिमानंप्रकुर्वंतिकिमुतान्येभवादृशाः॥३५॥गुणैरलमसंख्येयैर्माहात्म्यंतस्यसूच्यते।वासुदेवेभगवतियस्यनैसर्गिकीरतिः॥३६॥न्यस्तक्रीडनकोबालोजडवत्तन्मनस्तया।कृष्णग्रहगृहीतात्मानवेदजगदीदृशं॥३७॥आसीनःपर्यटन्नश्नन्शयानःप्रपिबन्ब्रुवन्।नानुसंधत्तएतानिगोविंदपरिरंभितः॥३८॥

न

दृष्टांतः॥३५॥सूच्यतेमयाकेवलंयोग्यतेषुकथ्यतइतिवा॥३६॥नैसर्गिकीरतेर्लिंगान्याह।न्यस्तक्रीडनकइतिषड्भिः।तन्मनस्तयातदेकचित्ततयेन॥३७॥एतानि आसनादीनिगोविंदेनपरिरंभितःआत्मनाएकीकृतः॥ ॥३८॥ ॥ श्रीराम॥ ॥ ॥ ॥

१५

रुदति रौति वैकुंठस्य चिंतया शबलो मिश्र आक्रांतं चेतनायस्य तस्य चिंतया आह्लादो यस्य ॥३९॥ उत्कंठः मुक्तकंठः सन् । अनुचकार तच्चेष्टादिकं ग्रहणं कृतवान् ॥४०॥ संस्पर्शस्तद्भावापत्तिः तेन निर्वृतः । अस्पंदः स्थिरो यः आनंदः तेन यत्सलिलं तेन युक्ते आमीलिते ईषन्निमीलिते ईक्षणे यस्य ॥४१॥ आत्मनः परां निर्वृतिं तन्वन् दुःसं-

क्वचिद्रुदति वैकुंठचिंताशबलचेतनः । क्वचिद्धसति तच्चिंताह्लाद उद्गायति क्वचित् ॥३९॥ नदति क्वचिदुत्कंठो विलज्जो नृत्यति क्वचित् । क्वचित्तद्भावनायुक्तस्तन्मयोऽनुचकार ह ॥४०॥ क्वचिदुत्पुलकस्तूष्णीमास्ते संस्पर्शनिर्वृतः । अस्पंदप्रणयानंदसलिलामीलितेक्षणः ॥४१॥ स उत्तमश्लोकपदारविंदयोर्निषेवयाऽकिंचनसंगलब्धया । तन्वन्परां निर्वृतिमात्मनो मुहुर्दुःसंगदीनस्य मनः शमं व्यधात् ॥४२॥ तस्मिन्महाभागवते महाभागे महात्मनि । हिरण्यकशिपू राजन्नकरोदघमात्मजे ॥४३॥ ॥युधिष्ठिर उवाच॥ ॥देवर्ष एतदिच्छामो वेदितुं तव सुव्रत । यदात्मजाय शुद्धाय पितादात्साधवे ह्यघं ॥४४॥ पुत्रान्विप्रतिकूलान्स्वान्पितरः पुत्रवत्सलाः । उपालभंते शिक्षार्थं नैवाघमपरो यथा ॥४५॥ ॥

गेन दीनस्यान्यस्यापि मनःशमं शांतं व्यधात् ॥४२॥ अघं द्रोहमकरोत् ॥४३॥ प्रथमाध्याये तेष्टमेवार्थमतिविस्मयेन पुनः पृच्छति देवर्ष इति तव वचनं तत्र वा-
क्यमिति वा । साधवे अघमदात् साधोर्द्रोहं कृतवानिति यत् । यत् हे देवर्षे इदं ॥४४॥ उपालभंते आक्षिपंति । अघं तु नैव कुर्वंति । अपरः शत्रुरिव ॥४५॥ ॥ ॥

श्रुत्वशात्। अनुकूलान्साधूनुपपातरोषान्गुरुः पितेव देवता येषां तानुद्दिश्य पाद्यं न कुर्वतीति किमु वक्तव्यमित्यर्थः। पुत्राय पुत्रमुद्दिश्य पितुर्द्वेषः पुत्रात्कृतो द्वेषः पुत्रस्य म
रणार्थं प्रयोजितः प्रवर्त्तित इति यत्। तत्कौतूहलं विधमसुपाकुरु। यद्वा। यद्यस्मात्पुत्राय यो द्वेषः स पितुर्मरणाय प्रयोजितः अत एतत्कौतूहलं विधमेत्यर्थः॥४६॥ स समन्वि
तुर्थः॥ ॥पंचमे गुरुतोधीतं त्यक्त्वा विष्णुभक्तौ रतं। घातयन्द्विपसर्पाद्यैः सुतं दैत्यो न चाशकत। भगवद्भक्तिरेव विद्वेषकारणमिति वक्तुमाह। पौरोहित्यायेत्यादिना। काव्यः शु

किमुतानुवशान्साधूंस्त्वादृशान्गुरुदेवतान्। एतत्कौतूहलं ब्रह्मन्नस्माकं विधम प्रभो। पितुः पुत्राय यद्द्वेषो मरणाय प्रयोजितः॥४६॥ ॥इ
ति श्रीभागवते महापुराणे सप्तमस्कंधे चतुर्थोध्यायः॥ ॥नारद उवाच॥ ॥पौरोहित्याय भगवान्वृतः काव्यः किलासुरैः। शंडामर्कौ सुतौ
तस्य दैत्यराजगृहांतिके॥१॥ तौ राज्ञा प्रापितं बालं प्रह्लादं नयकोविदं। पाठयामासतुः पाठ्यानन्यांश्चासुरबालकान्॥२॥ यत्तत्र गुरुणा प्रोक्तं
शुश्रुवेनुपपाठ च। न साधु मनसा मेने स्वपरासद्ग्रहाश्रयं॥३॥ एकदासुरराट् पुत्रमंकमारोप्य पांडव। पप्रच्छ कथ्यतां वत्स मन्यते साधु यद्भवान्॥४॥
॥प्रह्लाद उवाच॥ ॥तत्साधु मन्येऽसुरवर्य देहिनां सदा समुद्विग्नधियामसद्ग्रहात्। हित्वात्मपातं गृहमंधकूपं वनं गतो यद्धरिमाश्रयेत॥५॥ ॥

क्रः अतस्तस्य सुतौ तत्रन्यवसतामिति शेषः॥१॥ पाठ्यान्दंडनीत्यादीनुपाठ्यानसुरबालकानिति वाक्यशेषः॥२॥ अनुश्रवणानंतरं तथैव पपाठ च। किंतु तत्साधु न मेने तत्र
हेतुः स्वः पर इत्यसद्ग्रहो मिथ्याभिनिवेश एवाश्रयो यस्य तत्॥३॥४॥ हे असुरवर्य असद्ग्रहात् अहं ममेति मिथ्याभिनिवेशाद्धेतोः समुद्विग्नधियां। धीर्येषां वनं गतः सन्
हरिमाश्रयेतेति यत्तदेवाहं साधु मन्ये। कथंभूतं गृहं हित्वा। आत्मनः पातं अधःपातनिमित्तं। कुतः। अंधकूपवन्मोहावहं॥५॥ ॥ ॥ ॥ ॥

परपक्षे विपक्षे समाहिताः परिनिष्ठिताः हा स्मेव हा बुद्धिरिति । विष्णुपक्षैर्भगवत्तैर्हेतुभूतैः । ननु त्वं कुत एषां प्रवेशः सत्यं तथापि प्रतिच्छन्नैर्वेषांतरेणाच्छन्नैः इत्यादि ... तां बालान स्ववति । अति अतिक्रम्य तु स्थं तव ॥८॥१०॥ अहो मायामोहिता भवंतो मामाक्षिपंतीत्याशयेन तावदाह । परः स्वश्चेति । मिथ्याभिनिवेशो यदीयया मायया वक्ताः । ननु वा

नारद उवाच ॥ ॥श्रुत्वा पुत्रगिरो दैत्यः परपक्षसमाहिताः । जहास बुद्धिर्बालानां भिद्यते परबुद्धिभिः ॥७॥ सम्यग्विधार्यतां बालो गुरुगेहे द्विजातिभिः ॥ विष्णुपक्षैः प्रतिच्छन्नैर्न भिद्येतास्य धीर्यथा ॥८॥ गृहमानीतमाहूय प्रह्लादं दैत्ययाजकाः ॥ प्रशस्य श्लक्ष्णया वाचा समपृच्छंत सामभिः ॥९॥ वत्स प्रह्लाद भद्रं ते सत्यं कथय मा मृषा । बालानति कुतस्तुभ्यमेष बुद्धिविपर्ययः ॥ ॥ बुद्धिभेदः परकृत उताहो ते स्वतोऽभवत् । भण्यतां श्रोतुकामानां गुरूणां कुलनंदन ॥१०॥ ॥प्रह्लाद उवाच ॥ ॥परः स्वश्चेत्यसद्ग्राहः पुंसां यन्मायया कृतः । विमोहितधियां दृष्टस्तस्मै भगवते नमः । स यदानुव्रतः पुं- सां पशुबुद्धिर्विभिद्यते । अन्य एष तथान्योऽहमिति भेदगतासती ॥११॥ ॥ ॥

त्रा स

स्वः । अत एव तया विमोहितबुद्धीनां भवतामेव दृष्टः न तु मम तस्मै अचिंत्यमायेश्वराय नमः ॥११॥ अहो किमेतत् प्रलपसि तव बुद्धिभेदो यतो जातस्तत् कथयेत्यादिष्टः सन् तत्प्रसादा- देवेत्युत्तरमाह । स इति त्रिभिः । स भगवान् यदा अनुव्रतः अनुकूलो भवति तदा पशूनामिव बुद्धिर्भेदगता असती मिथ्याविषया तिष्ठते अतिशयात्मानिष्ठा भवति ॥ ॥१२॥ ॥ ॥

१७

मेदस्यामत्वंदर्शयेत्त्राह।सएषपरमात्मैवच्छः परइतिच।अविवेकिभिर्निरूप्यते।युक्तंचैतत।यतःयस्यवर्त्मनिजिज्ञासायांब्रह्मादयोपिमुह्यंति।तत्रहेतुःदुरत्ययंदुर्घटमनुक्रमणांअनुचरितमनुवर्णनंवायस्यसः॥१३॥ननुनिर्विकारस्यकथंमतिसेदकत्वंतत्राह।यथाअयोलोहंआकर्षग्रावस्वकांतस्यसमीपेस्वयमेवभ्रमति।चेतसश्चकृपाणेःसंनिधिरेवकुतोजातमत्त्राह।यदृच्छयेतिकस्यतपोदानादेःफलमेतदितिनज्ञायतइत्यर्थः॥१४॥राजसेवकरत्वा चेतिशेषः।वेत्रंकशायेउपायानांमध्येचतुर्थः

सएषआत्मास्वपरेत्यबुद्धिभिर्दुरत्ययानुक्रमणोनिरूप्यते।मुह्यंतियद्वर्त्मनिवेदवादिनोब्रह्मादयोह्येषभिनत्तिमेमतिं॥१३॥यथाभ्राम्यत्ययोब्रह्मन्स्वयमाकर्षसन्निधौ।तथामेभिद्यतेचेतश्चक्रपाणेर्यदृच्छया॥१४॥एतावदुक्त्वाब्राह्मणायोत्काविरराममहामतिः।तंनिर्भर्त्स्यकुपितःसदीनोराजसेवकः॥१५॥आनीयतामरेवेत्रमस्माकमयशस्करः।कुलांगारस्यदुर्बुद्धेश्चतुर्थोस्योदितोदमः॥१६॥दैतेयचंदनवनेजातोयंकंटकद्रुमः।यन्मूलोन्मूलपरशोर्विष्णोर्नालायितोर्भकः॥१७॥ ॥ ॥

दमोदंडःअस्यदुर्बुद्धेः।उदितःउक्तःशास्त्रेषुदुर्बुद्धित्वेहेतुः।कुलस्यांगारवन्नाशहेतोः॥१६॥ततकुतःतत्राह।दैतेयाएवचंदनद्रुमाःतेषांवनेअयंकंटकद्रुमस्तुल्योजातः।तदेवाह।यस्यदैत्यस्यवनस्यमूलोन्मूलनेपरशुस्थानीयस्यविष्णोरयमर्भकएवनालायितःनालमिवाचरत्।यथापरशोःछेदकत्वेवंशादिविशिष्टंदंडःसहकारी।तंविनाछेदनासंभवात्।तथायंविष्णोर्दैत्यमूलछेदेहेतुर्जातइत्यर्थः॥१७॥ ॥ ॥

१ भिन्नुद्दुः

इति तं प्रह्लादं लीघ्र यत्नुधमर्थिकामवर्गस्य प्रतिपादकं शास्त्रमध्यापयामास॥१८॥ज्ञातं ज्ञेयमुपायचतुष्टयं येन तं ज्ञात्वा दैत्येंद्रं प्रतिमात्राम्रष्टं ठहर्ष्यस्थापितं॥१९॥शापादसेवनं
परिचर्या।अर्चनं पूजा।दास्यं कर्मार्पणं।सख्यं तद्विश्वासादि।आत्मनिवेदनं देहसमर्पणं।यथा विक्रीतस्य गवाश्वादेर्भरणपालनादिचिंता न क्रियते तथा देहं तस्मै समर्प्य त-

इति तं विविधोपायैर्भीषयंस्तर्जनादिभिः।प्रह्लादं ग्राहयामास त्रिवर्गस्योपपादनं॥१८॥तत एनं गुरुर्ज्ञात्वा ज्ञातज्ञेयचतुष्टयं।दैत्येंद्रं दर्शयामास मातृमृष्ट-
मलंकृतं॥१९॥पादयोः पतितं बालं प्रतिनंद्याशिषासुरः।परिष्वज्य चिरं दोर्भ्यां परमामाप निर्वृतिं॥२०॥आरोप्यांकमवघ्राय मूर्द्धन्यश्रुकलांबुभिः।आसिं-
चन्विकसद्वक्त्रमिदमाह युधिष्ठिर॥२१॥ ॥हिरण्यकशिपुरुवाच॥ ॥प्रह्लादानूच्यतां तात स्वधीतं किंचिदुत्तमं।कालेनैतावतायुष्मन्यदशिक्षद्गुरो-
र्भवान्॥२२॥ ॥प्रह्लाद उवाच॥ ॥श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनं।अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनं॥२३॥इति पुंसार्पिता विष्णौ भक्तिश्चे-
व न्नवलक्षणा।क्रियते भगवत्यद्धा तन्मन्येधीतमुत्तमं॥२४॥निशम्यैतत्सुतवचो हिरण्यकशिपुस्तदा।गुरुपुत्रमुवाचेदं रुषा प्रस्फुरिताधरः॥२५॥ब्रह्मबंधो
किमेतत्ते विपक्षं श्रयतासता।असारं ग्राहितो बालो मामनादृत्य दुर्मते॥२६॥ ॥ ॥

च्चिंतावर्जनमित्यर्थः॥२३॥इति नवलक्षणानि यस्याः सा।अद्धा तेन चेद्भगवति विष्णौ भक्तिः क्रियेत सा च अर्पितैव सती।यदि क्रियेत न तु कृता सती पश्चादर्प्यते तदुत्तमम-
धीतं शिक्षितं वा तथाविधं किंचिदस्तीति भावः॥२४॥ श्रीराम॥ ॥ श्री॥ ॥ ॥

मित्रत्वेन वर्तमानस्यापि तव विरोधाचरणं नासंभावितमित्याह। संतिहीति। दुष्टमैत्रं मित्रत्वं येषां तरोगा इति। ब्रह्महा क्षयरोगी स्यात् सुरापः श्यावदंतिकः स्वर्णहारी तु
कुनखी दुश्चर्मा गुरुतल्पगः इत्यादिस्मृत्युक्तं। पातकिनां रोगा यथा दोरेति। तथा तेषां मध्ये विद्वेषादिकमुदेतीत्यर्थः॥२७॥ मत्प्राणीतं मया प्राप्तं। नो स्म स्यं ज्ञातं कुत्सितं
दोषं मा स्म भूदाः अज्ञातमज्ञार्थः। मयि दोषारोपं मा कृथा इत्यर्थः। इंद्रशत्रो इति न हि ब्राह्मणोक्तं तव कोपं उचितं इति भावः॥२८॥ गुरुमुखी गुरुवाक्यं जानितां हि भद्र॥२९

संति ह्यसाधवो लोके दुर्मैत्राः छद्मवेषिणः। अथ तेषां तु दैत्य घं काले रोगाः पातकिनामिव॥२७॥ ॥पुत्र उवाच॥ ॥न मत्प्रणीतं न परप्रणीतं सुतो वदत्येष तवेंद्रशत्रो। नैसर्गिकीयं मतिरस्य राजन्नियच्छ मन्युं कदराः स्म मा नः॥२८॥ ॥नारद उवाच॥ ॥गुरुणैवं प्रतिप्रोक्तो भूय आहासुरः सुतं। न चेद्गुरुमुखीयं ते कुतोऽभद्रासती मतिः॥२९॥ ॥प्रह्लाद उवाच॥ ॥मतिर्न कृष्णे परतः स्वतो वा मिथोऽभिपद्येत गृहव्रतानां। अदांतगोभिर्विशतां तमिस्रं पुनःपुनश्चर्वितचर्वणानां॥३०॥ ॥ ॥

आज्ञामियं वार्ता। भवादृशानां विषयासक्तानामज्ञानधिकारादित्याशयेनाह मतिरिति। परतः गुरोः स्वतो वा मिथो वा अन्योन्यतः नाभिपद्येत न संपद्येत केषां गृहव्र
तं संकल्प इति कृत्य चिंता येषां। अत एव अदांतैर्गोभिरिंद्रियैर्हेतुभूतैः तमिस्रं संसारं विशतां। तत्र चर्वितस्यैव चर्वणं येषां॥३०॥ ॥ ॥

ननुश्रीकृष्णस्यपरमानंदरूपत्वात्तेऽपितन्निष्ठाएवकिंनस्युःतदज्ञानादित्याह।नेति।येदुराशयाःविषयवासितांतःकरणाः।तेहिविष्णुंनविदुः।तत्रहेतुःस्वस्मिन्नेवार्थि
पुरुषार्थोयेषांतेषांगतिंगम्यं।ननुतेपिगुरूपदेशाद्विष्णुंज्ञास्यंति।वहिर्विषयेष्वर्थोयेषांतेवहिरर्थास्तान्नेवगुरुत्वेनमंतुंशीलंयेषांते।अतःअंधैरुपनीयमानाअं
धायथापंथानंनविदुःकिंतुगर्त्तेपतंति।तथातेपिईशस्यतंत्यांदीर्घरज्ज्वांवेदलक्षणायां।उरुणिदाम्निब्राह्मणादिनामाभिनियम्यांतस्यांकाम्यैःकर्मभिर्वद्धाएवभ
वंतीत्यर्थः।तदुक्तंविषयाविष्टचित्तानांविष्ण्वावेशःसुदूरतः।वारुणीदिग्गतंवस्तुव्रजन्नैंद्रींकिमाप्नुयात्इति॥३१॥ननुचएकोदेवःसर्वभूतेषुगूढःसर्वव्यापीसर्वभूतां

नतेविदुःस्वार्थगतिंहिविष्णुंदुराशयायेवहिरर्थमानिनः।अंधायथांधैरुपनीयमानास्तेपीशतंत्यामुरुदाम्निवद्धाः॥३१॥
नैषांमतिस्तावदुरुक्रमांघ्रिंस्पृशत्यनर्थापगमोयदर्थः।महीयसांपादरजोभिषेकंनिष्किंचनानांनवृणीतयावत्॥३२॥इ
त्युक्त्वोपरतंपुत्रंहिरण्यकशिपूरुषा।अंधीकृतात्मास्वोत्संगान्निरस्यतमहीतले॥३३॥ ॥

तरात्मेत्यादिश्रुतिप्रतिपादितंविष्णुंकथंनविदुःकुतोवातेषांतत्प्रवेशस्तत्राह।नैषामिति।निष्किंचनानांनिरस्तविषयाभिमानानांमहत्तमानांपादरजसाअभिषे
कंयावन्नवृणीततावतश्रुतिवाक्यतोजातापिएषांमतिरुरुक्रमस्यांघ्रिंनस्पृशति।नप्राप्नोति।असंभावनादिप्रतिविहन्यतइत्यर्थः।अनर्थस्यसंसारस्यापगमोयदर्थःय
स्यअंघ्रिस्पर्शिन्याःमतेरर्थःप्रयोजनं।महदनुग्रहाभावान्नतत्वनिश्चयोनापीहमोक्षस्तेषामित्यर्थः॥३२॥निरस्यतनिरास्यत्तविक्षेप॥३३॥ ॥ ॥

रा०स०
१९

अमर्षो महत्तं तेन सहितया रुषा आविष्टो व्याप्तः । कषायी सूते आताम्रलोचनेयस्याहे तेनैर्गता आज्ञसाः ॥३४॥ वध्यत्वे हेतुः यतोयं भ्रातृहा कुतो यो विष्णोः पादावधी
तित त्पन्नपाती त्यर्थः । अतः सएवायमित्यन्वयः ॥३५॥ अहो विष्णुरप्यविश्वसनीयं किमिति स्वीकृतवानित्याह । विष्णोर्वेति भ्रहा तज्जहो ॥३६॥ नन्वेतवायमपत्यं चक
थं वध्यस्तत्राह । परोप्यौषधमिव हितकृत्वे तत्तादपत्यमेव ज्ञेयं । सुतः स्वदेहजोपि अहितश्चेत । आमयवत् । आमांममता स्यदस्यकथा । अंगामपियत्स्वरणादितदप्यात्मनो

आहामर्षरुषाविष्टः कषायी तूतलोचनः । वध्यतामामुखयं वध्यो निःसारयत नैर्गताः ॥३४॥ अयं मे भ्रातृहा मोयं हित्वास्वानसुहृदो ऽधमः । पितृव्य
हं तुर्यः पादो विष्णोर्दासवदर्चति ॥३५॥ विष्णोर्वासाधुसौ किं तु करिष्यत्यसमंजसः । मो हृदंडस्यजं पित्रोर हाघः पंचहायनः ॥३६॥ परोप्यपत्यं हि
तकृद्यथौषधं स्वदेहजोप्यामयवत्सुतो ऽहितः । छिंद्यात्तदंगं यदुतात्मनो ऽहितं शेषं सुखं जीवति यद्विवर्जनात् ॥३७॥ सर्वैरुपायैर्हंतव्यः संभोजशय
नासनैः । सुहृल्लिंगधरः शत्रुर्मुनेर्दुष्टमिवेंद्रियं ॥३८॥ नैर्गतास्ते समादिष्टा भर्त्रा विशूलपाणयः । तिग्मदंष्ट्रकरालास्यास्ताम्रश्मश्रुशिरोरुहाः ॥ ॥
॥३९॥ नदंतो भैरवान्नादांश्छिंधि भिंधीति वादिनः । आसीनं चाहनन् शूलैः प्रह्लादं सर्वमर्मसु ॥४०॥ ॥ ॥

हितं चित छिंद्यादेवेत्यर्थः ॥३७॥ अतः सर्वैरुपायैर्हंतव्यः । संभोजो भोजनं । भोजनादिषु विषादिप्रयोगैरित्यर्थः । यथा दुष्टमिंद्रियं मुनेः शत्रुः ॥३८॥ तिग्मा तीक्ष्णा
दंष्ट्रा येषां करालान्यास्यानि येषां ते च ते च । ताम्राणि श्मश्रूणि शिरोरुहाश्च येषां ॥३९॥ ४०॥ ॥

राम
१९

परेऽश्वरेयुक्तः समाहित आत्मा मनो यस्य तस्मिन् तेषां प्रहाराः निःफला जाताः तत्र हेतवः ब्रह्मणि निर्विकारे अनिर्देश्ये अविषये भगवति निरतिशयैश्वर्ये अ
खिलात्मनि शक्रादीनामपि नियंतरि । एवंभूते परे अब्रह्मण्यस्य निर्देवस्य सत्क्रियया महोद्यमा इव ॥ ४१ ॥ १ ॥ अभिचाराः कृत्यादयः । अवपातनानि गिरिशृंगादेः
प्रापितानि तैः । अवटादिषु संनिरोधैश्च ॥ ४३ ॥ पर्वताक्रमणैः पर्वतानां तदुपरिक्षेपैः । बह्वसाधूक्त इत्यत्र चाराद्याहृतिं दर्शयति । ततः हननं कर्तुं नाभ्युपपद्य ततः पापता

परेब्रह्मण्यनिर्देश्ये भगवत्यखिलात्मनि । युक्तात्मन्यफला आसन्सर्वएवसत्क्रियाः ॥ ४१ ॥ प्रयासेऽपहते तस्मिन्दैत्येंद्रः परिशंकितः । च
कार तद्वधोपायान्निर्बंधेन युधिष्ठिर ॥ ४२ ॥ दिग्गजैर्दंदशूकेंद्रैरभिचारावपातनैः । मायाभिः संनिरोधैश्च गरदानैरभोजनैः ॥ ४३ ॥ हिमवाय्वग्नि
सलिलैः पर्वताक्रमणैरपि । न शशाक यदा हंतुमपापमसुरः सुतं । चिंतां दीर्घतमां प्राप्तस्तत्कर्तुं नाभ्यपद्यत ॥ ४४ ॥ एष मे बह्वसाधूक्तो वधोपायाश्च
निर्मिताः । तैस्तैर्द्रोहैरसद्धर्मैर्मुक्तः स्वेनैव तेजसा ॥ ४५ ॥ वर्तमानोऽविदूरे वै बालोऽप्यजडधीरयं । न विस्मरति मेऽनार्यं शुनःशेफ इव प्रभुः ॥ ४६ ॥ ॥

शक्तो दित्यर्थः ॥ ४४ ॥ चिंतामेवाह । एष इति त्रिभिः । मे मया असाधु परुषं यथा भवति तथोक्तः । असद्धर्मैरपकारैः अतिचारैर्वा ॥ ४५ ॥ अविदूरे वर्तमानोऽपि बा
लोऽप्ययं अजडधीः निर्भयचित्तः मे अनार्यमन्यायं शङ्कुं वा न विस्मरति । अजीगर्तस्य मध्यमपुत्रः शुनःशेफो नाम पित्रा हरिश्चंद्राय विक्रीतः स यथा तयोर
पकारमविस्मरंस्तद्विपक्षं विश्वामित्रमाश्रित्य गोत्रांतरमापन्नस्तद्वत् । यद्वा स्वभावापरित्यागे दृष्टांतः । शुनःशेफः पुच्छमिवेति ॥ ४६ ॥ ॥ ॥

ता०स०
२०

अप्रमेयः अपरिमेयोनुभावो यस्य अकृतश्छिद्रं यं यस्य तत्वालविता। अन्यथा मृत्युर्नैव संभविष्यतीत्यर्थः॥४७॥ औशनसौ उशनसः पुत्रौ नीतिज्ञौ विविक्तेय
कांते॥४८॥ भ्रुवोर्विजृंभणेनैव तं त्रयात्माधिष्ण्यपायमिच। तस्य चिंत्यं तव वत्तमहेन पश्यामः। पद्मालं वनं नैवाग्नि। यद्वा। शिशूनां इन्द्रं गुणदोषयोः पदं विषयो न भ
वतीत्यर्थः॥४९॥ तथापि त्वं बंधनमस्यो वितमित्याहतुः इमं इति। यावद्गुरुरागमिष्यति तावद्बद्ध्वा निधेहि। ततः किमत आहतुः बुद्धिश्च समीचीनावयसाभव

अप्रमेयानुभावोयमकृतश्छिद्रयोऽमरः। नूनमेतद्विरोधेन मृत्युर्वललिविता नवा॥४७॥ इति तं चिंतया किंचित्क्लान्तश्रियमधोमुखं॥ शंडामर्कौ
वोशनसोविविक्तइतिहोचतुः॥४८॥ जितं त्वयैकेन जगत्त्रयं भ्रुवोर्विजृंभितेन मन्त्रेसमस्तधिष्ण्यं। न तस्य चिंत्यं तव नाथ वन्महे न वैशिशूनां गुणदो
षयोःपदं॥४९॥ इमं तु पाशैर्वरुणस्य बध्वा निधेहि भीतो न पलायते यथा। बुद्धिश्च बृंसो वयसार्यसेवया यावद्गुरुर्भार्गव आगमिष्यति॥५०॥
तथेति गुरुपुत्रोक्तमनुज्ञायेदमब्रवीत्। धर्मश्चिकिस्योपदेष्टव्यो राज्ञां ये गृहमेधिनां॥ धर्ममर्थं च कामं च नितरां वानुपूर्वशः॥५१॥ प्रह्लादायोचतूरा
जन्नग्रश्रयावनताय चायथा त्रिवर्गं गुरुस्तिरात्मनेऽउपशिक्षितं। न साधु मेने तच्छिक्षां द्वंद्वारामोपवर्णितां॥५२॥ ॥ ॥

तीति॥५०॥ अनुज्ञाय तथेत्यंगीकृत्य॥५१॥ ततश्च तौ प्रह्लादाय तत्थे धर्मादिकमूचतुः शिश्रित तश्च सावचनं तत्र तस्मै॥५१॥ यथावत्त्रिवर्गमनुशिक्षित
मपि साधुतमं न। तां शिक्षां च। कुतः। द्वंद्वे रागद्वेषादितितिविर्षये श्वारमणां। येषां ते रूपवर्णितां॥५२॥ ॥ ॥ ॥ ॥ ॥ ॥

रा०
२०

पादपूरणार्थः १

स

पराहृतः अन्यत्र गतः उपहूतः संबिभ्य ५१ क्रीडार्थं कृतत्वाणोक्तोत्सवैः लब्धावसरैरिति वा तेषां निर्षां जन्ममरणादिलक्षणां विद्वान् ॥ ५४ ॥ द्वंद्वारा मा
मीरितैरीहितैर्नदूषिताधीर्येषां ते बालाः ॥ ५३ ॥ तस्मिन्नेवन्यस्थं हृदमीत्वाणां चयैः ॥ ५६ ॥ सप्तमे पंचमः ॥ ॥ षष्ठे गुरोरहव्यग्रे प्रह्लादो दैत्यबालकान् अक्रतुकंप्य परं त
त्वं नारदोक्तमुपादिशत् ॥ निरर्थकक्रियालोपेरायुर्व्ययमजानतां ॥ प्रह्लादः सदयं प्राह धर्मं भागवतं कृती ॥ २ ॥ कौमार इत्यादिना ॥ इहैव मानुषं जन्म निधर्म

यदाचार्यः पराहृत्तो गृहमेधीयकर्मसु ॥ वयस्यैर्बालकैस्तत्र सोपहूतः कृतक्षणैः ॥ ५२ ॥ अथ तान् श्लक्ष्णया वाचा प्रत्याहूय महाबुधः ॥
उवाच विद्वांस्तन्निष्ठां कृपया प्रहसन्निव ॥ ५३ ॥ ४ ॥ ते तु तद्गौरवात्सर्वे त्यक्तक्रीडापरिच्छदाः ॥ बाला नदूषितधियो द्वंद्वारामेरितेहितैः ॥
॥ ५५ ॥ पर्युपासत राजेंद्र तन्न्यस्तहृदयेक्षणाः ॥ तानाह करुणो मैत्रो महाभागवतोऽसुरः ॥ ५६ ॥ ॥ इति श्रीभागवते महापुराणे सप्तमस्कं
धे पंचमोऽध्यायः ॥ ॥ प्रह्लाद उवाच ॥ ॥ कौमार आचरेत्प्राज्ञो धर्मान्भागवतानिह ॥ दुर्लभं मानुषं जन्म तदप्यध्रुवमर्थदं ॥ १ ॥ यथा हि
पुरुषस्येह विष्णोः पादोपसर्पणं ॥ यदेष सर्वभूतानां प्रिय आत्मेश्वरः सुहृत् ॥ २ ॥ ॥ ॥

नाचरेत् ॥ यतोर्थदमितत् तत्र कौमार एव यतः तदप्यध्रुवं ॥ नचैवं भूते जन्मांतरे यतः दुर्लभं ॥ तत्र धर्मानिवाचरेत् ॥ न सुखार्थं प्रयासानुक्त्वा भागवतानेव न काम्या
न् ॥ १ ॥ इह भागवतानेव धर्मानाचरेदित्येतदुपपादयति ॥ यथा हीति चतुर्भिः ॥ इह पुरुषस्य विष्णोः पादोपसर्पणमेव यथा अनुरूपं योग्यमित्यर्थः ॥ यद्यस्मात् ॥ एष प्रिय
इत्यादि ॥ २ ॥

मोगोद्यमः कथं त्याज्य इति चेत्तत्राह। सुखमिति। सर्वत्र पश्चादावपि दैवात् नतु प्रयत्नात् यथा दुःखं दैवादेव॥३॥ अतस्तदर्थं प्रयासो न कर्तव्यः यतः प्रयासा न परं केवलं आयुषोव्यय एव अपितु स तथा तेन प्रकारेण क्षेमं न प्राप्नोति ~~तर्कं भयमाश्रि~~ अतः संसारं प्राप्तः भयं श्रितः सन् पौरुषं शरीरं यावत् पुष्कलं समर्थं न विपद्येत अक्षमं न भवेत्। न नश्येदिति वा। तावत् क्षेमाय यतेत॥५॥ अपि चायुर्व्ययश्च महान् मम अहमिति निश्चितश्चेत्याह पंचभिः॥६॥ विंशतिर्वर्षाणि आयुर्याति॥७॥ दुरापूरेण दुःखेन समंततो दापूर्यमाणेन॥८॥ ननु योवने गृहासक्तोऽपि पश्चाद्विरक्तः

सुखमैंद्रियकं दैत्या देहयोगेन देहिनां। सर्वत्र लभ्यते दैवाद्यथा दुःखमयत्नतः॥३॥ तत्प्रयासो न कर्तव्यो यत आयुर्व्ययः परं। न तथा विंदते क्षेमं मुकुंदचरणांबुजं॥४॥ ततो यतेत कुशलः क्षेमाय भयमाश्रितः। शरीरं पौरुषं यावन्न विपद्येत पुष्कलं॥५॥ पुंसो वर्षशतं ह्यायुस्तदर्धं चाऽजितात्मनः। निः फलं यदसौ रात्र्यां शेतेंऽधं प्रापितस्तमः॥६॥ मुग्धस्य बाल्ये कौमारे क्रीडतो याति विंशतिः। जरया ग्रस्तदेहस्य यात्यकल्पस्य विंशतिः॥७॥ दुरापूरेण कामेन मोहेन च बलीयसा। शेषं गृहेषु सक्तस्य प्रमत्तस्याऽपयाति हि॥८॥ को गृहेषु पुमान्सक्तमात्मानमजितेंद्रियः। स्नेहपाशैर्दृढैर्बद्धमुत्सहेत विमोचितुं॥९॥ को न्वर्थतृष्णां विसृजेत्प्राणेभ्योऽपि य ईप्सितः। यं क्रीणात्यसुभिः प्रेष्ठैस्तस्करः सेवको वणिक्॥१०॥ ॥ ॥

मनुक्तेमं यास्यतीत्याशंक्य तदसंभवं दर्शयन् कौमार एवाचरेदित्येतदुपपादयति। को गृहेष्विति सप्तभिः॥९॥ यं अर्थं असुभिः प्राणैरपि निमं क्रीणाति तस्करादिरर्थं साधयति तस्मिन्नर्थे तृष्णां को नु विसृजेत्॥१०॥ ॥ ॥ ॥ ॥

किंच कथमित्याह द्विप्रियायाः संगादिकं स्मरन्नु कथं त्यजेदिति तृतीयेनाह रहस्यं मंत्रान् हितशिक्षालापान्। सुहृत्सु च संगं तेषां स्नेहेन सितो बद्धः कलानि मधुराणि अ
क्षराणि येषां तेषां च संगं। तेषु अनुरक्तं चित्तं यस्य ॥११॥ ताः श्वशुरगृहे स्थिताः हृदय्याः हृदयंगमाः मनोज्ञा उरवः परिच्छदा येषु तान् वृत्तीः जीविकाः कुल्याः कुलपरंपरागताः
॥१२॥ कोशस्कृत् कोशस्कारी कीटः स यथा गृहं कुर्वन्नात्मनो निर्गमाय द्वारमपि नावशेषयति। तथा कर्म्माणि ईहमानः। न च वितृप्तकामोपि देहोपदर्शनेन विर

कथं प्रियायाः अनुकंपितायाः संगं रहस्यं रुचिरांश्च मंत्रान्। सुहृत्सु च स्नेहसितः शिशूनां कलाक्षराणामनुरक्तचित्तः॥११॥ पुत्रान्स्मरंस्ता
दुहितॄर्हृदय्या भ्रातॄन्स्वसॄर्वा पितरौ च दीनौ। गृहान्मनोज्ञोरुपरिच्छदांश्च वृत्तीश्च कुल्याः पशुभृत्यवर्गान्॥१२॥ त्यजेत कोशस्कृदिवेहमा
नः कर्माणि लोभादवितृप्तकामः। औपस्थ्यजैह्व्यं बहु मन्यमानः कथं विरज्येत दुरंतमोहः॥१३॥ कुटुंबपोषाय वियन्निजायुर्न बुध्यतेर्थं
विहितं प्रमत्तः। सर्वत्र तापत्रयदुःखितात्मा निर्विद्यते न स्वकुटुंबरामः॥१४॥ ॥ ॥

क्तः सन् त्यजेत। तत्राह। औपस्थ्यं वशेम्यं जैह्व्यं च सुखं तदेवाधिकं मन्यमानः। अतो दुरंतो मोहो यस्य सः कथं विरज्येत विरक्तः स्यात्॥१३॥ दुरंतमोहत्वं दर्शय
न्नाह। कुटुंबपोषणाय वियत् क्षीयमाणं निजमायुः पुरुषार्थं च विहतं न बुध्यते। अत एव तापत्रयेण दुःखितचित्तोपि न निर्विद्यते दुःखबुद्धिं न करोति। यतः स्वकुटुं
बे रामो रतिर्यस्य॥१४॥ ॥छ॥ ॥ ॥

प्रत्फवोर्थंकरोतीत्याह। वित्तेष्विति। नित्यमासिनिविष्टंचेतो यस्य सः परवित्तहर्तुःप्रेत्यनरकलक्षणं इह च दंडादिरूपं दोषं यद्यपि विद्वान्बुध्यात्माऽशांतात्तिलोभः स नूपरवि-
त्तं हरत्येव॥१५॥ तद्देवं को गृहेषु पुमानित्यादिसप्तभिः श्लोकैरुपपादितं। गृहादिषु प्रसक्तस्य वैराग्याद्यसंभवमुपसंहरति। विद्वानपीति। स्वलोकाय स्वात्मपरामर्शाय
न कल्पते। किंतु विमूढो यथा तथा नोपि तमस्त्रासिनिवेशमेव प्रपद्यते। तत्र हेतुः इतयति। स्वीयमिदं पारक्यमिदमिति तिरश्चीभावो भावनाय यस्य सः॥१६॥ तस्मात्कौमार एव

विद्व   प्प

वित्तेषु नित्याभिनिविष्टचेता विद्वांश्च दोषं परवित्तहर्तुः। प्रेत्येह वाथाप्यजितेंद्रियस्तदशांतकामो हरते कुटुंबी॥१५॥ विद्वानपीत्थं दनुजाः कुटुं-
बं पुष्णन्स्वलोकाय न कल्पते वै। यः स्वीयपारक्यविभिन्नभावस्तमः प्रपद्येत यथा विमूढः॥१६॥ यतो न कश्चित्क्व च कुत्रचिद्वा दीनः स्वमात्मानमलं
समर्थः। विमोचितुं कामदृशां विहारक्रीडामृगो यन्निगडो विसर्गः॥१७॥ ततो विदूरात्परिहृत्य दैत्या दैत्येषु संगं विषयात्मकेषु। उपेत नारायणमा-
दिदेवं स मुक्तसंगैरिषितोऽपवर्गः॥१८॥ ॥

भागवतान्धर्मान्नित्याचरेदिति। सहेतुकमुपसंहरति। यतः कश्चिदपि स्वमात्मानं मोचयितुं न समर्थः अतः नारायणमुपेत शरणं यात ते उत्तरेणान्वयः। असामर्थ्ये हेतुः अ-
लं दीनो लंपटः। अतः कामो दृशियासां तासां विहारे क्रीडायां निमित्ते क्रीडामृगाः। विहारमिति पृथक्पाठे तासां विहारसाधनमात्मानं यतस्तासां क्रीडामृगाः स इत्यन्वयः
किंच प्रत। यास्तु निगडः श्रृंखलातुल्यो विसर्गः पुत्रादिरूपो भवति॥१७॥ विदूरात् दूरतः संगं परिहृत्य। यद्वा। अविदूरात् शीघ्रं नारायणमुपेतेत्यन्वयः। यस्मात्स एवापवर्गः इषि-
तः इष्टः॥१८॥

वालानामस्माकं तद्दुर्लभमशक्यमिति चेत् तत्राह। नहीति। बह्वायासः अतिप्रयासः॥१९॥ आत्मत्वात्सर्वत्र च प्रसिद्धत्वादिति च हेतुद्वयमुपपादयति। परावरेष्विति त्रिभिः।
ब्रह्मा अंतो येषां स्थावरा आदिर्येषां तेषु जीवेषु भौतिकेषु अजीवेषु घटादिषु। महत्सु च भूतेष्वाकाशादिषु। गुणसाम्ये प्रधाने गुणव्यतिकरे महत्तत्वादौ च परः ब्रह्मस्वरू
पः॥२०॥ कथं तर्हि दृष्टृदृश्यभोक्तृभोग्यादिभेदः। माययेत्याह। प्रत्यगात्मा तद्द्रष्टा भोक्ता तत्स्वरूपेण व्यापकतया निर्देश्यः दृश्यं भोग्यं देहादि तद्रूपेण व्याप्यतया निर्दे

न ह्यच्युतं प्रीणयतो बह्वायासोऽसुरात्मजाः। आत्मत्वात्सर्वभूतानां सिद्धत्वादिह सर्वतः॥१९॥ परावरेषु भूतेषु ब्रह्मांतस्थावरादिषु। भौतिके
षु विकारेषु भूतेष्वथ महत्सु च। गुणेषु गुणसाम्ये च गुणव्यतिकरे तथा। एक एव परो ह्यात्मा भगवानीश्वरोऽव्ययः॥२०॥ प्रत्यगात्मस्वरूपेण दृश्य
रूपेण च स्वयं। व्याप्यव्यापकनिर्देश्यो ह्यनिर्देश्योऽविकल्पितः। केवलानुभवानंदस्वरूपः परमेश्वरः। माययांतर्हितैश्वर्य ईयते गुणसर्गया॥२२॥
तस्मात्सर्वेषु भूतेषु दयां कुरुत सौहृदं। आसुरं भावमुन्मुच्य यया तुष्यत्यधोक्षजः॥२३॥ ॥ ॥

श्यो मायया ईयत इत्युत्तरेणान्वयः। वस्तुतस्तु स्वयं अविकल्पितोऽनिर्देश्योऽपि सन्नुपहितः। अनिर्देश्योऽपि एवं निर्देश्यः सन्नविकल्पित ईयत इत्यन्वयः॥२१॥ यतः केव
लोऽनुभवात्मक आनंद एव स्वरूपं यस्य। ननु स एव चेत् सर्वत्र तर्हि सर्वत्र सर्वज्ञत्वाद्युपलभ्येत तत्राह। गुणात्मकः सर्गो यस्याः सा गुणसर्गा तया मायया अंतर्हितमै
श्वर्यं यतः सः॥२२॥ यस्मादेवं तस्मात्सर्वेषु भूतेषु दयां सौहृदं च कुरुत। यया दयया अनुकम्पया संतुष्यति॥२३॥ ॥ ॥ ॥ ॥ ॥

ततः किमत आह । त्वष्टेव तत्र तस्मिन् किमलभ्यं तथापि त्रिगुणपरिणामाद्दैवादिवस्वसिद्धा । अथ तत्र सिद्धा ये धर्मादयस्तैः किं गुणेन च मोक्षेण कांक्षितेन किं । तत्सुपगा
यतां नोस्माकमकांक्षितस्यापि तस्य सिद्धेः यद्वा । मा भून्मोक्षः तस्य चरणयोः सारं जुषां सुधां सेवमानानां तेनापि किमित्यर्थः ॥ २४ ॥ ननु च धर्मादिरत्र रूपार्थं विकि
मित्याचार्याभ्यां वेदोक्तत्वेन सर्वत्र एवाभिहितः । तत्राह । धर्मोर्थः काम इति यस्त्रिवर्गः तदर्थं च य ईक्षाद्या अभिहिताः ईक्षा आत्मविद्या त्रयी कर्मविद्या । नयदमौ तर्को

त्वष्टेव तत्र किमलभ्यमनंत आद्ये किं तैर्गुणव्यतिकरादिह ये स्वसिद्धाः । धर्मादयः किमगुणेन च कांक्षितेन सारं जुषां चरणयोरुपगायतां नः
॥ २४ ॥ धर्मार्थिकाम इति योभिहितस्त्रिवर्ग ईक्षा त्रयी नयदमो विविधा च वार्ता । मन्ये तदेतदखिलं निगमस्य सत्यं स्वात्मार्पणं स्वसुहृदः परमस्य पुं
सः ॥ २५ ॥

दंडनीतिश्च । विविधा च वार्ता जीविका । तदेतत्सर्वं निगमस्यार्थजातं स्वसुहृदः स्वांतर्यामिणः परमस्य पुंसः स्वात्मार्पणसाधनं चेत्तर्हि सत्यं मन्ये सत्यपरत्वात् । अ
न्यथा तदसत्यमेव । यद्वा । तदेतदखिलं निगमस्य त्रैगुण्यविषयस्य प्रतिपाद्यं मन्ये । सत्यं तु निस्त्रैगुण्यलक्षणं परमस्य पुंसः स्वात्मार्पणमेवेत्यर्थः । तदुक्तं भग
वता । त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुनेति ॥ २५ ॥ ॥ श्रीरामो जयति ॥ ॥ ॥ ॥ ॥

तेषांविश्वासार्थंगुरुसंप्रदायमाह।ज्ञानमिति।यद्यत्रनारदःश्रोतातत्रकुतोमादृशानामधिकारइतिमाशंकीत्याह।भागवतएकांतभक्ता।नांयत्पादरजःतेनस्ना
प्लुतानांस्नातानांदेहिनांसर्वेषामपितत्ज्ञानंस्यात्।नतुज्ञमानामेवेतिनियमः॥२६॥अतएवमयापिनारदात्श्रुतंविज्ञानसंयुतंश्रुत्वाभवपर्यंतिधर्मंचश्रुतं॥२७॥

ज्ञानंतदेतदमलंदुरवापमाहनारायणोनरसखःकिलनारदाय।एकांतिनांभगवतस्तदकिंचनानांपादारविंदरजसाप्लुतदेहिनांस्यात्।
॥२६॥श्रुतमेतन्मयापूर्वंज्ञानंविज्ञानसंयुतं।धर्मंभागवतंशुद्धंनारदाद्देवदर्शनात्॥२७॥ ॥दैत्यपुत्राऊचुः॥ ॥प्रह्रादत्वंवयंचापिनर्ते
न्यंविद्महेगुरुं।एताभ्यांगुरुपुत्राभ्यांबालानामपिहीश्वरौ॥२८॥बालस्यांतःपुरस्थस्यमहत्संगोदुरन्वयः।छिंधिनःसंशयंसौम्यस्याच्चेद्वि
श्रंतकारणं॥२९॥ ॥इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेप्रह्रादानुचरितेषष्ठोऽध्यायः॥६॥ ॥ ॥ ॥

तत्रातिविस्मिताःपृच्छंति।प्रह्रादेति।एताभ्यांष्टतेऽन्यंगुरुंनविद्महः।एतदातोमतानात्पूर्वमेवाहंनारदपार्श्वगातइतिचेत्तत्राहुः।बालानामपि।अतिशिशूनामस्माक
मेतावीश्वरौनियंतारौ।अतस्त्वयाअन्यत्रगमनंनसंभवति।२८॥सएवाग्रातइत्यपिनसंभवतीत्याहुः।बालस्येति।दुरन्वयःदुर्घटःविश्रंतकारणंविश्वासहेतुः॥२९॥सप्तमे
षष्ठः॥ ॥ ॥

भा०स०

२४

सप्तमे मातृगर्भस्थ स्वस्मिन्नारदभाषितं। प्रह्लादो वर्णयामास शिष्यप्रत्ययसिद्धये। अत्र विनाश्वा देतन्मया गर्भऽश्रितमिति तत्र तां कथामाह एवमिति षोडशभिः सुधीः। अस्मा

कं पितरि हिरण्यकशिपौ॥१॥ स्वकृतेनैव पापेन पापोऽसौ भक्षितः अभक्षि इति हर्षेण वदन्तो युद्धोद्यमं चक्रुः॥२॥३॥ राज्ञः शिबिरं आवासं। व्यलुंपन् सर्वस्वापहारेण ना॥ शि

॥नारद उवाच॥ ॥एवं दैत्यसुतैः पृष्टो महाभागवतोऽसुरः। उवाच स्मयमानः स्तान् स्मरन्मदनुभाषितं॥१॥ प्रह्लाद उवाच॥ ॥पितरि प्रस्थितेऽस्माकं तपसे

मंदराचलं। युद्धोद्यमं परं चक्रुर्विबुधा दानवान्प्रति।२॥ पिपीलिकैरहिरिव दिष्ट्या लोकोपतापनः। पापेन पापोऽभक्षीति वादिनो वासवादयः।३। तेषामति

बलोद्योगं निशम्यासुरयूथपाः। वध्यमानाः सुरैर्भीता दुद्रुवुः सर्वतो दिशं॥४॥ कलत्रपुत्रमित्राप्तान्गृहान्पशुपरिच्छदांस्त्र। नावेक्षमाणास्त्वरिताः सर्वे

प्राणपरीप्सवः।५॥ व्यलुंपन् राजशिबिरममरा जयकांक्षिणः। इंद्रस्तु राजमहिषीं मातरं मम चाग्रहीत्॥६॥ नीयमानां भयोद्विग्नां रुदंतीं कुररीमिवाय

दृच्छयागतस्तत्र देवर्षिर्ददृशे पथि॥७॥ प्राह नैनां सुरपते नेतुमर्हस्यनागसं। मुंच मुंच महाभाग सतीं परपरिग्रहं।८। ॥इंद्र उवाच॥ ॥आस्तेस्या जठ

रे वीर्यमविषह्यं सुरद्विषः। आस्यतां यावत्प्रसवं मोक्ष्येर्थपदवीं गतः।९॥ नारद उवाच॥ ॥अयं निःकिल्बिषः साक्षान्महाभागवतो महान्। त्वया न प्राप्स्य

ते संस्थामनंतानुचरो बली॥१०॥ ॥

गर्वितः॥६॥७॥ अनागसं निरपराधां मे तां नेतुं नार्हसीति प्राह॥८॥ अविषह्यं दुःसहं। अतः अनया प्रसवपर्यंतमत्रास्यतां। ततश्च अर्थस्य पदवीं मार्गं गतः प्राप्तः सन्नुजातं

पुत्रं हत्वा मोक्ष्यामीत्यर्थः।९॥ साक्षान्नारद्गुणैरेव महान् न तु पित्रादिसंबंधात्त्वया हेतुभूतेन संस्थां मृत्युं न यास्यति। तत्र हेतवो निःकिल्बिष इत्यादयः॥१०॥ ॥

भा०

२५

अनंतस्य प्रियो योऽहं स वा प्रियो यस्य तस्य मम तन्नाथ नतं प्रदक्षिणीकृत्य ॥ ११ ॥ इहोष्यतामित्यहितिशेषः ॥ १२ ॥ अंति समीपे ॥ १३ ॥ अंतर्वत्नी गर्भिणी इच्छया भर्तुरागमनानं
तरं प्रसूतये । एवमपि स्वरा भर्त्स्यन्ने मायाः ॥ १४ ॥ तस्याः शोकशांत्यै धर्मस्य तत्त्वं तत्किल ज्ञानं ज्ञानमात्मानात्मविवेकः । तदुभयं प्रादात् ईश्वरः समर्थः ॥ १५ ॥ १६ ॥ भूयात् भवेत् । वै

इत्युक्त्वा मां विहायेंद्रो देवर्षिर्मानयद्व्रजं । अनंतप्रियभक्त्यैनां परिक्रम्य दिवं ययौ ॥ ११ ॥ ततो नो मातरमृषिः समानीय निजाश्रमं । आश्वास्येहोष्यतां
वत्से यावत्ते भर्तुरागमः ॥ १२ ॥ तथेत्यवात्सीद्देवर्षेरंतिसाप्यकुतोभया । यावद्दैत्यपतिर्घोरात्तपसो न न्यवर्त्तत ॥ १३ ॥ ऋषिं पर्यचरत्तत्र भक्त्या परमया सती
अंतर्वत्नी स्वगर्भस्य क्षेमायेच्छाप्रसूतये ॥ १४ ॥ ऋषिः कारुणिकस्तस्याः प्रादादुभयमीश्वरः । धर्मस्य तत्त्वं ज्ञानं च मामप्युद्दिश्य निर्मलं ॥ १५ ॥ तत्तु का
लस्य दीर्घत्वात्स्त्रीत्वान्मातुस्तिरोदधे । ऋषिणानुगृहीतं मां नाधुनाप्यजहात्स्मृतिः ॥ १६ ॥ भवतामपि भूयान्मे यदि श्रद्दधते वचः । वैशारदी धीः श्रद्धा
तः स्त्रीबालानां च मे यथा ॥ १७ ॥ जन्माद्याः षडिमे भावा दृष्टा देहस्य नात्मनः । फलानामिव वृक्षस्य कालेनेश्वरमूर्त्तिना ॥ १८ ॥ ॥ ॥

शारदी स्वार्थे तद्धितः । देहाद्यहंकारच्छेदनिपुणेत्यर्थः ॥ १७ ॥ कासौ वैशारदी धीरित्यपेक्षायां नारदोक्तमेव देहात्मविवेकप्रकारमाह । जन्मेति । दशभिः । जन्माद्याः जायते अ
स्ति वर्द्धते विपरिणमते अपक्षीयते नश्यतीत्येवंभूता इमे षड्भावा विकाराः दृष्टाः देहस्य नात्मनः । यथा फलानां दृश्यंते । तद्वदात्मनि तत्तथैव स्थिते देहस्य दृष्टा इत्यर्थः । ईश्वरी विकारसमर्था
मूर्तिर्यस्य तेन ॥ १८ ॥

तदेवं देहधर्मैः स्वहैलक्षण्येनात्मनो देहभेदो दर्शितः इदानीमात्मधर्मैः स्वस्फुटयन्नहंकारादिकं त्याजयति। आत्मा नित्यः अविनाशी वा अरेयमात्मेति श्रुतेः। अव्ययः अप
क्षयशून्यः। अजो अजरो परमे व्योमन्निति श्रुतेः। शुद्धः। निरवद्यं निरंजनमिति श्रुतेः। एकः। एकमेवाद्वितीयमिति श्रुतेः। क्षेत्रज्ञः। विज्ञातारमरे केन विजानीयादिति श्रु
तेः। आश्रयः। यस्मिन् द्यौः पृथिवी चांतरिक्षमिति श्रुतेः। अविक्रियः। निष्कलं निष्क्रियं शांतमिति श्रुतेः। स्वदृक्। आत्मज्योतिः सम्राडिति होवाचेति श्रुतेः। हेतुः। सदु मां
लोकानुसृजेतिः। व्यापकश्च। सत्यं ज्ञानमनंतमिति श्रुतेश्च। असंगी। असंगो ह्ययं पुरुष इति श्रुतेश्च। अनावृतः। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यत इति श्रुतेः॥१९॥ परैः श्चे

आत्मा नित्योऽव्ययः शुद्धः एकः क्षेत्रज्ञ आश्रयश्च। अविक्रियः स्वदृग्घेतुर्व्यापकोऽसंगपनावृतश्च॥१९॥ एतैर्द्वादशभिर्विद्वानात्मनो लक्ष
णैः परैः। अहं ममेत्यसद्भावं देहादौ मोहजं त्यजेत्॥२०॥ स्वर्णं यथा ग्रावसु हेमकारः क्षेत्रेषु योगी प्रदलिन आक्रयात। क्षेत्रेषु देहेषु तथा
त्मयोगैरध्यात्मविद् ब्रह्मगतिं लभेत॥२१॥ ॥ ॥

ष्ठैः विवेकसमर्थैर्देहादिष्वेवं विद्वान् असद्भावं मिथ्याबुद्धिं त्यजेत्॥२०॥ नन्वेवं विविक्तात्मज्ञानिनोऽप्यपरोक्षज्ञानाभावेन ब्रह्मताप्राप्तिः कथं स्यात् अयतोऽहंकारादिकं त्यजे
दित्यपेक्षायां तत्प्राप्तिप्रकारं सदृष्टांतमाह। स्वर्णाकरक्षेत्रेषु स्फुरत्स्वर्णकणेषु ग्रावसु योगैर्धमनाद्युपायैस्तदुपायाभिज्ञो हेमकारो यथा स्वर्णं प्राकाशयात्। आ
त्मयोगैः आत्मप्राप्त्युपायैश्च ब्रह्मगतिं ब्रह्मतां। अध्यात्मवित् आत्माधिकृतकार्यकारणसंघातज्ञाता॥२१॥ ॥ ॥ ॥ ॥

अध्यात्मविवेकमात्मप्राप्त्युपायमाह। अष्टाविति त्रिभिः। मूलप्रकृतिः महदहंकारौ पंचतन्मात्राणि चेत्यष्टौ त्रयः सत्वादयः ते च प्रकृतिगुणाः। एवं नव तत्त्वानि। एकादशें
द्रियाणि पंचमहाभूतानि चेति षोडश। इमान्नात्मा एकः प्रोक्तः कपिलादिभिराचार्यैः। एकत्वे हेतुः। एषु सान्वितेनान्वयात्। तदुक्तं। मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृति
विकृतयः सप्त। षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुष इति॥२१॥ जगत् जंगमं तस्थुः स्थावरं। अत्रैव सर्वसंघाततामके देह एवम्मृग्यः अन्वेष्टव्यः सुशंकं चेतदि

अष्टौ प्रकृतयः प्रोक्तास्त्रय एव हि तद्गुणाः। विकाराः षोडशाचार्यैरिमानेकः समन्वयात्॥२२॥ देहस्तु सर्वसंघातो जगत्त
स्थुरिति द्विधा। अत्रैव मृग्यः पुरुषो नेति नेतीत्यतत्यजन्॥२३॥ अन्वयव्यतिरेकेण विवेकेनोशतात्मना। सर्गस्थानस
माम्नायैर्विमृशद्भिरसत्वरैः॥२४॥ ॥ ॥

त्याह। नेति नेतीत्यन्यापोहे क्रियमाणे स्वयमेव अतत्यजत्। अनात्मवर्गात्पृथग्उपलभ्यमान इत्यर्थः॥२३॥ मणिषु सूत्रमिव सर्वत्रानुस्यूतत्वेनान्वयः। अत ए
व मणिभ्यः सूत्रस्येवैकैकव्यतिरेकश्च। तयोर्द्वैविध्यं तेन यो विवेकः पूर्वोक्तो वा तेन उशता शुद्धेनात्मना मनसा सर्गस्थान समाम्नायैः सृष्टिस्थितिसंहारैः। य
तो वा इमानि भूतानि जायंते इत्यादिश्रुत्युक्तमार्गानुसंधानेनेत्यर्थः। विमृशद्भिः विचारयद्भिः। असत्वरैः अव्यग्रैः रूपत इति पूर्वेणान्वयः॥२४॥ ॥ ॥

भा॰स॰
२६

विमर्शप्रकारमाह। बुद्धेरिति। द्वाभ्यां। अध्यक्षः साक्षी। २५॥ अतः एभिर्बुद्धिभेदैः परिणामैः पर्यस्तैः परितः क्षिप्तैः आत्मधर्मत्वेन निरस्तैः बुद्धिधर्मत्वे हेतुः त्रिवर्णैः त्रिगुणात्म
कैः क्रियोद्भवैः कर्मजन्यैः बुद्धेरेव त्रिगुणात्मकत्वात्। कर्मकार्यत्वाच्च। तस्मादेवैता अवस्थाः आत्मा तु बुद्ध्यन्वयात् तत्तदवस्थावानिव भाति न तत्त्वत इत्यात्मनः स्वरूपं बु
ध्येत जानीयादित्यर्थः। अत्र दृष्टांतः। कुसुमधर्मैर्गंधैः सदाश्रयं वायुमिव। २६॥ ननु तर्हि यथा कुसुमोपाधिकोऽपि वायोर्गंधो विवेकज्ञानेन न निवर्तते। एवमात्म

बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति वृत्तयः। ता येनैवानुभूयंते सोऽध्यक्षः पुरुषः परः॥ २५॥ एभिस्त्रिवर्णैः पर्यस्तैर्बुद्धिभेदैः
क्रियोद्भवैः। स्वरूपमात्मनो बुद्ध्येद्गंधैर्वायुमिवान्वयात्। २६॥ एतद्द्वारो हि संसारो गुणकर्मनिबंधनः। अज्ञानमूलो
ऽपार्थोऽपि पुंसः स्वप्न इवेष्यते॥ २७॥ तस्माद्भवद्भिः कर्तव्यं कर्मणां त्रिगुणात्मकं। बीजनिर्हरणं योगः प्रवाहोपरमो धियः। २८॥
नां

नः संसारो न निवर्ततेत्याशंक्याह। एतदिति। एतद्द्वारः बुद्धिद्वारकः तदवस्थाद्वारको वा न स्वतः। हि यस्माद्बुद्धेर्ये गुणाः कर्माणि च तैर्निबद्ध इति तथा। स चाज्ञानमूलः अ
तोऽपार्थो मिथ्याभूतोऽपि स्वप्न इवेष्यते। वायोस्तु गंधवद्द्रव्यसंबंधः स्पर्शवत्त्वादिति विषमो दृष्टांतः॥ २७॥ यस्मादेवं निहेन्निर्घटते। तस्मात्तद्बीजमज्ञानं। तस्य निर्हरणं
दहनं। किं तत्। योगः। कथं स्यात्। ततः धियः प्रवाहं जाग्रदादिरूपमुपरमयतीति तथा॥ २८॥ ॥ ॥ ॥ ॥ ॥

वास्त

राम
२८

तदेवं ज्ञानप्रकारस्तूक्तात् तत्साधनं धर्मस्य तत्वं नारदोक्तमेवाह । तत्रेति पंचभिः । येद्दमीर्येथा तुष्टिस्ते वा रतिरिति मतं । अयं उपायो भगवतोक्तः तथा हि गीतासु । यत्करोषि यदश्नासि
यज्जुहोषि ददासि यत् । यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणमिति । भक्त्या माममिजानाति यावान्यश्चास्मि तत्वत इत्यादि ॥ २९ ॥ तत्रैवांतरंगान्धर्मानाह । गुरोः शुश्रूषया भक्त्या

तत्रोपायसहस्राणामयं भगवतोदितः । यदीश्वरे भगवति यथा यैरंजसा रतिः ॥ २९ ॥ गुरुशुश्रूषया भक्त्या सर्वलब्धार्पणेन च । संगेन साधुभक्ता
नामीश्वराराधनेन च ॥ ३० ॥ श्रद्धया तत्कथायां च कीर्त्तनैर्गुणकर्म्मणां । तत्पादांबुरुहध्यानात्तल्लिंगेक्षार्हणादिभिः ॥ ३१ ॥ हरिः सर्वेषु भूतेषु भगवा
नास्त ईश्वरः । इति भूतानि मनसा कामैस्तैः साधु मानयेत् ॥ ३२ ॥ एवं निर्जितषड्वर्गैः क्रियते भक्तिरीश्वरे । वासुदेवे भगवति यया संलभते रतिं ॥ ३३ ॥ निश
म्य कर्माणि गुणानतुल्यान्वीर्याणि लीलातनुभिः कृतानि । यदातिहर्षोत्पुलकाश्रुगद्गदं प्रोत्कंठ उद्गायति रौति नृत्यति ॥ ३४ ॥ यदा ग्रहग्रस्त इव क्वचिद्ध
सत्याक्रंदते ध्यायति वंदते जनं । मुहुः श्वसन्वक्ति हरे जगत्पते नारायणेत्यात्ममतिर्गतत्रपः ॥ ३५ ॥ ॥

प्रेष्ठास्सर्वेषां लब्धानामर्पणेन च ॥ ३० ॥ तस्य लिंगानां मूर्तीनामीक्षणमर्हणं चादिर्येषां वंदनादीनां तैश्च ॥ ३१ ॥ ३२ ॥ निर्जितः षट्कं कामक्रोधलोभमोहमदमत्सराणामिंद्रियाणां वा वर्गो
यैः ॥ ३३ ॥ भगवद्भक्तेर्लिंगान्याह निशम्येति त्रिभिः । गुणाननुभक्तवा अतुल्यादीन् अतिहर्षेणोत्कंठः पुलकाः अश्रूणि च तैर्गद्गदं यथा भवत्येवं प्रोत्कंठ उद्गायति ॥ ३४ ॥ ५ ॥ ॥ ॥

ला॰म॰

२७

तस्यतावच्चेष्टादिःतस्यभावोभावनातेनानुकृतेआशयाकृतीमनश्शरीरेयस्यनिर्दग्धबीजमज्ञानमनुशयोवासनाचयस्यसःसम्यग्गतिमाप्नोति॥३६॥ततःकिमतआह।अथोत्त
जस्यालंबंमनसास्पर्शंप्राप्तंतेरेतस्याअर्पणं।अस्तुतःरागादियुक्तआत्मामनोयस्यसंसृतिचक्रंशाततंतन्निवर्तकंतुधाविद्धः।तदेवब्रह्मनिर्वाणंलयोमोक्षःतदात्मकंसुखंवि
न्दः।हृदीश्वरंध्यंतपस्विणं॥३७॥लक्षिरशक्तोतिवनमंतव्यमित्याह।कइति।छिद्रवत्आकाशवत्विषयाणांसुप्रपादनेरंजनैःकिं।तत्रहेतुःसर्वदेहिनांसामान्यतःविषया।नि

तदाउमानुसूक्तसमस्तबंधनस्यदूरावभावानुकृताशयाकृतिः।निर्दग्धबीजानुशयोमहीयसातक्तिप्रयोगेणसमेत्यधोक्षजं॥३६॥अथोत्तजालंभमि
हासुत्तात्मनश्शरीरिणःसंसृतिचक्रशाततं।तद्ब्रह्मनिर्वाणसुखंविदुर्बुधास्ततोलजध्वंहृदयेहृदीश्वरं॥३७॥कोऽतिप्रयासोऽसुरबालकाहरेरूपास
नेस्वेहृदिछिद्रवत्सतः।स्वस्यात्मनःसख्युरशेषदेहिनांसामान्यतःकिंविषयोपपादनैः॥३८॥रायःकलत्रंपशवःसुतादयोगृहामहीकुंजरकोशभूत
यः।सर्वेर्थकामाःक्षणभंगुरायुषःकुर्वतिमर्त्यस्यकियत्प्रियंचलाः॥३९॥ ॥ ॥

४

स्ववेसूकरादिसाधारणापन्नैरित्यर्थः।नचैवमादोषोनरूक्तंदोषःनारदोक्तानुवादरूपत्वादस्यप्रकारस्य॥३८॥अनर्थकंचविषयार्जनमित्याह।रायःअर्थाःक्षणभंगु
रमायुर्यस्यतद्भुक्तमितिहासेभ्यःधनंहितुर्धोलोकेतुघंधनमेववा।अवश्यमेकांत्यजतितस्मात्किंधनत्वस्पेति॥३९॥ ॥ ॥

२०

यन्न दुःखेन संभिन्नं न च ग्रस्तमनंतरं । अभिलाषोपपन्नं च तत्सुखं स्वःपदास्पदमित्येवंरूपाः स्वर्गादितो गायत्र्यपि न सेव्या इत्याह । एवं हीति । क्षयिष्णुत्वे हेतुः क्रतुभिः कृता इ
ति । तद्यथेह कर्म्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयत इति श्रुतेः । अत एव तारतम्येन सातिशयाः । न च निर्मलाः । स्पर्द्धादिमत्वात् । न विद्यते दृ
ष्टं श्रुतं च दूषणं यस्मिन् ॥ ४० ॥ किं च । यदर्थं यत्संकल्प्य अतः संकल्पितान् । विपर्यासं विपरीतं फलं अमोघं अवश्यं प्राप्नोति ॥ ४१ ॥ तदेव दर्शयति सुखायेति । ईहया इच्छया

ये

एवं हि लोकाः क्रतुभिः कृता अमी क्षयिष्णवः सातिशया न निर्मलाः । तस्माददृष्टश्रुतदूषणं परं भक्त्यैकयेशं भजतात्मलब्धये ॥ ४० ॥ यदर्थ इह
कर्माणि विद्वन्मान्यसकृन्नरः । करोत्यतो विपर्यासममोघं विंदते फलं ॥ ४१ ॥ सुखाय दुःखमोक्षाय संकल्प इह कर्मिणः । सदाप्नोतीहया दुःख
मनीहायाः सुखावृतः ॥ ४२ ॥ कामान्कामयते काम्यैर्यदर्थमिह पूरुषः । स वै देहस्तु पारक्यो भंगुरो यात्युपैति च ॥ ४३ ॥ किमु व्यवहितापत्यदारा
गारधनादयः । राज्यं कोशगजामात्यभृत्याप्ता ममतास्पदाः ॥ ४४ ॥ किमेतैरात्मनस्तुच्छैः सह देहेन नश्वरैः । अनर्थैरर्थसंकाशैर्नित्यानंदमहोदधेः
॥ ४५ ॥

क्रियया वा । यः पूर्वमनीहाया हेतोः सुखेनावृतो व्याप्त आसीत् । स ईहया दुःखमाप्नोत्येव ॥ ४२ ॥ किं च । कामान् भोगान् । काम्यैर्विषयैः कर्म्मभिर्वा । पारक्यः श्वादि
भोग्यः न त्वात्मीयः । तं मुञ्चत्य ॥ ४३ ॥ किमु देहात् व्यवहिताः अपत्यादयो ममताविषयाः पारक्या इति वक्तव्यं ॥ ४४ ॥ किं च । यर्थं च अपार्थरूपस्य किमेतैरित्याह । किमेतैरिति ॥ ४५ ॥

भा०स० मोगावसराभावाद्वैतैः कठपयो इत्याह। निःस्पृहतामिति। प्राचीनैः कर्मभिः क्लिश्यमानस्य कर्मभिः क्रियानर्थ इति अन्वयः॥४६॥ ननु कर्मभिः समाप्ते भोगावसरः
स्यात्तत्राह। कर्माणीति। नचेदं कर्मतत्फलं देहादिकं च परमार्थ इत्याह। उत्पन्नं कर्म च देहं अविवेकतः अज्ञानात् नैव तत्तु तो॥४७॥ यदपाश्रयाय दधीनाः॥४८॥ भूतानां श्रा

२८

निःस्पृहतामिह स्वार्थः क्रियानुदेहभृतोऽसुराः। निषेकादिष्ववस्थासु क्लिश्यमानस्य कर्मभिः॥४६॥ कर्माण्यारभते देही देहेनात्मानुवर्तिना। कर्मभिस्
तनुते देहमुभयं त्वविवेकतः॥४७॥ तस्मादर्थाश्च कामाश्च धर्माश्च यदपाश्रयाः। भजतानीहयात्मानमनीहं हरिमीश्वरं॥४८॥ सर्वेषामपि भूतानां
हरिरात्मेश्वरः प्रियः। भूतैर्महद्भिः स्वकृतैः कृतानां जीवसंज्ञितः॥४९॥ देवोऽसुरो मनुष्यो वा यक्षो गंधर्व एव वा। भजन्मुकुंदचरणं स्वस्तिमान् स्याद्
स्कं ७ यथा वयं॥५०॥ नालं द्विजत्वं देवत्वमृषित्वं वासुरात्मजाः। प्रीणनाय मुकुंदस्य न वृत्तं न बहुज्ञता॥५१॥ न दानं न तपो नेज्या न शौचं न व्रतानि च। प्रीय
तेऽमलया भक्त्या हरिरन्यद्विडंबनं॥५२॥ ततो हरौ भगवति भक्तिं कुरुत दानवाः। आत्मौपम्येन सर्वत्र सर्वभूतात्मनीश्वरे॥५३॥ दैतेया यक्षरक्षांसि स्त्रि
यः शूद्रा व्रजौकसः। खगा मृगाः पापजीवाः संति ह्यच्युततां गताः॥५४॥ एतावानेव लोकेऽस्मिन् पुंसः स्वार्थः परः स्मृतः। एकांतभक्तिर्गोविंदे यत्सर्वत्र
दीक्षणं॥ ॥इति श्रीभागवते महापुराणे सप्तमस्कंधे सप्तमोऽध्यायः॥ ॥ ॥

राम
२८

४२८ णितां जीवसंज्ञितः अंतर्यामी॥४९॥ असुराणामस्माकमत्र नाधिकार इत्यपि न वाच्यमित्याह। देव इति पंचभिः॥५०॥५१॥ अमलया निष्कामया। विडंबनं नटनमात्रं॥५२॥
॥५३॥ अच्युततां अच्युततत्त्वं॥५४॥ अध्यायद्वयोक्तमुपसंहरति। एतावानिति। तदीक्षणं गोविंददृष्ट्या सम्माननं॥५५॥ सप्तमे सप्तमः॥ ॥ ॥ ॥

२२

अदृष्टमेतिरूपाश्चर्यंतं निघ्नन्दैत्यो हतः स्वयं। आविर्भूय नृसिंहेन स च ब्रह्मादिभिः स्तुतः। अंतः कृपासुधापूर्णो बहिः क्रोधोद्भटकेसरी दैत्येंद्र मरिभावेन लज्जितं च समभावय
त। एकांतसंस्थितां प्रत्यङ्निष्ठां यथा यथा वत। स च हंतुं मनो दधे। कथं स्वतः कोपस्यावेशेनोद्रेकेण चलत् गात्रं च बभूवर्यस्य सः॥३॥ निंदित्वा तिरस्कृत्य। पापेन स रोषेण तिरश्ची

५

नारद उवाच॥ ॥ अथ दैत्यसुताः सर्वे श्रुत्वा तदनुवर्णितं। जगृहुर्निरवद्यत्वान्नैव गुर्वनुशिक्षितं॥१॥ अथाचार्यसुतस्तेषां बुद्धिमेकांतसंस्थितां। आल
क्ष्य नीतस्त्वरितो राज्ञ आवेदयद्यथा॥२॥ श्रुत्वा तदप्रियं दैत्यो दुःसहं तनयानयं। कोपावेशचलद्गात्रः पुत्रं हंतुं मनो दधे॥३॥ क्षिप्त्वा परुषया वाचा प्रह्ला
दमतदर्हणं। आहेक्षमाणः पापेन तिरश्चीनेन चक्षुषा॥४॥ प्रश्रयावनतं दांतं बद्धांजलिमवस्थितं। सर्पः पदाहत इव श्वसन्प्रकृतिदारुणः॥५॥ हे दुर्विनी
त मंदात्मन्कुलभेदकराधम। स्तब्धं मच्छासनोद्वृत्तं नेष्ये त्वाद्य यमक्षयं॥६॥ क्रुद्धस्य यस्य कंपंते त्रयो लोकाः सहेश्वराः। तस्य मेऽभीतवन्मूढ शासनं किं
बलोऽत्यगाः॥७॥ प्रह्लाद उवाच॥ ॥ न केवलं मे भवतश्च राजन्स वै बलं बलिनां चापरेषां। परेऽवरेऽमी स्थिरजंगमा ये ब्रह्मादयो येन वशं प्रणीताः॥८
स ईश्वरः काल उरुक्रमोऽसावोजः सहः सत्त्वबलेंद्रियात्मा। स एव विश्वं परमः स्वशक्तिभिः सृजत्यवत्यत्ति गुणत्रयेशः॥९॥ ॥ ॥

नि तव क्रेण॥४॥ मंदात्मन् रे अल्पबुद्धे। मद्शासनाज्ञाति लंघितं त्वामद्य यमालयं नेष्यामि॥६॥ अभीतवत्। किं बलं यस्य स किंबलः॥७॥८॥ वशं प्रणीताः इत्यत्र हेतुः स ईश्वर
इति। उरवः क्रमाः पादविक्षेपा यस्य पराक्रमा इति वा। ओज आदिरूपः सत्त्वं धैर्यं बुद्धिर्वा॥९॥ ॥ ॥

मच्छत्रुरसौ कथं ममापि समरव्ववलं स्यादत आह जहीति। आत्मनश्च समस्य भावं त्यज। अजितादात्मनो मनसः ते विना अन्ये विद्विषो न संति किंच अतद्धि हितं देवहि। साम्येन मनसो धारणमेव समर्हणमाराधनं॥१०॥ मया दिग्विजये सर्वे जिताः अतः सांप्रतं न संतीति मत्यमिति तेवे तत्राह दस्यूनिति। एके लवा हंशा मंदाः। पुराआदौ लुंपतः सर्वस्वं हरतः षडिंद्रियलक्षणांश्छत्रूनविजित्य अजित्वा दश दिशः स्वयं जिता मन्यंते। साधोस्तु जितचित्तस्य देहिनां समस्य ज्ञस्य विद्वेषः स्वाज्ञानकल्पिताः परे शत्रवः कुतः स्युः॥

जह्यासुरं भावमिमं त्वमात्मनश्च समं मनो धत्स्व न संति विद्विषः। ऋतेऽजितादात्मन उत्पथस्थितात् तद्धि ह्यनंतस्य महत्समर्हणं॥१०॥ दस्यून्पुरा षण्न विजित्य लुंपतो मन्यंत एके स्वजिता दिशो दश। जितात्मनो ज्ञस्य समस्य देहिनां साधोः स्वमोहप्रभवाः कुतः परे॥११॥ ॥हिरण्यकशिपुरुवाच॥ ॥व्यक्तं त्वं
ति मर्तुकामोसि योऽतिमात्रं विकत्थसे मुमूर्षूणां हि मंदात्मन्ननु स्युर्विक्लवा गिरः॥१२॥ यस्त्वया मंदभाग्योक्तो मदन्यो जगदीश्वरः। क्वासौ यदि स सर्वत्र कस्मात्स्तंभे न दृश्यते॥१३॥ सोहं विकत्थमानस्य शिरः कायाद्धरामि ते। गोपायेत हरिस्त्वाद्य यस्ते शरणमीप्सितं॥१४॥ एवं दुरुक्तैर्मुहुरर्दयन् रुषा सुतं महाभागवतं महासुरः। खड्गं प्रगृह्योत्पतितो वरासनात् स्तंभं तताडातिबलः स्वमुष्टिना॥१५॥ तदैव तस्मिन्निनदोतिभीषणो बभूव येनांडकटाहमस्फुटत्। यं वै स्वधिष्ण्योपगतं त्वजादयः श्रुत्वा स्वधामात्ययमंग मेनिरे॥१६॥ स विक्रमन्पुत्रवधेप्सुरोजसा निशम्य निर्ह्रादमपूर्वमद्भुतं। अंतःसभायां न ददर्श तत्पदं वितत्रसुर्येन सु-
वसु
रारियूथपाः॥१७॥

॥११॥ व्यक्तं निश्चितं। विक्लवाः अनन्विता इत्यर्थः॥१२॥ हे मंदभाग्य यद्यसौ सर्वत्रास्ति तर्हि क्वास्तीति प्रह्लाद आह। सर्वत्रास्तीति हिरण्यकशिपुराह। तर्हि कस्मात्स्तंभे नास्ति प्रह्लादस्तु तं स्तंभं निरीक्ष्य माणो नमस्यन्नाह दृश्यत इति॥१३॥ हिरण्यकशिपुस्तं तमपश्यन्नाह सोहमिति॥१४॥ प्रह्लादेन शृंगिकृतांजलिना निरीक्ष्यमाणं तं स्तंभं ताडितवान्
॥१५॥१६॥ तत्पदं तस्य ध्वनेराश्रयं

वि
राम
१४

भगवांस्तदा अदृश्यत दृश्यो वभूव। किमर्थं। निजभृत्येन प्रह्लादेन यद्भाषितं। दृश्यत इति। तत्सत्यं विधातुं कर्तुं। तथा अखिलेषु भूतेषु स्वात्मनो व्याप्तिं च सत्यां क
र्तुं स्तंभे अदृश्यत। तत् किमर्थं भो ति केषु बलावेषु भूतेषु प्रथमहत्सु च। तत्र भगवान् नास्ति इति ते न च भृत्येन भाषितं तत्सत्यं कर्तुं तथा अत्यद्भुतं देत्यपन्नातकमतिवोरं रूपमुद्वह
न् दधत्। तत् किमर्थं निजभृत्यैः सनकादिशिष्यापानंतरमन्तुतत्त्वेभ्यो त्रिर्जन्मभिः शापमोक्षो लब्धाविति तत्सत्यं कर्तुं। तथा अत्यद्भुतं ब्रह्मसृष्टावदृष्टमश्रुतं च रूपमुद्वह
न्। तत्र नृसिंहाकारं तच्च मत्स्याकारं उद्वहन् सभायां मध्ये अदृश्य। तत् किमर्थं निजभृत्येन हिरण्यकशिपुना ब्रह्माणं प्रति यद्भाषितं। भूतेभ्यस्त्वद्विसृष्टेभ्यो मृत्युर्मा भूत् मम

सत्यं विधातुं निजभृत्यभाषितं व्याप्तिं च भूतेष्वखिलेषु चात्मनः। अदृश्यतात्यद्भुतरूपमुद्वहन् स्तंभे सभायां न मृगं न मानुषं॥ १८

मप्रतो ऽ इति। तथा नांतर्न वहिरिति। न नरैर्न मृगैरिति। ब्रह्मणा च निजभृत्येन तथा स्थितिः यद्भाषितं तत्सत्यं कर्तुं। न हि तद्ब्रह्मसृष्टं भूतं न च नरो वा मृगो वा न च सभा
गृहस्यांतः नं च पशवो ण एव तत् वहिः सर्वं तास्यां भाषितं सत्यं कर्तुं यच्च हिरण्यकशिपुना भाषितं कुतमेतद्विरोधे न स्तम्भे भवितेति। तथा। अयं मत्कृतस्त्विद्वयोऽस्मर इति। तत्र नारदेन नि
जभृत्येनेदं इति भाषितं अयं महान् संस्थानं प्राप्स्यति। अनंतानुभवः इत्यनेन च स्वस्य भक्तपक्षपातित्वं च यद्भाषितं तत्र सत्यं कर्तुं अदृश्यत। च कारात् निजभाषितं यत् कौन्तेय प्रतिजा
नीहि न मे भक्तः प्रणश्यतीति। तथा ते धाम हंसमुद्दन्तं स्थितं संसारसागरादित्यादि। तत्र सत्यं कर्तुं अदृश्यतेति इष्टव्यं अलमतिविस्तरेण॥ १८॥ ॥ ॥

भा०स०

३०

सदैवं पक्षं एवं ध्वनिं श्रुत्वा तदा अयं सत्त्वं प्राणिविशेषं सर्वतो विलोकयन् स्तंभस्य मध्यान्निर्गच्छन् नृमृगेंद्रयोर्मिश्रं रूपं अहो किमेतदिति मीमांसितवानिति त्रिभिः ॥१९॥
तस्यैवमलं तयानकं तन्नृसिंहरूपं मीमांसमानस्याग्रतो नृसिंहरूपो हरिः समुत्थितः। भयानकत्वमेव दर्शयंस्तद्रूपमनुवर्णयति त्रिभिः। प्रतप्तं चामीकरं स्वर्णं
तद्वच्चंडे लोचने यस्मिन्। सटा जटाः केसराः कंठरोमाणि स्फुरद्भिः सटाकेसरैर्जृंभितं साटोपमाननं यस्मिन् ॥२०॥ करालाः तुंगाः दंष्ट्रा यस्मिन्
करवालः खड्गः तद्वत् चंचला क्षुरांतवत्तीक्ष्णा जिह्वा यस्मिन् भ्रुकुटीयुक्तेन मुखेनोल्बणं। स्तब्धौ उन्नतौ शंकुवदूर्ध्वौ कर्णौ यस्मिन्। गिरिकंदरवदद्भुतं व्यात्तं

स सत्त्वमेवं परितो विपश्यन् स्तंभस्य मध्यादनुनिर्जिहानं। नायं मृगो नापि नरो विचित्रमहो किमेतन्नृमृगेंद्ररूपं ॥१९॥ मीमांसमानस्य समुत्थितोऽग्रतो नृसिंहरूपस्तदलं भयानकं। प्रतप्तचामीकरचंडलोचनं स्फुरत्सटाकेसरजृंभिताननं ॥२०॥ करालदंष्ट्रं करवालचंचलक्षुरांतजिह्वं भ्रुकुटीमुखोल्बणं। स्तब्धोर्ध्वकर्णं गिरिकंदराद्भुतव्यात्तास्यनासं हनुभेदभीषणं ॥२१॥ दिविस्पृशत्कायमदीर्घपीवरग्रीवोरुवक्षःस्थलमल्पमध्यमं। चंद्रांशुगौरैश्छुरितं तनूरुहैर्विष्वग्भुजानीकशतं नखायुधं ॥ ॥२२॥ ॥

व्यात्तमास्यं नासे च यस्मिन्। हनू कपोलप्रांतौ तयोर्भेदेन विदारणेन भीषणं ॥२१॥ दिविस्पृशन् कायो यस्मिन्। अलुक्समासः। अदीर्घा ह्रस्वा पीवरा स्थूला ग्रीवा यस्मिन्। उरु विशालं वक्षःस्थलं यस्मिन् तत्तथा। अल्पं मध्यमं उदरं यस्मिन्। चंद्रांशुवद्गौरैस्तनूरुहैर्लोमभिः छुरितं व्याप्तं विष्वक् सर्वतः प्रसृता भुजानामनीकानि सेनाः तेषां शतानि यस्मिन्। नखान्येवायुधानि यस्मिन् ॥२२॥ ॥ ॥

राम

३०

दुरासदं घातुमशक्यं सर्वाणि चनिजानि वज्रादीनि निहतराणि वज्रादीनि तिति एवायुधप्रवेकाः शस्त्रोत्तमाः तैर्विद्राविता दैत्यदानवा येन। तद्रूपं भीमां समानस्याय
तः समुच्छ्रितः इति पूर्वेणान्वयः। तदा विभवविप्रयोजनविमर्शपूर्वकं तेन सह दैत्यसत्तमः इमा हा। समस्तैः प्रायेण महामायाविना हरिणा मे ऽयमेवं भूतो वधः स्पष्ट एव हेतुः स्पष्ट
तश्चिंतितः। तथा यत्नेन समुद्यते न किं न किंचित्स्यादिति एवं ब्रुवन्नभ्यपतदित्यन्वयः॥२३॥ तदासौ असुरो नृसिंहस्यौजसि दीप्तो पतितः सन्। अलक्षितः अदृष्टो ऽभू

दुरासदं सर्वतिजेतरायुधप्रवेकविद्रावितदैत्यदानवं। प्रायेण मे ऽयं हरिणोरुमायिना वधः स्मृतो ऽनेन समुद्यते न किं॥२३॥ एवं ब्रुवंस्त्वभ्य
अपतद्गदायुधो नदन्नृसिंहं प्रति दैत्यकुंजरः। अलक्षितो ऽग्नौ पतितः पतंगमो यथा नृसिंहौजसि सो ऽसुरस्तथा॥२४॥ न तद्धि चित्रं खलु सत्वधा
मनि स्वतेजसा यो ऽसुरा ऽपिबत्तमः। ततो ऽभिपद्या ऽभ्यहनन्महासुरो रुषा नृसिंहं गदयोरुवेगया॥२५॥ तं विक्रमं तं सगदं गदाधरो महोरगं
तार्क्ष्यसुतो यथा ऽग्रहीत्। स तस्य हस्तोत्कलितस्तदासुरो विक्रीडतो यद्वदहिर्गरुत्मतः॥२६॥ असाध्वमन्यंत हृतौकसो ऽमरा घनच्छदा भारत सर्व
धिष्ण्यपाः॥२७॥

ता॥२४॥ सत्वधामनि सत्वप्रकाशे हरौ पतितः स पतमो मयस्यादर्शनं तद्धि चित्रं न भवति। तत्र हेतुः यो हरिः पुरा सृष्ट्यादौ प्रलयकालीनं तमः अंधकारं अहो अपिबत्
॥२५॥ तस्मिन्नपि विक्रमं तं ततः प्रहरंतां हस्ताद् उत्कलितः निःसृतः॥२६॥ तदा अमरा देवाः सर्वे धिष्ण्यपाः असाध्वमन्यंत। हृतान्योकांसि स्थानानि येषां ते तद्वि
या घनच्छदाः मेघांतरिताः संतः॥२७॥ ॥

रा०म० ३१

यस्य हस्तात्स्वयं मुक्तात्तं हरिं स्ववीर्यच्छिंकितं मन्यमानः खड्गचर्मणी प्रगृह्य पुनः संग्रामसज्जातं अल्पपद्यतेत्यन्वयः ॥ २८ ॥ श्येनस्येव वेगो यस्य तं शतचंद्रव
र्त्मभिः खड्गचर्ममार्गैः अच्छिद्रं यथा भवत्येवमुपर्यधश्चरंतं । अट्टहासमेवाह । खरं तीव्रं उत्स्वनेन महाशब्देनोल्बणं भयंकरं । तद्भयेन हरेरोजसा निमीलिते
अक्षिणी यस्य ॥ २९ ॥ ग्रहणे दृष्टांतः व्यालो यथा आखुं मूषकं । विदारणे दृष्टांतः । अहिं गरुड इवेति । विष्वक्सर्वतः स्फुरंतं निःसरंतं ग्रहणेनातुरं विवशं । इं
द्रेण सहस्राक्षेण प्रयुक्तेन कुलिशेन न क्षता त्वचा यस्य । द्वारि सभायां तं तमविहि: । ऊरू उरौ निपात्य नखैः सोन वांवरे न खैर्न व्यभ्रंति सुमद्भिर्वा । एवं दि

तं मन्यमानो निजवीर्यशंकितं यद्धस्तमुक्तो नृहरिं महासुरः । पुनस्तमासज्जत खड्गचर्मणी प्रगृह्य वेगेन जितश्रमो मृधे ॥ २८ ॥ तं श्येनवेगं शत
चंद्रवर्त्मभिश्चरंतमच्छिद्रमुपर्यधो हरिः । कृत्वाट्टहासं खरमुत्स्वनोल्बणं निमीलिताक्षं जगृहे महाजवः ॥ २९ ॥ विष्वक्स्फुरंतं ग्रहणातु
रं हरिर्व्यालो यथाखुं कुलिशाक्षतत्वचं । द्वार्यूरुमापात्य ददार लीलया नखैर्यथाहिं गरुडो महाविषं ॥ ३० ॥ संरंभदुष्प्रेक्ष्यकरालोचनो
नो व्यात्ताननांतं विलिहन्स्वजिह्वया । असृग्लवाक्तारुणकेशराननो यथांत्रमाली द्विपहत्यया हरिः ॥ ३१ ॥ नखांकुरोत्पाटितहृत्सरो
रुहं विसृज्य तस्यानुचरानुदायुधान् । अहन्समस्तान्नखशस्त्रपाणिभिर्दोर्दंडयूथोऽनुपथान्सहस्रशः ॥ ३२ ॥ ॥ हृ

वा नखक्षतपरिहाराय संध्यायामिति द्रष्टव्यं ॥ ३० ॥ दैत्यवधमुक्त्वा तद्गतमेव धर्ममाह । द्वाभ्यां । संरंभेण दुष्प्रेक्ष्ये अतिकराले । नि लोचने यस्य । असृग्लवैः रक्तकणै
र्विंदुभिः रक्ताः सिक्ताः अत एव अरुणाः केसरा आननं च यस्य सः । कइव । द्विपहत्यया गजवधेन हरिः सिंहो यथा ॥ एवंभूतस्तस्यानुचरान् । अहन् निःशस्त्रैः नखैः
॥ ३१ ॥ नखांकुरैरुत्पाटितं हृत्सरोरुहं यस्य एवं भूतं । दोर्दंडानां यूथा नियस्य सः तमनुपथायेयातान् । अन्यानपि तत्पक्षपातिन उत्पथ्यं ॥ ३२ ॥ ॥ ॥

भि

राम ३१

दैत्यवधव्यग्रस्य हरेराटोपमाहात्म्यात् सटाभिरवधूताः प्रकंपिताः परापतन् व्यशीर्यंत। तस्य दृष्ट्या विमुष्टरोचिषो विरोचिषः कांतेतिरस्कृतप्रभाः अभवन् निर्ह्रादः शब्दः तेन भीताः दिग्गजाः
॥३३॥ तस्य सटाभिरुत्क्षिप्तानि विमानानि तैः संकुला व्याप्ता मही प्रोत्सर्पत। ब्रह्मस्थानात् प्रकर्षेणोदसर्पत॥३४॥ स्वर्धष्टेपेस्वर्धर्मास्वर्यविवमवाकौतूहलेन तस्यासने उपविष्टं त

सटावधूता जलदाः परापतन् ग्रहाश्च तद्दृष्टिविमुष्टरोचिषः। अंभोधयः श्वासहता विचुक्षुभुर्निर्ह्रादभीता दिगिभा विचुक्रुशुः। द्यौस्तत्सटोत्क्षिप्तविमान
संकुला प्रोत्सर्पत क्ष्मा च पदातिपीडिता। शैलाः समुत्पेतुरमुष्य रंहसा तत्तेजसा खं ककुभो न रेजिरे॥३४॥ ततः सभायामुपविष्टमुत्तमे नृपासने संभृत
तेजसं विभुं। अलक्षितद्वैरथमत्यमर्षणं प्रचंडवक्त्रं न बभाज कश्चन॥३५॥ निशम्य लोकत्रयमस्तकज्वरं तमादिदैत्यं हरिणा हतं मृधे। प्रहर्षवेगोत्कलि
तानना मुहुः प्रसूनवर्षैर्ववृषुः सुरस्त्रियः॥३६॥ तदा विमानावलिभिर्नभस्तलं दिदृक्षतां संकुलमास नाकिनां। सुरानका दुंदुभयोऽथ जघ्निरे गंधर्वमुख्या न
नृतुर्जगुः स्त्रियः॥३७॥ तत्रोपव्रज्य विबुधा ब्रह्मेंद्रगिरिशादयः। ऋषयः पितरः सिद्धा विद्याधरमहोरगाः॥३८॥ मनवः प्रजानां पतयो गंधर्वाप्सरचारणाः।
यक्षाः किंपुरुषास्तात वेतालाः सिद्धकिंनराः॥३९॥ ते विष्णुपार्षदाः सर्वे सुनंदकुमुदादयः॥ ॥ ॥

याक्कोपि न बभाज नासेवत। न लक्षितो द्वैरथः प्रतियोद्धा येन॥३५॥ लोकत्रयस्य मस्तकज्वरं शिरोव्यथेव दुःसहं। प्रहर्षस्य वेगेन उत्कलितानि विकसितान्याननानि यासां ताः स्व
हरिं ववृषुः॥३६॥ नाकिनां विमानावलिभिः। सुराणामानकाः पटहाः। ते जघ्निरे वादिताः। स्त्रियोऽप्सरसो ननृतुः॥३७॥ ना गंधर्वा अप्सरसश्च चारणाश्चेत्यर्थः॥३९॥ ॥ ॥

नरशार्दूलं पुरुषोत्तमं ब्रह्माद्यैर्दृष्टसिंहस्पर्शं कथया कुलवेतसः ब्रह्मादेवाद्यैर्दैवैः संस्पृष्टः शक्रादिभिः पृथक्पृथक्॥ ४०॥ अनंताय अनंतं प्रसादयितुं नतोस्मि। अनंतत्वे हेतुः। दुरंताः शक्तयो यस्य। तत्कुतः विचित्राणि प्रसाधनानि यस्य। तत्किमर्थं। पवित्राणि शोधकानि कर्माणि यस्य। विचित्रवीर्यत्वमेवाह। विश्वस्येति। संदधते सम्यक् कुर्वंति। स्वयमपि अव्यय

मूर्द्धाभिवंद्यं जलनिधिष्ठा आसीनं तीव्रतेजसं। ददृशिरे नरशार्दूलं नातिदूरवराः पृथक्॥ ४०॥ श्रीब्रह्मोवाच॥ नतोऽस्म्यनंताय दुरंत शक्तये विचित्रवीर्याय पवित्रकर्मणे। विश्वस्य सर्गस्थितिसंयमान् गुणैः स्वलीलया संदधतेऽव्ययात्मने॥ ४१॥ ॥ श्रीरुद्र उवाच॥ कोपकालो युगांतस्ते हतोयमसुरो ल्पकः। तत्सुतं पाह्युपसृतं भक्तं ते भक्तवत्सल॥ ४२॥ ॥

यात्मने अप्रच्छन्नात्मस्वरूपाय॥ ४१॥ रुद्रस्तत्कोपकालानभिज्ञो नायं कोपावसर इति तं प्रार्थयते। सहस्रयुगांतस्तव कोपस्य कालः कोपायोग्यं ह्यायमित्याह। अल्पकः अल्पः। अतः कोपान्निवृत्य प्रह्लादं माहिंसीरित्याह। तत्सुतमिति। यद्वा। अकालेप्ययं कोपोस्मभक्तस्य रक्षणार्थं इति चेत् तर्हि इदानीं कोपं त्यक्त्वेमं पाहीत्यर्थः॥ ४२॥ ॥

इद्रुक्तेनास्माकं हविर्भागादिलालसः हुतभुक्प्रार्थ्यः किंतु त्वत्परिचर्यैव भवता भक्तरक्षणेन संरंभेण स्वकार्यमेव साधितं न स्वपरसिद्धत्वादुपसंहरैतं क्रोधमित्याशयेनाह हे परम नो स्माकं त्र
यता रक्षता लवता च्छीया एव भागादैत्यात्स्वात्पाहृताः। ज्ञातयमिणस्त्वेवे वयं तेषु भोक्तृत्वात्। अस्मदीयं हृदयकमलं च त्वत्स्वेहमेवैतावत्पर्यंतं भयहेतुत्वेतास्मत्स्थितिपथे नित्यं स्थितेनैतद्दे
पिनाक्रांतं व्याप्तं सत्प्रत्यवबोधितम्याय पाकरणेन विकाशंनीतं तव चैलोक्यैश्वर्यसाधनार्थमयमुद्यम इति चेत्। तत्राह। कालग्रस्तमिति। नेत्वांहे नारसिंह नरस्यसिंहस्यवाकार।

इंद्र उवाच॥ ॥ प्रत्यानीताः परम भवता त्रायता नः स्वभागा दैत्याक्रांतं हृदयकमलं त्वद्गृहं प्रत्यवबोधि। कालग्रस्तं कियदिदमहो नाथ शुश्रूषतां ते
मुक्तिस्तेषां नहि बहुमता नारसिंहापरैः किं॥४३॥ ॥ऋषय ऊचुः॥ ॥त्वं नस्तपः परममात्थयदात्मतेजो येनेदमादिपुरुषात्मगतं ससर्ज्ज। तद्विप्र
लुप्तममुनाद्य शरणपाल रक्षा गृहीतवपुषा पुनरन्वमंस्थाः॥४४॥ ॥
न्व

स्यांश्रिविर्हता॥४३॥ ऋषय ऊचुः तपः प्रवर्त्ततेनास्माकं महाननुग्रहः कृत इत्याहुः॥४४॥ त्वं नो यदात्थ परमं ध्यानलक्षणं तपः परमत्वहेतुः। आत्मन स्तव तेजः प्रभावरूपं। तदेवाहुः
येन तपसा आत्मनि लीनमिदं विश्वं ससर्ज्ज सृष्टवानसि। तत्तपः असुनादैत्येन विप्रलुप्तं कुंठितं मतहे शरणपाल। अद्य रक्षार्थं गृहीतेन। नेनवपुषा पुनरपि तपः कुरु तेत्य नुज्ञातवा
नसि। तस्मैतेनमः इत्युत्तरश्लोकचतुर्थपादस्यानुषंगः॥४५॥ ॥

पितरस्तत्र श्राद्धोद्धरणेन परमोपकारिणं प्रणमंति। श्राद्धानि श्रद्धाभुक्तानि पिंडादीनि तैर्नोस्मभ्यं पुत्रैर्दत्तानि प्रसलं बलात्। तत्स्वयमधिकृत्य बुभुजे। किं च तीर्थस्नानसमये दत्तं
तिलोदकमप्यपिबत्। तानि तस्योदराद्युत्राच्छित आहृतवान्नुकार्थं हत्वा नखैर्विदीर्णविपाय्य तस्मात्वया विदारणात्स्पातकृत पिंडोद्धरणमेव फलमिति भावः॥४५॥ यो
गसिद्धानां तिं अणिमादिसिद्धिं नानाश्चनेकेदपयिसात्तं। तस्मै नुभ्यं तं नवा शुदिश्य॥४६॥ विद्यां अतद्धनि दिलन्नाणां अनुराद्धां संप्राप्तां संख्ये युद्धे॥४७॥ रत्नानि फणासुद्धि

पितरऊचुः॥ ॥श्राद्धानि नोधिबुभुजे प्रसलं तनूजैर्दत्तानि तीर्थसमयेपि तिलांबु स स्यपः। तस्योदरान्नखविदीर्णवपाद्यआर्छत्तस्मै नमो नृह
रयेखिलधर्मगोप्त्रे॥४५॥ ॥सिद्धाऊचुः॥ योनोगतिं योगसिद्धामसाधुरहार्षीत्योगतपोबलेन। नानादर्पं तं नखैर्निर्ददार तस्मै तुभ्यं प्रण
ताःस्मो नृसिंह॥४६॥ ॥विद्याधराऊचुः॥ ॥विद्यां पृथग्धारणयानुराद्धां न्यषेधदज्ञोबलवीर्यदृप्तः। सयेन संख्ये पशुवद्धतस्तं मायानृसिंहं प्रण
ताःस्म नित्यं॥४७॥ नागाऊचुः॥ ॥येन पापेन रत्नानि स्त्रीरत्नानि हृतानि नः। तद्वक्षःपाटनेनास्मत्दत्तानंद नमोस्तु ते॥४८॥ ॥मनवऊचुः॥ ॥
मनवो वयं तव निदेशकारिणो दितिजेन देवपरिभूतसेतवः। भवता खलः स उपसंहृतः प्रभो करवाम ते किमनुशाधि किंकरान्॥४९॥ ॥ ॥

तानि स्त्रीरत्नानि च उत्तमांस्त्रियः॥ आसां स्त्रीणां दत्त आनंदो येन तत्संबोधनं। पागंतरे अस्माकं दत्त आनंदो येनेति॥४८॥ नृसिंहेनावलोकिताः संतो महर्षिवद्धांजल
योमनवः ऊचुः॥ मनवो वयं धर्मपालकाः परिभूताः सेतवो वर्णाश्रमधर्ममर्यादा येषां ते। अनुशाधि अनुशिक्षय॥४९॥ ॥ ॥

प्रजापतयोपितदवलोकिताःप्रोचुःहेपरेशतेत्वयायेसृष्टाःप्रजेशावयंयेननिषिद्धाःसंतःप्रजानसृजामःसएषभिन्नंवक्षोयस्यसः।इतिशिष्टंमृतःशेते।अतःपरंप्रजाःसृक्ष्या
मइतिहृष्यंतआहुःहेसत्वमूर्तेतवायमवतारोजगतोमंगलंगंधर्वाअपितदवलोकिताःप्रोचुःहेविभोवयंतेत्वदीयाःनटानर्तकाःयेनाद्यस्वतपेगायकाश्चयेनस्वाधीनाःकृ

प्रजापतयऊचुः॥ ॥प्रजेशावयंतेपरेशाभिसृष्टानयेनप्रजावैसृजामोनिषिद्धाः।सएषत्वयाभिन्नवक्षानुशेतेजगन्मंगलंसत्वमूर्तेवतारः॥५०॥
॥ ॥श्रीगंधर्वाऊचुः॥ ॥वयंविभोतेनटनाट्यगायकायेनात्मसाद्वीर्यबलौजसाकृताः।सएषनीतोभवतादशामिमांकिमुत्पथस्थःकुशलायकल्प
ते॥५१॥ ॥चारणाऊचुः॥ ॥हरेतवांघ्रिपंकजंभवापवर्गमाश्रिताः।यदेषसाधुहृच्छयस्त्वयासुरःसमापितः॥५२॥ ॥यक्षाऊचुः॥ ॥वयमनुचरमुख्याः
कर्मभिस्तेमनोज्ञैस्तइहदितिसुतेनप्रापितावाहकत्वं।सतुजनपरितापंतत्कृतंजानताते नरहरउपनीतःपंचतांपंचविंश॥५३॥ ॥
नौ

ताःकथंभूतेनवीर्यंशौर्यंबलंशक्तिःताभ्यामोजःप्रभावोयस्यतेन।इमांदशांस्थितिंउचितमेतदित्याहुः।किमिति॥५१॥भवापवर्गंसंसारनिवर्तकं।आश्रयणेहेतुः।यद्य
स्मात्साधूनांहृदिभयजनकत्वेनशेतेतिष्ठतीतितथा।सएषोसुरस्त्वयामासमापितःअंतंनीतः॥५२॥मनोज्ञैःकर्मभिस्तेअनुचरेषुमुख्याः।पंचतांमृत्युंहेपंचविंशचतुर्विंशति
तत्वतियामकः॥५३॥ ॥ ॥

भा०स० ३४

किंपुरुषास्तोत्वं प्राप्तोतुं केवयं वराका इत्याहुः। वयं किंपुरुषाः कुत्सिताः प्राणिनः। त्वं तु महानद्भुतप्रतापपुरुषः। न च यं महान्दैत्यो हत इति किं न वर्ण्यते इत्याशंक्याह कियदेत्या
हुः। अयमिति ॥५४॥ सत्रेषु यज्ञेषु। तेन यो हतः। एतद्दिष्ट्या मङ्गलं कृतं ॥५५॥ अमुना दितिजेन विष्टिं निर्मूल्यकर्म अनु निरंतरं कारिताः। अथ नः विभवाय समृद्ध्ये भव ॥५६॥

किंपुरुषा ऊचुः॥ ॥वयं किंपुरुषास्त्वं तु महापुरुष ईश्वरः। अयं कुपुरुषो नष्टो धिक्कृतः साधुभिर्यदा ॥५४॥ वैतालिका ऊचुः॥ ॥सभासु सत्रे
षु तवामलं यशो गीत्वा सपर्यां महतीं लभामहे। यस्तामनैषीद्वशमेष दुर्जनो दिष्ट्या हतस्ते भगवन्यथामयः॥ ॥किंनरा ऊचुः॥ ॥वयमीश कि
न्नरगणास्तवानुगा दितिजेन विष्टिममुनानुकारिताः। भवता हरे स वृजिनोऽवसादितो नरसिंह नाथ विभवाय नो भव॥५६॥ ॥विष्णुपार्षदा ऊचुः॥
अद्यैतद्धरिनररूपमद्भुतं ते दृष्टं नः शरणद सर्वलोकशर्म। सोऽयं ते विधिकर ईश विप्रशप्तस्तस्येदं निधनमनुग्रहाय विद्मः॥५७॥ ॥इति श्री भा
गवते महापुराणे सप्तमस्कंधे प्रह्लादचरिते दैत्यराजवधो नामाऽष्टमोऽध्यायः॥८॥ ॥

किं क.८।

८

नो मा कं भक्तानां शरणाश्रय प्रदः सर्वेषां लोकानां सर्वमंगलमेतदद्भुतं रूपं अद्यैव दृष्टं न तु पूर्वं। विधिकरः॥ ॥इति श्रीमत्सप्तमेऽष्टमः॥ ॥ ॥ ॥ ३४
स्मा

नरमृगेन्द्रलक्षणाभीत्यावोदितोसुरबालकः। कोपप्रशमन यत्नश्लोकेन्द्रसिंहमतिभीषणं। उग्रोप्युग्रग्रहः एवायं प्रसन्नतानां नांतःकेशरी। केशरी वक्ष्यपोतानामत्येषामुग्रविग्रहः ॥ इ
द्यात्याशामोक्तं भक्त्यात्युत्कंपितामाह। एवमिति सप्तभिः। एवं इत्थं वर्णिताः स्तुवंतः। मन्युना संरंभमावेशो यस्य तं। उपगंतुं नाशक्नुवन् ॥ १॥ महदद्भुतं रूपं दृष्ट्वा शंकिता सती
तं नोपजगाम। अद्भुतत्वे हेतुः। अदृष्टेति ॥ २॥ उपेहि उपगच्छ ॥ ३॥ ५॥ काल एवाहिस्तस्मात् त्रिवित्रस्तधियां तेषां कृतमभयं येन तत ॥ ५॥ तस्य करस्पर्शेन धुतं निरस्तमखिल

नारद उवाच। ॥ एवं सुरादयः सर्वे ब्रह्मरुद्रपुरःसराः। नोपैतुमशकन्मन्युसंरंभं सुदुरासदं ॥ १॥ साक्षाच्छ्रीः प्रेषिता देवैर्दृष्ट्वा तन्महदद्भुतं। अदृष्टा
श्रुतपूर्वत्वात्सा नोपेयाय शंकिता ॥ २॥ प्रह्लादं प्रेषयामास ब्रह्मावस्थितमंतिके। तात प्रशमयोपेहि स्वपित्रे कुपितं प्रभुं ॥ ३॥ तथेति शनकै राजन्
महाभागवतोर्भकः। उपेत्य भुवि कायेन ननाम विधृतांजलिः ॥ ४॥ स्वपादमूले पतितं तमर्भकं विलोक्य देवः कृपया परिप्लुतः। उत्थाप्य तच्छीर्ष्ण्यदधात्कराम्बुजं ष्ण्ये
कालाहिवित्रस्तधियां कृताभयं ॥ ५॥ स तत्करस्पर्शधुताखिलाशुभः सपद्यभिव्यक्तपरात्मदर्शनः। तत्पादपद्मं हृदि निर्वृतो दधौ हृष्यत्तनुः क्लिन्नहृद
श्रुलोचनः ॥ ६॥ अस्तौषीद्धरिमेकाग्रमनसा सुसमाहितः। प्रेमगद्गदया वाचा तन्न्यस्तहृदयेक्षणः ॥ ७॥ ॥

मशुभं यस्य। सपदि तत्क्षणमेव। अभिव्यक्तं अपरोक्षीभूतं परात्मदर्शनं ब्रह्मज्ञानं यस्य सः निर्वृतः सन् हृदि दधौ। हृष्यंती रोमांचिता तनुर्यस्य। क्लिन्नं प्रेमार्द्रं हृद् यस्य। अश्रूणि लो
चनयोर्यस्य। परमभक्तरूपार्थतया दृष्ट्वोक्तं न साधनत्वेनेत्यर्थः ॥ ६॥ सुसमाधिमेवाह। तस्मिन्नेव न्यस्तं हृदयमीक्षणं च येनेति ॥ ७॥ ॥ ॥

स्वस्मिन्निव समस्तेषु तत्कृपास्पदत्वे प्रह्लादः स्तौतीति सप्तदशभिः । वाचारितों हरिं तत्र तावदात्मनो भगवतः स्तुतावनधिकारमिवाशंक्याधिकारं संभावयन्नाह । ब्र
ह्मादय इति पंचभिः । मुनयो मननशीलाः सिद्धा ज्ञानिनोपि । कथंभूताः सत्त्व एवैकस्मिंस्तानो विस्तारो यस्याः सा मतिर्येषां तथाविधा अपि वचसां प्रवाहैरपि नाद्याव
द्यतिर्वत्स्वप्रमाणोरपि यमाराधयितुं न पिप्रुः न पूर्णाः न शक्ता इत्यर्थः । स हरिर्मे कथं तोषं प्राप्तुमर्हति । तत्र हेतुः उग्रा घोरा आसुरी जातिर्यस्य ॥ ८ ॥ एवं हरितोष

प्रह्लाद उवाच ॥ ॥ ब्रह्मादयः सुरगणा मुनयोथ सिद्धाः सत्त्वैकतानमतयो वचसां प्रवाहैः । नाराधितुं पुरुगुणैरधुनापि
पिप्रुः किं तोष्टुमर्हति स मे हरिरुग्रजातेः ॥ ८ ॥ मन्ये धनाभिजनरूपतपःश्रुतौजस्तेजःप्रभावबलपौरुषबुद्धियोगाः । नाराधना
यहि भवंति परस्य पुंसो भक्त्या तुतोष भगवान्गजयूथपाय ॥ ९ ॥ ॥ ॥

णोपायमाह मन्य इति । द्वाभ्यां । अभिजनः सत्कुले जन्म । रूपं सौंदर्यं । श्रुतं पांडित्यं । ओज इंद्रियनैपुण्यं । तेजः कांतिः । प्रभावः
प्रतापः । पौरुषमुद्यमः । बुद्धिः प्रज्ञा । योगोऽष्टांगः । एते धनादयो द्वादशापि गुणाः परमस्य पुंसः आराधनाय न भवंति । हि यतः केवलया भक्त्यैव गजेंद्राय
तुष्टो भवत् । एवं तत्सेवकेवलया हरेस्तोषः संभवतीत्युक्तं ॥ ९ ॥ ॥ ॥

एते ज्ञानादयः गुणाः महाव्रताः परमपुरुषार्थसाधनं
नमस्तो ... श्री ... णाख्यो ... र्थः

इदानीं भक्तिं विना नान्यत्किंचित्तोषहेतुरित्याह। विप्रादिति। पूर्वोक्ता धनादयो द्विषड्द्वादश गुणास्तैर्युक्तात् विप्रादपि श्वपचं वरिष्ठं मन्ये। यद्वा सनत्सुजातोक्ता द्वादश ध र्मादयो गुणा द्रष्टव्याः। तदुक्तं। ज्ञानं च सत्यं च दमः श्रुतं च ह्यमात्सर्यं ह्रीस्तितिक्षानसूया। यज्ञश्च दानं च धृतिः शमश्च महाव्रता द्वादश ब्राह्मणस्येति। कथंभूतात् विप्रात् अर विंदनाभस्य पादारविंदाद्विमुखात्। कथंभूतं श्वपचं। अरविंदनाभे अर्पिता मनआदयो येन तं। ईहितं कर्म्म वरिष्ठत्वे हेतुः स एवंभूतः श्वपचः सर्व्वकुलं पुनाति। भूरिमानो गर्व्वो यस्य स तु विप्रः आत्मानमपि न पुनाति कुतः कुलं। यतो भक्तिहीनस्य ते गुणा गर्व्वाय भवंति न तु शुद्धये। अतो हीन इति भावः॥१०॥ तर्हि किं धनाद्यर्प्पणेन सन्मानं

विप्राद्द्विषड्गुणयुतादरविंदनाभपादारविंदविमुखात्श्वपचं वरिष्ठं। मन्ये तदर्पितमनोवचनेहितार्थप्राणं पुनाति स कुलं न तु भूरिमानः॥
॥१०॥ नैवात्मनः प्रभुरयं निजलाभपूर्णो मानं जनादविदुषः करुणो वृणीते। यद्यज्जनो भगवते विदधीत मानं तच्चात्मने प्रतिमुखस्य यथा मु
खश्रीः॥११॥ ॥

शंकातइव भगवानपेक्षते तेनेत्याह। नैवेति। अयं प्रभुरीश्वरः। अविदुषो ऽस्मकाज्जनात् मानं पूजामात्मनोऽर्थे न वृणीते नेच्छति। यतो निजलाभेनैव पूर्णः। तर्हि पूजां नेच्छेदे व। तत्राह। करुणः कृपालुः। अतो वृणीते च। तत्र हेतुः। यद्यदिति। यं यं मानं। यद्वा। यद्यस्मात्। यद्येन धनादिना भगवते मानं विदधीत तत्तदेवात्मने भवति नान्यतः। यथा मुखे कृतो वतिलकादिश्रीः शोभा प्रतिबिंबस्य भवति न तु साक्षात्तस्यैव कर्तुं शक्यते तद्वत्॥११॥ ॥ ॥

ला॰स॰
३८

यस्मादेवंभगवान्नन्नेयेकतृप्यति।तस्मादहंनीचोऽपिविगतविक्लवःगतशंकःसन्नुईश्वरस्यमहिम्नहिमानंसर्वप्रयत्नेनस्वमनीषानुसारेणानुवर्णयामि।अजानतोप्रवृत्तिकारणे
हेतुमाह।येनैवमहिम्नाऽनुवर्णितेनअविद्ययासंसारमग्नविष्टःशुभान्नपूयेतस्तुस्तोतृनमहि।अन्यस्यतथाशोधकस्याभावादित्यर्थः॥१२॥तदेवमात्मनःस्तुतावनधिका

तस्मादहंविगतविक्लवईश्वरस्यसत्वात्मिनामहिम्नाणामियथामनीषं।नीचोऽजयागुणाविसर्गमिनुप्रविष्टःपूयेतस्मेनहिशुभानतुवर्णितेना
॥१२॥सर्वेह्यमीविधिकरास्तवसत्वधाम्नोब्रह्मादयोवयमिवेशनचोद्विजंतः॥न्नेमायत्नूतयठता।तमस्तुरवायचास्यविक्रीडितंभगवतोरुचिरा
वतारैः॥१३॥ ॥

रंपरिहृत्येदानींतंस्तुवन्नुकोपोपसंहारंप्रार्थयते।सर्वेहीतिद्वाभ्यां।भोईशअमीउद्विजंतोविभ्यतःसर्वेब्रह्मादयःसत्वमूर्तेस्तवविधिकराःत्वन्नियोगकर्त्तारोभक्ताएवनान्ये
नत्ववयमसुराःपूर्ववैरभावनेनतेभक्ताः।किंतुअहमद्येवतवरुचिरैरवतारैर्विविधंक्रीडनं।अस्यविश्वस्यक्षेमादिप्रयोजनायनतुभयोत्पादनाय॥१३॥ ॥ ॥

राम
३८

तत्तस्मादेषां तत्परिहाराय मन्त्रं यच्छ उपसंहराय दर्थे अयं मन्त्रः मचाणुरः साधूनां संतोषार्थं अयं हतः। अतः परं क्रोधेन कार्याभावान्नं नियच्छ। न च त्वेषां वधेन साधुः किं
मोदेत तत्राह। वृश्चिकादेः परोपद्रवकारिणः अपत एव प्रजातयाह। पापवधेन तत्स्पेव तद्भइं ज्ञातमिति साधुरपि मोदेतैव। तर्हि विहृनां सुखावहत्वाद्दुष्टक्रोधं न त्यजामीति चेत्। त
त्राह। लोकाश्च निर्वृतिं इताः प्राप्ताः संतः प्रतियंति क्रोधोपसंहारं प्रतीक्षंते। तर्हि जनानां पुनर्भयाभावाय मन्त्रं धरयामीति चेत्तत्राह। रूपमिति। विभयाय भयनिवृत्त्यै यत्तद्रूप

तद्यच्छ मन्त्रमसुरस्त्वं हतश्च प्रायमोदेत साधुरपि वृश्चिकसर्पहत्या। लोकाश्च निर्वृतिमितां प्रतियंति सर्वे रूपं ते सिंह विभयाय जनाः स्मरंति॥१४॥
नाहं विभेम्यजित तेऽतिभयानकास्यजिह्वार्कनेत्रभ्रुकुटीरभसोग्रदंष्ट्रात्। आंत्रस्रजःक्षतजकेसरशंकुकर्णान्निर्ह्रादभीतदिगिभादरिभिन्नखाग्रा
त्॥१५॥ ॥

स्मरणादेव भयनिवृत्तेर्न मन्त्रधारणोत्कृत्यमस्तीत्यर्थः॥१४॥ त्वं वेद्भिभेषि तर्हि प्रजामीति चेत्। तत्राह। नाहमिति। भो अजित ते अस्माद्रूपात् अहं न विभेमि। कथंभूतात्। अत्या
स्यं च जिह्वा च अर्कसदृशनेत्राणि च भ्रुकुटी तां भसा आटोपस्त्व। उग्रा दंष्ट्राश्च एतानि अतिभयानकानि यस्मिंस्तत्तस्मात्। आंत्रमय्यः स्रजो यस्मिंस्तत् तत्क्षतं अस्रक्तत्स्मात्। क्षतजा
क्ताः केसरा यस्मिंस्तत् शंकुवदुन्नतौ स्तब्धौ कर्णौ यस्मिंस्तत्तस्मात्। निर्ह्रादेन भीता दिगिभा यस्मात्। अरीन्भिंदंतीत्यरिभिंदितानि नखाग्राणि यस्मिन्। एवंभूतादपि ते रूपाद्हं न विभेमि
१५॥

महद्भयं वन्मदस्तीत्याह। नमोऽस्मीति। दुःसहं यद्भयं संसारचक्रे कस्तं दुःखं तस्मादहं नमोऽस्मि तत्र वयसतां हिंस्राणां मध्ये घ्वकर्म्मभिर्बद्धः सन्नरणी तः निर्विण्णोऽस्मि हे कृपार्णव सलीलाहे ऽशरणनमस्कार तुवं वीतः सन्नपवर्गाभूतं शरणं तवांघ्रिकमलं प्रति ध्यय सेमामात्का स्यामि॥१६॥ दास्ये सति मत्री तिरिति वेतत्तर्हिना। ता।

नमोऽस्त्वहं कृपणार्णवत्सल दुःसहोग्र संसारचक्रकदनाद्ग्रसतां प्रणीतः। बद्धः स्वकर्मभिरुशन्न मत्तोंघ्रिमूलं प्रीतोऽपवर्गमिरणं ह्वयसे कदा तु॥१६॥ यस्मात्प्रियाप्रियवियोगसंयोगजन्मशोकाग्निना सकलयोनिषु दह्यमानः। दुःखौषधं तदपि दुःखमतद्धियाहं भूमन्भ्रमामि वद मे तव दास्ययोगं॥ १७॥ ॥

योनिषु क्लिश्यमानस्य मम दास्यज्ञानाभावात्त्वमेव तदुपदिशेति प्रार्थयते॥१६॥ यस्मात् प्रियैरप्रियैश्च यथासंख्यं वियोगात्संयोगात्संजन्म यस्य तेन शोकाग्निना सकलयोनिषु दह्यमानोऽस्मि। दुःखस्य प्रतीकारः कार्य इति चेत्तत्राह। दुःखस्यौषधं प्रतीकारस्तदपि दुःखमेवैषपि अतद्धियादेहाद्यभिमानेन न तु भ्रमामि। अतः हे भूमन्तवविमो मेव तं दास्यरूपं योगं निस्तारोपायं वद॥ १७॥ ॥

ए

एवम

दा

ननु दास्ययोगो न प्रह्लादस्यापि तदंतरायभूतानां पूर्वोक्तानां दुःखानां कुतः परिहारः तत्राह सोऽहं त्वद्दासः सन् भो नृसिंह तव लीलाकथा अनुगृणन् दुर्गाणि महादुःखान्यंजसा ति-
तर्मि तरामि। तरणानिष्यामीत्यर्थः। तत्र हेतुः। गुणैः रागादिभिर्विशेषेण प्रमुक्तः सन् तत्कुतः। ते पदयुगमेवालयो येषां भक्तानां त एव हंसा ज्ञानिनः तैः संगो यस्य स तथा सोऽहं। कथं भू-
तस्य कथा तत्राह। प्रियस्येत्यादि कुतो ज्ञाताः विरिंचेन गीताः ततः संप्रदायप्रवृत्ताः तथा चाथर्वणी श्रुतिः देवो ह वै प्रजापतिमब्रुवन्नित्यादि। दास्ये प्रवृत्तस्य भगवदनुग्रहेण स-
त्संगः ततो वीतरागता ततो लीलाकथानुवर्णनं। ततश्च दुःखानभिभवः स्यादिति वाक्यार्थः।२८। ननु दुःखे प्राप्ते तत्प्रतीकारो लोके प्रसिद्ध एव किं भक्त्यादिना तत्राह। बाल

सोऽहं प्रियस्य सुहृदः परदेवताया लीलाकथास्तव नृसिंह विरिंच्यगीताः। अंजस्तितर्म्यनुगृणन् गुणविप्रमुक्तो दुर्गाणि ते पदयुगालयहंससंगः।।२८
बालस्य नेह शरणं पितरौ नृसिंह नार्तस्य चागदमुदन्वति मज्जतो नौः। तप्तस्य तत्प्रतिविधिर्य इहांजसेष्टस्तावद्विभो तनुभृतां त्वदुपेक्षितानां।।२९।। ।।

स्येति। भो नृसिंह तप्तस्य तत्प्रतिविधिर्दुःखप्रतीकारः इह लोके योंजसाऽभीष्टः स त्वयोपेक्षितानां तावदेव क्षणमात्रमेव न त्वात्यंतिकः। तदेवाह। बालस्य पितरौ शरणं रक्षका-
तः विह न भवेतां स्वपाल्यमानस्यापि तस्य दुःखदर्शनात्। क्वचिदजीर्णान्निदिष्टता। स्याभ्वतद्वक्षदर्शनाद्। न चार्तस्य रोगिणः अगदो धर्ममौषधं शरणं। कृतेऽप्यौषधे पुनर्दुःखदर्शनात्।
न च उदन्वति समुद्रे मज्जतः प्लवः नौः शरणं। तया सह मज्जनदर्शनात्। अतस्त्वमेव शरणमित्यर्थः। अथ चैवं काकाक्ष्या व्याख्येयं तप्तस्य तत्प्रतिविधिर्य इह तावत्प्रसिद्धः स त्वदुपेक्षिता-
नां किमंजसेष्टः अपि तु नेष्ट एव। यद्वा यस्तावदिह प्रतिविधिरिष्टः स किमंजसा नैवांजसेत्यादि योज्यं बालस्येत्यादि पूर्ववदेव।।२९।। ।। ।।

वा॰३

भा॰स॰ ननु क्वचित् कुतश्चित् केन चित् कदाचित् कश्चित् ईदृक्को ऽपि दृश्यत एवेत्याशंक्य तत्रापि तद्रूपेणा त्वमेव रक्षकः इत्युररीकृत्य तस्यैव सर्वात्मतामाह यस्मिन्निति। अपरो ऽर्वाची
३८ नः पित्रादिः परो ब्रह्मादिर्वा भावः कर्त्तेति भावः कर्तृत्वं तत्कारकैर्यद्यत्करोतीति तत्सर्वं भवत एव स्वरूपं न तु पृथक्। यस्मिन्नधिकरणे। यतो निमित्तात्। यर्हि यस्मिन्काले। ये
न करणेन। येन हेतुना कर्त्रा संचोदितश्च। यस्य संबंधि यस्माद् अपादानात्। यस्मै संप्रदानाय यदीप्सिततमं। एकत्वे ऽपि वंसप्त सप्तविभक्त्यर्थाः। यथा येन प्रकारेणेति क्रि
याविशेषणम्। उतानामव्ययानामर्थः। पृथक्स्वभावः सत्वादिप्रकृतिः करोति उत्पादयति। विकरोति रूपांतरं नयतीति॥ २०॥ अतो ऽन्यस्य रक्षकस्याभावं तत्संसारिणां बनि

यस्मिन्यतो यर्हि येन च यस्य यस्माद्यस्मै यथा यदुत यस्त्वपरः परो वा। भावः करोति विकरोति पृथक्स्वभावः संचोदितस्तदखिलं भवतः स्व
रूपं॥ २०॥ मायामतः सृजति कर्म्ममयं बलीयः कालेन चोदितगुणानुमतेन पुंसः। छंदोमयं यदजयार्पितषोडशारं संसारचक्रमज को ऽति
तरेत्त्वदन्यः॥ २१॥

त्पत्त्या वधमेवमाशरणा। तं रक्षेति प्रार्थयते। मायेति द्वाभ्यां। त्वदंशस्य पुंसो ऽनुमतेन ईक्षणलक्षणेन रूपेण अनुग्रहेण मनःप्रधानं लिंगं माया सृजति। कथंभूता कालेन चो
दिताः क्षोभिताः गुणा यस्याः। कथंभूतं मनस्कर्ममयं कुर्वद्रूपं बलीयः दुर्जयं। छंदोमयं वेदोक्तकर्मप्रधानं च। अजया अविद्यया तत्संबंधार्थं अर्पिताः षोडश अरा
विकारा यस्मिन्। यदेवंभूतं संसारचक्रात्मकं मनः तत्को ऽतितरेत्। हे अज त्वदन्यः त्वत्तः पृथक्कृताः। त्वामसंजन्नित्यर्थः॥ २१॥ ॥ ॥

३८

नतुममपितामहाणांसंवंधात्कर्तव्याद्यविशेषाच्चवन्मकोविशेषइत्यतआह।मइति।स्वधाम्नाविछिन्नपानित्यंविजिताआत्मनोवुद्धेर्गुणायेनसहितंत्वं।यतःकालःमायाप्रेरकःअ
तएववशीकृताविसृज्यंतांकार्य्याणांविसर्गाणांसाधनानांचशक्तयोयेन।अतःइक्षुदंडवन्निष्पीड्यमानंमांउपकर्षस्वसमी पंतया।२२।नतुलोकपालानांभोगाःअभुंजं
पित्र्यंवाराज्यमिदंदास्यामिकिमितिसंसाराडुद्विजसेतत्राह।दृष्टाइतित्रिभिः।श्रियःसंपदःविभवउद्भवः।आयुरादयोदृष्टाइतिकाक्वाउक्तवन्मुक्तं।तदेवाह।येअस्मात्पितुः

मत्वंहिनित्यविजितात्मगुणःस्वधाम्नाकालोवशीकृतविसृज्यविसर्गशक्तिः।चक्रेविसृष्टमजयेश्वरषोडशारेनिःपीड्यमानमुपकर्षविभोप्रपन्नं
॥२२॥दृष्टामयादिविविभोखिलधिष्ण्यपानामायुःश्रियोविभवइछतियान्जनोयं।येस्मात्पितुःकुपितहासविजृंभितभ्रूविस्फूर्जितेनलुलिताःसतुते
निरस्तः॥२३॥तस्मादमूस्तनुभृतामहमाशिषोज्ञआयुःश्रियंविभवमैंद्रियमाविरिंच्यात्।नेछामितेविलुलितानुरुविक्रमेणकालात्मनोपनयमां
निजभृत्यपार्श्वं॥२४॥ ॥

कोपहासविकृतभ्रूसंगमात्रेणविध्वस्ताःसचत्वया।निरस्तः।२३।यस्मादेवंतस्मात्आशिषःभोगान्ज्ञःतत्परिपाकंविद्वानअहंऐंद्रियंइंद्रियेभोग्यंब्रह्मणोभोगमपिब्रा
म्यकिमपिनेछामि।तेकालात्मनाउरुविक्रमेणविलुलितानविध्वस्तानणिमादीनपि।२४॥ ॥ ॥

ला० स०
३८

किंच। वर्त्तमानकालेऽपि न भोगार्हमित्याह। श्रुतिः श्रवणं तद्देवसुखं यावत् ताः मृगतृष्णिकावन्मिथ्याभूताश्चाशिषः श्रुत्वाऽशेषाणां रुजां रोगाणां विरोहः उद्भवस्थानं च
वेदं कलेवरं। एवं चेत् सर्वोऽपि जनः किं न विरज्यतीत्यत्राह। यदपि यद्यपीति एवंविद्वान् प्रजनस्तथाऽपि न निर्विद्यते विरक्तो न भवति। कुतः कामएवानलस्तं। मधुलवैः
सुखलवैर्दुःसाध्यैरपि शमयन्नुक्तामाग्निशमनत्वयस्य प्रतिवेदिगप्यवकाशो नास्तीत्यर्थः। यद्वा। अचिंत्यमिदं तव मायाचेष्टितमिति भावः॥ २५॥ तर्हि त्वं कथं निर्विण्णोऽसि

कुत्राशिषः श्रुतिसुखा मृगतृष्णिरूपाः क्वेदं कलेवरमशेषरुजां विरोहः। निर्विद्यते न तु जनो यदपीति विद्वान् कामानलं मधुलवैः शमयन्दुरा-
पैः॥ २५॥ क्वाहं रजःप्रभव ईश तमोऽधिकेऽस्मिन् जातः सुरेतरकुले क्व तवानुकंपा। न ब्रह्मणो न तु भवस्य न वै रमाया यन्मेऽर्पितः शिरसि पद्मक-
रः प्रसादः॥ २६॥

अतर्हीपि मयि प्रवृत्तं यावत्कृपयैवेत्याशयेनाह। क्वाहमिति। रजःप्रभव ईश रजस्तमय स्पसः। सप्तमं तं वा कुलविशेषणं। तमोऽधिकं यस्मिंस्तस्मिन् असुराणां कुले जातोऽहं। क्व। क्व
तवानुकंपा। तामेवाह। ब्रह्मादीनां शिरसि यो नैवार्पितः स पद्मवत्सकलसंतापहरः करः प्रसादः प्रकृष्टानुग्रहार्थं यो मे शिरस्यर्पित इति। यत् तया अनुकंपयेति वा॥ २६॥ ॥

राम
३८

ननत्वयीदमतिविचित्रमित्याह। नैषेति। परेब्रह्मादयउत्तमाअवमाअसुरानीचइत्येषापरावरमतिः। जंतोःप्राकृतस्ययथातथाभवतोनैवस्यात्। अत्रहेतुः। जगतश्चात्मनःसुहृ
दश्च। तर्हिसर्वत्रसमत्वप्रसादएकरूपश्चकिंनस्यात्तत्राह। संसेवयाततवप्रसादोभवति। तत्रचसेवानुरूपंतत्तदिच्छानुसारेणाधमदीनामुदयोभवति। एवंसत्यपिवैषम्याभावेदृ
ष्टांतः। सुरतरुर्यथासेवकस्यैवैकल्पानुसारेणफलंददाति। नचविषमस्वहेतु। नपरावरत्वं। अत्रकारणमितिशेषः॥२७॥ यत्त्वेवंङ्रूपकृपयामयाप्राप्तमितितदाहतपा

सं

नैषापरावरमतिर्भवतोननुस्याज्जंतोर्यथाऽत्मसुहृदोजगतस्तथापि। संसेवयासुरतरोरिवतेप्रसादःसेवानुरूपमुदयोनपरावरत्वं २७
एवंजनंनिपतितंप्रभवाहिकूपेकामाभिकाममनुयःप्रपतन्प्रसंगात्। कृत्वाऽत्मसात्सुरर्षिणाभगवन्गृहीतःसोऽहंकथंनुविसृजेत
वभृत्यसेवां॥२८॥ ॥ ॥

क्षेमिवमांनयेत्याशयेनाह। एवमिति। यथात्वयानुकंपितोस्मि। एवंनारदेन। तममाज्ञात्वापूर्वमनुगृहीतःसोऽहंकथंतवभृत्यसेवांविसृजामि। कथंभूतोऽनुगृहीतोस्मि। प्रभ
वएवाहिभुक्तःकूपस्तस्मिन्कामानभितःकामयमानंजनंनिपतितमनुतत्प्रसंगात्प्रपतन्सोऽहं। तदेवंत्वद्भृत्यस्यश्रीनारदस्यानुग्रहेणत्वयाप्यत्यंतमनुकंपितोऽस्मि। अय
मेवममपरमोऽनुग्रहः। नपुनरिदमितितुच्छंमत्वाणरक्षणादि॥२८॥ ॥ ॥

पि

नवेदं त्वया मदनुग्रहार्थं कृतं किं त्वन्यार्थमित्याह। मोऽनंत तत्पदे तन्मत्प्राणरक्षणं मां हंतुमुद्यतस्य मम पितुर्वधश्च तत्तु मये स्वभृत्यऋषिवाक्यमृतं विधातुमित्यहं मन्ये
कुतः। यद्यस्मात् असत् अयुक्तं विधित्सुः खड्गं प्रगृह्यावोचत्। किं मदपरो मद्व्यतिरिक्तोऽन्य ईश्वरोऽस्ति तर्हि त्वामिदानीमवतु। तव कं शिरोऽहं हरामीति। पार्श्वं तरेऽप्य
यमेवार्थः। यद्यदा अवोचत् तत्तदा मत्प्राणरक्षणमिति वाच्यः। एतद्वचनसत्यं विधातुं निजत्वत्प्रभाषितमित्यत्रैव वक्ष्यमाणव्याख्यातं। २९॥ नवेदं पक्षपातेन रक्षणं दैत्यहननं
च त्वयि क्रियाभाविकं। किं तु मायागुणोपाधिकं सर्वमिति केतवयि स्वतन्त्रदयोगादित्याह। एक इति। यदिदं जगत्त्वमेवैकोऽन्यद्यतः अमुष्यादावंते च पृथक्तया वस्यसि विरामं क
त

मत्प्राणरक्षणमनंत पितुर्वधश्च मन्ये स्वभृत्यऋषिवाक्यमृतं विधातुं। खड्गं प्रगृह्य यदवोचदसद्विधित्सुस्त्वामीश्वरो मदपरोऽवतु कं
हरामि॥ २९॥ एकस्त्वमेव जगदेतदमुष्य यत्त्वमाद्यंतयोः पृथगवस्यसि मध्यतश्च। सृष्ट्वा गुणव्यतिकरं निजमाययेदं नानेव तैरवसितस्तद-
नुप्रविष्टः॥ ३०॥

रोषि। सत्स्मान्न तथाकारणत्वेनावधित्वेन च वर्तसे इत्यर्थः। अतो मध्यतश्च त्वमेवा। कुतस्तर्हि भेदप्रतीतिस्तत्राह। निजमायया गुणपरिणामात्मकमिदं जगत् सृष्ट्वा तदनु
प्रविष्टस्त्वं तैर्गुणैर्हेतुभूतैर्नानेव रक्षक इव। हंतेव वा अवसितः प्रतीतः। तदुक्तं स्कंधोपक्रमे। निर्गुणोऽपि ह्यजोऽव्यक्तो भगवान् प्रकृतेः परः। स्वमायागुणमाविश्य बा-
ध्यबाधकतां गत इत्यादि। ३०॥ ॥

ननु यद्येतज्जगदहमेव तर्हि जगतो वैषम्येण मम वैषम्यमपि किं न स्यादित्यत आह। त्वं वै त्वमेवेदं सदसत्कार्यकारणात्मकं जगत् न तु अत्यन्तःपृथक्। भवांस्तु ततोन्यः आद्यं
तयोः पृथगवस्थानात्। अयं तु यस्मादेवं अतो यमात्मीयोऽयं पर इति या बुद्धिः सा अपार्था मायैव कार्यकारणाभेदं दृष्टान्तेन साधयति। यद्यतः यस्य जन्मादि ज्ञानं प्रकाशश्च यस्मि
न्निधनं च स्थितिश्च तद्वै तदेव। पृथिवी जं कारणं तरुः कार्यं तयोर्यथा वस्तुकालमात्रत्वं। अयमर्थः। कालशब्देन नीलत्वा साधारणगुणयोगात् पृथ्वी। वस्तुशब्देन वस्तुमात्रं भूत
सूक्ष्मं। तत्र तरोर्यथा पृथ्वीमयबीजमात्रत्वं तस्य च यथा भूतसूक्ष्ममात्रत्वं। एवं सर्वमपि कार्यकारणात्मकं जगत्परमकारणात्मकमेवेति। तथा च पारमर्षं सूत्रं। तदनन्य

त्वं

त्वं वा इदं सदसदीश भवांस्ततोन्यो माया यदात्मपरबुद्धिरियं ह्यपार्था। यद्यस्य जन्म निधनं स्थितिरीक्षणं च तद्वैतदेव वस्तुकालवदष्टित
र्वोः॥३१॥ न्यस्येदमात्मनि जगद्विलयाम्बुमध्ये शेषेत्मना निजसुखानुभवो निरीहः। योगेन मीलितदृगात्मनिपीतनिद्रस्तुर्ये स्थितो न तु त
मो न गुणांश्च युंक्षे॥३२॥ ॥ ॥

त्वमारंभणशब्दादिभ्य इति। श्रुतिश्च वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति॥३१॥ तत्र तावद्द्वैते पृथगवस्थानं दर्शयति। न्यस्येति। इदं जगत् अत्र आत्मनि
आत्मनैवात्मनि निक्षिप्य स्वसुखमेवानुभवन् निष्क्रियः सन् प्रलयोदकमध्ये शयनं करोषि। तर्हि किं जीवस्येव ममापि तमोवृत्तिरूपा निद्रास्ति। न हि। न हि। योगाख्यव
हिर्वृत्त्यावसाम्यान्निद्रोप्यत इत्याह। योगेन मीलिते दृशौ येन। आत्मना स्वरूपप्रकाशेन निपीता निद्रा येन। अयं तु तुर्ये अवस्थात्रयातिरिक्ते स्वरूपे स्थितस्त्वं। न तु सुषुप्त इवात्म
ना तमो युंक्षे। न योजयसि। न पश्यसि। न जाग्रत्स्वप्नयोरिव गुणान्विषयांश्च पश्यसि॥३२॥ ॥

ता०स०
४१

इदानींकारणत्वेनादावपिस्थूलावस्थांतंदर्शयन्मध्यतश्चत्वमेवेत्येतत्प्रपंचयति।चतुर्भिः।यश्चमशेषःतस्यैवतेइदंजगत्।उपकुंभवद्रूपंनान्यस्य।यतस्त्वंमध्यतोपिनस्याः
कथंभूतस्यनिजयाकालशक्त्यासंचोदिताःप्रकृतेधर्माःसत्वादयोयेनतद्रूपत्वेहेतुः[illegible]अनंतशया।नातःशेषपर्यंकात्।विरमत्समाधिर्यस्य।तवनाभेःसकाशादेका
र्णवोदकेमहाब्जंलोकपद्मंअभूत्।तत्कथंभूतं।आत्मनिलयेयेवगूढंसत्।तत्कर्णिकातःसूक्ष्माद्वटबीजान्महावटइव॥३३॥तदेवंकारणत्वेनाद्यगतःसन्मध्यतश्चत्वमेववर्तसे

तस्यैवतेवपुरिदंनिजकालशक्त्यासंचोदितप्रकृतिधर्मण्यात्मगूढं।अंभस्यनंतशयनाद्विरमत्समाधेर्नाभेरभूत्स्वकणिकावटव
न्महाब्जं॥३३॥तत्संभवःकविरतोऽन्यदपश्यमानस्त्वांबीजमात्मनिततंस्वबहिर्विचिंत्य।नाविंददब्दशतमप्सुनिमज्जमानोजातेंकुरेक
थमुहोपलभेतबीजं॥३४॥सत्वात्मयोनिरतिविस्मितआश्रितोब्जंकालेनतीव्रतपसापरिशुद्धभावः।त्वामात्मनीशभुविगंधमिवातिसूक्ष्मंभूतेंद्रियाशयमयेविततंददर्श॥३५॥ ॥ ॥

इत्युक्तं।एतदेववस्तुद्वयसत्वस्यब्रह्मणोत्रभवेनस्फुटयितुंतस्यप्राक्तनीमवस्थामाह।तस्मिन्नब्जेसंभवोयस्यसःकविर्ब्रह्मा।अतःपद्मादन्यदपश्यन्।बीजंउपादानकारण
भूतंत्वांस्वस्मिन्व्याप्तंसंतमपिनाविंदत।युक्तंचैतत्।उहआश्चर्ये।अंकुरेजातेसतिबीजंतदंतर्गतंकारणंस्थूलंकथंनामउपलभेत॥३४॥तवद्रूपासनयात्वस्मिन्नेवद्र
ष्टवानित्याह।सत्विति।परांहृत्पाद्मामाश्रितःस्मरतीव्रेणतपसाध्यानेन॥३५॥अनेनसत्त्वात्रस्वरूपेणोपासनतयादर्शितमुक्तं॥३५॥ ॥ ॥ ॥

रेय

राम
४१

ईश्वरत्वेनचेद्दृष्टाश्रुतार्थोऽस्त्वदित्याह। एवञ्चानेकप्रकारेण सहस्रमपरिमितानि यानि वदनादीनि तैराढ्यं सम्पूर्णं। मायामयं मायाप्रधानं सताप्रपञ्चेनोपलक्षितः सन्निवेशः पादादिरचना यस्य॥३६॥ तदा भवान्ब्रह्मणोऽनुग्रहं कृतवानित्याह। तस्मा इति। हयग्रीवमूर्तिं बिभ्रत्सन्रजस्तमोरूपौ मधुकैटभाख्यौ हत्वा तस्मै श्रुतिगणान्प्रत्यर्पितवान्। तत्र हेतुः। सत्वमिति॥३७॥ एकस्यमेवेत्पादितिरक्षितः लोकेर्ध्वडुकं पक्षपातेन रक्षणं तद्विपक्षवधश्च सत्वोपाधिको न तु स्वत इतीति तदुपसंहरति।

एवं सहस्रवदनाङ्घ्रिशिरःकरोरुनासास्यकर्णनयनाभरणायुधाढ्यं। मायामयं सदुपलक्षितसन्निवेशं दृष्ट्वा महापुरुषमापमुदं विरिंच्यः॥३६॥ तस्मै भवान्हयशिरस्तनुवं च बिभ्रद्वेदद्रुहावतिबलौ मधुकैटभाख्यौ। हत्वानयच्छ्रुतिगणांश्च रजस्तमश्च सत्वं तव प्रियतमां तनुमामनंति॥३७॥ इत्थं नृतिर्यगृषिदेवझषावतारैर्लोकान्विभावयसि हंसि जगत्प्रतीपान्। धर्मं महापुरुष पासि युगानुवृत्तं छन्नः कलौ यदभवस्त्रियुगोऽथ स त्वं॥३८॥ नैतन्मनस्तव कथासु विकुंठनाथ संप्रीयते दुरितदुष्टमसाधु तीव्रं। कामातुरं हर्षशोकभयैषणार्तं तस्मिन्कथं तव गतिं विमृशामि दीनः॥३९॥ ॥ ॥

इत्थमिति। विभावयसि पालयसि हंसि ख्यापयसि। कलौ तु तत्त्वकरोषि यतश्छन्नोऽभवः। यतः एवं युगेष्वाविर्भावात्स एवंभूतस्त्वं त्रियुग इति प्रसिद्धः॥३८॥ एवं भगवतस्तत्वं निरूप्य स्वस्य तद्विचारायोग्यतां निवेदयन्प्रार्थयते। नैतदिति त्रिभिः। असाधु बहिर्मुखं तीव्रं दुर्धरं। हर्षशोकभयैषणाभिरार्तं दुःखितमपि त्वत्कथासु न प्रीयते तस्मिन्नेवंभूते मनसि सति कथं तव तत्वं विचारयामि॥३९॥ ॥ ॥ ॥ ॥

ना०म०
४२

किंचनिक्षाऽविरत्नामतीमोऽप्रस्तुता।मामांयतोमधुरादिरसमतस्याकर्षति।उदरंतुकक्षासंतप्तंसद्यएवयत्किंचिदाहारमात्रंप्रतिवपलादृक्कावक्तृःकर्मशक्तिःकर्मेंद्रि
याणिलुनंतित्रोटयंति॥४०॥नकेवलमहमेकएवएवंकष्टांदशामापन्नः।किंतु।महाजनोऽप्येवमेवक्लिश्यति।अतःसर्वजनंपालयेतिप्रार्थ्यते।एवमिति।भवःसंसा
रएववैतरणीयमनदीतस्यांछन्नोन्यतोयातिजन्मादीतितेभ्योतिभीतंद्विधापरेषांचविग्रहेयथायथंवैरंमैत्रंचयस्य।एवंमूढंजनंपश्यन्त्वंहेपारखरतस्याःपारेस्थि
तनितपसुक्तहेतीतिउहोकष्टमित्येवमनुकंप्यापीष्टहिवैतरणीमुत्तार्यपालय॥४१॥एकेनमयाकथंसर्वेजनस्तारणीयइतिचेत्तत्राह।कोघ्विति।कोउतेअ

जिह्वैकतोच्युतविकर्षतिमाविततृप्ताशिश्नोन्यतस्त्वगुदरंश्रवणंकुतश्चित।घ्राणोऽन्यतश्चपलदृक्कचकर्मशक्तिर्बह्व्यःसपत्न्यइव
गेहपतिंलुनंति॥४०॥एवंस्वकर्मपतितंभववैतरण्यामन्योन्यजन्ममरणाशनभीतभीतं।पश्यन्जनंस्वपरविग्रहवैरमैत्रंहंतेतिपा
रचरपीप्रहिमूढमद्य॥४१॥कोन्वत्रतेखिलगुरोभगवन्प्रयासउत्तारणेऽस्यभवसंभवलोपहेतोः।मूढेषुवैमहदनुग्रहआर्तबंधो
किंतेनतेप्रियजनाननुसेवतांनः॥४२॥

त्रसर्वजनोत्तारणेप्रयासः।नकोऽपि।कुतः।अस्यविश्वस्यभवसंभवलोपानांउत्पत्तिस्थितिसंहाराणांहेतोः।किमेतत्दुष्करमितिभावः।उचितंचैतदि
त्याह।मूढेष्विति।त्वांवत्स्वदीयांश्चतारयिष्यामि।इमंदुरायहंमाहकथा।इतिचेत्तत्राह।तवयेप्रियजनाभक्तास्तानननुसेवमानानांनोस्माकंतेनउत्तारणेनकिं।
कोऽतिप्रयासोऽसुखालकाःहरेःकोन्वत्रतेऽखिलगुरोभगवन्प्रयासः।प्रह्लादइदंस्तुपमंत्र्यमिथोनराणामीशेनसख्यमकरोदपनीयमायां॥४२॥ ॥

राम
४२

वत्स प्रह्लाद त्वां तावत्तारयिष्यामि। तावतैव कृतार्थः स्याः। किमनेन तन्निर्बंधेनेत्यत आह। नैवेति। हे पर सर्वोत्तम त्वद्वीर्यगायनमेव महामृतं तस्मिन्मग्नं चित्तं यस्य सोहं स
वैतरण्याः नैवोद्विजे किंतु विमूढाननुशोचामि। तानेवाह। ततो महामृताद्विमुखं चेतो येषां प्रत्युत इंद्रियार्थात्मिकं यन्मायासुखं तदर्थं भरं कुटुंबादिभारमु
द्वहतः॥४३॥ त्वं तावत्तु मुक्तिं गृहाण तांस्त्वन्ये मुनयस्तूपदेक्ष्यंतीति चेत्तत्राह। प्रायेणेति। न विमुमुक्षे विमुक्तिं नेच्छामि। तर्हि त्वं कमपि प्रार्थय[illegible]यमामेव
किमिति निर्बध्नासीति चेत्तत्राह। त्वत्तोऽन्यमस्य जनस्य शरणं न पश्यामि॥४४॥ नन्वेते स्त्रीसंभोगादिना सुखिन एव न कृपणास्तत्राह। यदिति। करयोः

नैवोद्विजे परदुरत्ययवैतरण्यास्त्वद्वीर्यगायनमहामृतमग्नचित्तः। शोचे ततो विमुखचेतस इंद्रियार्थमायासुखाय भरमुद्व
हतो विमूढान्॥४३॥ प्रायेण देव मुनयः स्वविमुक्तिकामा मौनं चरंति विजने न परार्थनिष्ठाः। नैतान्विहाय कृपणान्विमुमु
क्ष एको नान्यं त्वदस्य शरणं भ्रमतोऽनुपश्ये॥४४॥ यन्मैथुनादिगृहमेधिसुखं हि तुच्छं कंडूयनेन करयोरिव दुःखदुःखं। तृप्यं
ति नेह कृपणा बहुदुःखभाजः कंडूतिवन्मनसिजं विषहेत धीरः॥४५॥ ॥

कंडूयनेन संघर्षणेनेव। दुःखमनु दुःखं यस्मिन् तत्। तर्हि दुःखत्वादेव ततो निर्विद्य मुच्येरन्न तत्राह। कृपणाः कामुकाः बहुदुःखभाजोऽपि इह गृहमेधिसु
खेन तृप्यंति अलमिति न मन्यंते। कंडूतिवत्कामस्य दुःसहत्वात्। ननु कोऽपि कंडूतिमपि सहते कामं वेत्यत आह। वत्स तादृक्तु कश्चिद्धीर एव मनसिजं कामं विष
हेत तु सर्वोऽप्यत्रापि कंडूतिवदिति दृष्टांतः॥४५॥ श्रीरामो जयति॥ ॥ ॥ ॥ ॥

न

सा०स्क०

४३

नत्वमौनादिभिर्मोक्षसाधनैः सुलभैर्भवतेषामपि मुक्तिः। तत्राह। मौनेति। हे पुरुष पञ्चनंतर्यामिन् मौनादयो दश आपवर्ग्याः अपवर्गहितावहाः प्रसिद्धाः। रहः विविक्तवासः तीर्थप्रापणं। अजितेंद्रियाणां इंद्रियभोगायद्यर्थिं विक्रीडितां वा न जीवनोपायास्तवंति। दांभिकानां वा न अपि स्तवंति वा न वा। दंभस्या नियतफलत्वात्॥४६॥ त्वत्ज्ञानं तु स्वभक्तिं विना सकामैर्मौनादिभिर्न भवत्येवेत्याह। रूपे इति त्रिभिः। बीजांकुराविव प्रवाहापन्ने इमे सदसती कार्यकारणरूपे

मौनव्रतश्रुततपोध्ययनस्वधर्मव्याख्यारहोजपसमाधयआपवर्ग्याः। प्रायःपरंपुरुषतेत्वजितेंद्रियाणांवार्ताभवं त्युतनवात्रतुदांभिकानां॥४६॥ रूपेइमेसदसतीतववेदसृष्टेबीजांकुराविवनचान्यदरूपकस्य। युक्ताःसमक्षमुभयत्र विचिन्वतेत्वांयोगेनवह्निमिवदारुषुनाऽन्यतःस्यात्॥४७॥ ॥

तव रूपे उपलक्षणे स्तः वेदेन सृष्टे प्रकाशिते न चान्यत्। यद्यसमेतं गौरत्वादिकमिव देववदन्ते दृश्येत कुतः। अरूपकस्य प्राकृतरूपादिशून्यस्य। अतः युक्ताः संयताः एव भक्तियोगेन समक्षं वा उभयत्र कार्यकारणोभावानुगतं पश्यंति। मंथनेन दारुषु वह्निमिव। नान्यतः स्यात् ज्ञानमिति शेषः। यद्वा। ज्ञानप्रकार मेवाह। एतदुभयमन्यतः प्रधानपरमाण्वादेर्न स्यात्। सर्वज्ञतेत्यादिश्रुतेः। अतस्त्वमेव कारणं ब्रह्म सर्ववेदोक्तमिति॥४७॥ ॥ ॥

राम

४३

तदेवाह। त्वं वायुरिति। हृदयं मनः। चित् चित्तं। अनुग्रहः अहंकारः। देवता वर्गो वा। सगुणः स्थूलः विगुणः सूक्ष्मः मनश्च वचश्च मनोवचः तेन निरुक्तं प्रकाशितं कि
मपि त्वत्तोऽन्यन्नास्ति॥४८॥ अभक्ता अस्मिन्ननुगतमपि त्वां न जानंतीत्याह। नेति। नैते गुणा यत्तिमा तिनो देवाः। आद्यंतवंतः जडोपाधित्वात्। अनाद्यंतं
निरुपाधिं त्वां न विदंति। हि यस्मात्। अतः सुधियो विद्वांसः एवं विचार्य शब्दात् अध्यापनादिव्यापाराडुपरमंति। त्वामेव समाधिनोपासंत इत्यर्थः। तथा च श्रु
तिः। किमर्थं वयमध्येष्यामहे किमर्थं वयं यक्ष्यामहे इति। याँ उध्याया बहूं छब्दा वाचो विग्लापनं हि तदिति श्रुतिः। स्मृतिश्च। यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति

ना

त्वं वायुरग्निरवनिर्वियदंबु मात्राः प्राणेंद्रियाणि हृदयं चिदनुग्रहश्च। सर्वं त्वमेव सगुणो विगुणश्च भूमन्नान्यत्त्वदस्त्यपि मनोवचसा
निरुक्तं॥४८॥ नैते गुणा न गुणिनो महदादयो ये सर्वे मनःप्रभृतयः सहदेवमर्त्याः। आद्यंतवंत उरुगाय विदंति हि त्वामेवं विमृश्य सुधि
यो विरमंति शब्दात्॥४९॥ तत्तेऽर्हत्तम नमःस्तुतिकर्मपूजाः कर्मस्मृतिश्चरणयोः श्रवणं कथायां। संसेवया त्वयि विनेति षडंगया किं भक्तिं
जनः परमहंसगतौ लभेत॥५०॥ ॥

नेति

तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य चेत्यादि॥४९॥ उपसंहरति तदिति। हे अर्हत्तम नमःस्तुतिकर्मपूजाः प्रणिपातस्तुतिसर्वकर्मार्पणानि कर्म तव परिचर्या
चरणयोः स्मृतिश्च। कथायां श्रवणं चेत्येवं षडंगया सम्यक्संसेवया विना परमहंसानां गतौ प्राप्ये त्वयि विनेति कथं भक्तिं लभेत। यस्मादेवं भक्तिं विना न मोक्षो न च
भक्तिः संसेवया विना। अतः प्राक्प्रार्थितं दास्ययोगमेव देहीति प्रकरणार्थः॥५०॥ ॥ जनः॥

भा०स्कं०
४४

एतावतावर्णितगुणो यस्माद्यतमन्युः उपसंहृतकोपः ॥५२॥ कामान्पूरयतीति तथा ॥ यद्वा ॥ पुरुषार्थप्रवाहो यस्मात्पूर्थः ॥५३॥ अप्रीणात् अप्रीणयत ॥ तत्तु
अपूर्णकामत्वेन शोचितुं ॥५३॥ प्रीणंतीति तोषयंति ॥५४॥ एकांतित्वात् निरुपाधिसक्तत्वात ॥५५॥ ॥ सप्तमेनवमः ॥ ॥ दशमेत्वशुद्धास्तत्तकामं तं हितेहं

नारदउवाच ॥ ॥ एतावद्वर्णितगुणो भक्त्या भक्तेन निर्गुणः ॥ प्रह्लादं प्रणतं प्रीतो यतमन्युरभाषत ॥५१॥ ॥ श्रीभगवानुवाच ॥ ॥ प्रह्ला
दभद्रंभद्रंतेप्रीतोहंतेसुरोत्तमावरंवृणीष्वाभिमतंकामपूरोस्म्यहंनृणां ॥५२॥ मामप्रीणतआयुष्मन्दर्शनंदुर्लभंहिमे ॥ दृष्ट्वामांन
पुनर्जंतुरात्मानंतप्तुमर्हति ॥५३॥ प्रीणंतिह्यथमांधीराःसर्वभावे[illegible]साधवः ॥ श्रेयस्कामामहाभागाःसर्वासामाशिषांपतिं ॥५४॥
एवंप्रलोभ्यमानोपिवरैर्लोकप्रलोभनैः ॥ एकांतित्वाद्भगवतिनैच्छत्तानसुरोत्तमः ॥५५॥ ॥ इतिश्रीभागवतेमहापुराणेसप्तमस्कंधे
नवमोध्यायः ॥ ॥ नारदउवाच ॥ ॥ भक्तियोगस्यतत्सर्वमंतरायतयार्भकः ॥ मन्यमानोहृषीकेशंस्मयमानउवाचह ॥१॥ ॥ प्रह्लाद
उवाच ॥ ॥ मामांप्रलोभयोत्पत्त्यासक्तंकामेषुतैर्वरैः ॥ तत्संगभीतोनिर्विण्णोमुमुक्षुस्त्वामुपाश्रितः ॥२॥ भृत्यलक्षणजिज्ञासुर्भक्तं
कामेष्वचोदयत् ॥ भवान्संसारबीजेषुहृदयग्रंथिषुप्रभुः ॥३॥ नान्यथातेखिलगुरोघटेतकरुणात्मनः ॥४॥ ॥ ले ॥

रोऽप्रसंगाद्धिरण्यरुडेहतो ऽत्रयह इंद्रियतीति तं सर्वं वरजातं ॥१॥ उत्पत्त्या स्वभावेनैवासक्तं मां तेषां कामानां संगाद्भीतं ॥२॥ ननु किमहं भक्तं प्रलोभयामि नहि
किंतु वरं वृणीष्वेति वदता भवता लिंगायो ऽन्यपरत्वमाह । भृत्यलक्षणेति । हृदयस्य ग्रंथिव बंधकेषु ॥ अन्यथा अनर्थसाधने प्रवर्तनं न घटेत इत्यर्थः ॥३॥ ॥ ॥

राम
४४

८

य

कथं मेवंभृत्यलक्षणाज्ञानं स्यात्। तत्राहाय इतितेवचः। ननुकामनया ऽपि सेव्यसेवकयोः स्वामित्वं तद्भावः प्रसिद्धः सत्यं सोपाधिको सौ न तत्त्वतः। विकड़
त्याह। स्वाम्यामित्यात्मनः आशिषो ऽपेक्षमाणो नैव भृत्यः। भृत्यहेतुकमात्मनः स्वाम्यमिच्छन्द्वयोस्तत्पादं ददाति स च नैव स्वामी॥४॥ आवयोस्तु ताविको सा। वि
त्याह। अहंत्विति। अतपाश्रयो निरतिसंधिः। अन्यथा कामाद्यनतिसंधिं विना अर्थःप्रयोजनं नास्ति॥५॥ नन्वतथापि परमोदारस्य मम संतोषार्थं किमपि

यमत्र आशिषं प्रआशास्सेनत सत्वृत्यः सेवे वणिक्का आशासानो नैवंभृत्यः स्वामित्याशिषं आत्मनश्च न स्वामी त्वत्तातः स्वाम्यमिच्छन्
यो राति वा शिषः। अहं त्वकामस्त्वं चकामस्त्वं च स्वाम्यनपाश्रयश्च तान्यथेहावयोरर्थो राजसेवकयोरिव॥५॥ यदि रासीशमेकामाद
वरांस्त्वं वरदर्षत। कामानां हृद्यसंरोहं भवतस्तु वृणे वरं॥६॥ इंद्रियाणि मनः प्राणा आत्मा धर्मो धृतिर्मतिः। ह्रीः श्रीस्तेजः स्मृतिः सत्यं
यस्य नश्यंति जन्मना॥७॥ विमुंचति यदा कामान्मानवो मनसि स्थितान्। तर्ह्येव पुंडरीकाक्ष भगवत्त्वाय कल्पते॥८॥ ॐ नमो भगवते तु
भ्यं पुरुषाय महात्मने। हरयेद्भुतसिंहाय ब्रह्मणे परमात्मने॥९॥ ॥ ॥

व

वृणीष्वेति चेदत आहायदीति। कामांकुराणां असंरोहं अनुत्पत्तिं भवतः सकाशात्॥६॥ ननु कामोत्पत्तौ सत्यां को दोष इत्यत आह। इंद्रियादीनि यस्य जन्मना नश्यं
तीति। आत्मा देहः॥७॥ कामत्यागे गुणमाह। विमुंचतीति। भगवत्त्वाय तत्समानैश्वर्याय तथा च श्रुतिः। यदा सर्वे प्रमुच्यंते कामा येस्य हृदि श्रिताः। अथ मर्त्यो ऽ
मृतो भवत्यत्र ब्रह्म समश्नुत इति॥८॥ निर्दोषा कामा स्वदास्तु मिच्छंतं प्रत्याख्यास्यन्नमस्यति। ॐ नम इति॥९॥ ॥ ॥

सा० स०
४५

सत्यमेकांतिसत्ताख्यं तथापि मदाज्ञाकरणीत्याशयेनाह। नेति। मे एकांतिनः कदाचिदपि इह भवबंधमय्याशिषो न वांछंत्येव। तथाप्येतन्मन्वंतरमात्रं भोगानाह्नीति॥ १०॥ नन
नु तर्हि बंधः स्या...दित्यत आह। कथा इति। ह्यासां सर्वेषु भूतेषु संतमेकमीशं यज्ञाधिष्ठातारं मामात्मन्यावेश्य यजस्व। तर्हि नैनैव कर्मणा बंधः स्यात्। नेत्याह। भोगे
न भयमर्पणेन कर्म हि विशत्प जन्तुय जस्व॥ ११॥ किंच भोगेन तु सुखात्तु लवेन नाशस्वं भुण्यं हित्वा भुक्त्वा बंधः स च लोका उग्रहार्थं कीर्तिं च विश्वार्यमां प्राप्स्यसि। कुशले
न पुण्यपापे वे रण्णन पापं हित्वेति विभीषामार्गं अथ यथा तस्य राज्ये प्रवृत्तेः। न तु तस्य प्रीचीनं पापमस्ति। तदधिमे उत्तरपूर्वाभियोर्गस्ते व विनाशो। तद्धपदेशादिति न्याया

श्रीनृसिंह उवाच॥ ॥ नैकांतिनो मे मयि जात्विहाशिष आशासतेऽमुत्र च ये भवद्विधाः। अथापि मन्वंतरमेतदत्र दैत्येश्वराणाममनुभुंक्ष्व भो
गान्॥ १०॥ कथा मदीया जुषमाणः प्रियास्त्वमावेश्य मामात्मनि संतमेकं। सर्वेषु भूतेष्वधियज्ञमीशं यजस्व योगेन च कर्म हिन्वन्॥ ११॥ भोगेन
पुण्यं कुशलेन पापं कलेवरं कालजवेन हित्वा। कीर्तिं विशुद्धां सुरलोकगीतां विताय मामेष्यसि मुक्तबंधः॥ १२॥ य एतत्कीर्तयेन्मह्यं त्वया गी
तमिदं नरः। त्वां च मां च स्मरन्काले कर्मबंधाद्विमुच्यते॥ १३॥ ॥ ॥

तात तस्य कृतं दुष्कृतं विभुत्व तद्गतिकृतेषु। न वेदं भारवपापानि तेषामयं। तस्य भोगेनैव क्षयात्। कुशलेन हित्वेति वचनादुपपत्तेः। न च ताभावविद्यानिति वाच्यं भगवतैव
कृतार्थत्वस्यानंतरं वक्ष्यमाणत्वात्। अत एव योगेन कर्म हिन्वन्निति इदमपि लोकसंग्रहार्थं। कर्माण्यप्रवर्तितस्यापि उद्वेग मात्रायेति सर्वमनवद्यं॥ १२॥ किंच। य इति। त्वां
च मां च इदं मच्चरितं च स्मरन्नेतत्स्तोत्रं यः कीर्तयेत् सोऽपि कर्मबंधाद्विमुच्यते किमुत त्वं बंधशंकेत्यर्थः॥ १३॥ ॥ ॥ ॥ ॥

राम
४५

ईश्वराज्ञाप्राप्तकर्माधिकारः स्वपितुर्निष्कृतिं प्रार्थयते । वरं वरणीयमेतदपरं वृणे । ते त्वत्तः ॥१४॥ विद्वेषोऽमर्षेण क्रोधेन आशयो यस्य ॥१५॥ तेऽपांगेन संदृष्टः ।
अतः पूयाव । तथाऽपि तो कृपणवत्सल । कार्पण्येन प्रार्थय इत्यर्थः ॥१६॥ यद्यपि कश्यपो मरीचिर्ब्रह्मा वेति तत्पितुस्त्रय एव पूर्वजाः तथाऽपि त्रिःसप्तभिः सहेति । आक्र
म्यात् तत्पित्रादिप्रायेणोक्तं ॥१७॥ यद्यस्मात् सम्प्रयुक्तमन्त्रा आचारो येषां ते कीकटा अपि देशाः तत्तुल्या वंशा अपि पूयंते शुद्धा भवंति ॥१८॥ ननु त्वद्भक्तानामयं महिमेति

प्रह्लाद उवाच ॥ ॥ वरं वरय एतं ते वरदेशान्महेश्वर । यदनिंदत्पिता मे त्वामविद्वांस्तेज ऐश्वरं ॥१४॥ विद्वामर्षाशयः साक्षात्सर्वलोकगुरुं प्र
भुं । भ्रातृहेति मृषादृष्टिस्त्वद्भक्ते मयि चाघवान् ॥१५॥ तस्मात्पिता मे पूयेत दुरंतात् दुस्तराद् घात् । पूतस्तेऽपांगसंदृष्टस्तदा कृपणवत्सल ॥१६॥ ॥
भगवानुवाच ॥ ॥ त्रिःसप्तभिः पिता पूतः पितृभिः सह तेऽनघ । यत्साधोऽस्य गृहे जातो भवान्वै कुलपावनः ॥१७॥ यत्र यत्र च मद्भक्ताः प्रशांताः समदर्शि
नः । साधवः समुदाचारास्ते पूयंत्यपि कीकटाः ॥१८॥ सर्वात्मना न हिंसंति भूतग्रामेषु किंचन । उच्चावचेषु दैत्येंद्र मद्भावविगतस्पृहाः ॥१९॥ भवंति पुरु
षा लोके मद्भक्तास्त्वामनुव्रताः । भवान्मे खलु भक्तानां सर्वेषां प्रतिरूपधृक् ॥२०॥ कुरु त्वं प्रेतकार्याणि पितुः पूतस्य सर्वशः । मदंगस्पर्शनेनांग
लोकान्यास्यति सुप्रजाः ॥२१॥ पित्र्यं च स्थानमातिष्ठ यथोक्तं ब्रह्मवादिभिः । मय्यावेश्य मनस्तात कुरु कर्माणि मत्परः ॥२२॥ ॥ ॥

ननु त्वं अहं तु तादृशो न भवामीति चेत् तत्राह । सर्वात्मनेति द्वाभ्यां । मद्भावेन मद्भक्त्या विगता स्पृहा येषां ॥१९॥ त्वामनुगता ये केचित्पुरुषाः तेऽप्येवंलक्षणाः संतो मद्भक्ता भ
वंति । अतो भवान्मे भक्तानां सर्वेषां प्रतिरूपधृक् उपमा तस्य दृष्टांतः श्रेष्ठः खल्वित्यर्थः ॥२०॥ मदंगस्पर्शनेन सर्वशः पूतस्य ते पितुः पापशंकैव नास्ति केवलं पुत्रकृत्यानि प्रेत
कार्याणि कुरु ॥२१॥ वेदवादिभिरुक्तमनतिक्रम्य मत्परः सन् कर्माणि कुरु ॥२२॥ ॥ ॥

ममदृष्टिर्मया दृष्टैर्भूतैः समं साम्यान्निगमानुपममनित्यर्थः ॥ अहं तु हतवान्सत्वया हतः ॥ २६ ॥ एतदिच्छा समितः सम्यक्प्राप्तः ॥ २७ ॥ सर्वतः संज्ञा सा तु गोप्तृ रज्जुकं ॥ ॥
॥ २८ ॥ एवं वरस्य पानप्रदेयः कुरोति सा स्वभावो येषां अस्पृष्टं नीरं ॥ २९ ॥ शिशुपालदंतवक्त्रयोर्द्विषतोः श्रीकृष्णसायुज्यं । कथमिति पृष्टं तद्देवतयोः पूर्व

शुक उवाच ॥ ॥ प्रह्लादोपि तथा चक्रे पितुर्यत्सांपरायिकं । यथाह भगवान्राजन्नभिषिक्तो द्विजोत्तमैः ॥ २३ ॥ प्रसादसुमुखं दृष्ट्वा ब्रह्मा नरहरिं हरिं । स्तुत्वा वाग्भिः पवित्राभिः प्राह देवादिभिर्वृतः ॥ २४ ॥ ॥ ब्रह्मोवाच ॥ ॥ देवदेवाखिलाध्यक्ष भूतभावन पूर्वज । दिष्ट्याते निहतः पापो लोकसंतापनोऽसुरः ॥ २५ ॥ योसौ लब्धवरो मत्तो न वध्यो मम सृष्टिभिः । तपोयोगबलोन्नद्धः समस्तनिगमानहन् ॥ २६ ॥ दिष्ट्यास्य तनयः साधुर्महाभागवतोर्भकः । त्वया विमोचितो मृत्योर्दिष्ट्या त्वां समितोधुना ॥ २७ ॥ एतद्वपुस्ते भगवन्ध्यायतः प्रयतात्मनः । सर्वतो गोप्तृ संत्रासान्मृत्योरपि जिघांसतः ॥ २८ ॥ ॥ श्रीनृसिंह उवाच ॥ ॥ मैवं वरोऽसुराणां ते प्रदेयः पद्मसंभव । वरः क्रूरनिसर्गाणामहीनाममृतं यथा ॥ २९ ॥ ॥ नारद उवाच ॥ ॥ इत्युक्त्वा भगवान्राजंस्तत्रैवांतर्दधे हरिः । अदृश्यः सर्वभूतानां पूजितः परमेष्ठिना ॥ ३० ॥ ततः संपूज्य शिरसा ववंदे परमेष्ठिनं । भवं प्रजापतींर्देवान्प्रह्लादो भगवत्कलाः ॥ ३१ ॥ ततः काव्यादिभिः सार्द्धं मुनिभिः कमलासनः । दैत्यानां दानवानां च प्रह्लादमकरोत्पतिं ॥ ३२ ॥ प्रतिनंद्य ततो देवाः प्रयुज्य परमाशिषः । स्वधामानि ययू राजन्ब्रह्माद्याः प्रतिपूजिताः ॥ ३३ ॥ एवं तौ पार्षदौ विष्णोः पुत्रत्वं प्रापितौ दितेः । हृदि स्थितेन हरिणा वैरभावेन तौ हतौ ॥ ३४ ॥ पुनश्च विप्रशापेन राक्षसौ तौ बभूवतुः । कुंभकर्णदशग्रीवौ हतौ तौ रामविक्रमैः ॥ ३५ ॥ शयानौ युधि निर्भिन्नहृदयौ रामसायकैः । तच्चित्तौ जहतुर्देहं यथा प्राक्तनजन्मनि ॥ ३६ ॥ ॥

जन्मकथनादिति रूपपादितमुपसंहरति । एवमिति सप्तभिः । दितेः पुत्रत्वं प्रापितौ विप्रशापेनेत्युक्तं तस्यापि उपसंगमः ॥ ३७ ॥ ॥ राम ॥ ॥ ॥

कल्मषजोऽदंतवक्त्रः हरेः सायुज्यं समीयतुः ॥ ३७ ॥ कृष्णनिंदादिना पूर्वकृतं तं वयत एनः पापं तत्तद्ध्यानेन तदात्मानः संतो जहुः । तदात्मत्वे दृष्टांतः कीटः पेशस्कृतो ध्या
नेन यथा तदात्मा भवतीति ॥ ३८ ॥ अविद्याभेददर्शनशून्यया हरेः सात्म्यं सारूप्यं ॥ ३९ ॥ ४० ॥ प्रह्लादचरितार्थमुपसंहरति । एषेति चतुर्भिः । अवतारः श्रीनृसिंहरूप
स्तस्य कथा आख्यातेति शेषः प्रह्लादस्य चरितमित्यादेः समाम्नातमिति तृतीयेनान्वयः । अस्येत्यनेनोक्तं सर्गस्थित्यप्ययानामीशस्य हरेर्याथात्म्यं तत्त्वं ॥ ४२ ॥ अने

ताविहाथ पुनर्जातौ शिशुपालकरूषजौ । हरौ वैरानुबंधेन पश्यतस्ते समीयतुः ॥ ३७ ॥ एनः पूर्वकृतं यत्तद्राजानः कृष्णवैरिणः । जहुस्त्वंते तदा
त्मानः कीटः पेशस्कृतो यथा ॥ ३८ ॥ यथा यथा भगवतो भक्त्या परमयाऽभिदा । नृपाश्चैद्यादयः सात्म्यं हरेस्तच्चिंतया ययुः ॥ ३९ ॥ आख्यातं सर्व
मेतत्ते यन्मां त्वं परिपृष्टवान् । दमघोषसुतादीनां हरेः सात्म्यमपि द्विषां ॥ ४० ॥ एषा ब्रह्मण्यदेवस्य कृष्णस्य च महात्मनः । अवतारकथा पुण्या
वधो यत्रादिदैत्ययोः ॥ ४१ ॥ प्रह्लादस्यानुचरितं महाभागवतस्य च । भक्तिर्ज्ञानं विरक्तिश्च याथात्म्यं चास्य वै हरेः ॥ ४२ ॥ सर्वस्थित्यप्ययेशस्य गुणक
र्मानुवर्णनं । परावरेषां स्थानानां कालेन व्यत्ययो महान् ॥ ४३ ॥ धर्मो भागवतानां च भगवान्येन गम्यते । आख्यानेऽस्मिन्समाम्नातमाध्यात्मिकमशेषतः
॥ ४४ ॥ य एतत्पुण्यमाख्यानं विष्णोर्वीर्योपबृंहितं । कीर्तयेच्छ्रद्धया श्रुत्वा कर्मपाशैर्विमुच्यते ॥ ४५ ॥ ॥ ॥

नकृतं हरेर्गुणकर्मानुवर्णनं चेत्यर्थः । परावरेषां देवासुरादीनां यानि स्थानानि तेषां व्यत्ययो विपर्यासः ॥ ४३ ॥ आध्यात्मिकं आत्मानात्मविवेकादि ॥ ४४ ॥ एतच्छ्रव
णादिफलमाह य इति द्वाभ्यां । एतच्छ्रुत्वा यः कीर्तयेत् ॥ ४५ ॥ ॥ ॥ ॥ ॥

एतत एतां म्होंड्स्य लीलां। तामेवाह। दैत्येंद्रस्य यूथपानां च वधं यः श्रुविः सन्पठेत्। पुण्यमतुलावां मतितिश्चियं वा लोकं वैकुंठं गा॥४६॥ अहो भज्ञादस्य भाग्यं येन देवो
दृष्टः स्वयं तु मंदस्याग्यपा इति विषीदंतं प्रत्याह। स्वयमिति त्रिति। येषां युष्माकं गृहान् गुत्तनयो लियंति सर्वतः समयांति। तत्कस्य हेतोः। एषु युष्टहेषु नराकारं गूढं सत श्रीकृ
ष्णाख्यं परं ब्रह्म साक्षात् वसतीति॥४७॥ ननु कृष्णोऽस्माकं मातुलेयः कथं ब्रह्मेत्युच्यते। तत्राह स वा इति। सोयं ब्रह्मैव कथं भूतः महद्भिर्विमृग्यं यत्कैवल्यं निर्वाणसुखं
निरुपाधिः परमानंदः तदनुभूतिरूपः वः युष्माकं खलु प्रियः सुहृत् दित्यादिरूपो भवति। विधिकृत। आज्ञानुवर्ती॥४८॥ ननु परं ब्रह्म चेत् कथं दृष्ट सह भ्रमतीश्वर

एतद्यस्त्रादि तु रूपस्य म्होंडलीलां दैत्येंद्रयूथपवधं प्रयतः पठेतादैत्यात्मजस्य वसतां प्रवरस्य पुण्यं श्रुत्वा तुलावमकुतोलयमेतिलोकं ४६
यूयं नृलोके वत भूरिभागाः लोकं पुनाना मुनयोऽभियंति। येषां गृहानावसतीति साक्षात् गूढं परं ब्रह्म मनुष्यलिंगं॥४७॥ स वा अयं ब्रह्म मह
द्विमृग्य कैवल्यनिर्वाणसुखानुभूतिः। प्रियः सुहृद्वः खलु मातुलेय आत्मार्हणीयो विधिकृद्गुरुश्च॥४८॥ न यस्य साक्षाद्भवपद्मजादिभी
रूपं धिया वस्तुतयोपवर्णितं। मौनेन भक्त्योपशमेन पूजितः प्रसीदतामेष स सात्वतां पतिः॥४९॥ ॥

तिः कथं वा धर्माद्यावरणं तस्येत्यत आह न तस्य रूपं तत्त्वं भवादिभिरपि धिया बुद्ध्या वस्तुतया इदमित्थमिति साक्षान्नोपवर्णितं स तु अस्माकं स्वयमेव प्रसन्नः
अस्माकं तु मौनादिसाधनैः प्रसादः प्रार्थनीय एवेत्याह। मौनेनेति। स एष सात्वतां पतिर्नः प्रसीदतु। ननु भज्ञादस्य गृहे परं ब्रह्म वसति। न च तद्दर्शनाय मुन
यस्तद्गृहान् नियंति। न च तस्य मातुलेयादिरूपेणावर्तते न च स्वयमेव प्रसन्नं। अतो युष्मयमेव ततोऽपि भूरिभागा इति भावः॥४९॥ ॥ ॥ ॥

ने

अरन्य नौवि

नवैबोर्द्धःकरं त्रिपुरलेदादिकं श्रीरुद्रं ज्ञातवान् सएवंभूतइश्वरोऽप्यस्यतत्वंनजानातीतिकथमित्यपेक्षायां तस्याप्येतन्महात्म्यादेवासौप्रसादोनकेवलस्ये
तिवकुमाख्यानमुपक्षिपति सएषइति ॥५०॥ राजायुधिष्ठिरउवाच ॥ ॥जगदीशितुर्देवस्यकीर्तिकस्मिन्कर्मणिमयोहतवान् ॥५१॥ अनेनश्रीकृष्णे
नोपबृंहिते संवर्द्धितः ॥५२॥ हेमीचरोप्याचायसीचेति तिस्रःपुरोतिमयितेभ्योदद्दाविति शेषः दुर्लक्ष्योऽपायसंयोगोगमनागमनेयासां दुर्वितर्क्यमि

णस्यकीर्त्ति

सएषभगवान्राजन्व्यतनोद्विहितंयशः ॥ पुरारुद्रस्यदेवस्य मयेनानंतमायिना ॥५०॥ राजोवाच ॥ ॥कस्मिन्कर्मसुदेवेस्यमयोहन्
जगदीशितुः ॥ यथाचोपचिताकीर्त्तिः कृष्णेनानेनकथ्यतां ॥५१॥ श्रीनारदउवाच ॥ ॥निर्जिताअसुरादेवैर्युध्यनेनोपबृंहितैः ॥ मायिनां
परमाचार्यंमयंशरणमाययुः ॥५२॥ सनिर्मायपुरस्तिस्रोहैमीरौप्यायसीर्विभुः ॥ दुर्लक्ष्यापायसंयोगादुर्वितर्क्यपरिच्छदाः ॥५३॥ ता
भिस्तेसुरसेनान्योलोकांस्त्रीन्सेश्वरान्नृप ॥ स्मरंतोनाशयांचक्रुः पूर्ववैरमलक्षिताः ॥५४॥ ततस्तेसेश्वरालोकाउपासाद्येश्वरंविभो ॥
त्राहिनस्तावकान्देवविनष्टांस्त्रिपुरालयैः ॥५५॥ अथानुगृह्यभगवान्माभैष्टेतिसुरान्विभुः ॥ शरंधनुषिसंधायपुरेष्वस्त्रंव्यमुंच
त ॥५६॥ ततोग्निवर्णाइषवउत्पेतुःसूर्यमंडलात् ॥ यथामयूखसंदोहानादृश्यंतपुरोयतः ॥५७॥ ॥ ॥

या
रिच्छदामु ॥५३॥ असुराणांसेनान्यःसेनापतयःपूर्ववैरंस्मरंतः ॥५४॥ अस्त्रंअतिमंत्रितं ॥ शस्त्रंअनभिमंत्रितंपुरेभ्यमुंचत ॥५६॥ ततःशरात्सूर्यमं
डलात्मयूखसंदोहाः रश्मिसमूहाइवायतःयेस्यः ॥५७॥ ॥ ॥ छ ॥ ॥

क्कूपरसेस्वयंनिर्मितक्रूपाह्वते॥ ५७॥ वज्रवत्सुदृढांगाःमहौजसोमहाबलाः॥ मेघदलनाःमेघलेदिनोविद्युदूपावृत्तयइव॥ ५८॥ ६०॥ कालेमध्याह्ने॥ ६॥ आत्मतोवाञ्र

स्त   स्र १

तैःसृष्टाप्रसवःसर्वेतिपेतुःस्मपुरोकसः॥ तानानीयमहायोगीमयःक्कूपरसेक्षिपत्॥ ५८॥ सिद्धामृतरसस्पृष्टावज्रसारामहौजसः॥ उत्तस्थुर्मेघदलनावैद्युतइवक्रयः॥ ५९॥ विलोक्यतन्मृसंकल्पंविमनस्कंवृषध्वजं॥ तदायंसगवाविष्णुस्तत्रोपायमकल्पयत्॥ ६०॥ वत्सआसीत्तदाब्रह्मास्वयंविष्णुरयंहिगौः॥ प्रविश्यत्रिपुरंकालेरसंकूपाम्बुतंपपौ॥ तेसुराह्यपिपश्यंतोतन्मायेयविमोहिताः॥ ६१॥ तद्विज्ञायमहायोगीरसपालानिदंजगौ॥ स्वयंविशोकःशोकान्नन्निस्मरद्दैवविहितं॥ ६२॥ देवोसुरोनरोन्योवानेश्वरोस्तीहकश्चन॥ आत्मनोन्यस्यवादिष्टंदैवेनापोहितुंक्षमः॥ ६३॥ अथासौशक्तिभिःस्वाभिःशंभोःप्राधानिकंव्यधात्॥ धर्मज्ञानविरक्त्यृद्धितपोविद्याक्रियादिभिः॥ ६४॥ रथंसूतंध्वजंवाहान्धनुर्वर्मशरादियत्॥ संनद्धोरथमास्थायशरंधनुरुपाददे॥ ६५॥ शरंधनुष्यभिसंधायमुहूर्तेभिजितीश्वरः॥ ददाहतेनदुर्भेद्याःहरोथत्रिपुरोन्नृप ६६॥

न्यस्यवाह्वयोरपिवोदैवेनादिष्टमुपकल्पितं॥ आपोहितुंपरिहर्तुंइहकश्चिदपीश्वरःसमर्थोनास्ति॥ ६३॥ असौश्रीकृष्णस्वरूपधनंसंग्राममन्तरावनं॥ ६४॥ ६५॥ अभिजितमध्याह्ने ६६॥ ॥

विमानशतानि संकुलानि संकीर्णानि येषां ते देवादयः॥६७॥ आदित आरभ्य कृष्णपार्थौ निगमयति। एवंविधानीति॥६८॥ नृलोकं नराकारं मायामनो विडंब॥
मानस्यानुवर्ततः॥६९॥ ॥इति सप्तमे दशमः॥ ॥एकादशे वर्णानां धर्माः साधारणेन वर्णिताः॥ विशेषेण च वर्णानां सुखासुखावाप्त्युपयो वितो॥१॥ ततेवंद

दिवि दुंदुभयो नेदुर्विमानशतसंकुलाः॥ देवर्षिपितृसिद्धेशा जपेतुः कुसुमोत्करैः॥ अ वाकिरन् जयहृष्टा ननृतुश्चाप्सरोगणाः॥
॥६७॥ एवं दाक्षायणीपुत्रो भगवान् सुरहाच्युप। ब्रह्मादिभिः पूज्यमानः स्वधाम प्रत्यपद्यत॥६८॥ एवंविधान्यस्य हरेः स्वमायया विडंब
मानस्य नृलोकमात्मनः। वीर्याणि गीतान्यृषिभिर्जगद्गुरोर्लोकान्पुनानान्यपरं वदामि किं॥६९॥ ॥इति श्रीभागवते महापुरा
णे सप्तमस्कंधे युधिष्ठिरनारदसंवादे त्रिपुरविजयो नाम दशमोऽध्यायः॥१०॥ ॥श्रीशुक उवाच॥ ॥श्रुत्वेहितं साधुसभासभा
जितं महत्तमाग्रण्य उरुक्रमात्मनः। युधिष्ठिरो दैत्यपतेर्मुदान्वितः पप्रच्छ भूयस्तनयं स्वयंभुवः॥१॥ ॥युधिष्ठिर उवाच॥ ॥भगवन्
श्रोतुमिच्छामि नृणां धर्मं सनातनं। वर्णाश्रमाचारयुतं यत्पुमान्विंदते परं॥२॥ भवान्प्रजापतेः साक्षादात्मजः परमेष्ठिनः। सुतानां सं
मतो ब्रह्मंस्तपोयोगसमाधिभिः॥३॥ ॥

शांतिज्ञानि भक्तियेषा वुदीरितो। अथ पंचभिरध्यायैः कर्मयोगो निरूप्यते॥१॥ दैत्यपतेः प्रह्लादस्य साधूनां सभा साधुसभा तया सभाजितं सत्कृतं ईहितं चरितं श्रुत्वा उन्नतरिद्व्यप्र
च्छकथं भूतस्येहितं महत्तमानामग्रण्यः श्रेष्ठस्य। तत्र हेतुः। उरुक्रमे आत्मा मनो यस्य॥१॥ श्रवणेच्छायां हेतुत्रयं तस्य तो धर्मः स्वभावतः परं ज्ञानं भक्तिं च विंदति॥

नतुस्मृतिकारैर्धर्मतत्त्वमुक्तमेवात्राह।नारायणपरा इति।४।अजाय श्रीनारायणायतस्यैवमुखाच्छ्रुतं।५।तन्मुखादात्मनःश्रवणंसंभावयन्विशिनष्टियदिति।६।
प्रथमंतावद्धर्मप्रमाणमाह।धर्ममिति।धर्मस्यमूलंप्रमाणं।स्मृतंचस्मृतिःतद्विदांवेदविदां।येनचात्मामनःप्रसीदतितुष्यति।तथाचयाज्ञवल्क्यः।श्रुतिःस्मृतिःसदाचा
रःस्वस्यचप्रियमात्मनः।सम्यक्संकल्पजःकामोधर्ममूलमिदंस्मृतमिति।मनुश्च।वेदोखिलोधर्ममूलंस्मृतिशीलेचतद्विदां।आचारश्चैवसाधूनामात्मनस्तुष्टिरेवच

नारायणपराविप्राधर्मंगुह्यंपरंविदुः।करुणाःसाधवःशांतास्त्वद्विधानतथापरे।।४।।नारदउवाच।। ।।नत्वाभगवतेजायलोकानांधर्महे
तवे।वक्ष्येसनातनंधर्मंनारायणमुखाच्छ्रुतं।।५।।योवतीर्यात्मनोंशेनदाक्षायण्यांतुधर्मतः।लोकानांस्वस्तयेध्यास्तेतपोवदरिकाश्रमे।।६।।
धर्ममूलंहिभगवान्सर्ववेदमयोहरिः।स्मृतंचतद्विदांराजन्येनचात्माप्रसीदति।।७।।सत्यंदयातपःशौचंतितिक्षेक्षाशमोदमः।अहिंसाचब्रह्म
चर्यंचत्यागःस्वाध्यायआर्जवं।।८।।संतोषःसमदृक्सेवाग्राम्येहोपरमःशनैः।नृणांविपर्ययेहेक्षामौनमात्मविमर्शनं।।९।। ।।

ति।।७।।तत्रतावन्नरमात्रसाधारणंधर्ममाह।सत्यमितिपंचभिः।तपएकादश्युपवासादि।ईक्षायुक्तायुक्तविवेकः।शमोमनसःसंयमः।दमोबाह्येंद्रियाणां।योगोध्यानं।स्वा
ध्यायोयथोचितजपः।।८।।संतोषोयदृच्छालब्धेनालंबुद्धिः।समदृशांमहतांसेवा।ग्राम्येहोपरमःप्रवृत्तकर्मभ्योनिवृत्तिः।विपर्ययेहेक्षा।निःफलक्रियाणामीक्षणं।मौनंवृथा
प्रलापनिवृत्तिः।आत्मविमर्शनंदेहादिव्यतिरिक्तात्मानुसंधानं।।९।। ।। ।।

निःकारणेपरदुःखप्रहणेच्छादया २

यस्मि

आत्मेतिदेवतेतिचबुद्धिः॥ ९॥ अस्य श्रीकृष्णस्य श्रवणादयो नवाङ्ग्या अर्चितं॥ १०॥ एवंत्रिंशल्लक्षणवान्॥ १२॥ इदानीं वर्णधर्मान्विवक्षुः द्विजानां लक्षणमाह संस्का
रा मंत्रवंतो गर्भाधानाद्या अविच्छिन्नाः स द्विजः। तर्हि शूद्रस्यापि संस्कारा विच्छेदे सति द्विजत्वं स्यात् तत्राह। अजो ब्रह्मा यमेकं भूतसंस्कारयुक्तं जगाद स द्विजः। शूद्रं तु न मं
त्रवत्संस्कारयुक्तं जगाद नचोपनयनवंतं अतो नासौ द्विजः। तथा च स्मृतिः। विवाहमात्रं संस्कारं शूद्रोपि लभतां सदा। न तेन वित्तमप्यूज छंदसा तं प्रजापतिः।

अन्नाद्यादेः संविभागो भूतेभ्यश्च यथार्हतः। तेष्वात्मदेवताबुद्धिः सुतरां नृप पांडव॥ १०॥ श्रवणं कीर्तनं चास्य स्मरणं महतां गतेः। सेवेज्या
वनतिर्दास्यं सख्यमात्मसमर्पणं॥ ११॥ नृणामयं परो धर्मः सर्वेषां समुदाहृतः। त्रिंशल्लक्षणवान्राजन्सर्वात्मा येन तुष्यति॥ १२॥ संस्कारा यत्रा
विच्छिन्नाः स द्विजोऽजो जगाद यं। इज्याध्ययनदानानि विहितानि द्विजन्मनां। जन्मकर्मावदातानां क्रियाश्चाश्रमचोदिताः॥ १३॥ ॥

श्रुतिश्च॥ ११॥ गायत्र्या ब्राह्मणमसृजत त्रिष्टुभा राजन्यं जगत्या वैश्यं न केनचिच्छन्दसा शूद्रमिति। अतो विवाहव्यतिरिक्तसंस्कारस्यानावश्यकत्वात्। उपनयनस्य तु सर्वथा निषे
धात्तस्य द्विजत्वमित्यर्थः। पाठांतरे वेदिकाद्य इति गर्भाधानाद्य इत्यर्थः। त्रैवर्णिकानामावश्यकान्धर्मानाह इज्येति जन्मना विशुद्धेन कुलेन कर्मणा चश्चाचारेण
व अवदातानां शुद्धानां। दुष्कुलानां दुराचाराणां च नैतानि विहितानीत्यर्थः॥ ब्रह्मचर्याद्याश्रमविहिताः क्रियाश्च शूद्रस्य वर्णधर्म एव। आश्रमभेदकृतविशेषाभावात्॥

३

तु १

र्णीमपि वृत्तिधर्मो च्चे २

ब्राह्मणादीनां चतुर्णां साधारणीं विप्रस्येति साधैः सप्तभिः। विप्रस्य षट्कर्माणि विहितानीत्युक्तं प्राक्। तत्राध्ययनं याजनं प्रतिग्रहश्च जीविका। यथाह मनुः। षण्णां तु कर्मणां अस्य त्रीणि कर्माणि जीविका। याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रह इति। अन्यस्य क्षत्रियस्य अप्रतिग्रह इति। प्रतिग्रहातिरिक्तं याजनमध्यापनं वा पद्यत्युज्जानाति बव क्षत्रियानंतरमेव। अतो राजन्यमिति। श्रूयते च। अश्वपति कैकेयप्रभृतीनां क्षत्रियाणामुपदेष्टृत्वात् द्विजपालनेऽधिकृतस्य क्षत्रियस्य वृत्त्यंतरमाह। राज्ञ इति। आदि शब्देन दंडशुल्कादि॥१४॥ वार्ता कृषिवाणिज्यादिलक्षणा वृत्तिर्वैश्यस्य। शूद्रस्य द्विजशुश्रूषा विहिता। स्वामिनो द्विजस्य तु शुश्रूषा वृत्तिश्च भवेत्॥१५॥ विप्रस्य मुख्या

विप्रस्याध्ययनादीनि षडन्यस्याप्रतिग्रहः। राज्ञो वृत्तिः प्रजागोप्तुरविप्राद्वा करादिभिः॥१४॥ वैश्यस्य वार्तावृत्तिश्च नित्यं ब्रह्मकुलानुगः। शूद्रस्य द्विजशुश्रूषा वृत्तिश्च स्वामिनो भवेत्॥१५॥ वार्ता विचित्रा शालीनयायावरशिलोञ्छनं। विप्रवृत्तिश्चतुर्धेयं श्रेयसी चोत्तरोत्तरा॥१६॥ जघन्यो नोत्तमां वृत्तिमनापदि भजेन्नरः। अतो राजन्यमापत्सु सर्वेषामपि सर्वशः॥१७॥ ॥

तु कल्पभेदेन वृत्त्यंतराण्याह। वार्ता विचित्राः कृष्यादिरूपाः। शालीनं धार्म्यविनैव प्राप्तमयाचितं। यायावरं प्रत्यहं धान्ययाच्ञा। शिलं शालिक्षेत्रादौ स्वामिपरित्यक्तकणिशोपादानं। उञ्छनं आपणादिपतितकणोपादानं। शिलोञ्छनं द्वयमेकीकृत्य चतुर्द्धेत्युक्तं। श्रेयसी उत्तमा॥१६॥ वृत्तिष्वेव व्यवस्थां दर्शयन्नुक्तापद्वृत्तीराह। जघन्यो नीचः उत्तमां अध्यापनादिरूपां। अतो राजन्यं। क्षत्रियस्य प्रतिग्रहाद्यन्यां भजेत॥१७॥ ॥ ॥

रो २

×श्लोकांतरेण १ ×अमान्येन घ्नेनैव धान्नं तु विवर्जयेत् ॥ ३

वत्तुर्विधां पूर्वोक्तां विप्रहन्निमित्तेरेषामपि दर्शयन्नाह। सत्ताद्दत्तात्या मिति॥ १८॥ श्लोकं व्याचष्टे सतमिति। तयोः सद्भिर्निहेतुमाह सर्ववेदमय इति॥ २०॥ वर्णानां नाति व्यंजकरूपात् धर्मानाह शम इति चतुर्भिः। अकृतात्मत्वं श्री विष्णुपरत्वं॥ २१॥ शौर्यं युद्धोत्साहः। वीर्यं प्रतापः। तेजः प्रागल्भ्यं॥ २२॥ ३। अमंत्रयज्ञः नमस्कारेणैव पंचयज्ञानुष्ठानं। तथा च याज्ञवल्क्यः। नमस्कारेण मंत्रेण पंचयज्ञान्न हापयेदिति॥ २४॥ स्त्रीधर्मानाह। स्त्रीणामिति। पंचभिः। पतिरेव देवो यासां। तस्य पक्षः शुश्रूषा

व्रताश्च ॥ यां जीवेत्तद्धते न प्रहृते न वा। सत्याहृतात्यां जीवेत्तन्न श्वद्दत्त्या कथंचन॥ १८॥ सततं उंछशिलं प्रोक्तमसृतं यदयाचितं। मृतं तु नित्य याञ्चास्यात्प्रमृतं कर्षणं स्मृतं। सत्यानृतं तु वाणिज्यं श्ववृत्तिर्नीचसेवनं॥ १९॥ वर्जयित्वा सदा विप्रो राजन्यश्च जुगुप्सितां। सर्ववेदमयो विप्रः सर्वदेवमयो नृपः॥ २०॥ शमो दमस्तपः शौचं संतोषः क्षांतिरार्जवं। ज्ञानं दयाच्युतात्मत्वं सत्यं च ब्रह्मलक्षणं॥ २१॥ शौर्यं वीर्यं धृतिस्तेजस्त्याग आत्मजयः क्षमा। ब्रह्मण्यता प्रसादश्च रक्षा च क्षत्रलक्षणं॥ २२॥ देवगुर्वच्युते भक्तिस्त्रिवर्गपरिपोषणं। आस्तिक्यमुद्यमो नित्यं नैपुण्यं वैश्यलक्षणं॥ २३॥ शूद्रस्य संनतिः शौचं सेवा स्वामिन्यमायया। अमंत्रयज्ञो ह्यस्तेयं सत्यं गोविप्ररक्षणं॥ २४॥ स्त्रीणां च पतिदेवानां तच्छुश्रूषानुकूलता। २ ×प्र २ तद्बंधुष्वनुवृत्तिश्च नित्यं तद्व्रतधारणं॥ २५॥ संमार्जनोपलेपाभ्यां गृहमंडलवर्तनैः। स्वयं च मंडिता नित्यं परिमृष्टपरिच्छदा॥ २६॥ कामैरुच्चावचैः साध्वी प्रश्रयेण दमेन च। वाक्यैः सत्यैः प्रियैः प्रेम्णा काले काले भजेत्पतिं॥ २७॥ ॥ ॥

तद्बंधुष्वनुकूलता च। तस्य पक्षं नियमस्य धारणं। एतच्चतुष्टयं पतिव्रतानां लक्षणं धर्मश्च॥ २५॥ किंच। संमार्जनोपलेपाभ्यामित्यादिः पतिं भजेदित्यन्वयेन। वर्त्तनं परिमृष्टा उद्वर्तनादिना निर्मलीकृता परिच्छदा गृहोपकरणानि यया॥ २७॥ ॥ ॥

किं वा संतुष्टा यथालाभेन। तावन्मात्रभोगेष्वलोलुपा। दक्षा अनलसा प्रियासत्यावचा अपस्पृहाः। सर्वदापि अप्रमत्ता अवहिता पतितं महापातकभूतं। यथाहुर्याज्ञवल्क्यः। आ शुद्धेः संप्रतीक्ष्यो हि महापातकदूषित इति॥२८॥ तत्परा सती तज्जेत श्रीर्हरिमिव। हर्यात्मना पत्या सह॥२९॥ प्रतिलोमजानां वृत्तिमाह। वृत्तिरिति त्रिभिः कुलक्रमात् कुलपरंपराप्राप्ता। ~~धर्मसंक्रमप्राप्ता~~। परंपराप्राप्तमपि चौर्यहिंसादिकं प्रतिषेधति। अचोराणामपापानां चेति। अत्र प्रदर्शनार्थं क्वापि प्रतिलोमजविशेषानाह।

संतुष्टा लोलुपा दक्षा धर्मज्ञा प्रियसत्यवाक्। अप्रमत्ता शुचिः स्निग्धा पतिं त्वपतितं भजेत्॥२८॥ या पतिं हरिभावेन भजेच्छ्रीरिव तत्परा। हर्यात्मना हरेर्लोके पत्या श्रीरिव मोदते॥२९॥ वृत्तिः संकरजातीनां तत्तत्कुलकृता भवेत्। अचोराणामपापानामंत्यजांतेवसायिनां॥३०॥ प्रायः स्वभावविहितो नृणां धर्मो युगे युगे। वेददृग्भिः स्मृतो राजन्प्रेत्य चेह च शर्मकृत्॥३१॥ वृत्त्या स्वभावकृतया वर्तमानः स्वकर्मकृत्। हित्वा स्वभावजं कर्म शनैर्निर्गुणतामियात्॥३२॥ ॥ ॥

अंत्यजेति। रजकश्चर्मकारश्च नटो बुरुड एव च। कैवर्तमेदभिल्लाश्च सप्तैते अंत्यजाः स्मृताः। अंतेवसायिनश्च चांडालश्वपचमातंगादयः। तेषां परंपराप्राप्तैव वध्यनिर्णेजनादिवृत्तिरित्यर्थः॥३०॥ श्रेष्ठादपि परधर्मान्नीचोपि स्वधर्म एव श्रेयानित्याह। प्राय इति स्वभावेन सत्त्वादिप्रकृत्या विहितो धर्मः शर्मकृत् सुखहेतुः स्मृतः। कैर्वेददृग्भिर्वेद एव दृक् चक्षुर्येषां तैः। भगवता चोक्तं श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितादिति॥३१॥ ननु स्वाभाविकस्य कर्मणो बंधहेतुत्वात्कथं सुखहेतुत्वं तत्राह वृत्त्येति॥३२॥ ॥ ॥

न तु काम्यानि कर्माणि कुर्वतस्तत्फलोपरागपरस्य कथं नैर्गुण्यं स्यात्। तदुक्तं प्रह्लादेन। श्रीपद्मजेद्यं वज्रमन्यं मानःकथं विरज्येत दुरंतमोहं इत्यादि तत्राधिकार
निर्वेदेन स्वयं वाञ्छां सदृष्टांतमाह। उप्यमाना इति द्वाभ्यां। पुनःसूत्येस स्यात्कुप्रसवाय।३३। कामाशयाश्रयेन्तेवासनारूपेण यस्मिन्नत तत्। अयं तात्वकः। ज्वाट्टवासनाविष्टस्य
महे सेवकामत्यागासंलवाद्देशोक्तनियमेनवकुश्चकामानुभुंजानस्येवनित्यनैमित्तिकेर्विशुद्धचेतस्योः सद्दोषदर्शनेन तथयातिसो सिरिप्रसुखानामिवशनैर्विरा

उप्यमानं मुहुः क्षेत्रं स्वयं निर्वीर्यतामियात्। न कल्पते पुनः सूत्यै उप्तं बीजं च नश्यति॥३३॥ एवं कामाशयं चित्तं कामानामतिसेवया। विर
ज्येत यथा राजन्नग्निवत्कामबिंदुभिः॥३४॥ यस्य यल्लक्षणं प्रोक्तं पुंसो वर्णाभिव्यंजकं। यदन्यत्रापि दृश्येत तत्तेनैव विनिर्दिशेत्॥३५॥
॥इति श्रीभागवते महापुराणे सप्तमस्कंधे युधिष्ठिरनारदसंवादे सदाचारनिर्णये एकादशोऽध्यायः॥ ॥ ॥

गो भवति। यथा सर्वीर्यं क्षेत्रं शनैर्निर्वीर्यं भवति। यथा च प्रज्वलितोऽग्निर्न घृतबिंदुभिः शाम्यति। महता तु घृतपूरेण शाम्यत्येव तद्वत्। प्रह्लादस्कंतैंतस्मत्कौमार एव नि
र्हत्सुपदिशो मंत्वासनानामधिकारेण। तदुक्तं तत्रैव बालानहृषितधियो द्वंद्वारामैरितेहितैरिति। अतः सर्वमनवद्यं॥३४॥ शमादिभिरेव ब्राह्मणादिव्यवहारो मुख्यः न जा
तिमात्रादित्याह यस्येति। यद्यदि अन्यत्र वर्णांतरेपि दृश्येत तद्वर्णांतरं तैर्लक्षणनिमित्तैरेव वर्णेन विनिर्दिशेत् न तु जातिनिमित्तेनेत्यर्थः॥३५॥ सप्तमे एकादशोऽध्यायः॥

छ.त.२
४२३

नै

सा०भ०
५२

द्वादशेवर्णापतिधर्मो ब्रह्मचारिविनष्टयोः॥ चतुर्णामाश्रमाणां साधारणपेनकस्वभावः वर्णादीनां धर्मस्तिक्ताः इदानीमाश्रमधर्मानभिधास्यंतो तत्राद्यस्मिन्द्वादशे ब्रह्मचारिविन
ष्टयोरसाधारणाश्चतुर्णामसाधारणाश्चोच्यंते॥ त्रयोदशे गृहस्थधर्माः॥ चतुर्दशे गृहस्थस्य पंचदशे सर्वधर्मसारसंग्रहः॥ ब्रह्मचारी गुरुकुले वसन्गुर्वादीनुपासीत
गुरुतरेणावयः॥१॥ ब्रह्मगायत्रीजपश्च संध्यात्रयमप्युपासीत उभे संध्ये च यतवाक् भवेत्। सायंप्रातः संध्याकालनिमित्तं होमं कुर्यादित्यर्थः॥२॥ गुरोश्चरणो

नारद उवाच॥ ॥ब्रह्मचारी गुरुकुले वसन्दांतो गुरोर्हितं। आचरन्दासवन्नीचो गुरौ सुदृढसौहृदः॥१॥ सायंप्रातरुपासीत गुर्वग्न्यर्कसुरो
त्तमान्। संध्ये उभे च यतवाक् जपन्ब्रह्म समाहितः॥२॥ छंदांस्यधीयीत गुरोराहूतश्चेत्सुयंत्रितः। उपक्रमेऽवसाने च चरणौ शिरसा न
मेत्॥३॥ मेखलाजिनवासांसि जटादंडकमंडलू। बिभृयादुपवीतं च दर्भपाणिर्यथोदितं॥४॥ सायंप्रातश्चरेद्भैक्ष्यं गुरवे तन्निवेदयेत्।
क्वचित् भुंजीत यद्यनुज्ञातो नो चेदुपवसेत्॥५॥ सुशीलो मितभुग्दक्षः श्रद्दधानो जितेंद्रियः। यावदर्थं व्यवहरेत्स्त्रीषु स्त्रीनिर्जितेषु वा॥६॥ व
र्जयेत्प्रमदागाथामगृहस्थो बृहद्व्रतः। इंद्रियाणि प्रमाथीनि हरंत्यपि यतेर्मनः॥७॥ केशप्रसाधनोन्मर्दस्नपनाभ्यंजनादिकं। गुरुस्त्री
भिर्युवतिभिः कारयेन्नात्मनो युवा॥८॥ नन्वग्निः प्रमदा नाम घृतकुंभसमः पुमान्। सुतामपि रहो जह्यादन्यदा यावदर्थकृत्॥९॥ ॥

तं
नमेत्॥३॥ यथोदितं पालाशो दंडो ब्राह्मणस्येत्यादिनियममनतिक्रम्य जटाधारणं तु केशप्रसाधनाभावमात्रं॥४॥५॥ यावदर्थं यथोपयोगमेव॥६॥ बृहद्व्रतः
ब्रह्मचर्यवान् गृहस्थव्यतिरिक्तः सर्वोपि गाथामपि वर्जयेत् तत्र हेतुः॥ इंद्रियाणि बलवंति संयतस्यापि मनो हरंतीति॥७॥८॥ न कार्यमित्यत्र हेतुः नन्विति। रहः एकां
ते। अन्यदा केशप्रसाधनादिव्यतिरिक्ते वसरे तु एकांते वा यावदर्थं तदुक्तं कुर्यात्॥९॥ ॥

राम
५२
२

सा १

नतु मिथ्यात्वादिति कश्मलत्वाद्यस्त्वयं तं प्रकाशयन्नाप्रजिह्मादिति कोयमतिर्निर्विषयस्त्वात्ताहंकल्पयित्वेति आत्मा नास्वरूपसाक्षात्कारेणाऽहं देहेंद्रियादि आभासमा
त्रं कल्पयित्वा निश्चितमयात्त्वसौ जीवईश्वरः स्वतंत्रो न भवेत् । तावत् द्वैतं अहं एवमा नियंत्रीत्यादिभेदो न विरमेत् । ततः किमत आह । ततो हि द्वैता ता विपर्ययः गुणाभ्या
सेन भोपता वृद्धिः । अतो जपादिविस्तर्थः ॥ १० ॥ यतस्सर्वं वस्तु शीलपत्माफलं । गृहस्थस्य विशेषमाहयुरुष्टत्रिरिति ॥ ११ ॥ अंजनादीनामाभिप्रां तानां द्वंद्वैकं । अंजनं

कल्पयित्वात्मना यावदात्मा समिदमीश्वरः । द्वैतं तावन्न विरमेत्ततो ह्यस्य विपर्ययः ॥ १० ॥ यतस्सर्वं गृहस्थस्य समाम्नातं यतेरपि । गुरुवृत्ति
विकल्पेन गृहस्थस्यर्तुगामिनः ॥ ११ ॥ अंजनाभ्यंजनोन्मर्द्दस्त्र्यवलेखामिषंमधु । स्रग्गंधालेपालंकारांस्त्यजेयुर्ये धृतव्रताः ॥ १२ ॥ उषित्वैवं गु
रुकुले द्विजोधीत्यावबुध्य वा । त्रयीं सांगोपनिषदं यावदर्थं यथाबलं ॥ १३ ॥ दत्वा वरमनुज्ञातो गुरोः कामं यदीश्वरः । गृहं वनं वा प्रविशेत्प्रव्रजेत्त
त्र वा वसेत् ॥ १४ ॥ अग्नौ गुरावात्मनि च सर्वभूतेषु मां परं । भूतैः स्वधामभिः पश्येदप्रविष्टं प्रविष्टवत् ॥ १५ ॥ ॥ ॥

शरीरस्य अभ्यंजनं शिरसः । भिर्यं च अवलेखा व विनत्तक मध्रीणां कुर्यादौ लेखनं वा तन्निरीक्षणं वा । अत्र अभ्यंगादिस्वरूपतो निषिध्यते । पूर्वं उक्तं अर्थं विदा पदिश्राप्तम
पित्री कर्ट किं निषिद्धमितिनेदः ॥ १२ ॥ अंगैः शिक्षादिभिरुपनिषद्भिस्सहितां वेदत्रयीमधीत्य अवबुध्य च तदर्थं च विचार्य यावदर्थं स्वाधिकारानुसारेण ॥ १३ ॥ यदीश्वरः
शक्तः तर्हि गुरोः काममपेक्षितं वरं दत्वा यथाधिकारं गृहस्थाद्याश्रमं स्वीकुर्यात् । तत्रैव वा वसेत् नैष्ठिकः स्यादित्यर्थः ॥ १४ ॥ स्वधामभिः स्वाश्रयैर्भूतैः जीवैः सह तन्नियंतृतया
॥ १५ ॥

ना०स०

× ९३ ५३

चरन्नूरणमावरन्। विदितंविज्ञानंविशेयंयेनसः॥१६॥ अखिलोकंमहर्लोकं॥१७॥ अकृष्टपच्यंअकालतःपाकंकालात्पूर्वमेवतिष्ठत्यमित्यर्थः। अर्कप
क्वंफलादिआहरेतअश्नीयात्॥१८॥ वन्यैर्नीवारादिभिः कालचोदिताः इतिप्रासुभूराणंपूर्वसंचितं॥१९॥ हिमादीन्सहतइतितथा॥२०॥ केशादीन्
मलंवाप्रक्षन्नेनधारयन्नाकमंडल्वादीन्दधत्॥२१॥ कृच्छ्रतःक्लेशाद्यथावृद्धिर्नतिष्ठेन्नथाचरेत्॥२२॥ द्वादशाब्दाद्यनंतरमपियद्विषमाद्धिष्ठेतिशक्त

एवंविधोब्रह्मचारीवानप्रस्थोयतिर्गृही। चरन्नविदितविज्ञानःपरंब्रह्माधिगच्छति॥१६॥ वानप्रस्थस्यवक्ष्यामिनियमान्मुनिसंमतान्
यानातिष्ठन्मुनिर्गच्छेदृषिलोकमिहांजसा॥१७॥ नकृष्टपच्यमश्नीयादकृष्टंचाप्यकालतः। अग्निपक्वमथामंवा अर्कपक्वमुताहरेत्
॥१८॥ वन्यैश्चरुपुरोडाशान्निर्वपेत्कालचोदितान्। लब्धेनवेनवेन्नाद्येपुराणंतुपरित्यजेत्॥१९॥ अग्न्यर्थमेवशरणमुटजंवाद्रिकंदरं
श्रयेतहिमवाय्वग्निवर्षार्कातिपसाःस्वयं॥२०॥ केशरोमनखश्मश्रुमलानिजटिलोदधत्। कमंडल्वजिनेदंडवल्कलाग्निपरिच्छदान्॥२१
चरेद्वनेद्वादशाब्दानष्टौवाचतुरोमुनिः। द्वावेकंवायथावुद्धिर्नविपद्येतकृच्छ्रतः॥२२॥ यदाऽकल्पःस्वक्रियायांव्याधिभिर्जरयाथवा। आ
न्वीक्षिक्यांवाविद्यायांकुर्यादनशनादिकं॥२३॥ आत्मन्यग्नीन्समारोप्यसंन्यस्याहंममात्मतां। कारणेषुन्यसेत्सम्यक्संघातंतुयथार्हतः॥२४॥

राम
५३

स्वर्हिवनएववसेत्। यदिवृज्ञानाभ्यासेयोग्यस्तर्हिसंन्यसेदित्यतराध्यायेवक्ष्यति। तद्वत्तयरहितस्यतुयत्कर्तव्यंतदाह। यदाऽकल्पःअसमर्थः। आन्वीक्षि
क्यांज्ञानाभ्यासे॥२३॥ अनशनादिकरिष्यतःपूर्वकृत्यमाह। आत्मनीत्यादिश्याव त्समाप्तियथार्हतःयथायोग्यंस्वकारणेषुआकाशादिषुसंघातंदेहंन्यसेत्प्रविलाप
येत्॥२४॥

मा १

तदेवविलज्यदर्शयति। खेआकाशेखानिदेहगच्छतिघ्राणिं। आत्मवान्बुधीमान्शोधं अस्थिमांसादिकठिनांशं॥२५॥ एवंस्थूलशरीरस्यलयमुक्त्वालिंगशरीररूपस्याध्यात्मादित्रयस्यलयमाह। वाचमित्यादिना। तत्रयद्यपियथोद्देशंलयस्यपुक्तत्वादध्यात्मादीनांखस्वकारणेष्विराजन्माहंकारादिषुलयोवाच्यः। तथापीहतेषांलयभावनेश्रमहितीयात्मप्रतिपत्तिपरेतियथाकथंचिद्विलयेलाध्यैदेवतानांप्रवर्त्तकत्वेनप्राधान्यादिंद्रियतद्विषययोर्देवतासुलयःकथ्यते। वक्तव्यसहितांवाचमग्नौन्यसेत्। एवंसर्वत्रपदानि पादौविष्णौ विलीनो॥२६॥ सनादेनशब्देनसह। अध्यात्मनिवायौअध्यात्मविदितिपाठेवायाविविनिज्ञातद्वं॥२७॥ ज्योतिषिआदित्येरसगंधयोश्चेंद्रियाकर्षकत्वेनप्राधान्यादि

खेखानिवायौनिश्वासांस्तेजसस्पर्शाणाम। तमवाङ्गुअस्ते चक्षुःशेषमपूर्यानिर्निहितोशेषंयथोद्देशं॥२५॥ वाचमग्नौसवक्तव्यांमिंद्रेशिल्पंकरावपि पदानिगात्यावयसित्योपस्थंप्रजापतौ॥२६॥ सृत्योपापुंविसर्गंवियथास्थानंविनिर्दिशेत्। दिक्षुश्रोत्रंसनादेनस्पर्शमध्यात्मनित्वचं॥२७॥ रूपाणिच

षा

ज्योतिराजन्ज्योतिष्यभिनिवेशयेत्। अप्सुप्रचेतसाजिह्वांघ्रेयैर्घ्राणंक्षितौन्यसेत्॥२८॥ मनोमनोरथैःसार्द्धंबुद्धिंवोध्यैःकवौपरे। कर्मण्यध्यात्मतां रुद्रेयदहंममताक्रियासत्त्वेनचित्तंक्षेत्रज्ञेगुणैर्वैकारिकंपरे॥२९॥ ॥

विवक्षयादेवतासहितस्येंद्रियस्यविषयेलयमाह। प्रचेतसामहजिह्वारसतंत्र्यप्सुरसरूपासुघ्राणंशब्देनाश्विनोरप्सुपलक्षणं। क्षितिस्पांमहघ्राणंघ्रेयैर्गंधैरुपलक्षितायांक्षितावित्यर्थः॥२८॥ परेकवौब्रह्मणि। अध्यात्मना अहंकारेणअध्यात्मताभितिपाठेकर्मणिपहंकारंचेत्यर्थः। कथंभूतेरुद्रेयस्मादहंममताप्रवर्त्तिकाक्रियाभवतितस्मिन् सत्वेनचेतनयायुगणैःगुणकार्यैःप्राणविशेषैर्देवैःसह। यद्वा। सत्वादित्रिगुणैर्हेतुभूतैर्वैकारिकंभौतिकावादिविकारवंतंक्षेत्रज्ञंपरेनिर्विकारेब्रह्मणि॥२९॥ ॥ ॥

म

भा०स०
५४

ननुविकारवतःकथंपरेलयःस्यात्।विकारहेतूनांसर्वोपाधीनांलयद्वारेणेत्याह।अप्स्विति।अदोज्योतिः।तद्वतलःकूटस्थेअहंतत्वेतद्वकूटस्थंमहति महत्तत्वे।त
दव्यक्तेप्रधानेतच्चात्मकंब्रह्मन्नेरपरमात्मनि॥३०॥इतिसर्वोपाधिलयाद्धेतोःअवशेषितंचिन्मात्रमात्मानंतन्नेत्रसमन्तरतमान्नात्वाअद्वयःसन्विरमेत्।दग्धकाष्ठोयथा
नलः॥३१॥इतिसप्तमेद्वादशः॥त्रयोदशेयतेर्धर्माःसाधकस्योत्तमहानूर्ववृत्तिहासेनसिद्धावस्थावर्णते।एवंध्यात्वाअकल्पोऽनशनादिकंकुर्यात्।आवी
अ ती

अप्सुक्षितिमपोज्योतिष्यदोवायौनलस्पृशं।कूटस्थेतञ्चमहतितदव्यक्तेन्नरेवतत्॥३०॥इत्यन्नरतयात्मानंचिन्मात्रमवशेषितं।ज्ञात्वाऽद्व
योथविरमेद्दग्धयोनिरिवानलः॥३१॥ ॥इतिश्रीभागवतेमहापुराणेसप्तमस्कंधेद्वादशोध्यायः॥ ॥नारदउवाच॥ ॥कल्पस्त्वेवंपरिव्रज्य
देहमात्रावशेषितः।ग्रामैकरात्रविधिनानिरपेक्षश्चरेन्महीं॥१॥बिभृयाद्यद्यसौवासःकौपीनाच्छादनंपरं।त्यक्तंनलिंगाद्दंडादेरन्यत्किंचिद
नापदि॥२॥एकएवचरेद्भिक्षुरात्मारामोनपाश्रयः।सर्वभूतसुहृच्छांतोनारायणपरायणः॥३॥पश्येदात्मन्यदोविश्वंपरेसदसतोऽव्यये।आत्मा
नंचपरंब्रह्मसर्वत्रसदसन्मये॥४॥ ॥

दि

क्षिकांकल्पस्त्वेवंध्यात्वापरिव्रजेदितिसंबंधः।कियद्दत्रत्याज्यं।देहव्यतिरिक्तंसर्वमित्याह।देहमात्रेति।तस्यधर्मानाह।ग्रामैकरात्रेतिनवभिः॥१॥कौपीनमाच्छाद्यतेया
वतातावन्मात्रंपरंकेवलं।अन्यदितिवा।त्यक्तंप्रैषोच्चारणात्सर्वमिव॥२।३॥सदसतःपरेकार्यकारणव्यतिरिक्ते॥४॥ ॥

राम
५४

न्यात्मानंपरंब्रह्मेतिकथंसामानाधिकरण्यनिर्देशः। नहिवह्नितुहिनयोरेक्यंसंभवतितत्राह। सुप्तेति। सुषुप्तेहितमसावृतमात्मतत्वंजाग्रत्स्वप्नयोस्तुविक्षिप्तंप्रकाशतेसंध्यो
स्तुततमोनापिविक्षेपः। अतस्तदा। आत्मदृक्। आत्मानंलक्षीकृत्यपश्यन्। अत्र आत्मनोगतिंतत्वंपश्यन्। अतएवबंधमोक्षंचमायामात्रंपश्यन्। आत्मानंपरंब्रह्मसर्वत्रपश्येदित्य
न्वयः। तदुक्तंयोगग्रंथे। निद्रादौजागरस्यांतेयोभावउपजायते। तंभावंभावयन्नित्यंमुच्यतेनेतरोयतिरिति॥५॥ अस्पदेहस्यप्रतवोऽप्ययक्षयस्मात्तत्कालं॥६॥ असच्छास्त्रेषु
अनात्मपरेषु। जीविकांवृत्तिंविद्यादिष्टिन्नि। वादवादान्जल्पवितंडानिष्ठान्। कंचनकमपिपक्षंनिर्बंधेननसंश्रयेत्॥७॥ नानुबध्नीतप्रलोभनादिनाबलान्नापादयेत्। आ

सुप्तप्रबोधयोःसंध्यावात्मनोगतिमात्मदृक्। पश्यन्बंधंचमोक्षंचमायामात्रंनवस्तुतः॥५॥ नाभिनंदेद्ध्रुवंमृत्युमध्रुवंवास्यजीवितं। कालंपरंप्रतीक्षेतभूता
नांप्रलयाश्रयं॥६॥ नासच्छास्त्रेषुसज्जेतनोपजीवेतजीविकां। वादवादांस्त्यजेत्तर्कान्पक्षंकंचननाश्रयेत्॥७॥ नशिष्याननुबध्नीतग्रंथान्नैवाभ्यसेद्बहून्। न
व्याख्यामुपयुंजीतनारंभानारभेत्क्वचित्॥८॥ नयतेराश्रमःप्रायोधर्महेतुर्महात्मनः। शांतस्यसमचित्तस्यबिभृयादुतवात्यजेत्॥९॥ ॥ ॥

रंभाःमठादिव्यापाराः॥८॥ परमहंसस्यविशेषमाह। नयतेराश्रमोधर्मार्थिः। कथंभूतस्यमहात्मनः। तस्यलक्षणं। शांतस्येत्यादि। प्रायइत्यस्यायंभावः। ज्ञानोत्पत्तिपर्यंतं
बहूदकादिलिंगमाश्रित्यसत्वशुध्यर्थंयमान्नियमांश्चाकरन्नेवज्ञानोत्पत्तयेयतेत। उत्पन्नेतुज्ञानेननियमैःकृत्यमस्तिअथमाश्रमस्वतएवस्फुरं। अतस्तदालिंगादिलिंगःप्रयो
जनाभावाल्लोकसंग्रहार्थंधारयेद्वात्यजेद्वेति॥ ॥९॥ श्री॥ ॥ ॥

भा॰स्क॰
५५

तस्यैव ज्ञानदार्ढ्याभावे योगभ्रंशपरिहारार्थमाह। नवहिर्व्यक्तं लिंगं यस्य। व्यक्तोर्थः प्रयोजनमात्मानुसंधानं यस्य सः। मनीष्यपि उन्मत्तवद्बालवच्च। कविरपि मूकव
दात्मानं नृणां दृष्ट्या दर्शयेत्। तिर्यथोन्मत्तादिरूपं मन्येरंस्तथा वर्तेत। स्वदृष्ट्येति पाठे वा आत्मानुसंधानाभावेनेत्यर्थः॥१०॥ परमहंसधर्ममेवेतिहासेन स्फुटयति। अत्रापीति। या
वदध्यायसमाप्ति। अजगरवृत्तस्य मुनेश्च॥११॥ धरोपस्थे भूपृष्ठे। सह्याद्रेः स्नेटरजोभिर्धूसरैस्तनूदेशैर्देहावयवैर्निगूढममलं तेजो यस्य तं॥१२॥ कर्मादिभिर्जना यं न विदुः

अव्यक्तलिंगो व्यक्तार्थो मनीष्युन्मत्तबालवत्। कविर्मूकवदात्मानं स्वदृष्ट्या दर्शयेन्नृणां॥१०॥ अत्राप्युदाहरंतीममितिहासं पुरातनं। प्रह्लादस्य च संवा
दं मुनेराजगरस्य च॥११॥ तं शयानं धरोपस्थे कावेर्यां सह्यसानुनि। रजस्वलैस्तनूदेशैर्निगूढामलतेजसं॥१२॥ ददर्श लोकान्विचरंल्लोकतत्वविवित्सया। वृतो
ऽमात्यैः कतिपयैः प्रह्लादो भगवत्प्रियः॥१३॥ कर्मणाकृतिभिर्वाचा लिंगैर्वर्णाश्रमादिभिः। न विंदंति जना यं वै सोसाविति न वेत्ति वा॥१४॥ तं नत्वाभ्यर्च्य विधि
वत्पादयोः शिरसा स्पृशन्। विवित्सुरिदमप्राक्षीन्महाभागवतोसुरः॥१५॥ बिभर्षि कायं पीवानं सोद्यमो भोगवान्यथा। वित्तं चैवोद्यमवतां भोगो वित्तवता
मिह। भोगिनां खलु देहोयं पीवा भवति नान्यथा॥१६॥ न ते शयानस्य निरुद्यमस्य ब्रह्मन्नु हार्थो यत एव भोगः। अभोगिनोयं तव विप्र देहः पीवा यत
स्तद्वद नः क्षमं चेत्॥१७॥ ॥

तं पादयोः शिरसा स्पृशन्नत्वा अप्राक्षीदित्युत्तरेणान्वयः॥१५॥१६॥ उद्यमसहित इव भोगवानिव पीवानं स्थूलं देहं धारयसि। तत्र हेतुं वदेति तृतीयेनान्वयः। उद्यमं
विनैव मम भोगोऽस्तीति चेत्तत्राह वित्तं चेति। उ इति निश्चये हे इति प्रसिद्धौ तवार्थो नास्तीति प्रसिद्धमेवेत्यर्थः। यतो यद्वित्तं ततो हेतोः पीवोन्नमं यो पंचेत्॥१७॥ ॥

राम
५५

भोग:१

किंच वित्तार्थर्जनाद्यसमर्थोऽप्ययं जनस्तदर्थमुद्यमं करोति। त्वं तु समर्थोऽपि किमिति न करोषीत्याह कविर्विद्वान् कल्यो दक्षः निपुणदृक् चतुरः। चित्राः प्रियाः लोकरंजनाः कथा यस्य। तथापि लोकस्य कर्म कुर्वतः शेषे तद्वीक्षिताऽपि वा ततः सर्वं पिशपन्न पिपाठांतरे न दृष्टित कर्मतदृषितो। पिवानवन्नो पिबीत्यर्थः। तस्य वा गोवा दृष्टं तेनयं जितो वशीकृतः सन्। अथ त्वमवकृष्या अंतर्दृष्ट्या भवान्वैदेव आर्याणां ज्ञानिनां संमतो न तु सत्त्वा त्रु इति दमिति यदुक्तं तदेवाह। इत्याणामीहोपरमयो दृष्टहन्निति दृष्टयोः पराति निष्ठा नातिफ

कविः कल्यो निपुणदृक्चित्रप्रियकथः शमः। लोकस्य कुर्वतः कर्म शिषे तद्वीक्षिताऽपि वा॥१९॥ ॥नारद उवाच॥ ॥सम्यक् छंदितोऽप्यपतिना परिदृष्टोऽस्म महामुनिः। अस्मयमानस्तमभ्याह तद्वाग्भूतहर्षितः॥१९॥ ॥ब्राह्मण उ॥ ॥वेदेदमसुरश्रेष्ठ भवान्नाख्यायार्यसंमतः। ईहोपरमयोर्नृणां पदान्यध्यात्मचक्षुषा॥२०॥ यस्य नारायणो देवो भगवान्हृद्गतः सदा। तन्वा केवलया ज्ञानं धुनोति ध्वांतमर्कवत्॥२१॥ अथापि ब्रूमहे प्रश्नांस्तव राजन्यथाश्रुतं। संभावनीयो हि भवान् आत्मनः शुद्धिमिच्छतां॥२२॥ तृष्णया भववाहिन्या योग्यैः कामैरपूर्यया। कर्माणि कार्यमाणोऽहं नानायोनिषु योजितः॥२३॥ यदृच्छया लोकमिमं प्रापितः कर्मभिर्भ्रमन्। स्वर्गापवर्गयोर्द्वारं तिरश्चां पुनरस्य च॥२४॥ ॥

लाभालीप्यर्थश्च वेदेत्यत्र हेतुर्यस्येति हृदि प्रविष्टः स्वतत्त्वज्ञानं धुनोति अर्को यथा वहिर्भूतं तमः यथाश्रुतमित्यौद्धत्यपरिहाराय योक्तं लोकः कर्मसु प्रवर्तते त्वं तु निवृत्तः सत्र किं शेष इति यदुक्तं तत्राह। तृष्णयेति चतुर्भिः। भवप्रवाहकारिण्या यथोचितैरपि विषयैः पूरयितुमशक्यया तृष्णया कर्मसु प्रवर्त्यमानोऽहं नानायोनिषु प्रवेशितः। तथैवेमं लोकं मनुष्यदेहं यदृच्छया प्रापितः। कथंभूतं लोकं। धर्मेण स्वर्गस्यापवर्गस्य द्वारं साधनं। अधर्मेण तिरश्चां पुनरस्य च मनुष्यत्वस्य। नेदं हरिमिश्रास्यांता स्यांपुनरप्यस्य मनुष्यस्य द्वारं सर्वतो नि

॥श्री॥ भा॰ द॰ स्कं॰ टी॰ ८४

भा०स०

५६

अत्रापि मत्तुच्छत्वेपि । अन्यापत्तत्त्वयेदुःखनिवृत्त्यै विपर्ययं द्रक्ष्यानिवृत्तोऽस्मि ॥२५॥ प्रवृत्त्या कदाचित्सुखं मे स्यादपि निवृत्त्या तु किं स्यादिति चेत्तत्राह । सुखमस्य
जीवस्य स्वरूपमेव तर्हि किं न प्रकाशते तत्राह । सर्वेति । तनोतीति तनुः सर्वक्रियानिवृत्तौ स्वत एव प्रकाश इत्यर्थः । भोगांश्च मनःसंस्पर्शजान् मनोरथमात्रजान् दुः
शाश्वतान् द्रक्ष्यामि स्वप्स्यामि निरुद्यमोऽस्मीत्यर्थः । तर्हि कदाचित्कथं दुःखं तत्राह । संविशन् आरब्धभोगान् भुंजान इत्यर्थः ॥२६॥ एवं चेत्कोपि संसारं न प्राप्नुयात् । तत्राह ।
इत्येतद्धात्मनः सुखात्मकं रूपं स्वार्थं स्वस्मिन्नेव संतं पुरुषार्थं विस्मृत्य । असत्यपि द्वैते ॥२७॥ एतदेव दृष्टांतेन स्पष्टयति जलमिति । तदुद्भवैः शैवालादिभिः जलका

अत्रापिदंपतीनांचसुखायान्यापनुत्तये । कर्माणिकुर्वतांदृष्ट्वानिवृत्तोस्मिविपर्ययं ॥२५॥ सुखमस्यात्मनोरूपंसर्वेहोपरतिस्तनुः । मनःसंस्पर्श
जान्दृष्ट्वाभोगान्स्वप्स्यामिसंविशन् ॥२६॥ इत्येतदात्मनःस्वार्थंसंतंविस्मृत्यवैपुमान् । विचित्रामसतिद्वैतेघोरामाप्नोतिसंसृतिं ॥२७॥ जलंतदुद्भवैश्छ
न्नंहित्वाज्ञोजलकाम्यया । मृगतृष्णामुपाधावेत्तथान्यत्रार्थदृक्स्वतः ॥२८॥ देहादिभिर्दैवतंत्रैरात्मनःसुखमीहतः । दुःखात्ययंचानीशस्यक्रियामो
घाःकृताःकृताः ॥२९॥ आध्यात्मिकादिभिर्दुःखैरविमुक्तस्यकर्हिचित् । मर्त्यस्यकृच्छ्रोपनतैरर्थैःकामैःक्रियेतकिं ॥३०॥ पश्यामिधनिनांक्लेशंलुब्धाना
मजितात्मनां । भयादलब्धनिद्राणांसर्वतोभिविशंकिनां ॥३१॥

×२४३

म्यया जलेच्छया स्वतः आत्मस्वरूपादन्यत्र पुरुषार्थं पश्यन् ॥२८॥ एवं स्वस्य निरुद्यमत्वे कारणमुक्त्वा विपर्ययं द्रक्ष्येति यदुक्तं तद्विवृणोति देहादिभिरिति पंचभिः । ईहतः इ
च्छतः । अनीशस्य पुनः पुनः प्राप्ताः क्रिया मोघा विफला एव भवंति ॥२९॥ क्रियाणां सफलत्वेपि फलस्यानुपयोगमाह । आध्यात्मिकादिभिरिति । मर्त्यस्य मरिष्यतः कृच्छ्रे
ण दुःखेनोपनतैः प्राप्तैः ॥३०॥ कृच्छ्रं विनैव प्राप्तैरप्यर्थैर्दुःखं तद्वदस्थमित्याह । पश्यामीति ॥३१॥ ॥ ॥

राम

५६

भयंप्रपंचयति।राजतइति।यस्मात्स्वत एवकथंचिन्नाशोमोहाविस्मरणादिना नाशःस्यादिति।प्राणवतामर्थवा[illegible]वसर्यंनित्यं॥३२॥अतोनर्थहेतुत्वात्प्राणेचार्थेस्पृहान
कार्येत्याह।शोकेति॥३३॥नन्वेवमनर्थानत्तु लवंतोपिनकेचिद्विरज्यंते।नवयथालालेन तुष्यंति।त्वंतुकथंवैराग्यपादिकंप्राप्तोसि तत्राह।मधुकारेति।मधुमक्षिका।अजग
रोमयोःशिक्षयाहृत्तपर्यालोचनया॥३४॥मधुकराच्छिक्षितमाह।विरागइति।वित्तपतिंहत्वाप्यन्योवित्तंहरेदित्येवं॥३५॥अजगराच्छिक्षितमाह।अनीहइति।सत्ववानुधैर्य

राजतश्चोरतःशत्रोःस्वजनात्पशुपक्षितः।अर्थिभ्यःकालतःस्वस्मान्नित्यंप्राणार्थवद्भयं॥३२॥शोकमोहभयक्रोधरागक्लैव्यश्रमादयः।यन्मूलाः
स्युर्नृणांजह्यात्स्पृहांप्राणार्थयोर्बुधः॥३३॥मधुकारमहासर्पौलोकेस्मिन्नोगुरूत्तमौ।वैराग्यंपरितोषंचप्राप्तायच्छिक्षयावयं॥३४॥विरागःस
र्वकामेभ्यःशिक्षितोमेमधुव्रतात्।कृच्छ्राप्तंमधुवद्वित्तंहत्वाप्यन्योहरेत्पतिं॥३५॥अनीहःपरितुष्टात्मायदृच्छोपनतादहं।नोचेच्छयेबह्वहानि
महाहिरिवसत्ववान्॥३६॥क्वचिदल्पंक्वचिद्भूरिभुंजेन्नंस्वाद्वस्वादुवा।क्वचिद्भूरिगुणोपेतंगुणहीनमुतक्वचित्॥३७॥श्रद्धयोपहृतंक्वापिकदाचि
न्मानवर्जितं।भुंजेभुक्त्वाथकस्मिंश्चिद्दिवानक्तंयदृच्छया॥३८॥क्षौमंदुकूलमजिनंचीरंवल्कलमेववा।वसेन्यदपिसंप्राप्तंदिष्टभुक्तुष्टधीरहं
॥३९॥क्वचिच्छयेधरोपस्थेतृणपर्णाश्मभस्मसु।क्वचित्प्रासादपर्यंकेकशिपौवापरेच्छया॥४०॥क्वचित्स्नातोनुलिप्तांगःसुवासाःस्रग्व्यलंकृतःरथे
भाश्वैश्चरेक्वापिदिग्वासाग्रहवद्विभो॥४१॥ ॥ ॥

द

वान्नापीनत्वेहं॥३६॥अनीहइति।अनीहत्वेनयदृच्छयाप्राप्तेनपरितोषंप्रपंचयति।क्वचिदल्पमितित्रिभिः॥३८॥चीरंजीर्णवस्त्रखंडंवसेपरिदधे।दिष्टभुक्प्रारब्धभोगी
॥३९॥प्रासादमध्येपर्यंकेतच्चापिकशिपौ॥४०॥चरेविचरामि।क्वचिद्ग्रहवद्दिगंबरोविचरामि॥४१॥ ॥ ॥

भा०स्क० ७
५७

तवमात्मा न परमात्मानं करिष्ये इत्येवं विषमस्वभावं ममेत्याह। नाहं निंदामि महात्मनि विश्वे॥४२॥ एवंभूतस्य चित्तनिस्थितत्वमुपायमाह। विकल्पमिति द्वाभ्यां। चित्तौ भेदग्राहकमनोवृत्तौ। अर्थरूपो विभ्रमो यस्मिन् वैकारिके अहंकारे। अनु अनंतरं महत्तत्त्वद्वारेणेत्यर्थः॥४३॥ सत्यमेव पश्यतीति तथा॥४४॥ मंदबुद्धेः लोकशास्त्राभ्यां व्यपेतं न तु तत्त्वदृष्ट्या यतो भवान् भगवत्परः॥४५॥ इति सप्तमे त्रयोदशः॥१३॥ ॥चतुर्दशे गृहस्थस्य परमो धर्म ईर्यते। देशकालादिभेदेन तत्पुनः श्रेयो विशेषकृत्॥ गृहस्थस्य तु न बंधमोक्षं प्रति

नाहं निंदे न च स्तौमि स्वभावविषमं जनं। एतेषां श्रेय आशासे उतैकात्म्यं महात्मनि॥४२॥ विकल्पं जुहुयाच्चित्तौ तां मनस्यर्थविभ्रमे। मनो वैकारिके हुत्वा तं मायायां जुहोत्यनु॥४३॥ आत्मानुभूतौ तां मायां जुहुयात्सत्यदृङ्मुनिः। ततो निरीहो विरमेत्स्वानुभूत्यात्मनि स्थितः॥४४॥ स्वात्मवृत्तं मयेत्थं ते सुगुप्तमपि वर्णितं। व्यपेतं लोकशास्त्राभ्यां भवान्हि भगवत्परः॥४५॥ नारद उवाच॥ ॥धर्मं पारमहंस्यं वै मुनेः श्रुत्वासुरेश्वरः। पूजयित्वा ततः प्रीत आमंत्र्य प्रययौ गृहं॥४६॥ ॥इति श्रीभागवते महापुराणे सप्तमस्कंधे युधिष्ठिरनारदसंवादे यतिधर्मे त्रयोदशोध्यायः॥१३॥ ॥युधिष्ठिर उवाच॥ ॥गृहस्थ एतां पदवीं विधिना येन चांजसा। याति देवऋषे ब्रूहि मादृशो गृहमूढधीः॥१॥ ॥नारद उवाच॥ ॥गृहेष्ववस्थितो राजन्क्रियाः कुर्वन्गृहोचिताः। वासुदेवार्पणं साक्षादुपासीत महामुनीन्॥२॥ शृण्वन्भगवतोभीक्ष्णमवतारकथामृतं। श्रद्दधानो यथाकालमुपशांतजनावृतः॥३॥ सत्संगाच्छनकैः संगमात्मजायात्मजादिषु। विमुच्येन्मुच्यमानेषु स्वयं स्वप्नवदुत्थितः॥४॥ ॥

राम
५७

श्रुतं राज्ञा तेन प्रथमं वनस्थयतिधर्मेषु लिखितेषु तर्हि गृहस्थस्य परमो ज्ञानस्यादिति शंकितचित्तः पृच्छति। गृहस्थ इति। तत्परमो नेद्धमतिमाह। गृहेष्वित्यादि यावदध्यायसमाप्ति। साक्षाद्वासुदेवार्पणं यथा भवत्येवं कुर्वन्नुपासीत॥२॥३॥ स्वयमेव मुच्यमानेषु विमुच्यमानेषु यथा उत्थितः स्वप्नदृष्टेषु पुत्रादिषु संगं विमुंचतीति तद्वत्॥४॥ ॥

दुर्भैरसिवहृतयमान भ्रिया ते

नन्वेवं स्नृतस्यैड्ज ... नस्य कुतो गृहे। चितोः स्युस्तत्राह यावदर्थमिति। अंतरनासक्तः वहिः सारक्त इव नृलोके जनमध्ये नरतां मानुष्यं न्यसेत्। पुत्रउपकारमाविकुर्यादित्यर्थः॥५॥ आग्रहं तु धर्मापि न कुर्यादित्याह। ज्ञातय इति॥६॥ नन्वेवं सर्वानुमोदने वित्तव्ययप्रसंगात् कुतो जीवनं कुतो वा कर्मकरणं तत्राह। दिव्यं दृष्ट्यादिनिर्जातं धान्यादि। भौमं निधानादि। अंतरिक्षं अकस्मादेव प्राप्तं। एवं स्वत एव अच्युतनिर्मितं दैवलब्धं यत्। एतत् पूर्वोक्तं कर्मादि॥७॥ देवाङ्गुरिलालेजाते पितत्राति मानोनकार्यइत्याह। यावदिति। भ्रियेत पूर्येत॥८॥ अत एव यत्कमपि स्वगृहं हृत्वा त्वं वा प्रविश्य भुंजानं न निवारयेदित्या

यावदर्थमुपासीनो देहे गेहे च पण्डितः। विरक्तो रक्तवत्तत्र नृलोके नरतां न्यसेत्॥५॥ ज्ञातयः पितरौ पुत्रा भ्रातरः सुहृदो परे। यद्वदंति यदिच्छंति चानुमोदेत निर्ममः॥६॥ दिव्यं भौमं चांतरिक्षं वित्तमच्युतनिर्मितं। तत्सर्वमुपयुंजान एतत्कुर्यात्स्वतो बुधः॥७॥ यावद्भ्रियेत जठरं तावत्स्वत्वं हि देहिनां। अधिकं यो भिमन्येत स स्तेनो दंडमर्हति॥८॥ मृगोष्ट्रखरमर्काखुसरीसृप्खगमक्षिकाः। आत्मनः पुत्रवत्पश्येत्तैरेषामंतरं कियत्॥९॥ त्रिवर्गं नातिकृच्छ्रेण भजेत गृहमेध्यपि। यथादेशं यथाकालं यावद्दैवोपपादितं॥१०॥ आश्वाघांतेवसायिभ्यः कामान्संविभजेद्यथा। अप्येकामात्मनो दारां नृणां स्वत्वग्रहो यतः॥११॥

घं १

मृगोष्ट्रेति। मर्को मर्कटः। सरीसृप् सर्पः। मक्षिका श्वोतः। एतेषामुष्ट्रादीनां॥९॥ अतिकृच्छ्रेण पीडयन न भजेत किंतु यावद्दैवप्राप्तं तावदेव भजेत॥१०॥ श्वानश्च अघाश्च पतिताः

अंतेवसायि चंडालादयस्तान् तिथ्याप्यपथायथार्हं कामान् संविभजेत्। स्वत्वं स्वीयत्वं अविभज्य दद्यात्। यद्यप्येकां वात्मनो दारां भार्यां अतिथिशुश्रूषणे नियुक्तायां स्वस्य शुश्रूषा हीयेत यस्मात् नृणां स्वत्वग्रहः ममैवेयमित्याग्रहः॥ तामेकामपि संविभजेत अतिथ्यादि शुश्रूषणे नियुंजीतेत्यर्थः॥ तत्र नमथा मंतव्यं यथार्हं संविभजेदिति फलत्वात्॥११॥

एवं चेन्नेन्द्रियैरीश्वरो वशीकृतः स्यादित्याह। यदर्थं यन्निमित्तं। अन्येरजितोपीश्वरस्तेन जित एव॥१२॥ कथमेवं तस्यां स्वत्वाभिमानो हा। तं शंकते। तत्तु विविक्तेरणेत्याह। क्रमिविड्भस्मसुनिष्ठापर्यवसानमंते यस्याः तदीयादेहार्थरतिर्यस्यां सा। स्वमहिम्ना न लोकं पिच्छादयतीति तथा॥१३॥ किंच। सिद्धैर्दैवलब्धैः यज्ञावशिष्टार्थैः पंचयज्ञशेषैः रक्षादिलिङ्गै महतां निहन्नानां॥१४॥ एतद्विवृणोत्यत्राह। देवादीत्यं च यज्ञदेवताः। आत्मा तं च। एवं पृथक्पुरुषं प्रति यामिणामेव यजेत॥

जम्बाद्यद्दृष्टेषुप्राणान्निहन्याद्वापितरं गुरुं। तस्यां स्ववंश्रियां जम्बाद्यस्तेन त्य जितो जितः॥१२॥ क्रमिविड्भस्मनिष्ठांतं क्वेदं तुच्छं कलेवरं। क्व तदीयरतिर्यस्य बध्यते महिमा तमो न लज्जते॥१३॥ सिद्धैर्यज्ञावसिष्टार्थैः कल्पयेद्वृत्तिमात्मनः। शेषे स्वत्वं त्यजन् प्राज्ञः पदवीं महतामियात्॥१४॥ देवानृषीन्नृभूतानि पितॄनात्मानमन्वहं। स्ववृत्त्यागतवित्तेन यजेत पुरुषं पृथक्॥१५॥ यर्ह्यात्मनोधिकाराद्याः सर्वाः स्युर्यज्ञसंपदः। वैतानिकेन विधिना अग्निहोत्रादिना यजेत्॥१६॥ न ह्यग्निमुखतोऽयं वै भगवान् सर्वयज्ञभुक्। इज्येत हविषा राजन् यथा विप्रमुखे हुतैः॥१७॥ तस्माद्ब्राह्मणदेवेषु मर्त्यादिषु यथार्हतः। तैस्तैः कामैर्यजस्वैनं क्षेत्रज्ञं ब्राह्मणाननु॥१८॥ ॥ ॥

॥१६॥ न ह्यग्निमुखतः इति निर्विवेचयन्नार्थं कार्यं इत्याह। नहीति। विप्रमुखे हुतैरन्नादिभिर्यथा इज्येत पूज्येत। न तथा अग्निमुखतो हविषा इज्येत॥१७॥ ब्राह्मणेषु देवेषु च पंचयज्ञदेवतासु मर्त्यादिषु अन्येष्वपि नरेषु प्रस्थादिषु च क्षेत्रज्ञमंतर्यामिणं ब्राह्मणानन्तु मत्वा दिविजनेभ्यो ब्राह्मणाय जनानंतरमन्येषु यजस्व। पाठांतरे ब्राह्मणाननु आनंतर्यस्मृतेः॥१८॥ ॥

प्रौष्ठपदे भाद्रपदे ॥२०॥ शुक्लपक्षेऽक्षय्यतृतीयायामित्यर्थः । हेमंते शिशिरे च मार्गशीर्षादिमासचतुष्टयेपि याश्चतस्रोऽष्टकास्तासु ॥२१॥ संपूर्णचंद्रा पौर्णमा
सी राका न्यूनचंद्रा सैवानुमतिः तया । मासनक्षत्राणि तत्तन्मासनामप्रवृत्तिनिमित्तानि नक्षत्राणि युतानि यदा स्युः तदा तत्तत्संज्ञिकाख्यां । पुष्ययुक्ता पौर्णमासी
पौषी मासे तु यत्र सा । तान्नाम सप्तपौषो माघाद्याश्चैवमेकादशापर इति ॥२२॥ अनुराधा श्रवणा उत्तराफाल्गुनी उत्तराषाढा उत्तराभाद्रपदा द्वादश्यां यदा स्या

कुर्याद्वापरपक्षीयं मासि प्रौष्ठपदे द्विजः । श्राद्धं पित्रोर्यथा वित्तं तद्बंधूनां च वित्तवान् ॥१९॥ अयने विषुवे कुर्याद्व्यतीपाते दिनक्षये ।
चंद्रादित्योपरागे च द्वादश्यां श्रवणेषु च ॥२०॥ तृतीयां शुक्लपक्षे नवम्यामथ कार्तिके । चतसृष्वष्टकासु हेमंते शिशिरे तथा ॥२१॥ माघे
च सितसप्तम्यां मघाराकासमागमे । राकया चानुमत्या वा मासर्क्षाणि युतानि वा ॥२२॥ द्वादश्यामनुराधासु स्याच्छ्रवणस्तिस्र उत्तराः । तिसृष्वेकादशी
वासु जन्मर्क्षश्रोणयोगयुक् ॥२३॥ त एतेऽक्षय्यसः कालाः दृष्टाः श्रेयोविवर्द्धनाः । कुर्यात्सर्वात्मना तेषु श्रेयो मोघं तदा यतः ॥२४॥ स्नानं जपो हो
मो व्रतं देवद्विजार्चनं । पितृदेवनृभूतेभ्यो यद्दत्तं तद्ध्यनश्वरं ॥२५॥ ॥

य

२६५

श्रे ६१

त । अनुराधासु एकादशी वा यदा स्यात्तदा च जन्मर्क्षश्रोणयोगयुक् । जन्मनक्षत्रस्य श्रवणस्य वा योगेन युक्तं दिनं यदा । योगग्रहणां संबंधवाचकत्वार्थी ॥२३
न केवलं श्राद्धस्यैव ते कालाः । किंतु धर्ममात्रस्येत्याह । त एत इति द्वाभ्यां । तेष्वेव आचरितं अमोघं साफल्यमित्यर्थः ॥२४॥२५॥ ॥ ॥ ॥

रा०म०
५९

स्य

संस्कारकालइति। जायायाः पुंसवनादि। अपत्यजातकर्मादि। आत्मनो यज्ञदीक्षादि। प्रेतस्य संस्थाद्दहनादि स्थिता हस्वसांवत्सरिकं यद्वा। अन्यस्मिन्नपि। अ
न्यदृष्टार्थकर्माणि श्रेयः कुर्यादित्यर्थः ॥२६॥ ॥७॥ यत्र यस्मिन्सर्वमेतद्वरावरमन्वितस्य भगवतो विश्वरूपं सत्पात्रं यत्र लभ्यते सर्वे पुण्यतमो देशः ॥२७॥
अथ हैरुत्तमैराश्रितानि ॥३१॥ सीतायारामस्य वाश्रम आदिर्येषां हृद्योऽष्टथक्तुग्रहणं वियोगकालातिशायिना ॥३२॥ अभ्यासाश्रिताश्चस्थितिस्थातिमाश्रिताः

संस्कारकालो जायाया अपत्यस्यात्मनस्तथा। प्रेतसंस्थामृतानां हस्वकर्मण्यपत्यफदयेऽष्टणा ॥२६॥ अथ देशान्प्रवक्ष्यामि धर्मादिश्रेयआव
हान्। स वै पुण्यतमो देशः सत्पात्रं यत्र लभ्यते ॥२७॥ बिंबं भगवतो यत्र सर्वमेतच्चराचरं। यत्र ह ब्राह्मणकुलं तपोविद्यादयान्वितं ॥२८॥ यत्र यत्र
हरेरर्चा सदेशः श्रेयसांपदं। यत्र गंगादयो नद्यः पुराणेषु च विश्रुताः ॥२९॥ सरांसि पुष्करादीनि क्षेत्राण्यर्हाश्रितान्युत। कुरुक्षेत्रं गयशि
रः प्रयागः पुलहाश्रमः ॥३०॥ नैमिषं फाल्गुनं सेतुः प्रभासोऽथ कुशस्थली। वाराणसी मधुपुरी पंपाबिंदुसरस्तथा ॥३१॥ नारायणाश्रमो नं
दा सीतारामाश्रमादयः। सर्वे कुलाचला राजन्महेंद्रमलयादयः ॥३२॥ एते पुण्यतमा देशा हरेरर्चाश्रिताश्च ये। एतान्देशान्निषेवेत श्रेयस्का
मो ह्यभीक्ष्णशः। धर्मो ह्यत्रेहितः पुंसां सहस्राधिफलोदयः ॥३३॥ पात्रं त्वत्र निरुक्तं वै कविभिः पात्रवित्तमैः। हरिरेवैक उर्वीश यन्मयं वै
चराचरं ॥३४॥ देवर्ष्यर्हत्सु वै सत्सु तत्र ब्रह्मात्मजादिषु। राजन्यदग्रपूजायां मतः पात्रतयाच्युतः ॥३५॥ ॥

एवं तीर्थशालग्रामशिलाद्यर्चनदेशा उक्ताः इत्युपपोनरुक्तं। अत्र पुण्डरीहितः कृतः सहस्रगुणामधिकस्य फलस्य उदयो यस्मात्तामतथा ॥३३॥ हरिरेव पात्रं
निरुक्तं निर्णीतं ॥३४॥ तदेवाह। देवेषु वत्सपिषु च अर्हत्सु च। तपोयोगादिसिद्धेषु ब्रह्मात्मजादिषु सनकादिष्वपि सत्सु तत्र त्वदीये राजसूये यद्यस्माद्च्युत एव
पात्रतया संमतः ॥३५॥ ॥ ॥

राम
५९

संमतत्वे हेतुमाह। जीवराशिभिरित्यादिना। अंडकोश एवांघ्रिपो वृक्षः। सर्वजीवानामात्मनश्च तर्पणं॥३६॥ तदेवं पुरुषनाममतिरूपत्वात् द्रढयति। पुराणीति। देवर्षितिर्यगादिरूपाणि पु
राणि शरीराणि तेष्वंतर्यामिरूपेणाल्पांशेन वसतः शेते। अतः पुरुष इति प्रसिद्धः॥३७॥ तारतम्येन तिर्यगादिष्वंशरूपेण मनुष्येषु अधिकेन वर्त्तते। तस्मात्पुरुषः पात्रं त
त्रापि यावानंशः यथा यथा ईक्ष्यते तत्पात्रादियोग्यो न यत्र यत्र प्रतीयते। तथा तथा सोपाधिमित्यर्थः। तथा च श्रुतिः पुरुषे त्वेवाविस्तरामात्मेत्यादि॥३८॥ तर्हि प्रतिमादौ

नाम्मा

जीवराशिभिराकीर्ण अंडकोशांघ्रिपो महान्। तन्मूलत्वादच्युतेज्या सर्वजीवात्मतर्पणं॥३६॥ पुराण्यनेन सृष्टानि नृतिर्यगृषिदेवताः। शेते जी
वेन रूपेण पुरेषु पुरुषो ह्यसौ॥३७॥ तेष्वेव भगवान्राजंस्तारतम्येन वर्त्तते। तस्मात्पात्रं हि पुरुषो यावानात्मा यथेयते॥३८॥ दृष्ट्वा तेषां मिथो नृणा
मवज्ञानात्मतां नृप। त्रेतादिषु हरेरर्चाक्रियायै कविभिः कृता॥३९॥ ततोऽर्चायां हरिं केचित्संश्रद्धाय सपर्यया। उपासत उपास्तापि नार्थदा पुरुषद्वि
षां॥४०॥ पुरुषेष्वपि राजेंद्र सुपात्रं ब्राह्मणं विदुः। तपसा विद्यया तुष्ट्या धत्ते वेदं हरेस्तनुं॥४१॥ नन्वस्य ब्राह्मणा राजन्कृष्णस्य जगदात्मनः। पुनंतः पाद
रजसा त्रिलोकीं दैवतं महत्॥४२॥ इति श्रीभागवते महापुराणे सप्तमस्कंधे चतुर्दशोऽध्यायः॥१४॥ ॥ ॥

हरेः पूजां किमिति कुर्वंति तत्राह। दृष्ट्वेति द्वाभ्यां। मिथोऽवज्ञानमसम्मानं तदस्मिन्नात्मता बुद्धिर्येषां तेषां तावद्धरेः क्रियायै पूजार्थं॥३९॥ हरिस्तूपासिता उपासितापि पु
रुषद्वेषिणामर्थदा न भवति पुरुषे भगवद्बुद्धिं हित्वा विहिता सती सापि मंदाधिकारिणां पुरुषार्थप्रदा भवत्येवेत्यर्थः॥४०॥ पुरुषेष्वेव ज्ञानतपआदिभिः विशिष्टानां तरतमा
। पुरुषेष्वपीति। यो धत्ते तं सुपात्रं विदुः॥४१॥ पात्रं देवकेभ्यः कैमुत्यन्यायेन द्रढयति। नन्वस्येति॥४२॥ ॥इति सप्तमे चतुर्दशः॥ ॥ ॥ ॥

ततः पंचदशे सर्ववर्णाश्रमाभिवर्धनं। मारतः संग्रहेणाथ वर्णयते मोक्षलक्षणं। सर्वेषामपि मोक्षधर्माणां सारसंग्रहार्थमध्यायारंभः। तत्राश्रमगता
श्च विशेषाणीह। कर्मनिष्ठा इति। स्वाध्यायादिषु परिनिष्ठिता। इति शेषः। शक्यानि। पितृनुद्दिश्य देयानि दैवे ह्यथ पितृभ्यो देयानि। यथार्हतः

॥ नारद उवाच॥ ॥ कर्मनिष्ठा द्विजाः केचित्तपोनिष्ठास्तथापरे। स्वाध्यायेऽन्ये प्रवचने केचिज्ज्ञानयोगयोः॥१॥ ज्ञाननिष्ठाय दे
यानि कव्यान्यानन्त्यमिच्छता। दैवं तत्प्रतिपादितरेभ्योऽपि यथार्हतः॥२॥ श्राद्धे दैवे पितृकार्ये हीनेऽकैकपुत्रयत्रगा। तोजये
त्पमस्त्रोपि श्रान्तेर्ज्यार्त्तविप्रवरा॥३॥ देशकालौ विना श्रद्धा इत्युपात्राहणा। निवासम्यस्त्रवृति नैतानि विप्रवरान्सुजनार्पणा
त्॥४॥ देशे काले वसंशासे सुचक्रं हरिदैवतं। श्रद्धया विधिवत्पात्रे यत्तं कामधुगक्षयं॥५॥ देवर्षिपितृभूतेभ्य आत्मने स्वज
नाय च। श्रुतं संविल जनः स्वरेणात्मवृतिं तत्तषात्मकं॥६॥ न दद्यादामिषं श्राद्धे न चाद्याद्धर्मतत्त्ववित्। तामुख्यत्रैः स्यात्परा प्रीतिर्य
था न पशुहिंसया॥७॥ नैतादृशः परो धर्मो नृणां सद्धर्ममिच्छतां। यासो दंडस्य तत्ते शमनोवाक्कायजस्मृ॥८॥ ॥ ॥

त्विति सर्वत्र संनादितारतम्यार्थ॥३॥ न तु विप्रसत्तमः श्राद्धदीनं निषिध्यते। तत्राह। श्राद्ध इति नानासम्पर्णाइ॥ नामातारविज्ञिमं अस्वेतान्पितरादयः कथं वर्ज्या इत्ये
वं शास्त्राद्विप्रशद्धि त्यर्थः॥४॥ उत्तमं श्राद्धं श्राद्धादि हरिदैवतं। हरये निवेदितं सर्वं पात्रे रूपात्मकं ईश्वरस्य रूपं॥६॥७॥ दंडस्य त्यागः हिंसायाः त्यागो यः। एतादृ
शो न्यो नास्ति॥८॥ ॥

ख२

अतएवोत्तमाधिकारिणो वा यानि कर्माणि त्यजंतीत्याह। एकइति। अनीहा निरीहा मा॥ ज्ञानदीपिते आत्मस्फूर्तिमति आत्मसंयमे नेजुह्वति मनो नियम्य तदंतराय
तया त्यजंतीत्यर्थः॥ तदुक्तं सर्वज्ञसूक्तैः। प्रत्यक्स्फूर्तिरसत्स्फूर्तिरिप्सितनिष्ठाविघातकं। संलक्ष्य संत्यजेत्कर्म त्यजन्विघ्नहतोऽन्यथेति॥ ९॥ मा मां एषः क्रवं हन्यादिति क्रु
रः। अकरुणश्च तत्कृतः असुतृप्‌ प्राणतर्पकः। तत्किं अतत्तज्ञः आत्मतत्वानभिज्ञः। तथा च श्रुतिः। न तं विदाथ य इमा जजानान्यद्युष्माकमंतरं बभूव। नीहारेण प्रावृ
ता जल्प्या वासुतृप उक्थशासश्चरंतीति॥ १०॥ प्रकृतमनुवर्तयति। तस्मादिति॥ ११॥ अधर्मवत्त्याज्यानि निषिद्धवत्॥ १२॥ क्रममात्राद्यन्यपंचापि व्याचष्टे धर्मबाधः धर्म

४ २

एवेकर्ममयान्यज्ञान्ज्ञानिनो यज्ञवित्तमाः। आत्मसंयमनेनीहाजुह्वति ज्ञानदीपिते॥ ९॥ द्रव्ययज्ञैर्यक्ष्यमाणं दृष्ट्वा भूतानि बिभ्यति। एष मा
करुणो हन्यादतज्ज्ञो ह्यसुतृप्ध्रुवं॥ १०॥ तस्माद्दैवोपपन्नेन मुन्यन्नेनापि धर्मवित्। संतुष्टोऽहरहः कुर्यान्नित्यनैमित्तिकीः क्रियाः॥ ११॥ विधर्मः
परधर्मश्च आभास उपमा छलः। अधर्मशाखाः पंचेमा धर्मज्ञोऽधर्मवत्त्यजेत्॥ १२॥ धर्मबाधो विधर्मः स्यात्परधर्मोऽन्यचोदितः। उपधर्मस्तु पाखं र्म
डो दंभो वा शब्दभिच्छलः॥ १३॥ यस्त्विच्छया कृतः पुंभिराभासो ह्याश्रमात्पृथक्। स्वभावविहितो धर्मः कस्य नेष्टः प्रशांतये॥ १४॥ ॥ ॥

भो

बुध्यापि यस्मिन्क्रियमाणे स्वधर्मबाधः। अन्यस्य चोदितोऽन्यस्य परधर्मः। उपमेति व्याचष्टे। उपधर्मस्त्विति शब्दस्य लितं ले दः। अन्यथा व्याख्यानं यस्मिन्गाथा
दशावतानुभोजयेदित्यकेदशाभ्यो वानिति। शब्दभिदिति पाठे। धर्मशब्दमात्रं विभर्तीति। तथा यथा गां दद्यादित्युक्ते मरिष्यंत्या गोदानं॥ १३॥ स्वधर्मानुष्ठानानंतरं ध
र्मत्वेप स्वार्थमपि परधर्मो नानुष्ठेयः अनुपयोगादित्याह। स्वभावविहित इति॥ १४॥ ॥ ॥ ॥ ॥

ता० स०
६१

किंवा अधनो धर्मार्थं धनं नेहेत नापेक्षेत न धनार्थं न ध्यायेदि योगिनां देहोपपत्तिनैव स्वधर्मसिद्धिरुक्तत्वाद्यात्रार्थमपि नेहेतेत्याह तत्र पंचभिः । अनीहेति सार्द्धैः षड्भिः ।१५। हा उपानही पादयोर्यस्य स उपानत्पात् तस्य ।१७। गृहपालः श्वा तद्वदाचरति ।१८।१९। क्षुधा तृषा च जनः कामस्यांतं याति ।

धर्मार्थमपि नेहेत यात्रार्थं वाधनो धनं । अनीहानीहमानस्य महाहेरिव वृत्तिदा ।१५। संतुष्टस्य निरीहस्य स्वात्मारामस्य यत्सुखं । कुतस्तत्कामलोभेन धावतोर्थेहया दिशः ।१६। सदा संतुष्टमनसः सर्वाः शिवमया दिशः । शर्कराकंटकादिभ्यो यथोपानत्पदः शिवं ।१७। संतुष्टः केन वा राजन्न वर्तेतापि वारिणा । औपस्थ्यजैह्व्यकार्पण्याद्गृहपालायते जनः ।१८। असंतुष्टस्य विप्रस्य तेजो विद्या तपो यशः । स्रवंतींद्रियलौल्येन ज्ञानं चैवावकीर्यते ।१९। कामस्यांतं च क्षुत्तृड्भ्यां क्रोधस्यैतत्फलोदयात् । जनो याति न लोभस्य जित्वा भुक्त्वा दिशो भुवः ।२०। पंडिता बहवो राजन् बहुज्ञाः संशयच्छिदः । सदसस्पतयोप्येके असंतोषात्पतंत्यधः ।२१। असंकल्पाज्जयेत्कामं क्रोधं कामविवर्जनात् । अर्थानर्थेक्षया लोभं भयं तत्त्वावमर्शनात् ।२२। आन्वीक्षिक्या शोकमोहौ दंभं महदुपासया । योगांतरायान्मौनेन हिंसां कायाद्यनीहया ॥२३॥ ॥

अतो रक्षाति रिक्तकामांतरालाभावात् । क्रोधस्यांतं याति एतस्य क्रोधस्य यत्फलं हिंसा तस्योदयात्तृप्तेः । दिशो जित्वापि भुवो भुक्त्वापि लोभस्यांतं नैवायं याति इत्यर्थः ।१९।२०।२१। इदानीं कामादिजयोपायानाह । असंकल्पादिभिस्त्रिभिः । जयेदिति यथा पिहमवेति । अर्थेनानर्थदर्शनेन तत्त्वावमर्शनात् ।२२। हिता उसंभावेना । आन्वीक्षिक्या आत्मानात्मविवेकेन । महतां सात्विकानां सेवया योगस्यांतरायाः श्लोककवार्तादीश ॥२३॥ ॥

राम
६१

येभ्यो भूतेभ्यो भयं जायेत तेष्वेव कृपया हिताचरणेन दुःखं दैवमुपसर्गनिमित्तं यथा मतः पीडादि। तद्दुःखं याज्ञवल्क्योक्तानां विहितानां विफलारंभश्च संसीदत्यनिमित्त
त इति। आत्मजं देहजं योगवीर्येण प्राणायामादिबलेन। सत्त्वनिषेवया सात्त्विकाहारादिना॥२४॥ ननु कथं गुरौ भक्त्या सर्वस्य जयः स्यात्। तस्यापि मनुष्य
त्वेन तद्दृष्ट्वा तत्राह। यस्येति मर्त्यासद्धीर्मनुष्य इति दुर्बुद्धिः तस्य शास्त्रश्रवणं कुंजरस्नानवद्व्यर्थं॥२६॥ ननु गुरोः पितृपुत्रादयस्तं नरमेव मन्यंते। अत आह। एष
गुरुः साक्षाद्भगवानेव लोकस्य नरो स्माविति विमृग्यांघ्रिरित्यर्थः। यद्वा। नहि तत्र सुज्ञो देहमनुष्यत्वप्रतीयमानो पि गुरुर्भगवानेव भवेत्। यथैव श्री कृष्ण इत्यर्थः।

कृपया भूतजं दुःखं दैवं जह्यात्समाधिना। आत्मजं योगवीर्येण निद्रां सत्त्वनिषेवया॥२४॥ रजस्तमश्च सत्त्वेन सत्त्वं चोपशमेन च। एतत्सर्वं गु
रौ भक्त्या पुरुषो ह्यंजसा जयेत्॥२५॥ यस्य साक्षाद्भगवति ज्ञानदीपप्रदे गुरौ। मर्त्यासद्धीः श्रुतं तस्य सर्वं कुंजरशौचवत्॥२६॥ एष वै भगवान् सा
क्षात्प्रधानपुरुषेश्वरः। योगेश्वरैर्विमृग्यांघ्रिर्लोको यं मन्यते नरं॥२७॥ षड्वर्गसंयमैकांताः सर्वा नियमचोदनाः। तदंता यदि नो योगानावहेयुः
श्रमावहाः॥२८॥

॥२७॥ एवं सर्वैरुपायैः कामादिवेगांजित्वा नियतेंद्रियो भूत्वा ध्यानपरो भवेत्। अन्यथा तं प्रति सर्वशास्त्रवैफल्यं स्यादित्याह। षड्वर्गेति। सर्वा अपि नियमचोदना
दृष्टादृष्टादिविषयाः षडिंद्रियवर्गस्य यः संयमः तस्मिन्नेवैकस्मिन्नंतो यासां तदेकपरा इत्यर्थः। न च तावता पि चरितार्था इत्याह। तदंताः सत्यो पि यदि योगान् धार
णाध्यानसमाधीन् नो आवहेयुः न साधयेयुः तर्हि केवलं श्रमावहा एवेत्यर्थः॥२८॥ ॥ ॥

एतदेव दृष्टांतेनाह। यथा वा नद्यः अर्थिनः तत्फलात्ति वियोगात् स्वार्थं मोहं न साधयंति। प्रत्युत अनर्थायै संसारायैव। असतो वहिर्दुःखस्येष्टा मूर्त्ता ग्रिपितया॥ २९॥ ए
वं योगं युंजतो। पि यस्य कुडुंबा दिकासां। ~~लज्जयित्वा गृही स्पष्टं संन्यसेदविचारयति॥ स्मिन्निति। मित्तयाशाम्नं~~ संगे न विन्नं विविक्षिप्येतत्। स्पष्टकृत्य माह। यश्चित्तस्य विजय
यत्न उद्युक्तः। स निष्क्रः स्यात् संन्यसेत। तथा वस्थितिः। द्वंद्वाहतस्य गार्हस्थ्ये ध्यानभंगादिकारणां। लज्जयित्वा गृही स्पष्टं संन्यसेदविचारयतीति। लिङ्गयाशाम्नं मितम

यथा वा नद्यो ह्यर्थियोगास्यार्थं न विश्राति। अनर्थायितवेयुस्वेष्टं तीमिष्टं तथासतः॥ २९॥ यश्चित्तविजये यत्नः स्यान्निःसंगो[illegible] परिग्रहः॥ एको विविक्त
शरणो भिक्षुर्भिक्षामिताशनः॥ ३०॥ देशे शुचौ समे राजन् संस्थाप्यासनमात्मनः। स्थिरं समं सुखं तस्मिन्नासीतर्ज्वंग ॐमिति॥ ३१॥ प्राणापानौ सं
निरुध्यात् पूरकुंभकरेचकैः। यावन्मनस्त्यजेत्कामान् स्वनासाग्रनिरीक्षणः॥ ३२॥ यतो यतो निःसरति मनः कामहतं भ्रमत्। ततस्तत उपाहृत्य
हृदि रुंध्याच्छनैर्बुधः॥ ३३॥ एवमभ्यसतश्चित्तं कालेनाल्पीयसा यतेः। अनिशं तस्य निर्वाणं यात्यनिंधनवह्निवत्॥ ३४॥ कामादिभिरनाविद्धं प्रशां
ताखिलवृत्तियत्। चित्तं ब्रह्मसुखस्पृष्टं नैवोत्तिष्ठेत कर्हिचित्॥ ३५॥ यः प्रव्रज्य गृहात् पूर्वं त्रिवर्गावपनात्पुनः। यदि सेवेत तान् भिक्षुः स वै वांताश्यपत्र
पः॥ ३६॥ ॥

तर्ज्वंग ॐ

शतं यस्य॥ ३०॥ ऋजुः समं गं यस्य सः। सुखं यथा भवत्येवमासीत। ॐमिति त्रिवारयत्रिवृतिशेषः॥ ३१॥ ३॥ एवमतिशमस्य सततमभ्यस्यतश्चित्तं निर्वाणं शांतिं याति॥
॥ ३४॥ न च पुनर्विक्षिप्येतेत्याह। कामादिभिरस्पृष्टत्वं तथाविधं तत्रोत्तिष्ठेत्। यतः प्रशांता अखिला वृत्तयो यस्य कृतं ब्रह्मसुखेन स्पृष्टं॥ ३५॥ यस्तु प्रव्रज्यां कृत्वापि भोगमभि
लिप्सुः स्यात् तं निंदति यदिति। त्रयाणां धर्मादीनां वर्गः। आसमंताद्वपनं यस्मिन् ततस्मात् गृहात् ततान् धर्मादीन् वांताशी छर्दितभोजी निर्लज्जश्च सः॥ ३६॥ ॥ ॥

नवेदमघटितंदृष्ट्वादित्याह॥ये॥ पूर्वंस्वदेहः अनात्मादिरूपःस्मृतःविंतितः तएवतुनरेनमात्मेतिमत्वाश्लाघयंतिस्तावयंतिहि॥३७॥ यतिस्तुपलक्षणीकृत्यान्यानपिस्व
धर्मत्यागिनोनिंदति॥ गृहस्थेतिद्वाभ्यां॥३ ॥७॥ नचात्मतत्वज्ञस्यस्थितोरिंद्रियलौल्येऽपिकोदोषस्तत्राह॥ आत्मानंपरंब्रह्मवेज्ञानीयात्॥ ज्ञानेनच्युतानिरस्ताआशया
वासनायस्यतस्यज्ञानिनोलौल्यमेवनसंभवतीत्यर्थः॥ तथावक्ष्यतिः॥ आत्मानंचेद्विजानीयादयमस्मीतिपूरुषः॥ किमिच्छन्कस्यकामायशरीरमनुसंज्वरेदिति॥
॥४०॥ अज्ञस्यतुल्यौल्येननरकपाताःपत्तेः॥ अप्रमत्तेनसदातत्वज्ञानेयतितव्यमितीममर्थंआत्मानंरथिनंविद्धिशरीरंरथमेवचेत्यादिश्रुत्यक्तरथरूपकद्वारेण॥

येःपूर्वदेहःस्मृतोनात्मामर्त्योविट्कृमिभस्मसात्॥ तएनमात्मसात्कृत्वाश्लाघयंतिह्यसत्तमाः॥३७॥ गृहस्थस्यक्रियात्यागोव्रतत्यागोवटोरपि॥ तप
स्विनोग्राससेवाभिक्षोरिंद्रियलौल्यता॥३८॥ आश्रमापसदाह्येतेखल्वाश्रमविडंवकाः॥ देवमायाविमूढांस्तानुपेक्षेतानुकंपया॥३९॥ आत्मानंचेद्विजा
नीयात्परंज्ञाननुताशयः॥ किमिच्छन्कस्यवाहेतोर्देहंपुष्णातिलंपटः॥४०॥ आहुःशरीरंरथमिंद्रियाणिहयानभीषून्मनइंद्रियेशं॥ वर्त्मानिमात्राधि
षणांचसूतंसत्वंबृहद्वंधुरमीशसृष्टं॥४१॥ अक्षं दशप्राणमधर्मधर्मौचक्रेऽभिमानंरथिनंचजीवं॥ धनुर्हितस्यप्रणवंपठंतिशरंतुजीवंपरमेवलक्ष्यं॥४२॥

ह॥ आहुरितिषड्भिः॥ इंद्रियेशंमनोभीषून्रश्मीनाहुः॥ मात्राःशब्दादीन्वर्त्मानिगंतव्यदेशानाहुः॥ सत्वंचित्तंबृहत्देहव्यापि॥ वंधुरंवंधनंचित्तंविनाह्यनिवद्धमिवशरीरंस्या
त्॥ ईशसृष्टमितिविंधनकर्तृत्वंईशस्यैवेत्यर्थः॥४१॥ प्राणादयःपंच॥ नागःकूर्मश्चकृकलोदेवदत्तोधनंजयश्चेत्येवंदशविधं॥ अभिमानंप्राहंकारंजीवंरथिनं॥ शुद्धंजीवंशरं॥ प
रंब्रह्मलक्ष्यंयथावक्रपाशरोलक्ष्येनिपात्यते॥ तथाप्रणवेनजीवोब्रह्मणिनिपात्यतेइत्यर्थः॥४२॥ ॥ ॥

रागाद्योजितत्वात्ःशत्रवः॥४३॥ तत्रज्योतिनिवेशात्कचित्रज्ञारूढसमाधेः॥ मलप्रक्षालनयोगपिपरोपकारादि॥४२॥ नयः शत्रवः॥४४॥ इष्टकायज्ञपरंरथंआ
त्मवशःउपकल्पः इंद्रियाश्चपरिष्कारोयस्मिरथस्तथातंया वकृतोगावदेवगरिष्ठानांगुरूणांशरणसेवयानिशितंज्ञानखड्गंविधृत्यअज्ञानाख्ययः स
त्रिरस्यशत्रूनुपशांतःआनंदेनतुष्टोस्तत्वा ऽद्यरथादिकमुपेक्षेतेत्यर्थः॥४५॥ अज्ञानाख्याताविवाधकमाह नोचेदिति॥ असंतो वहिर्मुखायेइंद्रियवा

ह्वं

रागोद्वेषश्चलोभश्चशोकमोहस्तथामदः॥ मानोवमानोऽसूयाचमायाहिंसाचमत्सरः॥४३॥ रजःप्रमादःक्षुन्निद्राशत्रवश्चैवमादयः॥ रज
स्तमः प्रकृतयःकचित्॥४४॥ यावद्देहकायरथमात्मवशोपकल्पंधत्तेगरिष्ठचरणार्चनयानिशातं॥ ज्ञानासिमच्युतवलो
दधद्वशत्रून्स्वाराज्यतुष्टउपशांतइदंविजह्यात्॥४५॥ नोचेत्प्रमत्तमसदिंद्रियवाजिसूतानीत्वोत्पथंविषयदस्युषुनिक्षिपंति॥ तेद
स्यवःसहयसूतममुंतमोंधेसंसारकूपउरुमृत्युभयेक्षिपंति॥४६॥ प्रवृत्तंचनिवृत्तंचद्विविधंकर्मवैदिकं॥ आवर्ततेप्रवृत्तेननिवृत्तेना
श्नुतेऽमृतं॥४७॥ हिंस्रंद्रव्यमयंकाम्यमग्निहोत्राद्यशांतिदं॥ दर्शश्चपूर्णमासश्चचातुर्मास्यंपशुःसुतः॥४८॥ एतदिष्टंप्रवृत्ताख्यंहुतंप्रहुत
मेवच॥ पूर्तंसुरालयारामकूपाजीव्यादिलक्षणं॥४९॥ ॥

ले

जिनःसूतस्तुतेउत्पथंअसन्मार्गंनीत्वाविषयाख्येषुदस्युषुनिक्षिपंति॥ हयेःसूतेनचसहचर्तमानंतंतमोंधेतमसाआच्छादितेंऽधकूपसंसारेऽस्मिन्॥४६॥ न उच्चैःवेरवि
हितेसायासेपारिकारिश्चत्वंसः कथमेवमनर्थप्राप्तिःस्यादित्याशंक्यवेदोक्तकर्मणांद्वैविध्यंदर्शयन्फलंचदमाह॥ प्रवृत्तंचेति द्वाभ्यां॥४७॥ हिंस्रंहिंसायत्रनादिकर्म
अशांतिदंअसंतोषकृद्भूतंच॥ आदिशब्दार्थंविवरणं दर्शइति॥ पशुःपशुयागः॥ सुतःसोमयागः॥४८॥ हुतंवैश्वदेवंप्रहुतंवलिहरणं एतत्सर्वइमिष्टमुच्यते॥ ए
तदेवपरिकाम्यमशांतिदंचतर्हिप्रवृत्ताख्यमपीत्यर्थः॥ आजीव्यंप्रपादि॥४९॥ ॥

प्रवृत्तेन कर्मणा आरोहावरोहात्मामाह त्रिप्रकारमाह । इत्यस्य चरुपुरोडाशादेः सूक्ष्मो विपाकः परिणामो देहांतरारंभकः येन संपरिष्वक्तो गच्छति । श्रुयेव श्रु-
तौ च धूमशब्देनोक्तः इति त्रिपंचम्यामाहुतावापः पुरुषवचसो भवंतीति पाठांतरे ऽप्यशब्देन तेजोमात्रशब्दोक्तानींद्रियाणि । उष्म विपाकशब्दे न हृदयाग्रप्रद्यो-
तः । तथा च श्रुतिः । स इमास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामतीति । तथा तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेनैष आत्मा निष्क्रामतीति । धूमादिश-
ब्देन त इति मातिन्यो देवताः तत्रापक्षयः कृष्णपक्षः सोमः सोमलोकः तत्र भुक्तभोगस्यावरोहणप्रकारमाह । दृश्य इति । विपरीतलक्षणया विशिष्टभोगक्षय

स्मि न्ना

दुष्यसूक्ष्मविपाकस्य धूमो रात्रिरपक्षयः ४ अयनं दक्षिणं सोमो ऽदर्श औषधिवीरुधः । ५० ॥ अन्नं रेत इति क्लेशापितयातं पुनः सर्वशः । एकैक
शेषत्वात्पूर्वं भूत्वा भूत्वेह जायते । ५१ ॥ निषेकादिश्मशानांतैः संस्कारैः संस्कृतो द्विजः । इंद्रियेषु क्रियायज्ञानुज्ञान्तरीयेषु जुह्वति ॥ ५२ ॥ ॥

शोकाग्निनादेहलयेत धूमशब्देन उच्यते । यतः उक्तं भवति । भूतसूक्ष्मयुक्तो धूममायाति वाहिकदेवताभिः सोमलोकं प्राप्य तत्र भोगावसाने विलीनदेहो वृष्टिद्वारेणौषधि-
वीरुधादिसाम्यापत्तिक्रमेण जायते । एवं पुनः सर्वहेतुः पितृयानं प्रवृत्तकर्ममार्ग इति । ५० ॥ क्लेशशब्दे भूयते पुनः तर्भविषमेवाह । एकैकशेषेन तत्पक्षक्रमेण भूत्वा तत्तत्सा-
निध्यं प्राप्येह क्रमेण जायते । ५१ ॥ तत्राधिकारिणामाह । निषेकादीति । अत्यप्ययिष्टादिकार्येप्येवं जन्मनलभतेत्यर्थः । निवृत्तकर्मनिष्ठस्योपासनाविशेषमुपदिशन्नर्चिरा-
दिमार्गेण ब्रह्मलोकप्राप्तिमाह । इंद्रियेष्विति । अदिनायद्वाङ्मयज्ञेषु हिंसायाइवरित्वा दितिसुरसं निष्कर्मकर्मैव दृष्टिमत्राह । ज्ञानेनदीप्यंत इति तथा तेषु इंद्रियप्रकाराणां
मिष्टामृत्तदीनामिंद्रियैतावन्मात्रतां भावयंतीत्यर्थः । एवमुत्तरत्रापि । ५२ ॥ ॥

समुद्भाये

भा॰म॰
६४

उमेर्हर्षनादिसंकल्परूपेमनस्तिवेकारिकंविकारयुक्तमनोवाविविधादिलक्षणयावाचाहिमनःकर्तृत्वादिविकारंभजति।वर्णानांसमाम्नायेऽोतद्विशेषवाहा
नःसूरेअकारादिस्वरत्रयात्मको॥५३॥ॐकारंबिंदोर्नादे।प्राणेसूत्रात्मनिमहतिब्रह्मणि।अग्निरितितत्तद्दलिमानिन्योदेवताःताःप्राप्नोतीतिपूर्ववत्।दिवाहःप्र
त्यक्षस्येवांतः।राकाशुक्लपक्षस्यांतश्च्यक्षा।।प्राज्ञो।राकेतिचभूरा।णं।मतांउत्तरमयनंस्वपराहब्रह्मा।एवंब्रह्मलोकंगतस्यभोगावसानेमोक्षप्रकारमाह।विश्वइ
तिविश्वःस्थूलोपाधिः।सस्थूलंसूक्ष्मेविलाप्यसूक्ष्मोपाधिस्तैजसोभवति।सूक्ष्मंचकारणेविलाप्यकारणोपाधिःप्राज्ञोभवति।कारणंचसर्वत्रसाक्षित्वेना

इंद्रियाणिमनस्येवविवाक्विवेकारिकंमनश्च।वाचंवर्णसमाम्नायेतमोंकारेस्वरेन्यसेत्॥५३॥ॐकारंबिंदोनादेतंतंतुप्राणेमहत्यमुं।अग्निश्च
सूर्योदिवाप्राह्णःशुक्लोराकोत्तरंस्वराट्।विश्वश्चतैजसःप्राज्ञःकार्यआत्मासमन्वयात्॥५४॥देवयानमिदंप्राहुर्भूत्वाभूत्वानुपूर्वशः॥
आत्मयाज्युपशांतात्माह्यात्मस्थोननिवर्तते॥५५॥यएतेपितृदेवानामयनेवेदनिर्मिते।शास्त्रे[illegible]णचक्षुषावेदजनस्थोऽपिनमुह्यति॥
५६॥आदावंतेजनानांसद्बहिरंतःपरावरं।ज्ञानंज्ञेयंवचोवाच्यंतमोज्योतिस्त्वयंस्वयं॥५७॥ ॥

चयात्मातिस्वरूपे[illegible]विलाप्यतुर्योभवतितेषांचव्यभिचारिणांलयेशुद्धआत्माभवतिमुच्यतइत्यर्थः॥५४॥यथैतरोभूत्वानिवर्ततितथान
निवर्ततइत्यर्थः॥५५॥वेदेननिर्मितेतेधूममार्गेसंभवंतीत्यादिनातेअर्चिरादिसंभवतीत्यादिनाच।निश्चयेनविविच्यज्ञापितेइत्यर्थः।जनस्थोपिन
मुह्यति॥५६॥तत्रहेतुमाह।आदाविति।जनानांदेहादीनांआदौकारणत्वेनअंतेचावधित्वेनयत्सत्तथाबहिर्भोग्यंअंतर्भोक्तृपरमवरंचउद्घंनीचंतमः
प्रकाशःज्योतिःप्रकाशश्चतत्सर्वंअयंज्ञातीस्वयमेवनतस्माद्व्यतिरिक्तंवस्तुकिंचिदस्तीत्ययंनमुह्यतीत्यर्थः॥५७॥ ॥ ॥ ॥

राम
६४

साधनपणे ४

ननु हि कथं एतस्यार्थस्य स्यापि प्रतीयते न ग्राह। आबाधितः। तर्कविरोधेन सद्वैतो बाधितोपि आभासः प्रतिबिंबादिर्वक्ष्यते यथा यथास्मृतः। तद्दैंद्रि
यकं सर्वमर्थत्वे न विकल्पितं न तु परमार्थतः। दृश्यत्वात् ॥५०॥ तदेवाह ह्निरण्यादीनां पंचभूतानां छायाए कतु ब्युत्पन्नरूपं देहादि संघाता
तत्परिमाणानां मध्ये कृतमपि ह्यतमापि न स्वगतिनतावन्नेषां संघातः। हृष्टाणामिव वने एकदेशाकर्षणे सर्वाकर्षणात् पपच्चेः। न ह्येकस्मिन्वृ
क्ष आकृष्टे सर्वं वनमाकृष्यते। न च विकारः आरब्धो ऽवयवी। अपि शब्दान्न परिणामोपि। कुतः। सांगिकं ह्यवयवेभ्यो वा परिशांते सो वा दृष्टव्यः। नद

आबाधितोपि ह्याभासो यथा वक्ष्यत्यथा स्मृतः। इंद्रियकं तदृश्यं हि विकल्पितं। पंचह्निरण्यादीनामिहार्थानां छायानकृतमा
पि हि। न संघातो विकारो वा पिनष्टः कार्यवंतो द्रष्टा ॥५१॥ धातवोवयविद्वाबृत स्मात्रावयवैर्विना। न स्युः र्ह्यसत्यवयविद्यसन्नवय
वैं ततः ॥६०॥ ॥ न्वि

हिरण्यगर्भतावदस्यं तं इत्यश्चातथाप्रतीतेन बाधितः। साकिं सत्यवयवं सर्वोपि अवेति अंशेन वा आद्ये अंगुलिमात्रेपि देह बुद्धिः स्यात्। द्वितीये तस्याप्यं
शांगीकारे सत्यनवस्था स्यात्। अतो दृष्टे वेत्यर्थः ॥५१॥ एवं देहादेर्मिथ्यात्वमुक्त्वा तद्धेतूनां ह्निरण्यादीनामपि मिथ्यात्वमाह। धारयंतीति धातवो महाभूतानि
तन्मात्रैः सूक्ष्मैरवयवैर्विना न स्युः। अवयविद्वात्तेषामपि। नर्ह्यवयव सत्य इति चेन्नेत्याह। उक्तप्रकारेणावयविद्यसति। अवयवो ऽग्र्यंततो। मनेनस्यात्। अ
वयविप्रतीत्यन्यथानुपपत्तिं विनान्तःसरूपविश्रमाणसा वादित्यर्थः। नद्युक्तं पंचमस्कंधे। एवं निरुक्तं ह्निति शब्दे ष्टत्वमित्यादि ॥ सा। ॥

रा०म
६५

नन्वेवं यदि नित्योऽस्तावेद्यागमप्राप्यपिभ्रवाल्यादिष्वमी ये देवदत्तस्यति उत्पत्तिज्ञानं नस्यात् तदुक्तं तत्त्वे आविर्भावतिरोभावधर्मकेष्वनपायिय
त तद्धर्मीति तन्त्राह। सादिनि। वक्ष्यतः परमात्मनो निर्विकल्पे तेदेव्यसति। यद्भावक्तौ विषया विकल्पो मति शब्दं शब्दारोपमात्र स्यात् स एवे
ति भ्रमः स्यात्। मन्वतार्देव्याच्च विद्यानि हसि। ननु सर्वं मिथ्यात्वे शास्त्रस्य विधिनिषेधता कथं तत्राह। ब्रह्म मध्ये जाग्रत्स्वप्नावस्था
यथैवेति। ९०। इदानीमुक्तमेवाद्वैतं तावनात्र्युपदेशेन दृढीकरोति। तावद्वैतमिति। वर्त्तते यत्रालोचयन्। शास्त्राद्वैत्यतामात्मत

स्ता

द्यात्मादृश्यभ्रमशून्यो वा द्विकल्पोऽस्ति वक्ष्यतः। जाग्रत्स्वापौ यथा स्वप्ने तथा विधिनिषेधता। ९२। तावदद्वैतं क्रियाद्वैतं द्रव्याद्वै
तं यथात्मनः। वर्त्तयत्र वाद्वै स्वेहत्रीस्वप्नास्वत्तुते श्रुतिः। ९२। कार्यकारणवस्त्वैक्यमर्शनं पटतंतुवत्। अवस्त्वाद्विकल्प
स्य तावदद्वैतं तदुच्यते ९३। यद्ब्रह्मणि परे साक्षात्सर्वकर्मसमर्पणं। मनोवाक्कायजनितैः पार्थ क्रियाद्वैतं तदुच्यते॥ ९४॥ ॥

त्वात्तत्त्वेन तत्रैव जाग्रदादौ स्वप्नावस्थायां स्वप्नादि इति स्फुटं यद्वा वक्ष्यते भेदबुद्धिरेकः द्वन्द्वः। तत्तत्तदधिकारस्थे देहे कर्मस्ते भेदबुद्धिर्द्विती
यः। ततो मत्कर्म साधितमेतत्फलं ममैवस्तोऽप्यमिति त्वंतीयः। तान् स्तुतेनिवर्त्तयति। ९३। कार्यकारणयोर्वस्त्वैक्यस्य मर्शनं आलोचनं। तंतु
रेव न पटः शतं ९३। मनोवाक्कायजनितैः कृतानां कर्मणां समर्पणं तेः समर्पणमिति वा। उद्देश्य फलसंदोहि क्रियानेदेहेतु। ईश्वरार्पणेन तदस्तावत् क्रि
याणमद्वैतं॥ ९४॥ ॥

राम
६५

आत्मनः स्वस्य जायादीनां च स्वार्थस्य कामस्य च तयोः देहादीनां पंचभूतात्मकत्वेनालोकस्य परमात्मत्वेनात्वेदालोचनेनार्थकाम
योर्यदैक्यदर्शनमित्यर्थः॥ ६५॥ उक्तानाश्रमधर्मान् संक्षिप्याह यदिति॥ यतः इष्टं येनोपायेन यतः आसकाशात्॥ ६६॥ शक्तानुप
संहरति॥ एतैरिति॥ अस्य श्रीकृष्णस्य गतिं तद्भक्तिलक्षणं तस्य लक्ष्म॥ ६७॥ एतच्च सर्वसाधारणमुक्तं॥ तत्र स्वतुभक्तिरेव स

॥ आत्मजायासुतादीनामन्येषां सर्वदेहिनां॥ यत्स्वार्थकामयोरैक्यं दृष्ट्याद्वैतं तदुच्यते॥ ६५॥ यद्यदस्यानि
षिद्धं स्याद्येन यत्र यतो नृप॥ स तेनेहेत कार्याणि नरो नान्यैरनापदि॥ ६६॥ एतैरन्यैश्च वेदोक्तैर्वर्तमानः
स्वकर्मकृत्॥ गृहेऽप्यस्य गतिं यायाद्राजंस्तद्भक्तिभाङ्नरः॥ ६७॥ यथा हि यूयं नृपदेव दुस्त्यजादापद्गणादा
दुत्तरतात्मनः प्रभोः॥ यत्पादपंकेरुहसेवया भवानहार्षीन्निर्जितदिग्गजः क्रतून्॥ ६८॥ ॥

स्वभक्त्यार्थहेतुरिति पांडवानेव लक्ष्मीकृत्याह यथाहीति॥ हे नृपदेव नृपैर्देवैश्च सहायैरीश्वजारिति वा॥ आत्मनः श्रीकृष्णादेव प्रभो
हेतोः॥ अरुंतावदार्षः॥ उत्कर्षेणोत्तरतेत्यर्थः॥ यथायथावत्॥ तमेव [illegible] विशेषः॥ यत्पादेति यया आपद्गणादुत्तीर्णं यथा चक्रतून् अ
हार्षीः तातस्या श्रीकृष्णादेव तारकात् संसारादुत्तरतेत्यर्थः॥ ६८॥ ॥

श्रीरुक्मसेवासमहतामवज्ञयाचरणनिमित्तकपयाचमिष्यतीतिदर्शयन्स्वपूर्ववृत्तांतमाहा।अहमितिसार्द्धैःपंचभिः।नाम्नाउपवर्हणः॥

अहंपुराभवंकश्चिद्गंधर्वउपवर्हणो।नाम्नातीतेमहाकल्पेगंधर्वाणांसुसंमतः।६९।रूपपेशलमा
धुर्यसौगंध्यप्रियदर्शनः।स्त्रीणांप्रियतमोनित्यंमत्तःस्वपुरलंपटः।७०।एकदादेवसत्रेतुगंधर्वा
प्सरसांगणाः।उपहूताविश्वसृड्भिर्हरिगाथोपगायने।७१।अहंचगायंस्तद्विद्वान्स्त्रीभिःपरिवृतोग
तः।ज्ञात्वाविश्वसृजस्तन्मेहेलनंशेपुरोजसा।याहित्वंशूद्रतामाशुनष्टश्रीःकृतहेलनः।७२।तावद्दास्या
महंजज्ञेतत्रापिब्रह्मवादिनां।शुश्रूषयानुषंगेणप्राप्तोहंब्रह्मपुत्रतां।७३।धर्मस्तेगृहमेधीयोवर्णि
तःपापनाशनः।गृहस्थोयेनपदवीमंजसान्यासिनामियात्।७४॥ ॥

॥रूपेणापिशलंसौकुमार्यंरूपादिभिःप्रियंदर्शनंयस्य।७०नरानदाक्षानेविप्राइत्युन्मत्तःसन्नगायन्नेवगतः॥७२॥ ॥राम॥ ॥

भा॰स्कं॰
६७

त्वं उक्तार्थ एवेति हर्षेण पुनः स्वरूपश्लोकानेव पठति स्पष्टमितिशेषं स्पष्टं॥७५॥८०॥ ॥सप्तमे त्वार्थदीपिकायां टीकायां पं

यूयं नृलोके बत भूरिभागा लोकं पुनाना मुनयोऽभियंति। येषां गृहानावसतीति साक्षाद् गूढं परं ब्रह्म मनुष्यलिं
गं॥७५॥ स वा अयं ब्रह्म महद्विमृग्यं कैवल्यनिर्वाणसुखानुभूतिः॥ प्रियः सुहृद्वः खलु मातुलेय आत्मा
र्हणीयो विधिकृद्गुरुश्च॥७६॥ न यस्य साक्षाद्भवपद्मजादिभि रूपं धिया वस्तुतयोपवर्णितं मौनेन भक्त्यो
पशमेन पूजितः प्रसीदतामेष स सात्वतां पतिः॥७७॥ ॥श्रीशुक उवाच॥ ॥इति देवर्षिणा प्रोक्तं निशम्य भरतर्षभः॥
पूजयामास सुप्रीतः कृष्णं च प्रेमविह्वलः॥७८॥ कृष्णपार्थावुपामंत्र्य पूजितः प्रययौ मुनिः॥ श्रुत्वा कृष्णं परं ब्रह्म पार्थः
परमविस्मितः॥७९॥ इति दाक्षायणीनां ते पृथग्वंशाः प्रकीर्तिताः॥ देवासुरमनुष्याद्या लोका यत्र चराचराः॥८०॥
इति श्रीभागवते महापुराणे सप्तमस्कंधे प्रह्लादचरिते युधिष्ठिरनारदसंवादे पंचदशोऽध्यायः॥ समाप्तः॥

राम
६७

चदशोऽध्यायः॥ ॥इति श्रीसप्तमस्कंधस्य भागवतार्थदीपिका श्रीश्रीधरस्वामिकृता टीका॥ ॥समाप्तोयं सप्तमः॥ ॥

॥ सप्तमस्कंध ॥ ७

॥ मुयोमाहादेवस्यदंपुस्तकं [illegible] स्वार्थं परार्थं वेत्ति ॥ ६ ॥

॥षष्ठमस्कंध॥६

॥सुयोमाहादेवस्येदं पुस्तकं॥

भा॰ष॰

१

॥श्रीगणेशायनमः॥ ॥गुणपारण्यप्रेन्द्रसिंहैकनामसिंहोविराजते॥ यच्छब्दादतःपलायंते महाकल्मषकुंजरा॥ १ विसर्गसंभवानूर्जीवान्बूममर्यादानुसंयुता न्विघ्नश्चापात्य खिलेन्द्रपे रित्येवंपंचमेस्थितं॥ आध्यायेकोनविंशत्याषष्ठेपोषणमुच्यते॥ अतिलंघितमर्यादसन्नारक्षणलक्षणं ३ अजामिलोमवृष्येषु महापापोयथ्याविताः॥ विष्णुत्रूपादिघातीचयथादेवेषुवासवः ४ अजामिलस्यभक्तत्वं विष्णुदूतैर्निरूपितं॥ संकीर्तनभगवन्नामपुत्रस्नेहानुषंगजं ५ इंद्रोपिभगवद्भक्तःसख्येनोपेंद्रसेवकः॥ तदधीनस्तुरैश्वर्यशत्रुनिर्जयजीवितः ६ तत्रादौत्रिभिरध्यायैरजामिलकथोच्यते॥ विष्णुदूपकथ्यापद्विरिंद्रो बोक्तयेततः॥ ७ ॥ इंद्रस्यैवतुदोषोक्तयेवृत्राख्यानंततोभलिः॥ द्वाभ्यांचमरुदाख्यानेनमेवंप्रकरणक्रमः॥ ८ ॥ तत्रादौप्रथमेविष्णोर्दूतैःपात

श्रीराजोवाच॥ ॥निवृत्तिमार्गःकथितआदौभगवतायथा॥ क्रमयोगोपलब्धेनब्रह्मणायदसंसृतिः॥ प्रवृत्तिलक्षणश्चैवत्रैगुण्यविषयोमुने॥ योसावलीनप्रकृतेर्गुणसर्गःपुनःपुनः॥ १ रामायनमः॥ ॥

किमीचेनेतत्पापस्यापनायोक्तांयाम्येर्दुर्मादिलक्षणं॥ ए ॥ अथषष्ठस्कंधोव्याख्यायते॥ पूर्वोक्तानुवादपूर्वकं मन्वंतरेनानरकपरिहारोपायंपृच्छ तिनिवृत्तिमार्गइतिषड्भिः॥ आदौद्वितीयस्कंधेवैश्वानरंयाती त्यादिना॥ भगवता यथायथावत्येनमार्गक्रमेणयोगो र्चिरादिप्राप्तिः तेनोपलब्धे ब्रह्मातेनसहासंसृतिर्मोक्षो भवति॥ ब्रह्मणासहतेसर्वेसंप्राप्तेप्रतिसंचरे॥ परस्यांतेकृतात्मानःप्रविशंतिपरंपदमितिवचनात् १ त्रैगुण्यंस्वर्गादिसुखंतदेवविषयःप्राप्यंयस्यअलीनाप्रकृतिर्यस्यतस्यगुणैःसर्गःपुनःपुनर्गुणसर्गः॥ लोगाधंदेहारंभरूपोयोमार्गःसचकथितःहतीयेदक्षिणेनपथाऽर्यमणःपितृलोकंव्रजंतीत्यादिना २ रामायनमः॥ ॥

१

अनुवर्णिताः निरंतराध्यायो व्याख्यात अनुवर्थस्यादौ यतः यस्मिन् ॥ २ ॥ द्वीपादीनां भागं लक्षणे मानतश्च धरामंडलस्य संस्थानं ॥ ४ ॥ ज्योतिषां विवराणां
च इदं संस्थानं विभुर्यथा सृष्टवान् तथा व्याख्यातमित्यर्थः ॥ ५ ॥ नानानां उग्राः यातना येषु तान् नरकान् यथा येनोपायेन न गच्छेत् तन्मे अधुना व्याख्यातुमर्हसि ॥ ६ ॥ तत्र
तावन्महता दुःखेन प्रायश्चित्तं विना नरका दुर्निवारा इत्याह न चेदिति द्वाभ्यां मनउक्तिपाणिभिर्मनोवाक्कायैः कृतस्यांहसः स्वैरेव इहैवापचितिः प्रायश्चित्तं न कुर्यात्

अधर्मलक्षणा नाना नरकाश्चानुवर्णिताः ॥ मन्वंतरश्च व्याख्यात आद्यः स्वायंभुवो यतः ॥ २ ॥ प्रियव्रतोत्तानपदोर्वंशस्तच्चरितानि च ॥ द्वी
पवर्षसमुद्राद्रिनद्युद्यानवनस्पतीन् ॥ ४ ॥ धरामंडलसंस्थानं भागलक्षणमानतः ॥ ज्योतिषां विवराणां च यथेदमसृजद्विभुः ॥ ५ ॥
अधुनेह महाभाग यथैव नरकान्नरः ॥ नानोग्रयातनान्नेयात्तन्मे व्याख्यातुमर्हसि ॥ ६ ॥ श्रीशुक उवाच ॥ न चेदिहैवापचि
तिं यथांहसः कृतस्य कुर्यान्मनउक्तिपाणिभिः ॥ ध्रुवं स वै प्रेत्य नरकानुपैति ये कीर्तिता मे भवतस्तिग्मयातनाः ॥ ७ ॥ तस्मात्पु
रैवाश्विह पापनिष्कृतौ यतेत मृत्योरविपद्यतात्मना ॥ दोषस्य दृष्ट्वा गुरुलाघवं यथा भिषक् चिकित्सेत रुजां निदानवित्
॥ ८ ॥ ॥ श्रीरामचंद्राय नमः ॥ ॥ १ ॥ ॥ रामाय नमः ॥ ॥

चेत् तर्हि पुरुषः प्रेत्य मृत्वा नरकान् ध्रुवमुपैति मया ये भवतः कीर्तिताः तिग्मा दारुणा यातना येषु तान् ॥ ७ ॥ यस्मादेवं तस्मात्पापस्य प्रायश्चित्ते यतेत क
टी० २ दा मृत्योः पुरैव तत्रापि अविपद्यता अम्रियमाणेनात्मना देहेन यद्वा अविपत् विपत्तिरहितो यावत् यतात्मना संयतेन मनसा तत्रापि आशु ॥ अन्यथा
अतीव चिरकाले तु द्विगुणं व्रतमर्हतीति द्वैगुण्यापत्तेः ॥ तत्र च पापस्य महत्त्वमल्पत्वं चावेक्ष्य तदनुरूपं प्रायश्चित्तं यतेत ॥ रुजां रोगाणां निदानविद्यथा
वैद्यः तदनुरूपं चिकित्सेत तद्वत् ॥ ८ ॥ ॥

सा॰ष॰ अत्र चोदयति द्वाभ्यां दृष्टं राजदंडादि श्रुतं नरकपातादि ताभ्यामात्मनः पापमहितं जानन्नपि भूयः प्रायश्चित्तानंतरं करोति ह्यथो अतः कारणात् द्वादशेष्टा
२ दिकथं प्रायश्चित्तं। तेन समूलदोषस्यानिवृत्तेः। निवृत्तौ वा पुनः स पापप्ररोहो योगादिति भावः॥९॥ किंच क्वचित् कदाचित् तद्ज्ञात्या पापान्निवर्त्तते क्वचित्तदे
वपुनरेवाचरति। यथा कुंजरस्नातोऽपि रजोभिरात्मानं मलिनीकरोति तथा पापस्य पुनर्दुर्निर्वारत्वेन नरकपातस्यावश्यंभावित्वात् प्रायश्चित्तं व्यर्थमि ला

राजोवाच ॥ दृष्टश्रुताभ्यां यत्पापं जानन्नप्यात्मनोऽहितं करोति भूयो विवशः प्रायश्चित्तमथो कथं ॥९॥ क्वचिन्निवर्त्तते
ऽभद्रात्क्वचिच्चरति तत्पुनः। प्रायश्चित्तमथोऽपार्थं मन्ये कुंजरशौचवत् ॥१०॥ श्रीबादरायणिरुवाच ॥ कर्मणा क
र्मनिर्हारो न ह्यात्यंतिक इष्यते। अविद्वदधिकारित्वात्प्रायश्चित्तं विमर्शनं ॥११॥ नाश्नतः पथ्यमेवान्नं व्याधयोऽभिभवंति
हि। एवं नियमकृद्राजन् शनैः क्षेमाय कल्पते ॥१२॥ ॥श्रीरामचंद्राय नमः॥ ॥

ति॥१०॥ परिहरति। कर्मणा कृच्छ्रादिप्रायश्चित्तेन कर्मणः पापस्य निर्हारो नाशः आत्यंतिकः समूलो न हीष्यते। अविद्वानधिकारी यस्मिन् तस्य भावस्
त्वं तस्मात्। अतोऽविद्यायाः नाशाभावात् नष्टेऽपि तस्मिन् पापे तत्संस्कारेण पापांतरस्य पुनः पुनः प्ररोहो भवत्येव। किं तर्हि मुख्यं प्रायश्चित्तं तदाह। प्रा २
यश्चित्तं तु विमर्शनं ज्ञानं॥११॥ तद्वन्नियमपरमन्नः शनैर्लभते नान्यदिति स दृष्टांतमाह नेति। पथ्यमेवान्नमश्नतः पुरुषान् यथा व्याधयो न बाधंते। त
थानियमादिकर्त्तॄन् क्षेमाय तत्त्वज्ञानाय समर्थो भवति॥ ॥

एतदेव विशदयति द्वाभ्यां तपसा ऐकाग्र्येण मनसश्चेंद्रियाणां च ऐकाग्र्यं परमं तप इति स्मृतेः ब्रह्मचर्येण अष्टांगेन । तदुक्तं स्मरणं कीर्तनं केलिः प्रेक्षणं गु
ह्यभाषणं संकल्पोध्यवसायश्च क्रियानिर्वृत्तिरेव च । एतन्मैथुनमष्टांगं प्रवदंति मनीषिणः । विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणमिति । शमो मनसो
नियमनं दमो बाह्येंद्रियाणां त्यागो दानं यमो हिंसादिः नियमो जपादिः ॥ १३ ॥ अस्यातिदुष्करत्वात्सुखमेवान्यत्प्रायश्चित्तमाह । केचिदिति । अनेनैवंभूता
भक्तिः प्रधाना विरला इति दर्शयति । केवलया तपआदिनिरपेक्षया । वासुदेवपरायणा इति नाधिकारिविशेषणमेतत् । किंत्वन्येषामप्युद्द्यर्थं नात्रह

तपसा ब्रह्मचर्येण शमेन च दमेन च । त्यागेन सत्यशौचाभ्यां यमेन नियमेन च ॥ १३ ॥ देहवाग्बुद्धिजं धीरा धर्मज्ञाः श्रद्धयान्वि
ताः । क्षिपंत्यघं महदपि वेणुगुल्ममिवानलः ॥ १४ ॥ केचित्केवलया भक्त्या वासुदेवपरायणाः । अघं धुन्वंति कार्त्स्न्येन नीहारमि
व भास्करः ॥ १५ ॥ न तथा ह्यघवान् राजन् पूयेत तपआदिभिः । यथा कृष्णार्पितप्राणस्तत्पूरुषनिषेवया ॥ १६ ॥ सध्रीचीनो ह्ययं लो
के पंथाः क्षेमोऽकुतोभयः । सुशीलाः साधवो यत्र नारायणपरायणाः ॥ १७ ॥ प्रायश्चित्तानि चीर्णानि नारायणपराङ्मुखं ।
न निष्पुनंति राजेंद्र सुराकुंभमिवापगाः ॥ १८ ॥ ॥ श्रीरामाय नमः ॥ ॥

निरर्थास्तेष्वेव पर्यवसानादनुवादमात्रं एतच्च ज्ञानमार्गादपि श्रेष्ठमित्याह न तथा पूयेत शुध्येत तात तत्पुरुषनिषेवया कृष्णार्पिताः प्राणा येन तत्र हेतुः सध्री
चीन इति । सध्रीचीनः समीचीनः । अयं पंथाः भक्तिमार्गः यतः क्षेमः क्षेमे हेतुः । न कुतश्चित् विघ्नादेर्भयं यस्मिन् । तदेवाह सुशीलाः कृपालवः साधवो निष्कामाः
यत्र धर्मनिष्ठा अतो न ज्ञानमार्ग इव सहायतो निमित्तं भयं । नापि कर्ममार्गवत् मत्सरादियुक्तेभ्यो भयमिति भावः । भक्तेरन्यनिरपेक्षत्वमुक्तं । प्राय
श्चित्तानि तु भक्तिं विना न शोधयंतीत्याह प्रायश्चित्तानीति महतामप्यशोधकत्वे दृष्टांतमाह सुराकुंभमिवापगा इवेति ॥ ॥

प्रतिशादृष्टप्रत्येकं।सकृदपि किंपुनरभ्यासेन।मनः संशयात्मकमप्यंतःकरणं किंपुनर्निश्चयात्मिका बुद्धिः पादारविंदयोरपि किंपुनः सर्वैर्भूत्यैर्निवेशितं बलादपि किंपुनः स्वतो निविष्टं तद्गुणेष्वपि रागि किंपुनस्तत्स्वरूपे येरिहेति सामान्यवाचिभ्यां सर्वनामभ्यां मनो निवेशने जातिदेशादिविशेषानपेक्षेते निगम्यते ये विनिवेशितं बलादपि तेन भक्ताः इति शेषः॥

तत्तिः स्वल्पापि पुनात्येवेत्याह।सकृदिति।तत्पगुणेषु रागमात्रमपि न तु ज्ञानयस्य तन्मनाः।तावतैव वीर्णनिष्कृतं प्रायश्चित्तं येः इममर्थमितिहासेनोपपादयति।अत्रेति।मिमन्तः कान्यकुब्जे देदास्याः पतिर्नाम्ना अजामिलः वंदियहेए।अनेन च द्यूतेन कैतवैर्वंचनादिलिश्चाद्वृत्तिं जीविकां विस्रवे

हानुरा ४

सकृन्मनः कृष्णपदारविंदयोर्निवेशितं तद्गुणरागि यैरिह।न ते यमं पाशभृतश्च तद्भटान्स्वप्नेपि पश्यंति हि चीर्णनिष्कृताः॥१९॥ अत्रैवो दाहरंतीममितिहासं पुरातनं।दूतानां विष्णुयमयोः संवादस्तं निबोधमे॥२०॥ कान्यकुब्जे द्विजः कश्चिद्दासीपतिरजामिलः।नाम्ना नष्टसदाचारो दास्याः संसर्गदूषितः॥२१॥ वंद्यक्षकैतवैश्चौर्यैर्गर्हितां वृत्तिमाश्रितः।बिभ्रत्कुटुंबमशुचिर्यातयामास देहिनः॥२२॥ एवं निवसतस्तस्य लालयानस्य तत्सुतान्।कालोत्यगान्महान्राजन्नष्टाशीत्यायुषः समाः॥२३॥ तस्य प्रवयसः पुत्रा दशतेषां तु यो वमः।बालो नारायणो नाम्ना पित्रोश्च दयितो भृशं॥२४॥ स बद्धहृदयस्तस्मिन्नर्भके कलभाषिणि॥॥ निरीक्षमाणस्तल्लीलां मुमुदे जरठो भृशं॥२५॥ भुंजानः प्रपिबन्खादन्बालकस्नेहयंत्रितः।भोजयन्पाययन्मूढो न वेदागतमंतकं॥२६॥ स एवं वर्तमानोज्ञो मृत्युकाल उपस्थिते।मतिं चकार तनये बाले नारायणाह्वये॥२७॥ ॥श्रीरामचंद्राय नमः॥ ॥

लन्यालयामास पीडयामास।आयुषः संबंधी महान्कालोऽत्यागात् सकिया नित्यपेक्षायामाह।अष्टाशीत्यासंख्यया युक्ताः समाः संवत्सराः प्रवयसो वृद्धस्य वर्द्धहृदयं येन जरठो वृद्धः एतच्चतदुपलालनादि श्रीनारायणनामोपचारमाहात्म्येन तद्विरक्तिरवाभूदिति सूचितं।ज्ञातोपयोगितेनापि द्रष्टव्यं॥

॥श्रीरामाय नमः॥ ॥

क ५

वक्त्राणि तुंडानि मुखानि येषां ऊर्ध्वानि रोमाणि येषां तान् प्लावितेन प्लुतांतं नीतेन हरिकीर्त्तनं निशम्य आपतन् आयतः तत्र तु भर्तुर्नाम पुरःसराः आद्यत्वात् अस्य नयनं निषे
धयाव यं यत्र भ्रान्त्या ज्ञानी मद्यति न कोपः कार्यः यतो लौकिकाद्भुतरूपा यूयमित्याहुः ३ सर्व इति सार्द्धैः लसत्यः पुष्करमालाः संति येषां ते नूत्नं नवं वयो येषां ते षामिषं

सपाशहस्तांस्त्रीन् दृष्ट्वा पुरुषानतिदारुणान् । वक्रतुंडानूर्ध्वरोम्ण आत्मानं नेतुमागतान् ॥ २८ ॥ दूरे क्रीडनकासक्तं पुत्रं नारायणाह्वयं । प्लावितेन स्वरेणोच्चैराजुहावाकुलेन्द्रियः ॥ २९ ॥ निशम्य म्रियमाणस्य मुखतो हरिकीर्त्तनं । भर्तुर्नाम महाराज पार्षदाः सहसापतन् ॥ ३० ॥ विकर्षतोऽन्तर्हृदयाद्दासीपतिमजामिलं । यमप्रेष्यान्विष्णुदूता वारयामासुरोजसा ॥ ३१ ॥ ऊचुर्निषेधितास्तांस्ते वैवस्वतपुरःसराः । के यूयं प्रतिषेद्धारो धर्मराजस्य शासनं ॥ ३२ ॥ कस्य वा कुत आयाताः कस्मादस्य निषेधथ । किं देवा उपदेवा वा यूयं किं सिद्धसत्तमाः ॥ ३३ ॥ सर्वे पद्मपलाशाक्षाः पीतकौशेयवाससः । किरीटिनः कुंडलिनो लसत्पुष्करमालिनः ॥ सर्वे च नूत्नवयसः सर्वे चारुचतुर्भुजाः । धनुर्निषंगासिगदाशंखचक्रांबुजश्रियः ॥ ३६ ॥ दिशो वितिमिरालोकाः कुर्वंतः स्वेन रोचिषा । किमर्थं धर्मपालस्य किंकरान्नो निषेधथ ॥ ३७ ॥ ॥ श्रीशुक उवाच ॥ इत्युक्ते यमदूतैस्ते वासुदेवोक्तकारिणः । तान्प्रत्यूचुः प्रहस्येदं मेघनिर्ह्रादया गिरा ॥ ३७ ॥ ॥ विष्णुदूता ऊचुः ॥ ॥ यूयं वै धर्मराजस्य यदि निर्देशकारिणः । ब्रूत धर्मस्य नस्तत्त्वं यच्चाधर्मस्य लक्षणं ॥ ३८ ॥ ॥ राम ॥ ॥

गदेषुधिः धनुर्निषंगादिभिः श्री शोभा येषां ते विगतं तिमिरं आलोकश्चान्यस्य प्रकाशो यासु तथाभूता दिशः कुर्वंतः भवतां मे दर्शनं अवितर्व्यं मित्याहुः कि
मर्थमिति । अहो दंडधारं दंड्यादिज्ञानमस्मान्य एते चौरा एवास्मद्विया धर्मराजस्य किंकरा इत्यनृतं वदंतीति विस्मयेन प्रहस्य तान् प्रत्यूचुः मेघस्येव निर्ह्रादो ध्व
निर्यस्याः तया तत्त्वं स्वरूपं लक्षणं प्रमाणं ॥ ३९ ॥ ॥ राम ॥ ॥

यो धर्मः २

सा॰ष॰ ४

कथंस्वित्केनप्रकारेण स्थानं विषयः कारिणः कर्मिणः नृणामिति तानराएवनपञ्चादयः तेष्वपि कतिविदेवेत्यर्थः। वेदेन प्रणिहितो विहितो धर्मः वेदप्रमा
णक इत्यर्थः। अनेन यो वेदप्रमाणकः स धर्मः स वेदप्रमाणक इति स्वरूपं प्रमाणं चोक्तं। यथाह जैमिनिः। चोदनालक्षणोऽर्थो धर्म इति। व्याख्यातं च ल
ह्यैः। इयमेकेन सूत्रेण कृत्यर्थास्तानि नृप्यत इति। अदृष्टस्याप्य धर्मस्य लक्षणं स्वरूपं च दंडस्थानकथनायाहुः। तद्विपर्ययः यो वेदनिषिद्धः सो
धर्मः। निषेधश्चात्तस्मिन् प्रमाणमित्यर्थः। वेदस्य प्रामाण्ये हेतुः वेदो नारायणेडुक्तः स एव साक्षादित्युपचारः। स्वयंभूरिति च निःश्वासमात्रे

कथंस्वित् ध्रियते दंडः किं वास्य स्थानमीप्सितं। दंड्याः किं कारिणः सर्वे आहोस्वित्कतिचिन्नृणां॥ ४० ॥ यमदूता ऊचुः॥
वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः। वेदो नारायणः साक्षात्स्वयंभूरिति शुश्रुम॥ ४ ॥ येन स्वधाम्न्यमी भावा रजः
सत्त्वतमोमयाः। गुणनामक्रियारूपैर्विभाव्यंते यथातथं॥ ५ ॥ सूर्योऽग्निः खं मरुद्गावः सोमः संध्याहनी दिशः। कं कुः
स्वयं धर्म इति ह्येते दैह्यस्य साक्षिणः॥ ४२ ॥ श्रीरामायनमः॥ ॥

रांग

एव स्वयमेव लब्धवतीति तथाच श्रुतिः। अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेद इति। कोसौ नारायण इत्यत्राहुः। येन स्वधाम्नि स्वस्वरूपे अमी भावाः प्राणिनः स्थु
णाः सत्त्वादयः। नामानि ब्राह्मणादीनि क्रिया अध्ययनाद्याः रूपाणि वर्णाश्रमादयः तैर्विभाव्यंते विविच्यंते यथायथावत् स नारायणः। तथाप्य धर्मो
नेन कृत इति कुतो ज्ञायते। तत्राहुः। सूर्य इति। अहनी अहश्च रात्रिश्च कं उदकं कुः पृथ्वी देह्यस्याजीवस्य यथाहुः। आदित्यचंद्रावनिलोऽनल
श्च द्यौर्भूमिरापो हृदयं यमश्च। अहश्च रात्रिश्च उभे च संध्ये धर्मश्च जानाति नरस्य वृत्तमिति॥ ॥

४

वेदेना लक्षितोऽर्थो

ण

स्वकृतफलदातारो दृश्यंते प्रभाते इति शेषः।

स्थानमाहुः एतैर्निमित्तभूतैर्विज्ञातः दंड्या नाहुः ४३ सर्व इति कारिणः कर्मिणः विपरीतानि अलड्डाण्यपि कर्मिणां संलवंति। यतस्तेषां गुणसंगोपि यदि कश्चि
दकर्मा स्यात्तर्हि तस्य लड्डाणि न स्फुः। न त्वेतदस्तीत्याहुः। न हि देहवान् कर्मकृदस्तीति। अतः सर्वे कर्मिणः कर्मिणां च पापस्यावश्यं भावित्वात् ते सर्वे दंडमर्हंती
त्यर्थः। कथं ज्ञायते दंड इत्यस्योत्तरं यैनेति धर्मो वेति दृष्टांतः। अधर्मानुसारेण दंडः धर्मानुसारेण सुखवदित्यर्थः। ४४ न केवलं सूर्योदय एव ज्ञापकः
किंत्वर्थापत्तिरपीत्याहुः यथेति। इह देवप्रवराः इह जन्मनि शांत घोरमूढत्वेन त्वात् सुखदुःखमिश्रत्वेन वा धार्मिकत्वादिना वात्रैविध्यं भूतेषु यथोपलभ्य

एतैः स्वधर्मोऽलिज्ञातः स्थानं दंडस्य गुडपतोः सर्वो क्रमात्तु शेषेन दंडमर्हंति कारिणः ४३ संलवंति हि लड्डाणि विपरीतानि चानघाः। कारि
णां गुणसंगोस्ति देहवान् ह्यकर्मकृत् ॥ ४४ येन यावान्यथाधर्मोऽधर्मो वेह समीहितः स एव तत्फलं भुंक्ते तथा तावदमुत्र वै ४५
यथेह देवप्रवरास्त्रैविध्यमुपलभ्यते भूतेषु गुणवैचित्र्यात्तथान्यत्रानुमीयते ४६ वर्तमानोऽन्ययोः कालो गुणाभिज्ञापको
यथा। एवं जन्मान्ययोरेतद्धर्माधर्मनिदर्शनं ॥ ४७ ॥ मनसैव पुरे देवः पूर्वरूपं विपश्यति। अनुमीमांसते पूर्वं मनसा भगवान

जः ४८ राम

ते तथान्यत्र जन्मांतरेप्यनुमीयते त्रैविध्यान्यथानुपपत्त्या कल्प्यते। वर्तमान जन्मना पूर्वापर जन्मधर्माधर्मज्ञानं लवतीति स दृष्टांतमाहुः ४६ वर्तमा
नो वसंतादिकालः अन्ययोर्भूत लविष्ययोर्वसंतयोर्ये गुणाः पुष्पफलादयः तेषामभिज्ञापको यथा। एवमेतज्जन्म अन्ययोर्भूतभाविजन्मनोर्ध
र्माधर्मौ निदर्शयतीति तथा। ४७ ॥ अपं च धर्माधर्मज्ञानप्रकारोन्येषां धर्मराजस्य मनसैव सर्वं पश्यतीत्याहुः। पुरे संयमिन्यां स्थित एव यमो देवो
देहे स्थितोंतर्यामी वा जीवस्य पूर्वरूपं धर्मादि युक्तं विशेषेण पश्यति अनुध्यातं रमः पूर्वरूपं मीमांसते यद्यस्याऽनुरूपं तद्विचारयति यतो सौ भ

गवान जः ॥ रामाय नमः ॥ ॥ ८

धर्माधर्म

ला॰प॰

५

कुरुते४

एकस्त

जीवस्तीश्वरेण उपस्थापितं वर्त्तमानं देहं पश्यति न तु पूर्वमपरं वेत्याहुः। यथेति। अज्ञः अविद्योपाधिर्जीवस्तु व्यक्तमेव भावीनकर्माभिव्यक्तं वर्त्तमानमेव दे
हं उपास्ते अहमिति मन्यते। पूर्वमपरं वा न वेद। तत्र हेतुः नष्टा जन्मनां स्मृतिर्यस्य अत्र दृष्टान्तः। तमसा निद्रया युक्तो यथा स्वप्ने अभिव्यक्तमेव देहादि पश्यति न
तु जाग्रद्देहादि पूर्वं स्वप्नादिगतं वा तद्वदित्यर्थः॥ ४९॥ एवं भूतस्य जीवस्य संसारं प्रपंचयति। पंचभिः श्रोत्रादिभिः पंचभिः कर्मेंद्रियैः स्वार्थान् उपादानादी
न् पंच शब्दादीन् विषयान् वेद पंचभिर्ज्ञानेंद्रियैः षोडशेन मनसा सह सप्तदशः षोडशोपाध्यंतर्गतोपि स्वयं एकः। एवं सर्वेंद्रियविषयप्रतिसंधाता

यथाज्ञस्तमसा युक्त उपास्ते व्यक्तमेव हि। न वेद पूर्वमपरं नष्टजन्मस्मृतिस्तथा॥ ४९॥ पंचभिः कुरुते स्वार्थान् पंच वेदाथ पंचभिः।
एकस्तु षोडशेनत्रीन् स्वयं सप्तदशोऽश्नुते॥ ५०॥ तदेतत् षोडशकलं लिंगं शक्तित्रयं महत्। धत्तेनुसंसृतिं पुंसि हर्षशोकभयार्तिदं॥
॥ ५१॥ देहस्थोऽजितषड्वर्गो नेच्छन् कर्माणि कार्यते। कोशकार इवात्मानं कर्मणाच्छाद्य मुह्यति॥ ५२॥ नहि कश्चित्क्षणमपि
ज्ञातु तिष्ठत्यकर्मकृत्। कार्यते ह्यवशः कर्म गुणैः स्वाभाविकैर्बलात्॥ ५३॥ लब्ध्वा निमित्तमव्यक्तं व्यक्ताव्यक्तं भवत्युत।
यथा योनि यथा बीजं स्वभावेन बलीयसा॥ ५४॥ ॥

त्रीन् ज्ञानकर्मेंद्रियमनोविषयान् प्राप्नोति॥ ५०॥ तदेतल्लिंगं शरीरं शक्तित्रयं गुणत्रयकार्यं महदनादि पुंसि जीवे अनुसंसृतिं धत्ते॥ ५१॥ नेच्छन्नप्यनिच्छ
न्नपि अनेनैव कर्माणि कार्यते। कोशकारः कीटविशेषः मुह्यति। निर्गमोपायं न जानाति॥ ५२॥ कार्यत इत्यत्राह। सर्वं प्रमाणयति। नहीति
॥ गुणैर्गुणकार्यरागादिभिः स्वाभाविकैः पूर्वकर्मसंस्कारोद्भूतैः कर्मवशेन च तदनुरूपो देहो भवतीत्याह। लब्ध्वेति। अव्यक्तं अदृष्टं निमित्तं लब्ध्वा
व्यक्ताव्यक्तं तदनुरूपं स्थूलसूक्ष्मं च शरीरं भवति। यथा योनि मातृसदृशं यथा बीजं पितृसदृशं स्वभावो वासना शुक्रशोणितयोरेकं बलीयः कर्म वा
सनया माता पितृसदृशो देहो भवतीत्यर्थः॥ ॥

५

संसारचक्रं(म)उपसंहरंतो मुक्तिप्रकारमाजः। एष इति। ईशसंगात् परमेश्वरलजनात्॥ ५५ ॥ तदेवं सामान्यतो धर्मादिनिर्णयं यथा(?) ... प्रकृतस्याजामिलस्य धर्मप्रपंचय-
तो दंश्यन्नमाह। अयं हीति। यावदध्यायसमाप्तिः। स्पष्टं तत्सर्वं वृत्तान्तानुवादो ऽन्यायाति रेकप्रदर्शनार्थः। शीलं सुलावः(?) वृत्तं सदाचारः गुणानां आलयः तेषामा-
लयः ॥ ५६ ॥ निरहंकृतो निरहंकारः ॥ ५७ ॥ आवृत्तः वनात्परावृत्तः ॥ ५८ ॥ भुजिष्यया दास्या मैरेयं मधु पैष्टी सुरां पीत्वा मदेनाघूर्णिते नेत्रे यस्याः

एष प्रकृतिसंगेन पुरुषस्य विपर्ययः। आसीत्स एव न चिरादीशसंगाद्विलीयते ॥ ५५ ॥ अयं च श्रुतसंपन्नः शीलवृत्तगुणालयः। धृतव्रतो मृदु-
दांतः सत्यवाङ्मंत्रविच्छुचिः ॥ ५६ ॥ गुर्वग्न्यतिथिवृद्धानां शुश्रूषुरनहंकृतः। सर्वभूतसुहृत्साधुर्मितवागनसूयकः ॥ ५७ ॥ एकदासौ वनं
यातः पितृसंदेशकृद्द्विजः। आदाय तत आवृत्तः फलपुष्पसमित्कुशान् ॥ ५८ ॥ ददर्श कामिनं कंचित् शूद्रं सह भुजिष्यया। पीत्वा
च मधु मैरेयं मदाघूर्णितनेत्रया ॥ ५९ ॥ मत्तया विश्लथन्नीव्या व्यपेतं निरपत्रपं। क्रीडंतमनुगायंतं हसंतमनयांतिके ॥ ६० ॥ दृष्ट्वा तां
कामलिप्तेन बाहुना परिरंभितां। जगाम हृच्छयवशं सहसैव विमोहितः ॥ ६१ ॥ स्तंभयन्नात्मनात्मानं यावत्सत्त्वं यथाश्रुतं। न
शशाक समाधातुं मनो मदनवेपितं ॥ ६२ ॥ तन्निमित्तस्मरव्याजग्रहग्रस्तो विचेतनः। तामेव मनसा ध्यायन्स्वधर्माद्विरराम ह ॥ ६३ ॥

॥ ५९ ॥ विशेषेण श्लथंती नीवी यस्याः। तया सह व्यपेतं सुष्ठु परादृष्टं कामलिप्तेन [illegible] कामोद्दीपकेन तदंगरागेण हरिद्रादिना लिप्तेन। सत्त्वं धैर्यं श्रुतं ज्ञानं तद्-
लेन स्तंभयन्नपि मदनेन कंपितं मनः समाधातुं न शक्तोऽभूत् ॥ ६२ ॥ तद्दर्शनमेव निमित्तं यस्य स्मरव्याजग्रहस्य तेन ग्रस्तः। विचेतनो गतस्मृतिः ॥ ६३ ॥

भा॰ष॰
६

यावता समयेन ॥ ६४ ॥ लंभितां परिणीतां ॥ ६५ ॥ अघरूपमायुर्यस्य मलमेव तदीयमन्नादिकमश्नातीति मलात् ॥ ६८ ॥ अकिंचिन्निर्वेशं अकृतप्रायश्चित्तं अस्मैव हिता-
र्थमित्याम इत्याह यत्रेति ॥ ६९ ॥ इति षष्ठे प्रथमः ॥ ॥ द्वितीये वैष्णवैर्याम्यान्नाममाहात्म्यमुक्तं श्रावयित्वा द्विजो विष्णोर्लोकं नीत ईर्यते ॥ १ ॥ नयकोवि-

तामेव तोषयामास पित्र्येणार्थेन यावता ग्राम्यैर्मनोरमैः कामैः प्रसीदेत यथा तथा ॥ ६४ ॥ विप्रां स्वभार्यामप्रौढां कुले महति लंभितां ।
विससर्ज चिरात्पापः स्वैरिण्यापांगविद्धधीः ॥ ६५ ॥ यतस्ततश्चोपनिन्ये न्यायतोऽन्यायतो धनं । बभारास्याः कुटुंबिन्याः कुटुंबं मं-
दधीरयं ॥ ६६ ॥ यदसौ शास्त्रमुल्लंघ्य स्वैरचार्यतिगर्हितः । अवर्तत चिरं कालमघायुरशुचिर्मलात् ॥ ६८ ॥ तत एनं दंडपाणेः
सकाशं कृतकिल्बिषं । नेष्यामोऽकृतनिर्वेशं यत्र दंडेन शुध्यति ॥ ॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे प्रथमोध्यायः ॥
२ ॥ ॥ श्रीबादरायणिरुवाच ॥ ॥ एवं ते भगवद्दूता यमदूताभिभाषितं । उपधार्याथ तान् राजन् प्रत्याहुर्नयकोविदाः ॥ १ ॥ विष्णु-
दूता ऊचुः ॥ ॥ अहो कष्टं धर्मदृशामधर्मः स्पृशते सभां । यत्रादंड्येष्वपापेषु दंडो यैर्ध्रियते वृथा ॥ २ ॥ प्रजानां पितरो ये च शास्ता-
रः साधवः समाः । यदि स्यात्तेषु वैषम्यं कं यांति शरणं प्रजाः ॥ ३ ॥ यद्यदाचरति श्रेयानितरस्तत्तदीहते । स यत्प्रमाणं कुरुते लो-
कस्तदनुवर्त्तते ॥ ४ ॥ यस्यांके शिर आधाय लोकः स्वपिति निर्वृतः । स्वयं धर्ममधर्मं वा न हि वेद यथा पशुः ॥ ५ ॥ स कथं न्यर्पितात्मा-
नं कृतमैत्रमचेतनं । विस्रंभणीयो भूतानां सघृणो द्रोग्धुमर्हति ॥ ६ ॥ ॥

६

दाः न्यायनिपुणाः ॥ धर्मदृशां सभां अधर्मः स्पृशतीति दाहा यत्र सभायां यैर्धर्मदर्शिभिः तेषां तां सभां पितरः । पितृवत्पालकाः शास्तारः अनुशिक्षकाः वैषम्य-
मदंड्यदंडनं ॥ ३ ॥ एतत्प्रवर्तितमधर्ममन्योपि करिष्यतीति महत्कष्टं भूदित्याहुः यद्यदिति श्रेयानुश्रेष्ठः ॥ विश्वासस्थानादपीत्याहुः ॥ यस्येति द्वाभ्यां
निर्वृतो निश्चिंतः विश्वासेनेर्पितरामर्पित आत्मा येन तं विस्रंभणीयः विश्वसनीयः सघृणः सदयः ॥ ६ ॥

नच स्वपापिनो नियहे किमित्याक्रोशः क्रियते तत्राह अयं हीति यद्यस्माद्विवशोपि हरेर्नाम व्याजहार उच्चारितवान् न केवलं प्रायश्चित्तमात्रं हरेर्नाम अपितु अस्य
यनं मोक्षसाधनमपि। सकृदुच्चरितं येन हरिरित्यक्षरद्वयं बद्धः परिकरस्तेन मोक्षाय गमनं प्रतीति स्मृतेः॥ ७ ॥ ननु कर्मसाद्गुण्यकरं हरेर्नामेति द्युक्तं यस्मा
त्वाच नामोक्त्या तपोयज्ञक्रियादिषु। न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतमित्यादिवचनात् स्वातंत्र्येण त्वयं घनिवर्तकं हरेर्नाम कथं स्यात्तत्राह। एतेनैवे
ति अघोनः अघवतः मघवत्त्वशरदूपं। यतत्र आ इति छेदः। आइषदात्तास मात्रेवत्तु रुक्तरयन्नाम जगाद एतेनैव केवलेन न च तु रुक्तरमित्यनेनाधिक्यं
च दर्शितं। कथं जगाद नारायणआयाह्यागच्छ इत्येवं विक्रोशरूपेण उच्चारणेन। अयं लावः कर्मांगत्वेपि हरिनाम्नः स्वादिरत्वादिवत्संयोगपृथक्त्वेन स

अयं हि कृतनिर्वेशो जन्मकोट्यंहसामपि। यद्व्याजहार विवशो नाम स्वस्त्ययनं हरेः॥ ७ ॥ एतेनैव ह्यघो
नोऽस्य कृतं स्यादघनिष्कृतं। यदा नारायणायेति जगाद चतुरक्षरं॥ ८ ॥

वप्रायश्चित्तार्थत्वं युक्तमेवात यहि विवशोनापि यज्ञाह्निकीर्त्तिसर्वपातकैः प्रमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिवेत्यादिलिंगः प्रायश्चित्तावत्सहस्रशो नाम्नातं
त्यमवगम्यते। न चैते अर्थवादा इति शंकनीयं विधिशेषत्वाभावात्। न च विध्यश्रवणादन्यशेषता कल्पनीया यदाग्नेयोऽष्टाकपालो भवतीत्यादिवदश्रुत
र्थत्वेन विधिकल्पनोपपत्तेः। मंत्रेषु च मर्ता अमर्त्यस्य ते भूरि नाम मनामहे विप्रासो जातवेदसः आस्य जानंतो नाम चिद्विविक्तन महस्ते विष्णो सुमतिं
सजामहे इत्यादिषु नाम्नस्तपोदानादिसर्वधर्माधिक्यमवगम्यते। उपपादितं च मंत्रार्थवादानामपि स्वार्थे प्रामाण्यं देवताधिकरणे तस्मान्नारा
यणनामाभासमात्रेणैव सर्वाघनिष्कृतं कृतं स्यादिति॥ ॥ रामाय नमः॥ ॥

नादन्नाद्यादि

द्वादिकोटिसिरपानवरी ९

सा.ष.

७

ननु पापानां महत्तारतम्येन महापातकानां सहस्रशश्च वर्त्तिता। नां द्वादशाब्दानां कथमिदमेकमेव प्रायश्चित्तं स्यात् तत्राह स्तेन इति द्वाभ्यां॥ ९॥ सुनिष्कृतं श्रेष्ठं प्रायश्चित्तमिदमेव। तत्र हेतुः। यतो नामव्याहरणात् तद्विषया नामोच्चारकपुरुषविषया मदीयोऽयं मया सर्वतो रक्षणीय इति विष्णोर्मतिर्भवति। श्रेष्ठत्वमेवोपपादयति। नेति द्वाभ्यां॥ ब्रह्मवादिभिर्मन्वादिभिरुक्तैर्व्रतादिभिर्निष्कृतैः शुद्ध्यति परं तथा न शुद्ध्यति उदाहृतैरुच्चारितैर्यथा नामपदैरित्यनेन नमामीत्यादिक्रियायोगोऽपि नापेक्षित इति दर्शितं। किंच तन्नामपदोच्चारणं उत्तमश्लोकस्य गुणानां चोपलम्भकं ज्ञापकं भवति। न तु कृच्छ्रचान्द्रायणादिवत्पापनिवृत्तिमात्रोपपत्तीणमीत्यर्थः॥ १२॥ नैकांतिकं नात्यंत

स्तेनः सुरापो मित्रध्रुग्ब्रह्महा गुरुतल्पगः। स्त्रीराजपितृगोहंता ये च पातकिनोऽपरे॥ सर्वेषामप्यघवतामिदमेव सुनिष्कृतं। नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः॥ १०॥ न निष्कृतैरुदितैर्ब्रह्मवादिभिस्तथा विशुद्ध्यत्यघवान्व्रतादिभिः। यथा हरेर्नामपदैरुदाहृतैस्तदुत्तमश्लोकगुणोपलम्भकं॥ ११॥ नैकांतिकं॥ ११॥ नैकांतिकं तद्धि कृतेऽपि निष्कृते मनः पुनर्धावति चेदसत्पथे। तत्कर्मनिर्हारमभीप्सतां हरेर्गुणानुवादः खलु सत्त्वभावनः॥ १२॥ अथैनं मापनयत कृताशेषाघनिष्कृतं। यदसौ भगवन्नाम म्रियमाणः समग्रहीत॥ १३॥ ॥

शोधकं। तन्निष्कृतं यस्मिन्कृतेऽपि असत्पथे। पापमार्गे मनो धावति चेत्कर्मणां पापानां निर्हारमात्यंतिकं नाशमभीप्सतां हरेर्गुणानुवादः प्रायश्चित्तं यतो सो खलु सत्त्वभावनः चित्तशोधकः। अथ तस्मादेनं मापनयत कृतं समस्तानामघानां निष्कृतं येन यद्यस्मात्समग्रहीत। संपूर्णमुच्चारितवान्। नामैकदेशेनापि फलमिति भावः। प म्रियमाण इत्यनेन न पुनः प्राणांतरासंभव उक्तः। न तु तत्कालत्वमेव विवक्षितं। तदानीं कृच्छ्रादिविधिवन्नामोच्चारणविधेरप्यसंभवात्। न च विधिं विना कथं तदा नामोच्चारणं पापहरमिति प्रमाणमस्ति॥ १३॥ ॥ रामाय नमः॥ ॥ श्रीरामचंद्राय नमः॥ ॥

७

व

नन्वयं पुत्रनामाग्रहीन्न तु भगवन्नाम तत्राह । सांकेत्यं पुत्रादौ संकेतितं पारिहास्यं परिहासेन कृतं स्तोभो गीतालापपूरणार्थः कृतं हेलनं किंचित् विलुप्तनेति सावज्ञमपि
वैकुंठनामोच्चारणं १३। ननु नायं संकल्पपूर्वकं वैकुंठनामाग्रहीत् । किं तु पुत्रस्नेहपरवशः सन् तत्राह । पतित इति । अवशेनापि यो हरिरित्याह । स यात
नां नार्हति प्रमाणिनित्यनेनेन नात्र वर्णाश्रमादिनियम इत्युक्तं । अवशत्वमेवाह । पतितः प्रासादादिभ्यः स्खलितो मार्गे ॥ भग्नः भग्नगात्रः संदष्टः सर्पादिभिः त

सांकेत्यं पारिहास्यं वा स्तोभं हेलनमेव वा । वैकुंठनामग्रहणमशेषाघहरं विदुः ॥ १३ ॥ पतितः स्खलितो भग्नः
संदष्टः तप्त आहतः । हरिरित्यवशेनाह पुमान्नार्हति यातनां १४ ॥ गुरूणां च लघूनां च गुरूणि च लघूनि च । प्रा
यश्चित्तानि पापानां ज्ञात्वोक्तानि महर्षिभिः ॥ १५ ॥

प्तो ज्वरादिना आहतो दंडादिना ॥ १४ ॥ ननु महतः पापस्य महदेव प्रायश्चित्तं युक्तं नत्वल्पं नामग्रहणमात्रं । पापतारतम्येन कृच्छ्रादितारतम्यवत्
तत्राह । गुर्वल्पानां गुरूणि पापानां गुरूणि प्रायश्चित्तानि लघूनां च लघूनि तारतम्यं ज्ञात्वा मन्वादिभिरुक्तानि अतस्तत्र तथैव व्यवस्था । हरिनाम्नस्तु ने
यं व्यवस्थोक्ता विष्णोः स्मरणमात्रेण मुच्यते सर्वपातकैरिति वचनात् । न च सुराबिंदुपानेन महापातकात्तु स्मरणवन्नाम्नः स्मृत्या प्रायश्चित्तत्वस्मरण
स्यायमतिसारः १५ राम ॥ ॥

रा॰ष॰

८

किंच तैस्तपोदानादिभिस्तानि पापान्येव क्षयं तेन शंसंति। अथ मर्मजातं मलिनं कृतं सपापकर्तृ हृदयं यद्धा तेषाम घानां हृदयं हृद्गतं सूक्ष्मरूपं संस्कारारव्यं न शुध्यति तदपीशांघ्रि सेवया कीर्तनादिना शुध्यतीत्यर्थः। अयं भावः महांत्यपि पापानि सकृदुच्चारितेन भगवन्नाम्ना नश्यंति। सकृत्प्रवर्तितेन दीपेनेव गाढध्वांतानि। तदा हत्या पापांतरस्यानुत्पत्तिः। दीपधारणेन स्वतमोंतरस्य ततश्च वासनाक्षयात् हृदयशुद्धिः एतदर्थमेव तत्र तत्र हरिविधानं पापक्षयश्च स्वतः। स्मरंतातमहर्निशमित्यादि श्रुतं देवात्राप्यु रंगरणानुवादः खलु सत्वलाघवनः। तदपीशांघ्रिसेवयेति च। अतोस्य हरिनाम्नैव सर्वपापक्षयः। वासनाक्षयस्तु महापुरुषदर्शनादिभिरिति २६ तथापि पापं

यत्तद्‍

तैस्तान्यघानि पूयंते तपोदानजपादिभिः। नाधर्मजं तद्धृदयं तदपीशांघ्रिसेवया २६ अज्ञानादथवा ज्ञानादुत्तमश्लोकनाम यत्। संकीर्तितमघं पुंसो दहेदेधो यथानलः। २७ यथागदं वीर्यतममुपयुक्तं यदृच्छया। अजानतोप्यात्मगुणं कुर्यान्मंत्रोप्युदाहृतः राम

श्रीरामाय नमः॥ ॥

यश्चित्तमिदमिमिति ज्ञात्वा नोच्चरितमिति चेत्तत्राहुः अज्ञानादिति बालकेनाज्ञानादपि प्रक्षिप्तोग्निर्यथा काष्ठराशिं दहतीति तद्वत् २७ न चैवमपि पर्षद्भ्यदिष्टं श्रद्धाहीनं च कथं प्रायश्चित्तं स्यात्तत्राहुः॥ यथेति। अगदमौषधं वीर्यवत्तममिति विक्रव्ये वीर्यतममिति युक्तं। यदृच्छया श्रद्धाहीनमुपयुक्तं तच्चितं पर्षन्मुखेन नोपदिष्टं श्रद्धाहीन.......चित्तं पर्षन्मुखेन नोपदिष्टमपि स्वगुणमारोग्यं कुर्यात्तद्वन्मंत्रोपि नाम्नात्मकः स्वकार्यं कुर्यादेव न हि वस्तुशक्तिः श्रद्धादिकमपेक्षत इत्यर्थः॥ तदुक्तं विष्णुधर्मेषु। हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः। अनिच्छयापि संस्पृष्टो दहत्येव हि पावक इति॥ १८

मा।

...रनादज्ञानतो २

८

तंविप्रंअस्मस्तुवन्नोमोचयामासुः १९ ॥ प्रत्युदितानिराकृताःयात्वायमराजायप्रयथावत्कथयामासुः २० दर्शनिनोत्सवोयस्याविवदुवंमन्निच्छंतंज्ञात्वा
३ए २२ त्रैविद्यंवेदत्रयंप्रतिपाद्यंत्रिगुणाश्रयंयमदूतानांधर्म्मकृत्सह्कृतानांचभागवतंभगवत्प्रणीतंशुद्धिंनिर्गुणंधर्म्ममाकर्ण्यंपितयोज्यंभक्तिमानासीदितत्र

श्रीशुकउवाच ॥ ॥ तएवंसुविनिर्णीयधर्म्मंभागवतंदूपातंयाम्यपाशान्निर्मुच्यविप्रंमृत्योरमूमुचन् ॥ १९ ॥ इतिप्रत्युदितायाम्या
दूतायात्वायमांतिकेयमराज्ञेयथासर्वमाचचक्षुररिंदम २० ॥ यमपाशाद्विनिर्मुक्तोगतभीःप्रकृतिंगतःववंदेशिरसाविष्णोःकिं
करान्दर्शनोत्सवः ॥ २१ ॥ तंविवक्षमालिप्रेत्यमहापुरुषकिंकराःसहसापश्यतस्तस्यतत्रैवांतर्दधेनद्य ॥ २२ ॥ अजामिलोप्यथा तत्रांतर्दधिरेनद्या
कर्ण्यदूतानांयमकृष्णयोःधर्म्मंभागवतंशुद्धंत्रैविद्यंचगुणाश्रयं ॥ २३ ॥ भक्तिमान्भगवत्याशुमहात्म्यश्रवणाद्धरेःअनुतापो
महानासीत्स्मरतोऽशुभमात्मनः ॥ २४ ॥ अहोमेपरमंकष्टमभूदविजितात्मनःयेनविप्लावितंब्रह्मवृषल्यांजायतात्मना ॥ २५ ॥
टीक धिङ्मांविगर्हितंसद्भिर्दुष्कृतंकुलकज्जलं।हित्वाबालांसतींयोहंसुरापीमसतीमगां ॥ २६ ॥ वृद्धावनाथौपितरौनान्यबंधूतपस्विनौ ॥ अ
होमयाधुनात्यक्तावकृतज्ञेननीचवत् ॥ २७ ॥ सोहंव्यक्तंपतिष्यामिनरकेभृशदारुणेधर्म्मघ्नाःकामिनोयत्रविंदंतियमयात
नाः ॥ २८ ॥ राम ॥ ॥

स्यानुषंगः २३ ॥ अनुतापंप्रपंचयति ॥ अहोइतिचतुर्भिःयेनआत्मनामयावृषल्यांशूद्रतयाजायमानेनब्रह्मब्राह्मणजातिःविप्लावितंनाशितं २४
दुष्कृतंदोषकर्त्तारंकुलस्यकज्जलंकं ॥ २५ ॥ नान्योबंधुःशुश्रूषादिर्ययोःतपस्विनोसंतप्तौअधुनात्यक्तावेव ॥ २६ ॥ राम ॥ ॥

कलि

भा॰ष॰

९

इदानींतस्यविमर्शपूर्वकंमोहं(?)ममाह।किमिदमित्यष्टभिः।साक्षात्त्वत्यदृष्टमिहज्ञायतेवदृष्टांनकुमद्भुतेविकर्षयन्।येचमांव्यमोचयन्तेचक्वगताःपु-
द्यप्यहमस्मिन्जन्मनिदुर्भगःपापीयान्।अथापिजन्मांतरेनूनंपुण्यवानित्याह।विबुधोत्तमदर्शनइतिनिमित्तेसप्तमी।तेषांदर्शनार्थंपूर्वंएमं

किमिदंस्वप्नआहोस्वित्साक्षाद्दृष्टमिहाद्भुतं।क्वयाताअद्यतेयेमांव्यकर्षन्पाशपाणयः॥२९॥अथतेक्वगताःसिद्धा-
श्चत्वारश्चारुदर्शनाः।व्यमोचयन्नीयमानंबद्ध्वापाशैरधोभुवः॥३०॥अथापिमेदुर्भगस्यविबुधोत्तमदर्शने।भवितव्यंमंग-
लेनयेनात्मामेप्रसीदति॥३१॥अन्यथाम्रियमाणस्यनाशुचेर्वृषलीपतेः।वैकुंठनामग्रहणंजिह्वावक्तुमिहार्हति॥३२॥क्वचा-
हंकितवःपापोब्रह्मघ्नोनिरपत्रपः।क्वचनारायणेत्येतद्भगवन्नाममंगलं॥३३॥सोहंतथायतिष्यामियतचित्तेंद्रियानिलः।
यथानभूयआत्मानमंधेतमसिमज्जये॥३४॥विमुच्यतमिमंबंधमविद्याकामकर्मजं।सर्वभूतसुहृच्छांतोमैत्रःकरुण-
आत्मवान्॥३५॥मोचयेग्रस्तमात्मानंयोषिन्मय्यात्ममायया।विक्रीडितोययैवाहंक्रीडामृगइवाधमः॥३६॥ममाहमिति
देहादौहित्वाऽमिथ्यार्थधीर्मतिं।धास्येमनोभगवतिशुद्धंतत्कीर्तनादिभिः॥३७॥इतिजातसुनिर्वेदःक्षणसंगेनसाधुषु।
गंगाद्वारमुपेयायमुक्तसर्वानुबंधनः॥३८॥ ॥

गलेनमहतापुण्येनभवितव्यंयेनदर्शनेन।अन्यथापूर्वंपुण्यंविनाकथंभूतंवैकुंठनामग्रहणंतवशीक्रियतेनेनेतिग्रहणंब्रह्मघ्नःविप्रावनाशकः
अमिथ्याभूतेऽर्थेधीर्यस्यतथाभूतःसन्देहादौमेहादौममाहमितिमतिंहित्वाधास्येमुक्तंसर्वमनुबंधनंपुत्रादिस्नेहोयेनसः॥ राम॥ ॥

भा

९

ह१

प्रत्याहृतइंद्रियग्रामोयेनगुणेभ्योदेहेंद्रियादिभ्यः आत्मानंविविंचन्पृथग्विशोध्य आत्मसमाधिनाचित्तैकाग्र्येणभगवतोधाम्निरूपेतस्मिन्भगवद्धाम्निउपारतानिस्थूलार्थ
र्यस्यसः। तस्मिन्कालेऽद्राक्षीदितिवापुरः पुरतः। ततश्चप्रागुपलब्धानेवतानुपलभ्यप्रत्यभिज्ञायववंदे। उपसंहरतिएवमितिद्वाभ्यां। विप्लाविताः सर्वध

बादरायणिरुवाच ॥ ॥ सतस्मिन्देवसदनआसीनोयोगमास्थितः। प्रत्याहृतेंद्रियग्रामोयुयोजमनआत्मनि ॥ ३९ ॥ ततोगुणेभ्यआत्मानं
वियुज्यात्मसमाधिना। युयुजेभगवद्धाम्निब्रह्मण्यनुभवात्मनि ॥ ४० ॥ यर्ह्युपारतधीस्तस्मिन्नद्राक्षीत्पुरुषान्पुरः। उपलभ्योपलब्धा
न्पूर्ववद्वंदेशिरसाद्विजः ॥ ४१ ॥ हित्वाकलेवरंतीर्थेगंगायांदर्शनादनु। सद्यः स्वरूपंजगृहेभगवत्पार्श्ववर्तिनां ॥ ४२ ॥ साकंविहायसाविप्रो
महापुरुषकिंकरैः। हैमंविमानमारुह्यययौयत्रश्रियः पतिः ॥ ४३ ॥ एवंसविप्लावितसर्वधर्मादास्याः पतिः पतितोगर्ह्यकर्मणा। निपा
त्यमानोनिरयेहतव्रतः सद्योविमुक्तोभगवन्नामगृह्णन् ॥ ४४ ॥ नातः परंकर्मनिबंधकृंतनंमुमुक्षतांतीर्थपदानुकीर्तनात्। नयत्पुनः
कर्मसुसज्जतेमनोरजस्तमोभ्यांकलिलंततोन्यथा ॥ ४५ ॥ यएवंपरमंगुह्यमितिहासमघापहं। शृणुयाच्छ्रद्धयायुक्तोयश्चभक्त्या
नुकीर्तयेत् ॥ ४६ ॥ ॥

मर्यिनाहतंव्रतंस्वदारनियमादियस्य। कर्मनिबंधस्यपापमूलस्यकृंतनंछेदकमतः परंनास्ति। कस्मात्तीर्थपदस्यानुकीर्तनात्। तत्रहेतुः यंयतो
नुकीर्तना ... दन्यथाप्रायश्चित्तांतरैः रजस्तमोभ्यांकलिलंमलिनमेवावतिष्ठतीतियत्तन्मनः ॥ ॥ राम ॥ ॥

पा ३

भा॰ष॰
१०

नचेद्विनोलवतीत्। म्रियमाणः अवशत्वेन श्रद्धाविहीनोपि ॥४८॥ ॥ षष्ठे द्वितीयः ॥ ॥ तृतीये तु यमेनापि वैष्णवोत्कर्षवर्णनैः। सांत्वयित्वा स्वदूतांस्ते वैष्णवे विकरी कृताः ॥ १ विष्णुदूतैर्निर्णितं शास्त्रार्थं यममुखेन द्रढयितुं तृतीयाध्यायारंभः। तत्र यदुक्तं यमराज्ञे तथा सर्वमावदन्निति ततः। किं तत्र तद्वमिति द्रष्टुमिति। निशम्येति। मुरारेर्नैदेशिकैः किंकरैः स्वैर्विहिता अत एव हताज्ञा यस्य यस्य वशवर्ती अयं जनः सोपि ताम्प्रति किमाह। २ यत्यास्य यम

नैवसनरकं यातिनेक्षितोभग्नकिंकरैः यद्यप्यमंगलोमर्त्योविष्णुलोकेमहीयते ४७ म्रियमाणोहरेर्नामगृणन्पुत्रोपचारितं अजामिलो
प्यगाद्धामकिंपुनः श्रद्धयागृणन् ॥ ४८ ॥ इतिश्रीभागवतेमहापुराणेषष्ठस्कंधेद्वितीयोध्यायः ॥ श्रीराजोवाच ॥ निशम्यदेवः
स्वभटोपवर्णितंप्रत्याहकिंतानपिधर्मराजः। एवंहताज्ञोविहतान्मुरारेर्नैदेशिकैर्यस्यवशेजनोयं १ ॥ यमस्यदेवस्यनदंडभं
गः कुतश्चनर्षेश्रुतपूर्वआसीत्। एतन्मुनेवृश्चतिलोकसंशयंनहित्वदन्यइतिमेविनिश्चितं २ ॥ श्रीशुक उवाच ॥ भगवत्पु
रुषैराजन्याम्याः प्रतिहतोद्यमाः। पतिंविज्ञापयामासुर्यमंसंयमनीपतिं ३ ॥ यमदूता ऊचुः ॥ कतिसंतीहशास्तारोजीवलो
कस्यवैप्रभो। त्रैविध्यंकुर्वतः कर्मफलाभिव्यक्तिहेतवः ४ ॥ राम ॥

तदित्याहायमस्येति। हे ऋषे यमस्य दंडभंगः कुतश्चन कस्माद्विदपि श्रुतपूर्वो नासीत्। एतत् एतस्मिन्नर्थे यद्ज्ञानं श्रुतपूर्वः एतत् यमदूतनिराकरणं चासीत्। अतः सर्वस्यापि लोकस्य संशयो वर्तते तं च त्वत्तोन्यो मच्छिनत्तीति मे निश्चितं। अतः कथयेति शेषः। ३॥ भगवत्पुरुषैः प्रतिहत उद्यमो येषां ते याम्याः पुरुषाः ३ कति संतीत्याद्येकोनकिः॥ त्रैविध्यात् त्रिविधं स्वार्थे ष्यञ् यद्वा त्रैविध्यं यथा भवति तथा कर्म कुर्वतः। तदर्थं च कर्मफलस्याभिव्यक्तिहेतवः कति संतीति ४ ॥ राम ॥

१०

महोतुक

संतु वहवः को बाधस्तत्राह । यदीति । सुखं दुःखं अस्तु तं सुखं तेषां विशति पत्नीतेउ भे एकस्य स्यात् । तां न कस्यापि परस्परविरोधेनोत्तयोरपि घातितं घातो एकस्य वा न स्यात् तौ एकः सुखं कर्तुमिच्छति दुःखं चान्यः एकमत्ये च तयोः परस्परकार्यातु मोदने नोत्तयोरपि प्राप्तिरेकस्य वा तेउ भे अपि न स्यातामित्यर्थः ॥ ५ ॥ न नु वहूनां कर्मिणां व्यवस्थापाय वहवः शास्तारो भवंतु ॥ तथा सति नायं दोषः स्यात् तत्राह । वहूनां कर्मिणां व्यवस्थया शास्तृ बहुत्वे शास्तृत्वं स्यात् ॥ घटेत ॥ किंतु तदा यास्वेशास्तरिखस्थं

यदि स्युर्बहवो लोके शास्तारो दंडधारिणः ॥ कस्य स्यात् तां न वा कस्य स्वस्य त्वा कृतमेव वा ॥ ५ ॥ किं तु शास्तृबहुत्वे स्याद्बहूनामिह कर्मिणां ॥ शास्तृत्वमुपचारो हि यथा मंडलवर्त्तिनां ॥ ६ ॥ अतस्त्वमेकोऽस्ता नामीश्वराणामधीश्वरः ॥ शास्ता दंडधरो हर्त्ता शुभाशुभविवेचनः ॥ ७ ॥ तेनाविहितो दंडो न लोके वर्त्तते धुना ॥ तत्रैव निरंकुशे सिद्धे राज्ञा ते विप्रलंभिता ॥ ८ ॥ नीयमानं त्वया देश त्वत्कालिर्यातना गृहात् यमो वयं न्यायतः किं न छित्त्वा पाशान्प्रसह्यते ॥ ९ ॥ तां न वेदितुमिच्छामो यदि नो मन्यसे क्षमं ॥ नारायणेत्यसिहितं मोनैरित्याय युर्डुतं ॥ १० ॥

शास्तृत्वं तदेकदेशे उपचारमात्रमेव स्यात् । यथा चक्रवर्त्तिन एव मुख्यं शास्तृत्वं मंडलवर्त्तिना मुपचारमात्रं निरंकुशत्वाभावात् ॥ ६ ॥ यस्मादेवं शास्तृबहुत्वं घटते अतस्त्वमेक एव शास्ता ॥ शुभाशुभे विविनक्तीति तथा ॥ ७ ॥ विप्रलंभिता वंचिता लंघिते त्यर्थः ॥ ८ ॥ तदेवाह ॥ नीयमानमिति ॥ ९ ॥ तेष्वेतत्कथयति नो ऽस्माकं क्षमं हितं मन्यसे ॥ अन्यथा ज्ञाननतच्छत्रदेव । ज्ञाने तवाधनर्थः स्यात् । अतर्कोहितेषां भावश्य तो नारायणामेति केवलमसिहितमात्रयं कुर्वितिवरंतः शाद्रमामता ॥

भा०ष०

११

श्री ३

संयमयतीतितथा ११ मत्तोन्योजगतस्तस्माच्चपरोधीश्वरोस्मि॥ अहंउ जंगमानामेवतत्रापिदृणामेवा॥ तत्रापिपापिनामेवा॥ तर्तिकारःसंत्रीश्चरः॥ सर्वसर्वेश्वरःकोसो॥ यच्च यस्मिञ्चविश्वमोतंप्रोतंचऊर्ध्वंतिर्यक्‌ तंउष्णुपरत्ववत्॥ यस्यत्वंशेभ्योविरुक्रंद्रहरुद्रेभ्यो॥ स्यस्थित्यादयोभवंति॥ तस्यैववशेलोकोवर्त्तते॥ नसिनसिकार्यांशोतवलीवर्दवत् १२ एतत्स्वपंचयति॥ ब्राह्मणादिनामभिर्वाचायांतिजायांतंत्पांदामन्पांजनंयोबौतिनामतिर्गःवलीवर्द्दानिव॥ तइमेजीवानामकर्मभिर्निर्बंधेर्बद्धाः॥ यस्यैव

श्रीवादरायणिरुवाच ॥ इतिदेवःस॰॰ष्टष्टःप्रजासंयमनोयमः॥ प्रीतःस्वदूतान्प्रत्याहस्मरन्पादांबुजंहरेः॥ ११ यमउवाच ॥ परोमदन्योजगतस्तस्थुषश्चओतंप्रोतंपटवद्यत्रविश्वं॥ यदंशतोस्यस्थितिजन्मनाशानस्योतवद्यस्यवशेचलोकः॥ १२ योनामभिर्वाचिजनंनिजायांबध्नातितंत्पामिवदामभिर्गाः॥ यस्मैवलिंतइमेनामकर्मनिर्बंधबद्धाश्चकितावहंति १३ अहंमहेंद्रोनिर्ऋतिःप्रचेताःसोमोग्निरीशःपवनोर्कोविरंच्यः॥ आदित्यविश्वेवसवोथसाध्यामरुद्गणारुद्रगणाःससिद्धाः॥ १४ अन्येचयेविश्वसृजोमरेशाभृग्वादयो॰॰॰॰॰रजस्तमस्काः॥ यस्येहितंनविदुःस्पृष्टमायाःसत्वप्रधानोपिकिंततोन्ये ॥ १५ ॥

श्रं

[illegible] वहंति॥ यदधीनाःकर्मकुर्वंतीत्यर्थः॥ १३ यस्यबलीलादुर्विभाव्येत्याह॥ अहमितिद्वाभ्यां॥ नस्पृष्टंरजस्तमश्चयैःईहितंअभिप्रेतंवा नविदुःस्पृष्टमायाः मायया स्पृष्टाः तत्तस्मैत्पाः॥ येनविदुरितिकिंपुनर्वक्तव्यं॥ १५ ॥

भा०

११

तन्मायामोहितत्वान्न जानंतीत्युक्तं। अविषयत्वाच्च तस्येत्याह। यमिति। गोभिरिंद्रियैर्हृदा चित्तेन न विचक्षते। न पश्यंति। यद्वा वानसुदितं यन्मनो मनुते तेत्पादिश्रुतेः। आत्मनां जीवानां आत्मानं द्रष्टारं। आकृतयो रूपाणि चक्षुर्यथा कर्मभूतं न जानंति। ततः परमाकृतीनां प्रकाशकं। न हि प्रमाता प्रमाणस्य विषय इति भावः। एवंभूतेऽपरमेश्वरो हीति पूर्वेणैव संबंधः।१६॥ स च वैवंभूतोऽन्यः परमेश्वरः। अथ नेतु रस्मान्निर्भर्त्स्य पापिनं रक्षितवंतस्ते के तानाह तस्येति। द्वाभ्यां तस्यैव रूपं गुणाः प्रभावादयः स्वभावः भक्तवाछ

यं वै न गोभिर्मनसाऽसुभिर्वा हृदा गिरा वाऽसुभृतो विचक्षते॥ आत्मानमंतर्हृदि संतमात्मनां चक्षुर्यथैवाकृतयस्ततः परं।१६॥ तस्यात्म[तं]त्रस्य हरेरधीशितुः परस्य मायाधिपतेर्महात्मनः। प्रायेण दूता इह वै मनोहराश्चरंति तद्रूपगुणस्वभावाः॥१७॥ भूतानि विष्णोः सुरपूजितानि दुर्दर्शलिंगानि महाद्भुतानि। रक्षंति तद्भक्तिमतः परेभ्यो मत्तश्च मर्त्यानथ सर्वतश्च॥१८॥ धर्मं तु साक्षाद्भगवत्प्रणीतं न वै विदुर्ऋषयो नापि देवाः॥ न सिद्धमुख्या असुरा मनुष्याः कुतश्च विद्याधरचारणादयः॥१९॥ स्वयंभूर्नारदः शंभुः कुमारः कपिलो मनुः। प्रह्लादो जनको भीष्मो बलिर्वैयासकिर्वयं।२०॥ द्वादशैते विजानीमो धर्मं भागवतं भटाः। गुह्यं विशुद्धं दुर्बोधं यं ज्ञात्वामृतमश्नुते॥ ॥

[margin: गा निरुपाधिये षांता मे]

ल्यादिर्येषां ते। विष्णोर्भूतानि भृत्याः। दुर्दर्शानि लिंगानि द्रष्टुमशक्यानि। तद्भक्तिमतः विष्णुभक्तान् परेभ्यः शत्रुभ्यः सर्वतः अग्न्यादिभ्यश्च रक्षंति।१८। ननु विष्णुभक्ताश्चेत्कथमधर्मपक्षपातं कृतवंतः॥ तदाह॥ धर्ममिति॥ ऋषयो भृग्वादयः। ननु केऽपि चेन्न जानंति तस्य सत्त्वे किं प्रमाणं॥ तत्राह स्वयंभूरिति। कुमारः सनत्कुमारो वयमिति यमः आत्मानमेव बहुमन्यमानो निर्दिशति। भटाः। गुह्यं अतींद्रियं मोहप्रशकं। विशुद्धं शुद्धांतःकरणेन ज्ञायमानं अत एव दुर्बोधं यं ज्ञात्वा अमृतं मोक्षं अश्नुते प्राप्नोति॥ ॥ ॥

[margin: र्यं] [below line: का] [below line: तर्हि२]

पि२

भा०पु०
१२
म

तमेवधर्ममाह। एतावानिति। २१। नवात्रप्रमाणं वक्तव्यं दृष्टत्वादित्याह। नामोच्चारणेति। येनैव केवलेन। ननु सकृदुच्चारितेन नामाभासेन कथं सर्वपापक्षयः स्यात्। अद्धा मन्त्रा हन्त्यादेरैवमिति विधानात्॥ तथाहि सायंप्रातर्यद्गृणन्भक्त्या दुःखग्रामाद्विमुच्यत इति। अनुदिनमिदमादरेण शृण्वन्निति। श्रवणं कीर्तनं ध्यानं हरेरद्भुतकर्मणः जन्मकर्मगुणानां च तदर्थेऽखिलचेष्टितमित्यादि यस्मिन्नेव पुराणे तत्रतत्र पठ्यते। पुराणान्तरेऽपि पापक्षयश्च भवति स्मरतां तमहर्निशमिति। अचैत्वात्तस्मात्संकीर्तनं विष्णोर्जगन्मंगलमंहसां महतामपि कौरव्य विद्ध्यैकान्तिकं निष्कृतमित्यादिना सम्यक्कीर्तनादेव मन्यते॥ किंच तथा सति किमिति मवाद

एतावानेव लोकेस्मिन्पुंसां धर्मः परः स्मृतः। भक्तियोगो भगवति तन्नामग्रहणादिभिः॥२२॥ नमोच्चारणमाहात्म्यं हरेः पश्यत पुत्रकाः। अजामिलोपि येनैव मृत्युपाशादमुच्यत॥२३॥ एतावतालमघनिर्हरणाय पुंसां संकीर्तनं भगवतो गुणकर्मनाम्नां। विक्रुश्य पुत्रमघवान्यदजामिलोपि नारायणेति म्रियमाण इयाय मुक्तिं॥ ॥ ॥

योद्वादशाक्षरी निस्मरे इत्थं तस्मादिदमनुपपन्नमिव तत्राह एतावतेति। भगवतो गुणानां कर्मणां च नाम्नां च सम्यक्कीर्तनमिति यत् एतावतांहसामघनिर्हरणाय पापक्षयमात्राय अलं उपयोगो नाधिक। अलं शब्दो वारणे। यथाहामरसिंहः अलं भूषणपर्याप्तिशक्तिवारणवाचकमिति। उपयोगमात्रमेवाह। अजामिलो महापातक्यपि नारायणेति विक्रुश्य न तु सम्यक्कीर्तयित्वा येन पुत्रं विक्रुश्य न तु हरिं। अघवान् स्थविरोपि म्रियमाणो स्वस्थचित्तोपि मुक्तिमवाप न चैव निर्हरणमात्रं अतो नामाभासेनापि सर्वपापक्षय इत्येवं तत्त्वं। आहत्तिश्रद्धादिविषयस्तु पापवासनाक्षयार्थ इत्युक्तमेकहरेर्गुणानुवादःखलु सत्वभावन इत्यत्र॥ ॥ ॥

राम
१२

गु तु

अतिविमोहिता मतिर्यस्य २

यत्तूक्तं यद्यर्थं तर्हि द्वादशाद्यादिस्मरणमिति तत्राह प्रायेणेति ॥ महाजनो मन्वादिः ॥ अयं तावत् यथामृतसंजीवनौषधिमजानंतो वैद्या रोगातिहीणाय त्रिकटुकनिंबादीनि स्मरंति ॥ तथायमस्मत्स्वभूतस्वद्वादशव्यतिरेकेणायं महाजनोऽतियुग्ममिदं ज्ञात्वा द्वादशाद्यादिस्मरंतीति ॥ किंच मायया देव्या अलं मोहितमतिरयं जनः मधुमधुरं यथा लवत्येवं पुष्पितायां प्रशस्थानीयैरर्थवादैर्मनोहरायां त्रय्यां जडीकृतातो महत्येव कर्मणि श्रद्धया युज्यमानो नाल्पे प्रवर्तते ॥ इत्थं ते हि प्राकृतस्य लोकस्य महति मंत्रादौ

भ १

मति १

प्रायेण वेद तदिदं न महाजनोऽयं देव्या विमोहितमतिर्बत मायया ऽलं त्रय्यां जडीकृतमतिर्मधुपुष्पितायां वैतानिके महति कर्मणि युज्यमानः ॥ २५ ॥ एवं विमृश्य सुधियो भगवत्यनंते सर्वात्मना विदधते खलु भावयोगं ॥ ते मे न दंडमर्हंत्यथ यद्यमीषां स्यात्पातकं तदपि हंत्युरुगायवादः ॥ २६ ॥ ते देवसिद्धपरिगीतपवित्रगाथा ये साधवः समदृशो भगवत्प्रपन्नाः ॥ तान्नोपसीदत हरेर्गदयाभिगुप्तान्नैषां वयं न च वयः प्रभवाम दंडे ॥ ॥ ॥

श्रद्धा अल्पे वा अश्रद्धा ॥ तस्मादस्य याह को नास्तीति तैर्नोक्तं ॥ यद्वा स्वाधीनश्च मिहोऽस्तीत्येतावता श्वसृगालादिनिवारणाय तं यथा न प्रयुंजते ॥ तथातितुच्छत्वात्पापस्य तन्निरसनाय परमं मंगलं हरेर्नाम स्मरंति ॥ यद्वा नाममाहात्म्यज्ञाने सर्वशुक्तिप्रसंगादिप्रेषादिरूपग्रंथविस्तरतया तु नातिप्रपंच्यते तो भावयोगं भक्तियोगं ॥ अमीषां पातकं न स्यादेव यदि स्यात्तदुरुगायस्य वादः कीर्तनं ॥ तदेवं धर्मतत्त्वं निर्णीय स्वभृत्याननुशास्तितान् इति ॥ ये भगवंतं प्रपन्नास्ते देवैः सिद्धैश्च परिगीता पवित्रगाथाः ॥ अतस्तान्नोपसीदत न तत्समीपमपि नागच्छत वयश्च कालो न प्रभवति ॥ ॥ ॥

केत हिर्दंडार्थमानेयाइत्यत्राह। तानिति द्वाभ्यां। असतः दुष्टान् तानेवाह। मुकुंदपादारविंदयोर्यो मकरंदः रूपो यो रसस्तस्माद्विमुखान् कथंभूतात् निष्किंचनैरजस्रं जुष्टात् तेषां। ज्ञापकमाह। निरयवर्त्मनि स्वधर्म्मेऽपि गेहे च बद्धा तृष्णा येषां तान्। किंच जिह्वेत्यादि। येषां जिह्वेत्यादि चत्वारः। न कृतं विष्णुकृत्यं भगवद्भजनं यैः॥ २८॥ भगवंतं

तानानयध्वमसतो विमुखान् मुकुंदपादारविंदमकरंदरजादजस्रं॥ निष्किंचनैः परमहंसकुलैरसंगैर्जुष्टाद्गृहे निरयवर्त्मनि बद्धतृष्णान्॥ जिह्वा न वक्ति भगवद्गुणनामधेयं चेतश्च न स्मरति तच्चरणारविंदं। कृष्णाय नो नमति यच्छिर एकदापि तानानयध्वमसतोऽकृतविष्णुकृत्यान्। तत्क्षम्यतां स भगवान् पुरुषः पुराणो नारायणः स्वपुरुषैर्यदसत्कृतं नः। स्वानामहो न विदुषां रचितांजलीनां क्षांतिर्गरीयसि नमः पुरुषाय भूम्ने॥ ॥श्रीशुक उवाच॥ ॥तस्मात्संकीर्त्तनं विष्णोर्जगन्मंगलमंहसां॥ महतामपि कौरव्य विद्ध्यैकांतिकनिष्कृतं॥ शृण्वतां गृणतां वीर्याण्युद्दामानि हरेर्मुहुः। यथा सुजातया भक्त्या शुद्ध्येन्नात्मा व्रतादिभिः॥

मापयति। तदिति। अयं तावद्भगवतः स्वपुरुषैरस्मदीयं चेन स्थितेऽस्वीयैरेव पुरुषैर्यद्यस्मादसदन्याय्यं कृतं तत्तस्मात्त्वयमेव क्षम्यतां महतां। स्वानां स्वीयानां नः अविदुषां अज्ञानां। अहो गरीयसि त्वां क्षांतिरिति युक्तैव। महद्‌इति पाठे स्वीयानां माहात्म्यमविदुषां नः क्षमां करोत्वित्यर्थः। तस्मादिति पादित्रयकोक्तेः जगतोऽपि मंगलरूपमैकांतिकत्वमेवाह। शृण्वतामिति व्रतादिभिस्तथा न शुद्ध्येत॥ ॥

पत्तदुपपादयति॥ क्रूष्मांघ्रिपद्मयोर्मधुलेढि आस्वादयतीति तथा। मधुलिट्त्वेनविघृष्टायेमायागुणा विषयास्तेषु पुनर्नसज्जते। अन्यस्मात्तन्मधास्वादरहितः॥ अत
एवकामाभिसृतः स नु आत्मनोरजः पापंप्रमार्ष्टुमपि कर्मैव प्रायश्चित्तरूपमीहेत। यतः कर्मणः पुनरपि रजःपापं स्यादेवकुंजरशौचवत्॥ सत्व सोधकत्वाभावात् नैवविस्मितधि
योवभूवुः किंतु मत्तयत्नक्रामित्येयचमेनिरे।। ततः प्रभृतिप्रशंकमानाः अस्मानेवैषहन्यादितिशंकांवहंतः। तंदुष्टमपि विस्पृतिस्म। पाठांतरेतु विस्मितधियोजाताश्चेचतत्र

स्तंग

क्रूष्मांघ्रिपद्ममधुलिङ्नतुनर्विसृष्टमायागुणेषुरमतेवृजिनावहेषु॥ अन्यस्तुकामहत आत्मरजः प्रमार्ष्टुमीहेतकर्मयतएवरजः
पुनः स्यात्॥ इत्थंस्वभ[illegible]दितं भगवन्महित्वं संस्मृत्य विस्मितधियो यमकिंकरास्ते। नैवाच्युताश्रयजनंप्रतिशंकमाना द्रष्टुं च बिभ्यति
ततः प्रभृतिस्मराजन्॥ इतिहासमिमं गुह्यं भगवान्कुंभसंभवः। कथयामासमलय आसीनोहरिमर्चयन्॥ ॥इति श्रीभागवते महापुराणे ष
ष्ठस्कंधे तृतीयोध्यायः॥ ॥राजोवाच॥ ॥देवासुरनृणांसर्गोनागानांमृगपक्षिणां। सामासिकस्त्वयाप्रोक्तोयस्तुस्वायंभुवेंतरे॥ ॥

दृतिविस्पतिस्मेत्यर्थः॥ कुंभसंभवो अगस्त्योमलयेपर्वते आसीनोऽर्चयन्सोहरिमर्चयन्नुपुनः पुनः विश्वासार्थं हरेः पादौ स्पृशन्नित्यर्थः॥ षष्ठे तृतीयः॥ चतुर्थे दिविसृष्टिर्विस्त
रूपजन्मविवक्षया। प्राचेतसः सुतदक्षस्य वंशस्तावन्नतन्यते। चतुर्थेतु प्रजासृष्ट्यै दक्षेणाराधनं हरेः। तपसा हंसगुह्याख्यस्तोत्रेणाथ निरूप्यते॥ प्रकारांतु प्रसक्तेन स्वायंभु
वमुतावयोनामप्रतावमाकर्ण्य विशाख्यासंतुभ्यन्ते देवासुरेतिद्वाभ्यां। सामासिकः संक्षिप्तोऽयः प्रोक्तः तृतीयस्कंधे॥ ॥ ॥

व१

भा०ष०
२४

व्यासं विस्तारं ते त्वत्तः श्रोतुं । यया शक्त्या यथा ससर्ज तां शक्तिं तं च प्रकारं ज्ञातुमिच्छामि ॥ अनुसर्गमित्युक्तं सर्गं हित्वा दक्षरूपेण ससर्जेति वक्तुं दक्षजन्मप्रकारमाह । यदेति ॥ प्रा
चीनबर्हिषः पुत्राः यदा समुद्रमध्यादुन्मग्ना निर्गताः तदा गां पृथ्वीं द्रुमैर्वृतां ददृशुः ॥ नारदोपदेशतः प्राचीनबर्हिषि निर्गते पश्चाद्राजके सति क्ष्मापालनाभावात् तपसादी

तस्यैव व्यासमिच्छामि ज्ञातुं ते भगवन्यथा ॥ अनुसर्गं यया शक्त्या ससर्ज भगवान्परः ॥ सूत उवाच ॥ ॥ इति संप्रश्नमाकर्ण्य राजर्षेर्बादराय
णिः ॥ प्रतिनंद्य महायोगी जगाद मुनिसत्तम ॥ ॥ श्रीशुक उवाच ॥ ॥ यदा प्रचेतसः पुत्रा दश प्राचीनबर्हिषः ॥ समुद्रमध्यादुन्मग्ना ददृशुर्गां
द्रुमैर्वृतां ॥ द्रुमेभ्यः क्रुध्यमानास्ते तपोदीपितमन्यवः ॥ मुखतो वायुमग्निं च ससृजुस्तद्दिधक्षया ॥ ताभ्यां निर्दह्यमानांस्तानुपलभ्य कुरूद्वह ।
राजोवाच महान्सोमो मन्युं प्रशमयन्निव ॥ मा द्रुमेभ्यो महाभागा दीनेभ्यो द्रोग्धुमर्हथ । विवर्धयिषवो यूयं प्रजानां पतयः स्मृताः ॥ अहो प्रजाप
तिपतिर्भगवान्हरिरव्ययः ॥ वनस्पतीनोषधीश्च ससर्जोर्जमिषं विभुः ॥ अन्नं चराणामचरा ह्यपदः पादचारिणां । अहस्ता हस्तयुक्तानां द्विप
दां च चतुष्पदः ॥ यूयं च पित्रान्वादिष्टा देवदेवेन चानघाः ॥ प्रजासर्गाय हि कथं वृक्षान्निर्दग्धुमर्हथ ॥ आतिष्ठत सतां मार्गं कोपं यच्छत दीपितं । पि
त्रा पितामहेनापि जुष्टं वः प्रपितामहैः ॥ ॥ ॥ ॥

नवा२

राम
२४

दुमार

पितो मन्युः येषां तेषां द्रुमाणां दग्धुमिच्छया तां तौ वाय्वग्नी ताभ्यां दह्यमानांस्तान् वनस्पतीनां राजा सोम उवाच । मा द्रुमेभ्य इति त्रिभिः । हे महाभागाः विशेषेण वर्धयि
तुमिच्छवः प्रजापतीनां तत्पतिः स्वभोग्यदाहोऽनुचित इत्याह । अहो इति त्रिभिः । ऊर्जं मद्यमिषमन्नं अतः आतिष्ठत । आश्रयत सतां मार्गमुपशमं पित्रादिभिर्जुष्टं ॥ ॥

प्रजानां प्रजापतिरेव बंधुरतः स्वजीविकानाशो न कर्तव्य इति दृष्टांतपंचकेनाह । तोकानां बालानां मातापितरौ । अज्ञानां ज्ञानदो बुधः सुहृत् । ईश्वराधिष्ठानत्वाच्च भूत-
द्रोहो न युक्त इत्याह । अंतर्देहेष्विति । वः युष्माभिः । आकाशात् देहे समुत्पतितं आकस्मिकमित्यर्थः । आत्मविचारेण नियच्छेत् । खिलानां शेषाणां वः युष्माकं च शिवमस्तु ॥

प्रति:१

तोकानां पितरौ बंधू दृशः पक्ष्म स्त्रियाः पतिः । पतिः प्रजानां भिक्षूणां गृह्यज्ञानां बुधः सुहृत् ॥ अंतर्देहेषु भूतानामात्मास्ते हरिरीश्वरः ॥ सर्वं तद्धिष्ण्यमीक्ष-
ध्वमेवं वस्तोषितो ह्यसौ ॥ यः समुत्पतितं देह आकाशान्मन्युमुल्बणं । आत्मजिज्ञासया यच्छेत्स गुणानतिवर्त्तते ॥ अलं दग्धैर्द्रुमैर्दीनैः खिलानां शिवम-
स्तु वः ॥ वार्क्षी ह्येषा वरा कन्या पत्नीत्वे प्रतिगृह्यतां ॥ इत्यामंत्र्य वरारोहां कन्यामाप्सरसीं नृप । सोमो राजा ययौ दत्त्वा ते धर्मेणोपयेमिरे । तेभ्यस्तस्यां
समभवद्दक्षः प्राचेतसः किल । यस्य प्रजाविसर्गेण लोका आपूरितास्त्रयः ॥ यथा ससर्ज भूतानि दक्षो दुहितृवत्सलः ॥ रेतसा मनसा चैव तन्ममाव-
हितः शृणु ॥ मनसैवासृजत्पूर्वं प्रजापतिरिमाः प्रजाः ॥ देवासुरमनुष्यादीन्नभस्थलजलौकसः ॥ तमबृंहितमालोक्य प्रजासर्गं प्रजापतिः ॥ विंध्य-
पादानुपव्रज्य सोचरद्दुष्करं तपः ॥ तत्राघमर्षणं नाम तीर्थं पापहरं परं । उपस्पृश्यानुसवनं तपसातोषयद्धरिं । अस्तौषीद्धंसगुह्येन भगवंतमधोक्ष-
जं । तुभ्यं तदभिधास्यामि कस्यातुष्यद्यतो हरिः ॥ ॥

इष्टवरवर्णार्थिनि तदीयां कन्यां ददाति । वार्क्षी वृक्षैः पालिता । आमंत्र्य संबोधयित्वा आप्सरसीं अप्सरसः प्रम्लोचायाः सुतां । दुहितृवत्सल इति तस्य कन्यावंश एवोक्तः । मम मत्तः
प्रजापतिर्दक्षः अबृंहितं असंवृद्धं विंध्यस्य पादान् संनिहितपर्वतान् । हंसगुह्याख्येन स्तोत्रेण कस्य दक्षस्य ॥ ॥ ॥

भा०अ०

२५

परायसर्वोत्तमाय॥ नमोदधेनमनं करोमि।परहेतुत्वमाह। अवितथा अनुभूतिःचिच्छक्तिर्यस्य॥ अतो गुणत्रयाभासो जीवो निमित्तं मायावा तयोर्बंधवे नियंत्रे॥ एवमपि गुणैः बु
तत्वबुद्धिर्येषां तैर्जीवैरदृष्टंधामस्वरूपंयस्यात त्वेहेतुः॥ निवृत्तं मानं यस्मात्।पाठांतरे चनिवृत्तमानमवधिस्त्रयस्मात्।तर्हि कथंतस्य सिद्धिरत आह स्वयंभुवे स्वप्रकाशा
य॥ अदृष्टधाम त्वं दर्शयन्नाह।नेति।पुरुषःसखाजीवःअस्मिन्पुरेदेहेवसन्नपि अत्रैवसंवसतःसख्युर्यस्य सख्यं करणप्रवर्तकत्वादिकंनावैतिनजानाति।तस्मै।कुतः व्य

प्रजापतिरुवाच॥ ॥नमःपरायावितथानुभूतये गुणत्रयाभासनिमित्तबंधवे।अदृष्टधाम्ने गुणतत्वबुद्धिभिर्निवृत्तमानाय दधेस्वयंभुवे
नयस्य सख्यं पुरुषोवैति सख्युः सखावसन्संवसतःपुरेस्मिन्।गुणोयथागुणिनोव्यक्तदृष्टेस्तस्मैमहेशायनमस्करोमि।देहोसवोक्षामनवोभू
तमात्रामात्मानमन्यंचविदुःपरंयत्॥सर्वंपुमान्वेदगुणांश्चतत्तज्ज्ञोनवेदसर्वज्ञमनंतमीडे॥ ॥ ॥

क्तदृष्टेः प्रपंचद्रष्टुःनहि दृष्टादृश्यो भवतीति।प्रथमांतपाठे व्यक्तेप्रपंचएवदृष्टिर्यस्य सः।गुणोविषयो गुणिनोविषयिणःइंद्रियादेःसख्यं प्रकाशकत्वं यथा न
वेत्ति।तद्वत्।ननुगुणोजडत्वान्नजानातिजीवस्त्वचेतनः किमितिनजानातीति।तत्राह।देहस्त्वासवश्चप्राणाःअक्षाणीन्द्रियाणि मनवश्चअंतःकरणानि।भूतानिचमात्रा
श्चतन्मात्राश्च गुणाःआत्मानंस्वस्वरूपंदृश्यंअन्यंइंद्रियवर्गंतयोश्चपरंदेवतावर्गंचनविदुःपुमान्जीवस्तु।सर्वमेतत्त्रयंवेदगुणांश्चतन्मूलभूतान्वेदतत्तज्ज्ञोपिसन्नयंसर्व
ज्ञं नवेदतमनंतमीडेस्तौमि। ॥ ॥

राम

२५

अदृष्टधामत्वमुक्त्वा स्वप्रकाशत्वमाह। यदा मनस उपरामः समाधिः। न तु सुषुप्ताविव लयः। न च जाग्रत्स्वप्नयोरिव विक्षेपः। तदा हि नामरूपे दृष्येते न तु तस्या
उपरमे हेतुः दृष्टदर्शनं स्मृतिश्च तयोः संप्रमोषान्नाशात्। तदा यः केवलेन स्वरूपज्ञानेन प्रतीयते। तस्मै हंसाय शुद्धाय। शुचि शुद्धं मनः सद्म प्रतीतिस्थानं यस्य तस्मै नमः। एवं
भूतः केषां प्रतीयत इत्यपेक्षायामाह। मनीषिण इति द्वाभ्यां। विवेकिनो निःकर्षन्ति विविच्य ध्यायन्ति। स निर्वाणसुखानुभूतिर्मम प्रसीदतामिति द्वयोरन्वयः। एवं निःकर्ष
तां प्रतीयत इति भावः। किमिति। निःकर्षन्ति। स्वशक्तिभिर्गूढं अप्रकाशमानं। कतिभिर्नवभिः। पुनश्च त्रिवृद्भिः त्रिगुणाभिः सप्तविंशति उपाधिभिः [illegible] निश्च

यदोपरामो मनसो नामरूपरूपस्य दृष्टस्मृतिसंप्रमोषात्। य ईयते केवलया स्वसंस्थया हंसाय तस्मै शुचिसद्मने नमः॥ मनीषिणोन्तर्हृदि
दि संनिवेशितं स्वशक्तिभिर्नवभिश्च त्रिवृद्भिः॥ वह्निं यथा दारुणि पाञ्चदश्यं मनीषया निःकर्षन्ति गूढं। स वै ममाशेषविशेषमाया निषेध
स १ निर्वाणसुखानुभूतिः। स सर्वनामा स च विश्वरूपः प्रसीदतामनिरुक्तात्मशक्तिः॥ ॥

कर्षन्तीत्यर्थः। यद्वा नवभिः प्रकृतिपुरुषमहदहंकारपञ्चतन्मात्ररूपाभिः। त्रिवृद्भिस्त्रिगुणात्मकाभिः॥ चकारात्षोडशविकाररूपाभिश्च कार्यभूतां निःकर्षन्ति मनी
षयांतर्हृदि संनिवेशितं। निश्चलीकृतं। पाञ्चदश्यं पञ्चदशसामिधेनीमन्त्रैः प्रकाश्यं। अलौकिकं वह्निमिवाहंकारास्पदादात्मनोन्यं परमात्मानं निःकर्षन्तीत्यर्थः॥ अशेष
विशेषायस्याः तस्या मायाया निषेधेन निर्वाणसुखे अनुभूतिर्यस्य अप्रसक्तनिषेधासंभवात् प्रसक्तिमाह। स एव सर्वनामा विश्वरूप इति। तर्ह्येवमपि वाच्यवाचकभावान्निषेधः संभव
तीत्याह। अनिरुक्ता आत्मनि शक्तिर्माया यस्य सः॥ ॥ ॥

भा० भा०

१६

ननु यदि केवलया स्वसंस्थया प्रतीयते। तर्हि सर्वनामत्वं विश्वरूपत्वं वा उपपन्नं वागाद्यगोचरत्वादित्याशंक्य सर्वैर्नामतिवर्ध्यं प्रत्यक्त्वाद्दृश्यं तस्य स्वरूपं वक्तो माभूत्तथापि मायया घटत इति श्लोकत्रयेणोपपादयन्नमस्करोति। यद्यदिति। यद्यद्वस्तु अनिरुक्तं अस्ति हितं धिया। विरूपितं व्यवसितं। अन्नालिवाइंडि येन निरूपितं गृहीतं ज्ञातं अपि मनसार्पितं तं यस्य प्रकाशत्वं तस्य तत्स्वरूपं माभूत्। तास्वरूपत्वाभावे हेतुः। हि यस्मात् तद्गुणानामेव रूपं। पार्थंतरे गुणेर्विद्धितं। स तु गुणव्यतिरिक्तः।। यतो गुणानामपायविसर्गास्थाप्रलयोत्पत्ति स्थां लक्ष्यत इति तथा। चेतनाधिष्ठानं विना तयोरसंभवात्। यद्वा यस्य स्वरूपं माहून्न भवति। तस्मै नम इति तृतीयेनान्वयः। तदेवं वक्ष्यतो गुणरूपत्वाभावमंगीकृत्य अनिरुक्तात्मश

यद्यन्निरुक्तं वचसा निरूपितं धियाक्षभिर्वा मनसोत यस्य।। माभूत्स्वरूपं गुणरूपं हि तत्तत्स वै गुणापायविसर्गलक्षणः।। यस्मिन्यतो येन च यस्य यस्मै यद्यो यथा कुरुते कार्यते च।। परावरेषां परमं प्राक्प्रसिद्धं तद्ब्रह्म तद्धेतुरनन्यदेकं।। ॥

क्रिरित्यनेन द्योतितं मायया सर्वव्यवहारेण विश्वरूपत्वमाह। यस्मिन्नधिकरणे। यतः उपादानात्। येन करणेन। यस्य संबंधि। यस्मै संप्रदानाय। यद्यदीप्सिततमं यः कर्ता क्रियां कुरुते स्वतं त्रः कार्यते वान्येन प्रयोजककर्तृत्वेन इति प्रत्येकं संबंधः। अत्र च सप्त विभक्त्यर्था दर्शिताः। यथेति क्रियाकारकसंबंधप्रकारा विनाम भूयानामर्थाः कुरुते कार्यते चेति स्वार्थपरार्थक्रियाद्वयं च सर्वेषां दर्शितिः। च शब्देन भावकर्मविहितप्रत्ययार्थाः संगृहीताः। तद्ब्रह्मैवेति कुतः तत्राह तद्धेतुः तेषां कारणं। तत् कुतः सर्वस्य प्राक्प्रसिद्धं ननु ब्रह्मादयस्त द्धेतवः श्रूयंते अन्ये च दृश्यंते तत्कथं ब्रह्मैव तद्धेतुः। तत्राह परेषामवरेषां च हेतूनां परमं कारणं। ननु सर्वकारणत्वे तस्य किं नाम सहकारित्वे तदानीमन्यस्याभावात्तमत्वं निरपेक्षमेव तत्का रणमित्याह। अनन्यद्विजातीयशून्यं एकं सजातीयशून्यं च। तस्मै नम इत्युत्तरेणान्वयः।। ॥

निरूपितं संकं

१६

नन्वेवं ब्रह्मवेद्विद्यस्य हेतुः तर्हि न कदाविद्दृतीद्दशं जगदितिवदंतो मीमांसकाः कुतोत्र विवदंते ते ह्यात्येत्स्वभाववादिनः संवदंते तेनैव ते वक्तव्याविद्धिर्वोधिता अपि नु तः द्धनः उ
नर्भुद्दां तितत्राह। यस्य मायाः विद्याद्युः श क्तयो विवादस्य क्रद्वितं संवादस्य भुवः स्थानानि भवंति तस्मै नमः ४ ननु किं तद्भ्रूयस्य शक्तयो विवादादि भुवो भवंति। अत्राह। अ
स्ती ति। योगउपासनाशास्त्रं तत्र हि विष्णुरूपेणोपासनायां पातालपादादिकमस्ती त्युपास्यत्वेन विधीयते। नास्तीति सांख्यं ज्ञान शास्त्रं तत्र ह्यपाणिपादः ४ अवक्ता रूप्यो त्र मिति
चपादादिनास्तीति निषिध्यते। तयोर्योगसांख्ययोर्यत्किंचित्समंजसं उत्तवर्तमानं अवेह्नितं प्रतीतं। तत्र ह ब्रह्मविवादे थ विवादास्पदं ब्रह्मेत्यर्थः॥ विवादं स्फुटयति। भि

यच्छक्तयो वदतां वादिनां वै विवादसंवादभुवो भवंति॥ कुर्वंति चैषां मुहुरात्ममोहं तस्मै नमोऽनंतगुणाय भूम्ने॥ अस्तीति नास्तीति
च वस्तु निष्ठयोरेकस्थयोर्भिन्नविरुद्धधर्मयोः ४॥ अवेक्षितं किंचन सांख्ययोगयोः समं परं ह्यनुकूलं बृहत्तत्॥ २॥ यो नुग्रहार्थं भजतां पा   तां २
दमूलमनामरूपो भगवाननंतः ॥ नामानि रूपाणि व जन्मकर्मभिर्भेजे स मह्यं परमः प्रसीदतु॥ ॥

न्नो अस्तिनास्तीत्येवंभूतौ विरुद्धौ धर्मौ पयोः ४ तयोर्भिन्नविषयत्वे विरोधो न स्यादित्येकस्थयोरित्युक्तं। एकविषययोः कुतः वस्तुनिष्ठयोः ४ पादादिविधि
प्रतिषेधयोरेक वस्तुनिष्ठत्वात् समवेहेतुः परं हि यतो विधिप्रतिषेधयोरविषयः तयोः पादादिविषयत्वात्। तर्हि तयोः [illegible] स्य सद्भावे किं प्रमाणं तदाह। अ
नुकूलम धिष्ठानं विना पादादिकल्पनायोगात्॥ अवधिं विना तन्निषेधायोगाच्च॥ तयोरुपादकत्वेन सिद्धमित्यर्थः। तस्मै नम इति पूर्वस्यानुषंगः। नन्वदी
मी नस्यं नमस्कारैः लौकैर्भमन्त्राह यद्विति। पादमूलं भजतामनुग्रहार्थं प्राकृतनामरूपरहितोपि जन्मानि खवतारैः विश्रुद्धो जिन्मत्स्यादिरूपाणि कर्मभिर्नामानि च योभेजे। कुतः भगवान् न
समस्य १   प २ श्चित्येश्वर्यः स मह्यं प्रसीदतु॥ ॥

विधस्य २

गंधर्वा ऋषिकाति। देवो गुणे सूरत्या दिवं आश्रित्य नाना २

नत्वाद्दशाः सकामाः प्राणेशादीनुप्रार्थयंते वंदता विहाय किमिति भगवंतमेव प्रार्थयसे तत्राह। प्राकृतैरखिलैस्तैर्जनिपथे रूपासताम्गौर्थियाशयं तत्तद्वासनानुसारेणायोदेह्यातोंत
र्यामी तत्तद्देवतारूपेण विविधोभाति। यथा वायुः पार्थिवं चंपकादिगंधभेदमाश्रित्य नानारूपवानुप्रतीयते तद्वत् तस्यैव तत्तद्देवतारूपेण विविधोभाति। यथा वायुः पार्थिवं चंपका
दमाश्रिफलदात्वात्। स ईश्वर एव मम मनोरथं सत्यं करोतु। किमंतराङ्गिलिर्देवतां तरैरित्यर्थः। तद्भक्तांगितासु। योयोयांयां तनुं भक्तः श्रद्धयार्चितुमिच्छति। तस्यतस्याचलां श्रद्धां ताम

यः प्राकृतैर्जनिपथैर्जनानां यथाशयं देहगतो विभाति॥ यथानिलः पार्थिवमाश्रितो गुणं स ईश्वरो मे कुरुतान्मनोरथं॥ ॥शुक उवाच॥ ॥
इति स्तुतिः संस्तुवतः स तस्मिन्नघमर्षणे॥ आविरासीत्कुरुश्रेष्ठ भगवान्भक्तवत्सलः॥ कृतपादः सुपर्णांसे प्रलंबाष्टमहाभुजः॥ चक्रशंखासि
चर्मेषुधनुःपाशगदाधरः॥ पीतवासा घनश्यामः प्रसन्नवदनेक्षणः॥ वनमालानिवीतांगो लसच्छ्रीवत्सकौस्तुभः॥ महाकिरीटकटकः स्फुरन्म
करकुंडलः॥ कांच्यंगुलीयवलयनूपुरांगदभूषितः॥ ॥ ॥

वविदधाम्यहं। सतया श्रद्धया युक्तस्तस्याराधनमीहते। लभते च ततः कामान्मयैव विहितान्हितानिति। येषां मां प्रपद्यंते तांस्तथैव भजाम्यहमिति चेति। संस्तुवतो दक्षस्य
भगवान्प्रत्यक्षोऽभूत्॥ तं वर्णयति सार्द्धैस्त्रिभिः। सुपर्णस्यांसे स्कंधे कृतौ पादौ येन प्रलंबा अष्टौ महांतो भुजा यस्य चक्राद्यष्टायुधधरः। प्रसन्नं वदनं ईक्षणे च यस्य। वनमा
लया निवीतं कंठादिपादांतं व्याप्तमंगं यस्य लसंतौ श्रीवत्सकौस्तुभौ यस्य महांति किरीटकटानि यस्य। स्फुरंती मकरकुंडले यस्य कांच्यादिभिर्विभूषितः। वलयमत्र पादभूषणं
इष्टद्युं कटकस्योक्तत्वात्॥ ॥

त्रैलोक्यमोहनंश्रीछत्रुपोत्तमाख्यं॥सुरयूथपैःलोकपालकैः॥आपूरितानिमनोहारािणीइंद्रियाणितैर्यथाङ्गदित्योनद्योतिहरिरापूर्यंतेतथामहानंदापूर्णैर्विनाहन्तिक
त्वाद्यागादीनांनकिंचित्वक्तुंशक्तोभूदित्यर्थः॥यद्यथसौनावोचत्तथापिविन्नज्ञइदंवक्ष्यमाणमाह॥मावंभक्तिंगतःप्राप्तः॥यत्तयातःतेनतपःअस्यवि [illegible] दंहणांदृष्टिकरमत

त्रैलोक्यमोहनंरूपंबिभ्रत्त्रिभुवनेश्वरः॥स्तूतोनारदनंदाद्यैःपार्षदैःसुरयूथपैः॥स्तूयमानोनुगायद्भिःसिद्धगंधर्ववारणैः॥रूपंतन्मह
दाश्चर्यंविचक्ष्यागतसाध्वसः॥ननामदंडवद्भूमौप्रहृष्टात्माप्रजापतिः॥नकिंचनोदीरयितुमशकत्तीव्रयामुदा॥आपूरितमनोद्वारैर्ह्रदिन्यइव
निर्झरैः॥तंतथावनतंभक्तंप्रजाकामंप्रजापतिं॥चित्तज्ञःसर्वभूतानामिदमाहजनार्दनः॥ ॥श्रीभगवानुवाच॥ ॥प्राचेतसमहाभागासंसिद्ध
स्तपसाभवान्॥यत्श्रद्धयामत्परयामयिभावंपरंगतः॥प्रीतोहंतेप्रजानाथयत्तेस्योद्बृंहणंतपः॥ममैषकामोभूतानांयद्भूयासुर्विभूतयः॥
ब्रह्माभवोभवंतश्चमनवोविबुधेश्वराः॥विभूतयोममह्येताभूतानांभूतिहेतवः॥ ॥

स्मेहंप्रीतःमत्तपसोलोकसमृद्ध्यर्थत्वेनत्वत्प्रीतेःकिंकारणंतत्राह॥ममेति॥भूतानांविभूतयःसमृद्धयोभूयासुरितियत्एषएवममकामः॥अतोमत्कामपूरणाद्देवाहंप्री
तोस्मीत्यर्थः॥भूतिविस्तारप्रयत्नश्चतवोचितएवेत्याह॥ब्रह्मेति॥भवंतःप्रजापतयःभूतेरुद्भवस्यहेतवः॥ ॥ ॥

सा० १ विषयः पुंव्यापारोत्पादनात्र दृष्ट्वाच्यः। तेन लिङ्ग्यानादि ग्रीवा २

भा०स्क०

१८

विश्वसृष्ट्यर्थलिनत्वात्तपसोऽहं श्रीतद्दुक्तं॥ तदेवमुक्त्वा तु प्रसंगादन्यान्यपि लोकदृष्टिकराणि विद्यादीनि प्रोतीति तपः यमादिसहितं ध्यानं मे हृदयं। विद्या सांगमंत्रजपः साध्यानां तनोति तनुर्देहः क्रिया ध्यानादिकर्मा क्रियत इत्याकृतिः। जाताः सुनिष्पन्नाः क्रतवोंगानि शिरो वा पत तत्र वषट्कृत उपसद्वक्ष्यपी आज्यभागावित्यादिश्रुतेः। धर्मः म॰ क्रतावयपूर्वं आत्मानः हृदयाश्रयत्वात्। सुरा यज्ञभुजः प्राण एव असवः प्राणाः संतर्पणीयत्वात्। तपसः संतानहृष्टिहेतुत्वं दर्शयितुं द्वितीयतृतीयोक्तमिति ह्यासमास्व तु

तपो मे हृदयं ब्रह्मन् तनुर्विद्या क्रियाकृतिः। अंगानि क्रतवो जाता धर्म आत्मासवः सुराः॥४॥ अहमेवासमेवाग्रे नान्यत्किं वांतरं बहिः॥ संज्ञानमात्रमव्यक्तं प्रसुप्तमिव विश्वतः॥ मय्यनंतगुणेऽनंते गुणतो गुणविग्रहः। यदासीत्तत एवाद्यः स्वयंभूः समभूदजः॥ स वै यदा महादेवो मम वीर्योपबृंहितः॥ मेने खिलमिवात्मानमुद्यतः स्वर्गकर्मणि॥ अथाभिप्रेतिहितो देवस्तपोऽतप्यत दारुणं॥ नवविश्वसृजो युष्मान् येनादावसृजद्विभुः॥

लिश॥ अहमेवेति विश्वं तत्स्व्याहन्निश॥ आसमेवेति क्रियांतरहान्तिः॥ आंतरं ग्राहकं वहिर्ग्राह्यं संज्ञानमात्रं चेतन्यमात्रं अव्यक्तं इंद्रियवृत्तिविरहनिमित्तं अत एव प्रसु प्तमिव विश्वतः। सर्वत्र गुणतो मायातः गुणमयो विग्रहो ब्रह्मांडं ततः तदेव अजः अयोनिजः॥ खिलमसमर्थमिवात्मानं मत्वा तपतपेत्यभिहितः मदुक्तेन तपसा॥ राम॥ ॥

राम

१८

किंच वयं भगवतैव सृष्टाः पालिताश्च वर्द्धिताः अतस्तमेव शरणं व्रजामित्याहुः य एक इति त्रिभिः। येनानुगृहीताः संतो विश्वं सृजामः। न तु स्वयं नेदं सृष्टारः नान्यो युष्माकं म
नुग्राहकोस्ति तस्यादर्शनात्तत्राहुः। अस्मत्स्रष्टुरपि पूर्वमेवांतर्यामितया समीहमानस्यापि यस्य लिंगं रूपं न पश्यामः॥ तत्र हेतुः पृथगात्मबुद्ध्याभिमानिनः। देवादिषु उपेंद्रपरशु
राममत्स्यरामादितनुभिः कृतावतारः सन् आत्मसात्कृत्वा पाति वा। आत्मभूतं दैवतं चकृतः विश्वं विश्वात्मकं। तथापि विकारं वारयंति अनन्यं। विश्वात्मत्वे हेतुः। परं कारणं।

य एक ईशो निजमायया नः ससर्ज येनानुसृजाम विश्वं। वयं न यस्यापि पुरः समीहतः पश्याम लिंगं पृथगीशमानिनः। यो नः सपत्नैर्भृशमर्द्यमानान् दे
वर्षितिर्यङ्नृषु नित्य एव। कृतावतारस्तनुभिः स्वमायया कृत्वात्मसात्पाति युगे युगे च। तमेव देवं वयमात्मदैवतं परं प्रधानं पुरुषं विश्वमन्यं। व्रजाम सर्वे श
रणं शरण्यं स्वानां स नो धास्यति शं महात्मा॥ ॥श्रीशुक उवाच॥ ॥इति तेषां महाराज सुराणामुपतिष्ठतां। प्रतीच्यां दिशि प्रभूदाविः शंखचक्रगदाधरः।
आत्मतुल्यैः षोडशभिर्विना श्रीवत्सकौस्तुभौ। पर्युपासितमुन्निद्रशरदंबुरुहेक्षणं। दृष्ट्वा तमवनौ सर्वे ईक्षणाह्लादविक्लवाः। दंडवत्पतिता राजन्श
नैरुत्थाय तुष्टुवुः॥ ॥

ननु प्रधानं पुरुषश्च विश्वस्य कारणं तत्राहुः॥ प्रधानं पुरुषं च तदात्मकोपि स एवेत्यर्थः। स एव नः शं विधास्यति। प्रतीच्यां दिशि प्रथमं आविरभूत्॥ भगवन्स्तं भरी दृ
ष्ट्वा ईक्षणाह्लादेन विवशाः अवनौ दंडवत्पतिताः संतः शनैरुत्थाय तुष्टुवुरित्यन्वयः॥ कथंभूतं श्रीवत्सकौस्तुभौ विना स्वतुल्यैः षोडशभिः सुनंदादिभिः परितः सेवितं उ
न्निद्रशरदंबुरुहवदीक्षणे यस्य तं॥ ॥ ॥

यज्ञो वीर्यंस्वर्गादिफलजननाय सामर्थ्यं यस्मात् तस्मै नमः। वयसे उत ते तत्फलपरिच्छेदककालात्मने पि तद्विधात्तकेभ्यदेवेभ्यश्च संप्रत्तिर्वक्रांयेन। एवंभूतेभ्यप्रभावे ऽःसु
भ उरुहूतयोः शीलनवक्तु नाम्ने। नत्तु ममगुणातीतं रूपंविहायगुणोपाधिकं यज्ञवीर्यत्वादिकिमितिवर्ण्यते तत्राहुः। यत्त्वचगुणत्रयस्येशितुः नियंतुः त्रिगुणात्मिकानां तिसृ
णां गतीनां परं पदं निर्गुणस्वरूपं तत्। विसर्गस्यार्वाचीनइदानींतनः। हेधातर्वेदितुं अतत्केवलं तस्मै ते नमोस्तु। मितान्नराणिपद्यानि नमीयंते हरेर्गुणाः शतिपद्येस्तुष्वंतः
सद्योगाद्येतत्रस्तुस्तुः। तत्सुद्देकेण वहुधा संवोधयंतोप्युर्जेयं तोड्जेयत्वं प्रपंचयंति। भगवन्नित्यादित्रिना। परमंमंगलं श्रुद्धो धर्मो यस्मिन्। आत्मयोगो नाष्टांगो न यः समाधिश्चित्ते

देवाऊचुः॥ ॥नमस्तेयज्ञवीर्याय वयसेउत ते नमः। नमस्तेह्यस्तचक्राय नमःसुपुरुहूतये। यत्तेगतीनांतिसृणामीशितुःपरमंपदं। नार्वाचीनोविसर्गस्य
धातर्वेदितुमर्हति। ॐनमस्तेस्तुभगवान्नारायणवासुदेवादिपुरुषमहापुरुषमहानुभावपरममंगलपरमकल्याणपरमकारुणिककेवलजगदाधरलो
कैकनाथसर्वेश्वरलक्ष्मीनाथपरमहंसपरिव्राजकेःपरमेणसमाधिनापरिभावितपरिस्फुटपारमहंस्यधर्मेणोद्घाटिततमःकपाटद्वारेचित्ते ऽपावृतआत्म
लोकेस्वयमुपलब्धनिजसुखानुभवोभवान्। दुःखबोधइवत्वायंविहारयोगोयदशरणोशरीरइदमनवेक्षितास्मत्समवायआत्मनैवाविक्रियमाणे
नसगुणमगुणःसृजसिपासिहरसि॥ ॥ ॥

कार्यंतेनपरिभावितःसुशीलितःपरिस्फुटोयःपारमहंस्यधर्मोभगवद्भजनंतेनउद्घाटितं तमोरूपंकपाटंयस्मिन्। तस्मिन्द्वारभूतेचित्ते अपावृते प्रकटे आत्मलोकेआत्म
रूपेस्वयमेवोपलब्धमलिप्तंकंयन्निजसुखंतदनुभवरूपोभवान्। ननुकेवलानुभवरूपत्वेममसृष्ट्यादिकर्तृत्वंकथं तत्राहुः। दुःखबोधइवत्वायंविहारयोगःक्रीडायो
गः यद्यस्मादशरणोनिराश्रयः इदंविश्वंअनपेक्षितोस्माकंसमवायोमेलनंसाहाय्यंयेनसः॥ ॥ ॥

दुर्ज्ञेयत्वांतरमाहुः ॥ अथ तत्रेति । इह देवदत्तो गृहादिनिमित्तं स्वकृतशुभाशुभयोः फलमुपादत्ते । एवं भवान् ब्रह्मस्वरूपोऽपि जीवरूपेण गुणविसर्गे पतितः सन्नुपादत्ते इति यद्वा
समंजसं अपरिच्छिन्नं दर्शनं विच्छित्तिर्यस्य सन् तथाभूतः उदास्ते उदासीनः साक्षितया वर्तते इति । तदेवं विरोधेन दुर्ज्ञेयत्वमुक्त्वा तत्परिहारेणाज्ञानप्रकारमाहुः ॥ नहीति विरुध्यत इति विरो
ध उभयं न विरुद्धमित्यर्थः । न ह्यन्यदृष्टांतेन तवापि विकल्पो युज्यते अतर्क्यैश्वर्यत्वादित्याहुः ॥ भगवतीति । अपरिमिता गुणगणा यस्य तस्मिन्नीश्वरे स्वतंत्रे अत एव अनवगाह्यमतर्क्यं मा
हात्म्यं यस्य तस्मिन्नुभविकल्प एवं वा एवं वेति वितर्कः किमत्र युक्तमिति विचार इत्थमेवेति तत्र प्रमाणाभासाः तदनुग्राहकाः कुतर्कशास्त्रावर्वाचीनां वक्तृस्वरूपाणि स्पृशन्ति ये विक

अथ तत्र भवान् किं देवदत्तवदिह गुणविसर्गपतितः पारतंत्र्येण स्वकृतकुशलाकुशलफलमुपाददाति । आहोस्विदात्माराम उपशमशीलः समंजसदर्श
नः उदास्ते इति ह वाव न विदामः ॥ न हि विरोध उभयं भगवत्यपरिगणितगुणगणे ईश्वरे अनवगाह्यमाहात्म्ये अर्वाचीनविकल्पवितर्कविचारप्रमाणाभा
हु ९ सकुतर्कशास्त्रकलितांतःकरणाशयदुरवग्रहवादिनां विवादानवसरे उपरतसमस्तमायामये केवल एवात्ममायामंतर्द्धाय को न्वर्थो दुर्घट इव भवति स्व
रूपद्वयाभावात् ॥ समविषममतीनां मतमनुसरसि यथा रज्जुखंडः सर्पादिधियां ॥ ॥ ॥

त्वादयस्ते येषु शास्त्रेषु तैः कलिलं व्याकुलं अंतःकरणमाशयो यस्य दुरवग्रहस्य तेन वादिनां विवादस्यानवसरे अगोचरे न तु अज्ञामात्रमेतत् तदुक्तिरुच्यतां तत्राहुः उ
परतो मायामयः संसारो यस्मिन् तस्मिन् केवले आत्ममायामभ्येति धाय को न्वर्थः कर्तृत्वादिर्निरस्यते भवति । यदि वस्तुतः कर्तृत्वादि भवेत्तर्हि विरोधः स्यात् । न तु तदस्ति । इत्याहुः । स्व
रूपद्वयाभावादिति । अत्र तु यदि नियतं हार्दं किं तु तत्तन्मतिभेदेन त्वमात्ममायया प्रतिस्फुरसीत्याहुः । समा विषमाश्च मतयो येषां तेषां मतमनुसरसि यथा सर्पादिविषया धीर्येषां तेषां यथा रज्जुखंड
स्तथा तथा भाति । यद्वा तमेवाविरोधं पुनः अमतिभेदेन संदर्शयति समविषमेति ॥ ॥ ॥

ता०ष०
३२

तदेवं विरोधं परिहृत्य निष्कृष्टं तं परमार्थमाहुः। सुवर्णवन्नानारूपेणाप्रतीतः। वस्तुस्वरूपः सर्वेषां गुणानां विषयाणामाभासैः प्रकाशैरुपलक्षितः ननु तर्हि जीव एवोपलक्ष्यते न सर्वप्रत्यगात्मत्वात् सर्वजीवानां तत्र्यमित्वात् जडतादात्म्याध्यासेन जीवस्यापि जडप्रायत्वान्न तेन विनाप्रकाश इति भावः। पर्यवशेषितः नेति नेतीत्यादिश्रुतिभिः अतत्स्य इङ्गितैरेव परमपुरुषार्थ इत्याहुः। अथ हे निपर्यक्त इति पतेन। यस्मादेवंभूतस्त्वं परमेश्वरः अथ ह वाव अत एव हि हे मधुमथन परमभागवता एते त्वत्पदांभोजानुसेवां कथं

प्र

स एव हि पुनः सर्ववस्तुनि वस्तुस्वरूपः सर्वेश्वरः सकलजगत्कारणभूतः सर्वप्रत्यगात्मत्वात्॥ सर्वगुणाभासोपलक्षित एक एव पर्यवशेषितः ४॥
अथ ह वाव तव महिमामृतरससमुद्रविप्रुषा सकृदवलीढया स्वमनसि निष्यन्दमानानवरतसुखेन विस्मारितदृष्टश्रुतविषयसुखलेशाभासाः परमभागवता एकान्तिनो भगवति सर्वभूतप्रियसुहृदि सर्वात्मनि नितरां निर्वृतमनसः ४॥ कथमु ह वा एते मधुमथन पुनः स्वार्थकुशला ह्यात्मप्रियसुहृदः साधवस्त्वच्चरणाम्बुजानुसेवां विसृजन्ति न यत्र पुनरयं संसारपर्यावर्तः॥ ॥ ॥

भा.स्या.परम

मुकुन्द विसृजन्तीत्यन्वयः। हि यस्मात् स्वार्थे पुरुषार्थे। कुशलाः निपुणाः अत आत्मा त्वमेव प्रियः सुहृच्च येषां साधवो रागादिशून्याः। तत्र हेतुः तव महिमैवामृतरससमुद्रस्तस्य विप्रुषा बिन्दुमात्रेण सकृदपि लीढया आस्वादितया स्वमनसि निष्यन्दमानं अतिशयेन स्रवत्यनिरन्तरं सुखं तेन विस्मारिता दृष्टश्रुतविषयास्तत्सुखलेशाभासा येषां ते अत एव भगवति त्वयि नितरां निरन्तरं निर्वृतं मनो येषां ते यत्र यस्यां तव सेवायां सत्याम्॥ ॥ ॥

राम
२३

त

१ प्रस्तुतं विज्ञापयंति। त्रिभुवनेत्यादिना यावत् समाप्ति॥

दुर्लंघ्यं तस्मात्कुतः अर्थ्यतां चेति यथेह देवं दत्तो गृहादिर्निर्मयितः स्वकृते त्रिभुवनमात्मा स्वरूपं तत्र वनं यस्य त्रिभुवनस्यात्मा भवनं चेति वा त्रयो विक्रमा यस्य। त्रीन्लोकान्नयतीति तथा त्रयाणां लोकानां मनोहरो भावो यस्य॥ एवं च तद्दर्शिवो ध्याङ्गः तेषामनुपक्रमसमयः उद्यमकालो न भवतीति मत्वा। हे दंडधर पूर्वं यथा दंडं दधर्थ धृतवानसि॥ एवमेतं त्वाद्यमपि जहि। यस्मिन्नपसे हं तं यदीच्छसि। प्रथमं तावत्त्वदीयानामस्माकं अंतर्गतं शमयितुमर्हसि। तावकानामित्यत्र हेतुः। हे पितर् हे पितामह। त्वद्वर

त्रिभुवनात्म

त्रिभुवनात्मभवनत्रिविक्रमत्रिनयनत्रिलोकमनोहरानुलावतंवेवविभूतयो दितिजदनुजादयस्त्वापि तेषामनुपक्रमस
मयोयमितिस्वात्ममायया स्फुरतरस्वगामिश्रितजलवराकृतिलिर्यथा पराधं दंडं दंडधर दधर्थ। एवमेनमपि भगवन्नुजहिला
क्षस्तं यदि मन्यसे। अस्माकं तावकानां ततवनतानां तत तत तामहतववराणां नलिनमृणालध्यानाद्बद्धहृदयनिगडानां स्व
लिंगविवरणेनात्मसात्कृतानां मनुकंपानुरंजितविशदरुचिरशिशिरस्मितावलोकेन विगलितमधुरस्वरसाहृतकं यो
यांत प्रापमनर्घ्यीं हसिशयितुं॥ ॥

घा म

णामृणालनलिनध्यानोत्तैवानुवद्धो हृदयेनिगडः श्रृंखलायेषां स्वलिंगविवरणेन निजमूर्तिप्रकटनेन स्वीकृतानां केन चानुकंपया ... नुरंजितं सानुरागं च तद्धि
शदं रुचिरं च शिशिरं च स्मितं तत्सहितेनावलोकनेन तथानुकंपयेव विगलितो मधुरोस्वरस प्रियावाक्रमेवाहृतकलातयाव॥ ॥ ॥

३ भला~~…~~

भा०स्क०
३४

किंवास्मदादिप्रायप्रच्छया ज्ञायत एव।। किमत्रास्माभिर्विज्ञापनीयमित्याह। अथ हे भगवन्नुत वास्माभिरिह क्रियाद्वार्थविशेषो विज्ञापनीयः स्यादित्यन्वयः। यथा हिरण्य
रेतसो ऽग्नेः सदंशस्य तेर्विस्फुलिंगादिभिः प्रकाशो न क्रियते।। तथा तवास्माभिः कार्यार्थप्रकाशनं न कार्यमित्यर्थः। अत्र हे भग भगणि विशेषणानि। अखिलजगतामुत्पत्त्यादि
छुनिमित्तायमानया दिव्यमायया विनोदोयस्य। अत एव सर्वजीवनिकायानामंतर्हृदयेषु स्वरूपेण प्रत्यगात्मांतर्यामी तद्रूपेण वहिरपि प्रधानरूपेण देशकालदेहाव

२ प्रधानरूपे
ण

अथ तमवं मवास्माभिरखिलजगदुत्पत्तिस्थितिलयनिमित्तायमानदिव्यमायाविनोदस्य सकलजीवनिकायानामंतर्हृदयेषु वहिर
पि च ब्रह्मप्रत्यगात्मस्वरूपेणांचयथा देशकालदेहावस्थानविशेषं तदुपादानोपलंभकतयानुभवतः सर्वप्रत्ययसाक्षिण आकाशश
रीरस्य साक्षात्परब्रह्मणः परमात्मनः कियानिह वा अर्थविशेषो विज्ञापनीयः स्यात्। विस्फुलिंगादिभिरिव हिरण्यरेतसः। अत एव स्वयं तदुपकल्प
यास्माकं भगवतः परमगुरोस्तव चरणशतपलाशच्छायां विविधवृजिनसंसारपरिश्रमोपशमनीमुपसृतानां वयं यत्कामेनोपसादिताः ॥४॥ ॥

स्थानविशेषं तदुपादानोपलंभकतयानुभवतः।। कथं तेषामुपादानतया उपलंभकतया वा। उपादानस्योपलंभकतयेति वा। अत एव सर्वेषां प्रत्ययानां बुद्ध्यादीनामपि साक्षिणः साक्षि
णः साक्षित्वे हेतुः। आकाशवत् अलिप्तशरीरं स्वरूपं यस्य। अलिप्तत्वे हेतुद्वयं। साक्षात्परब्रह्मणो निरुपाधेः परमात्मनः।। शुद्धसत्वमूर्तेश्च अत एव सर्वज्ञत्वादेव वयं
यत्कामेतस्य कार्यस्य कामेनोपसादिताः प्रापिताः तदस्माकं कार्यं स्वयमेवोपकल्प्य संपादयेति। चरणमेव शतपलाशं कमलं तस्य छायां विविधैर्वृजिनैः संसारपरि

राम
३४

सं २

श्रमः तस्योपशमकरी। उपसृतानां प्राप्तानां।

६२

पूर्वं भक्तेरुत्कर्षेण किंचित्काममशंकामाभूदिति स्वकामं कथयंति। अथोऽनंतरमेवाशीघ्रं तद्वधाय पुनः प्रणमंति। हंसाय शुद्धाय हरये च्चा निर्हिरायते नमः। शुद्धत्वे हेतवः। द
ह्रनिलयाय हृदयाकाशनिकेताय। निरीक्षकाय बुद्ध्यादिसाक्षिणे। कृष्णाय सदानंदरूपाय। कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः। तयोरैक्यं परं ब्रह्म कृष्ण इत्यभि
धीयत इति निरुक्तेः। निर्हरत्वे हेतवः। मृष्टं शुद्धं विकीर्णं यशो यस्य। निरुपक्रमाय आदिशून्याय। सद्भिः संगृह्यत इति तथा तस्मै। भवपांथः स्वस्वरूपे प्राप्य वर्तमानः। तस्य निजाश्र

अथो ईश जहि त्वाष्ट्रं ग्रसंतं भुवनत्रयं। ग्रस्तानि येन नः कृष्ण तेजांस्यस्त्रायुधानि च। हंसाय दह्रनिलयाय निरीक्षकाय कृष्णाय मृष्टयशसे निरुपक्रमा
य। सत्संग्रहाय भवपांथनिजाश्रमाप्तावंते परीष्टगतये हरये नमस्ते॥ ॥श्रीशुक उवाच॥ ॥अथैवमीडितो राजन्सादरं त्रिदशैर्हरिः। स्वमुपस्थानमाक
र्ण्य प्राह तानभिनंदितः॥ ॥श्रीभगवानुवाच॥ ॥प्रीतोऽहं वः सुरश्रेष्ठा मदुपस्थानविद्यया। आत्मैश्वर्यस्मृतिः पुंसां भक्तिश्चैव यया मयि। किं दुरापं मयि प्री
ते तथापि विबुधर्षभाः॥ मय्येकांतमतिर्नान्यन्मत्तो वांछति तत्त्ववित्॥ न वेद कृपणः श्रेय आत्मनो गुणवस्तुदृक्। तस्य तानिच्छतो यच्छेद्यदि सोऽपि तथाविधः॥

२

स्तोत्रं विद्यया

संसारस्यांते मा प्राप्तोऽस्य शरणं प्राप्तो मत्तोऽपरिष्टा सर्वतः पूजिता ऽत्र मार्गातिः फलं यस्य तस्मै। अभिनंदितः संतोषितः मदीयमुपस्थानं तत्सहितयज्ञानेन आत्मन ऐश्वर्यमसंसारित्वं तस्य
स्मृतिर्यया न हि विरोधः ऽतत्त्वयमित्यादिना कर्तृत्वभोक्तृत्वादेर्मायिकत्वोक्तेः। भक्तिश्च यया त्वमवन्नित्यादिना भक्तेः सर्वोत्कर्षोक्तेर्भक्तिमभिनंदति। किमिति। यद्युक्तं देवेश स्वयं त
दुपकल्प्यतां स्माकमित्यादितत्संपादनं कृपालोर्मम भवितमित्याशयेनाह। नवेदेति द्वाभ्यां। गुणवस्तु विषयेषु तत्त्वदर्शी तान्विषयान्न तथा विधोज्ञ एव॥ ॥

त्वेद ध्यङ् निष्कलं ब्रह्म तज्जाधिगमतः सन् अश्वि वांछाहे। सून्वयः। नक्तिमित्य पद्मतायांपदेति।

नदृदाति

कर्मनवक्तिप्रहृत्तिमार्गनिवक्तिहि। अपथ्यंयथानरातिर्मिषक्रमः सदैद्यः एवंतत्कथनेनानौचित्यंपरिहृत्यतद्दलिप्रायमनुसरन्नाहमघवन्निति विद्ययाव्रतैस्तपसावत्सरंह ढंगाव्रंयावत। तत्रतदीयंविद्यातिशयमाह। सवाइतिद्वासांएवंह्ल ब्रह्मसिद्धाकथा। निशाम्यपाथर्वणाद्दंक्षंप्रवर्ग्यब्रह्मविद्ययोः दृष्टांचसमुपागम्यतमूवतुरथाश्विनो। भगवन्दहिनोविद्यामितिश्रुत्वासवाब्रवीत्। कर्मण्यप्रवस्थितोद्याहंपश्चादृन्यामिगछतां। तयोर्निर्गतयोरेवशक्रआगात्यतंमुनिं। उवाचलिप्सुर्नोविद्यांमावदीरश्विनोमु नि। यदिमद्वाक्यमुल्लंघ्यब्रवीषिसहसातृते। शिरश्छिंद्यांनसंदेहइत्युक्त्वासययौहरिः। इंद्रेगतेतथास्येत्यनासत्याहूवतुर्द्विजं। तन्मुखाद्दिंद्रकृत्वातौ हूवतुःपुनः। श्या

इंद्रस्तनं ४

वृत्रहि

स्वयंनिश्रेयसंविद्वान्नवक्तपज्ञापकस्थितः। नरातिरोगिणोऽपथ्यंवांछतोपिनिषक्रमः। मघवन्यातलइंवोदध्यंचस्त्विसत्तं। विद्याव्रततपःसारंमाज्ञंयाचतमाविरं। सवाअधिगतोदध्यङ् अश्विभ्यांब्रह्मनिष्कलं। यद्वाश्वशिरोनामतयोरमरतांव्यधात्। ॥

वांतवशिरःछित्वापूर्वमश्वस्यमस्तकंसंधास्यावस्मतोब्रूहिब्रह्मविद्यांचनोद्विज। तस्मिंश्छिंद्रेणासंछिन्नेपुनःसंधायमस्तकं। निजंतेदक्षिणांदत्वाम्मिचामोचयथा गतं। एतत्तंश्रुत्वातथीवावदध्यङ्ङाथर्वणस्तयोःप्रवर्ग्यंब्रह्मविद्यांचसक्रतोसत्यशंकितइति। ततश्चायमर्थः। दध्यङ्निष्कलंशुद्धंब्रह्मअधिगतःज्ञातवान्। पाठांतरेश्च नितरांकृतंतत्वतिधतंतंप्रवर्ग्यंचाधिगतः। ज्ञातवान्। ततोश्विभ्यांप्रादादित्यन्तरस्यानुषंगः। उपरिष्टिशेत्यर्थः। कथंभूतंब्रह्मयदेवंअश्वशिरसाप्रोक्तत्वात् ~~[illegible]~~ अुदश्वाशिरोनामप्रसिद्धं। तयोरमरतांजीवन्मुक्तत्वंव्यधात्। तथाचश्रुतिःअश्वस्यशीर्ष्णाप्रयदीमुवाचेति। ॥ ॥

वं

मदात्मकं वर्म श्रीनारायणकवचं अधिगतं इति पूर्वस्याध्यायांते तत्र हेतुः यद्यस्मात्त्वष्ट्रे प्रादात् किं तत्। ५३। यत्त्वष्टा विश्वरूपाय उपाय प्रादात् कीदृशं यत् त्वं त
तो विश्वरूपात् अधाश्च धृतवानसीति देवं विद्यया सारं गात्रं याचध्वमित्यर्थः। ननु श्रेष्ठं देहं कथं दास्यतीति तत्राह। युष्मभ्यमंगानि अश्वीलिपा वितेन स दास्यति। यतो
धर्मज्ञः विशेषतो ग्विल्यां शिष्यप्रीत्या दास्यति। अस्थीनीत्यनेन हेयत्वं दर्शितं तैरस्थिभिर्विश्वकर्मणा विनिर्मितमायुधश्रेष्ठो वज्रो भविष्यतीति शेषः ५४। येन ल

दध्यङ्ङाथर्वणाच्चेदं वर्म नित्यं मदात्मकं। विश्वरूपाय यत्प्रादात् त्वष्टा यत्त्वमधास्ततः ४॥ युष्मभ्यं याचितोऽश्विभ्यां धर्मज्ञोऽगा
नि दास्यति। ततस्तैरायुधश्रेष्ठो विश्वकर्मविनिर्मितः ४॥ येन वृत्रशिरो हर्ता मत्तेजउपबृंहितः ४ तस्मिन्विनिहते यूयं तेजोऽस्त्रायु
धसंपदः। भूयः प्राप्स्यथ भद्रं वो न हिंसंति च मत्परान्॥ ॥इति श्रीभागवते महापुराणे षष्ठस्कंधे नवमोऽध्यायः ४॥ ॥ ॥

न्वि

यान् वृत्रस्य शिरो हर्ता हरिष्यति॥ मम तेजसा उपबृंहितः ४ सन् ते तेजश्च अस्त्राणि आयुधानि च संपदश्च भूयः प्राप्स्यथ। महाकायत्रिभुवनग्रासी स एवास्मान्
हन्यादिति शंकाकुलचित्तान् प्रत्याह। मत्परांश्च केऽपि न हिंसंति। अतो युष्माकं भद्रमेवेति॥ दशमे केशवादिष्टदध्यङ्ङस्थिजवज्रधृत्। इंद्रो युध्यत वृत्रेण सासुरेण स
निर्जरः॥ ॥

ना॰ष॰
३६

मोदमानएवतत्सुखात्धर्मंश्रोतुकामःप्रत्याचख्याणइवोवाच॥अपीतिह्वात्यांहेवृंदारकाःअपिकिंसंस्थायांभ्रत्यौयोतिंडोहोङ्कःखंतन्नजानीथ॥आत्मादेहःव
यंजानीमएवकिंतुविष्णुरस्मत्सुखेनयावतइतिवेत्तत्राह॥यावतेविष्णुकेपिदातुंकउत्सहेत॥पुण्यश्लोकेरीड्या॥निकर्माणियेषां॥यावकोयदिवेदतर्हिनियाचेत॥
यदीश्वरःदानसमर्थश्चेत्तर्हिसोपिनेतिनाह॥अतोयथातवसंकटंवयंस्वार्थपरानजानीमःएवंप्रत्याचख्याणएवमस्माकंसंकटंनजानासीतिभावः॥मिमयाप्

श्रीबादरायणिरुवाच॥ ॥इंद्रमेवंसमादिश्यभगवान्विश्वभावनः॥पश्यतामनिमेषाणांतत्रैवांतर्दधेहरिः॥४॥तथाभियाचितोदेवैऋषिरा
तं तु कायक्लेशात् तव कोपः परपीडा संभवति। तदुक्तं गीतासु। कर्षयंतः शरीरस्थं भूतग्राममचेतसः। मां चैवांतःशरीरस्थं तान्विद्ध्यासुरनिश्चयानिति। तथा परसंपीडया धर्मः अव शब्दात् तव कोपश्च। अतस्त्वत्पराणां धर्ममपि कथं विद्वेषमार्गप्रवर्त्तितं काम्यधर्मोऽभिहितो न तथा दृष्टः। भागवतं धर्मं तु न दोषः इत्याह। न व्यभिचरति। परमार्थं न हातीति। तवेक्षा दृष्टिः। अव्यभिचारे हेतवः। स्थिरेति स्थावरजंगमप्राणिसमूहेषु समबुद्धयो भागवता यं धर्ममुपासते। एवंभूतस्य भागवतधर्मप्रवर्त्तकस्य तव दर्शनात् सर्वपापक्षयो भवतीति किं चित्रमित्याह। नहीति॥४४॥ ॥

अतोऽहं कृतार्थोस्मीत्याह अथेति। अतो हे तोऽनंत वावलोकनेन परिमृष्टा निरस्ता आशये चित्ते मलाये षां ते। त्वदर्शनं च मम नारदोपदेशेन जातमित्याह सुरर्षिणेति।
यथा वाहं पूर्वमतिमूढ आसं यथा च नारदेनानुगृहीतोऽस्मि तत्सर्वं तिरयाभिरणान्नवमया किं प्रकाशनीयमित्याह। विदितमिति। विशेषेणाज्ञार्थं अक्षोरनी यं किय
दिव न किमपीत्यर्थः। सवितुर्यथा खद्योतैः प्रकाशनीयं नास्ति तद्वत्। उक्तलक्षणं भगवंतं प्रणमति नम इति द्वाभ्यां सकलस्य जगतः स्थित्यादीनामीशाय सम्यग्यि

अथ भगवन्वयमधुना त्वदवलोकपरिमृष्टाशयमलाः सुरऋषिणा यत्कथितं तावकेन कथमन्यथा भवति॥४५॥ विदितमनंत समस्तं तव जगदात्म
नो जनैरिहाचरितं। विज्ञाप्यं परमगुरोः किंयदिव सवितुरिव खद्योतैः॥४६॥ नमस्तुभ्यं भगवते सकलजगत्स्थितिलयोदयेशाय दुरवसितात्मगतये कुयो
गिनां भिदापरमहंसाय॥४७॥ यं वै श्वसंतमनु विश्वसृजः श्वसंति यं चेकितानमनु चित्तय उच्चकंति। भूमंडलं सर्षपायति यस्य मूर्ध्नि तस्मै नमो भगवते
स्तु सहस्रमूर्ध्ने॥४८॥ ॥श्रीशुक उवाच॥ ॥संस्तुतो भगवानेवमनंतस्तमभाषत। विद्याधरपतिं प्रीतश्चित्रकेतुं कुरूद्वह॥ ॥श्रीभगवानुवाच॥ ॥
यन्नारदांगिरोभ्यां ते व्याहृतं मेऽनुशासनं। संसिद्धोसि तया राजन्विद्यया दर्शनाच्च मे॥ ॥५०॥ ॥

दुरवसिता अविज्ञाता आत्मगतिर्निजतत्त्वं यस्य। तस्मै केषां कुयोगिनां केन भिदादृष्ट्या। श्वसंति चेष्टंते चेकितानं पश्यंतमनु चित्तयः ज्ञानेंद्रियाणि उच्चकंति स्वार्थं पश्यंति। तेऽनुशासनं मद्विषयउपदेशस्तेन च तया च विद्यया अस्माच्च दर्शनात्त्वं संसिद्धोसि॥५०॥ ॥ ॥

प

ने

तद्द्वौ घटादर्थाय स्वयमध्यापदिशति ॥ अहमित्यादिना सर्वभूतान्यहमेव भोक्तृभोग्यात्मकं विश्वं मद्व्यतिरिक्तं नास्तीत्यर्थः । यतोहं भूतभावनः । भूतानां प्रकाश
कः कारणं च । ननु शब्दब्रह्म प्रकाशकं परं ब्रह्म कारणं च प्रकाशकं च । सत्यं ॐ भे मममेव रूपेऽत्याह । शब्दब्रह्मेति । शाश्वती शाश्वत्यौ ॥ ५१ ॥ अत एवमेवं पश्येत्या
ह । लोके भोग्यप्रपंचे भोक्तृत्वेन विततमनुगतमात्मानं लोकं वात्मनि भोग्यत्वेन संततं व्याप्तं तदुभयं च मया कारणात्मना व्याप्तमपि चैवोल्लयं कृतं कल्पितं स्मरे
दिति तृतीयेनान्वयः पश्येत्पश्या हारो वा ॥ ५२ ॥ ननु जाग्रदाद्यवस्थाभेदेन भोग्यात्मकं विश्वं स्फुटं प्रतीयमानं कथं कल्पितं स्यादित्याशंक्य स्वप्नेन जाग्रदा

अहमेव सर्वभूतानि विश्वात्मा भूतभावनः ॥ शब्दब्रह्म परंब्रह्म ममोभे शाश्वती तनू ॥ ५१ ॥ लोके विततमात्मानं लोकं चात्मनि संततं । उभयं च मया
व्याप्तं मयि चैवोल्लयं कृतं ॥ ५२ ॥ यथा सुप्तः पुरुषो विश्वं पश्यति चात्मनि । आत्मानमेकदेशस्थं मन्यते स्वप्न उत्थितः ॥ ५३ ॥ एवं जागरणादीनि जी
वस्थानानि चात्मनः । मायामात्राणि विज्ञाय तद्द्रष्टारं परं स्मरेत् ॥ ५४ ॥ येन प्रसुप्तः पुरुषः स्वापं वेदात्मनस्तदा । सुखं च निर्गुणं ब्रह्म तमात्मान
मवेहि मां ॥ ५५ ॥

न

दिदृक्षां तेऽसंलावयन्नाह । यथेति द्वाभ्यां । यथा स्वप्ने सुप्तो विश्वं शिखिनादिरूपं देशांतरस्थमात्मन्येव पश्यति स्वप्नमध्ये सुप्तस्तु स्वप्नं च पश्यतीत्यर्थः । तथा स्वप्न एव
उत्थितः सन्नात्मानमेकदेशस्थं शयनदेशे स्थितं मन्यते जाग्रदवस्थामनुभवति एवं प्रसिद्धान्यपि जागरादीनि जीवस्थानानि जीवोपाधेर्देहस्यावस्था आत्म
नो मायामात्राणीत्येवं विज्ञाय तेषां द्रष्टारं अत एव परं तदवस्थारहितमात्मानं स्मरेत् ननु तेषां द्रष्टारमिति कथमुच्यते स्वापदशायाभावेन द्रष्टृत्वाभावात् । तत्राह ये
नेति । प्रसुप्तः पुरुषो जीवः येन रूपेणात्मना स्वापकाले आत्मनः स्वापं निर्गुणमतीन्द्रियं सुखं च वेदात्मानं ब्रह्म मामवेहि । तथा च सुखमहमस्वाप्समिति स्मृतेः संभवा

राम
५३

मा पे २ वा ३

नतु स्वापसाक्षिणा दृष्टं कथं जाग्रदवस्थः स्मरेत्। न ह्यन्येन दृष्टं अन्यः स्मरति। तत्राह। उभयं प्रस्वापं प्रतिबोधं च स्मरतः अनुसंदधतः तयोः प्रस्वापप्रतिबोधयोः प्रकाश-
कत्वेन यदन्वेति ताभ्यां व्यतिरिच्येत वा एकैकापायेप्यनपायात्। तज्ज्ञानं परं ब्रह्म तदेव न तु लिङ्गमित्यर्थः। अतो वाल्ये दृष्टस्य यौवने स्मृतिवदवस्थांतरत्वेपि स्वापानंतरं द्वयोः स्मर-
णं घटत इति भावः। तदेवंभूतं आत्मानमवेहीत्युपसंहारः। विपक्षे दोषमाह। यत्तु यदि एतत्त्वयि यत्नमपि ब्रह्मत्वं मत्स्वरूपं ब्रह्म विस्मृतं तदात्मनः सकाशाद्भिन्नं स्यात्। तत

उभयं स्मरतः पुंसः प्रस्वापप्रतिबोधयोः। अन्वेति व्यतिरिच्येत तज्ज्ञानं ब्रह्म तत्परं॥५६॥ यदेतद्विस्मृतं पुंसो मद्भावं भिन्नमात्मनः। ततः संसा-
र एतस्य देहाद्देहो मृतेर्मृतिः॥५७॥ लब्ध्वेह मानुषीं योनिं ज्ञानविज्ञानसंभवां। आत्मानं यो न बुध्येत न क्वचित्क्षेममाप्नुयात्॥५८॥ स्मृत्वेहायां प-
रिक्लेशं ततः फलविपर्ययं। अभयं चाप्यनीहायां संकल्पाद्विरमेत्कविः॥५९॥ ॥

एतस्य पुंसः संसारो भवति। संसारस्वरूपमाह। देहाद्देहं जन्मान्तरं तेषु तज्जन्ममृत्योरनंतरं मृतिश्चेति। यो ऽन्यं तं रेपि भोगादिसंपादनं शक्यं ज्ञानार्थं चैव यतितव्यमित्या-
ह लब्ध्वेति। ज्ञानं शास्त्रोक्तं विज्ञानमपरोक्षं तयोः संभवो यस्यां तां। वैराग्यार्थमाह। ईहायां प्रवृत्तिमार्गे ततः ईहातः अनीहायां निवृत्तिमार्गे तु अभयं मोक्षो भवतीति विमृश्य वा फल-
संकल्पाद्विरमेत्। पाठांतरे नो भयं परिक्लेशः फलविपर्ययश्च नास्तीत्येवं स्मृत्वा॥५९॥ ॥ ॥ ॥

एतद्विवृणोति। सुखायेति। निवृत्तिः दुःखस्य निवृत्तिः सुखस्याप्राप्तिः विज्ञा उद्यमे प्रवीणा वयमित्यभिमानवतां। स्थानत्रयविलक्षणां तुरीयं बुद्ध्वा। दृष्टश्रुताभिर्मात्राभि
रैहिकामुष्मिकैर्विषयैः स्वेन तेजसा विवेकबलेन। न वा तत्परं पुरुषार्थोऽस्तीत्याह। एतावानिति। योगनैपुण्यं यस्याः सा बुद्धिर्येषां परस्यात्मनः एकं दर्शनमिति यत् एता

सुखायदुःखमोक्षायकुर्वाते दंपती क्रियाः। ततो निवृत्तिरप्राप्तिर्दुःखस्य च सुखस्य च ॥६०॥ एवं विपर्ययं बुद्ध्वा नृणां विज्ञाभिमानिनां। आत्मनश्च गतिं
सूक्ष्मां स्थानत्रयविलक्षणां ॥६१॥ दृष्टश्रुताभिर्मात्राभिर्निर्मुक्तः स्वेन तेजसा। ज्ञानविज्ञानसंतृप्तो मद्भक्तः पुरुषो भवेत् ॥६२॥ एतावानेव मनुजैर्योगनैपु
ण्यबुद्धिभिः। स्वार्थः सर्वात्मना ज्ञेयो यत्परात्मैकदर्शनं ॥६३॥ त्वमेतच्छ्रद्धया राजन्नप्रमत्तो वचो मम। ज्ञानविज्ञानसंपन्नो धारयन्नाशु सिध्यसि ॥६४॥ ॥
॥श्रीशुक उवाच॥ ॥आश्वास्य भगवानित्थं चित्रकेतुं जगद्गुरुः। पश्यतस्तस्य विश्वात्मा ततश्चांतर्दधे हरिः ॥६५॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे
षोडशोऽध्यायः॥ ॥श्रीशुक उवाच॥ ॥यतश्चांतर्हितोऽनंतस्तस्यै कृत्वा दिशे नमः॥ विद्याधरश्चित्रकेतुश्चचार गगने चरः॥१॥ स लक्षं वर्षलक्षा
णामव्याहतबलेंद्रियः॥ स्तूयमानो महायोगी मुनिभिः सिद्धचारणैः॥२॥ कुलाचलेंद्रद्रोणीषु नानासंकल्पसिद्धिषु। रेमे विद्याधरस्त्रीभिर्गापयन्
हरिमीश्वरं ॥३॥ ॥

वानेव॥ ॥इति षष्ठे षोडशोऽध्यायः॥ ततः सप्तदशेऽमोघमहर्षिशापप्रखेचरः। विहस्य गिरिशं शापं उमाया असुरतां गतः। यतः यस्यां तस्यै दिशे नमः कृत्वा सवि
द्याधरस्त्रीभिर्हरिं गापयन् रेमे इति द्वयोरन्वयः॥ अव्याहतबलानि इंद्रियपाटवं यस्य सः। नानाविधाः संकल्पेनैव सिद्धयो यासु तासु॥३॥ ॥ ॥

अकस्माद्भुतैश्वर्यगार्वात्प्राचीनकर्मतत्स्मात्सुंरीयो निमापत्रोलवानीशापतःसङ्ग॥ ३॥ तदाह। एकदेत्यादिना। अंगीकृतां उमां तेनैकीकृत्य देवीवाङ्गनालिंगपस्थितं उवाच॥
जहास च तस्यां तिके स्थितःसङ्ग। धर्मम्वक्ता वदति शरीरिणां मध्ये मुख्यस्त्व भार्यया मिथुनीभूय वाग्मी आसा। धा वामीरा धीर्यस्य सः। नतस्य वीर्यं प्रत्यावंविद्वान् अतद्वीर्यवि

एकदा स विमानेन विष्णुदत्तेन भास्वता। गिरिशं द्रष्टुमागच्छदुपरीतं सिद्धचारणैः॥ ४॥ आलिंगपांकीकृतां देवीं वाङ्गनाम्रतिमं सदि। उवाच वेदेद्याः श्वावंत्याः
जहास सोऽद्वैस्वदंतिके॥ ५॥ चित्रकेतुरुवाच॥ ॥ एष लोकगुरुः साक्षाद्धर्मवक्ता शरीरिणां। आस्ते मुख्यः सभामध्ये मिथुनीभूय भार्यया॥ ६॥ जटाधरस्तीव्र
तपा ब्रह्मवादिसभापतिः। अंकीकृत्य स्त्रियं चास्ते गतह्रीः प्राकृतो यथा॥ ७॥ प्रायशः प्राकृताश्चापि स्त्रियं रहसि बिभ्रति। अयं महाव्रतधरो बिभर्ति सदसि
स्त्रियं॥ ८॥ भगवानपि तच्छ्रुत्वा प्रहस्यागाधधीर्नृप। तूष्णीं बभूव सदसि सभ्याश्च तदनुव्रताः॥ ९॥ इत्यतद्वीर्यविदुषि ब्रुवाणे ह्यसदीशितुः। रुषाह देवी धृष्टा
य निर्जितात्माभिमानिने॥ १०॥ ॥ पार्वत्युवाच॥ ॥ अयं किमधुना लोके शास्ता दंडधरः प्रभुः। अस्मद्विधानां दुष्टानां निर्लज्जानां च विप्रकृत्॥ [illegible]न
वेद धर्मं किल पद्मयोनिर्न ब्रह्मपुत्रा भृगुनारदाद्याः॥ न वै कुमारः कपिलो मनुश्च ये नो निषेधंत्यतिवर्तिनं हरं॥ ११॥ [illegible]यषामनुध्येयपदाब्जयुग्मं जगद्गु
रुं मंगलमंगलं स्वयं। यः क्षत्रबंधुः परिभूय सूरीन्प्रशास्ति धृष्टस्तदयं हि दंड्यः॥ १२॥ ॥ ॥

ह्यात्मनिर्जितात्मा। तिमानिनेजितें द्रियो ह्मित्यतिमानवतो तिरुषाक्रोधेनाह। विकृद्वं प्रकर्षेणाकरोतीति विप्रकृत् तत्प्रतिवर्तिनं शास्त्रमतिक्रम्य वर्तमानशीलं ये नो निषेधं
ति त्वारयंति। एषां ब्रह्मादीनां अनुध्येयपदाब्जयुग्मं यस्य मंगलं परमधर्मवृत्तिं सूरीन्परिभूय अतो नृक्षत्रबंधुरुयंः प्रशास्ति तस्मात्। १२॥ ॥

भा॰ष॰
५५

न तु हरिलक्तो नर्दंडार्ह इति चेत्तत्राह। नायं साधुभिः परिसेवितं वैकुंठस्य पादमूलमुपसर्पणमर्हतीति। यतः संभावितो अहमधिक इति कृता मतिर्येन अत एव स्तब्धः अनम्रः। तत
देव स्वयं दंड्यत्वं निश्चित्य तं प्रत्याह। अत इति हे पुत्र यथा भूयः महतां किल्बिषमपराधं न करिष्यसि। तथा याहीत्यर्थः। पूर्वदिष्टं प्राचीनकर्मप्राप्तमेव दुःखं संसा

नायमर्हति वैकुंठपादमूलोपसर्पणं। संभावितमतिः स्तब्धः साधुभिः पर्युपासितं॥२३॥ अतः पापीयसीं योनिमासुरीं याहि दुर्मते। यथेह भूयो महतां न क
र्ता पुत्र किल्बिषं॥२४॥ श्रीशुक उवाच॥ ॥एवं शप्तश्चित्रकेतुर्विमानादवरुह्य सः। प्रसादयामास सतीं मूर्ध्ना नम्रेण भारत॥२५॥ ॥चित्रकेतुरु
वाच॥ ॥प्रतिगृह्णामि ते शापमात्मनोंजलिनांबिके। देवैर्मर्त्याय यत्प्रोक्तं पूर्वदिष्टं हि तस्य तत्॥२६॥ संसारचक्र एतस्मिन् जंतुरज्ञानमोहितः।
भ्राम्यन् सुखं च दुःखं च भुंक्ते सर्वत्र सर्वदा॥२७॥ नैवात्मा न परश्चापि कर्ता स्यात्सुखदुःखयोः। कर्तारं मन्यते प्राज्ञ आत्मानं परमेव च॥२८॥ गुणप्रवा
ह एतस्मिन् कः शापः को न्वनुग्रहः। कः स्वर्गो नरकः को वा किं सुखं दुःखमेव वा॥२९॥ एकः सृजति भूतानि भगवानात्ममायया। एषां बंधं च मोक्षं च सुखं दुःखं
च निष्कलः॥३०॥

तव
मया

चक्रस्वतावप्रवर्तनविचित्रं इत्याह संसारचक्र इति। अत एवात्र मम अयं न कोपि दोष इत्याह। नैवेति। एवं तावत्सुखदुःखादिकमंगीकृत्योक्तं इदानीं तदपि वस्तुतो नास्तीत्याह गुणा
नां मायायाः नां प्रवाहे संसारो न तु मायागुणानां स्वयं प्रवाह इत्यर्थः। हितिषां जडत्वात् अहं धर्मो हृष्टः अतः उभयोर्न स्यात्तत्राह। एकः परमेश्वरो मायया निमित्तभूतया भूतानि प्राणिनः सृजति॥
एषां बंधादिकं च सृजति। निष्कलः स्वयं बंधादिस्पृष्टः॥३०॥ ॥ ॥

राम
५५

नैबस्याभावादि

नन्वेवंभूतविषमदृष्टेस्तस्य किंकारणं प्रियादित्याशंक्य यद्यपि प्रियादयो न संति तथापि तत्कर्मवशात्सर्वं घटत इत्याह। न तस्येति द्वाभ्यां। प्रीतिविषयः न ज्ञातिर्वंधुर्द्वेषविषयः परः स्वः त
न हेतुः। सर्वत्र समस्य तत् कुतः निरंजनस्य तत्संगास्पद अत एव तन्निमित्ते सुखे रागो नास्ति। रागाद्येवं क्रोधो रोषः कुतः स्यात्। यद्यप्येवं तथापि तस्य शक्त्या मायया मायाविसर्गः सृष्टिः पुण्यप
पापादिलक्षणं कर्म एषां शरीरिणां सुखाद्यर्थमवकल्पते। समर्थो भवति। यथोक्तं गीतासु। भूतभावोद्भवकरो विसर्गः कर्मसंज्ञित इति। अथ तस्माद्धे भामिनि कोपं न

न तस्य कश्चिद्दयितः प्रतीपो न ज्ञातिबंधुर्न परो न च स्वः॥ समस्य सर्वत्र निरंजनस्य सुखे न रागः कुत एव रोषः॥२२॥ तथापि तच्छक्तिविसर्ग एषां सुखाय दुःखाय हिताहिताय। बंधाय मोक्षाय च मृत्युजन्मनोः शरीरिणां संसृतयेवकल्पते॥२३॥ अथ प्रसादये न त्वां शापमोक्षाय भामिनि। यन्मन्यसे ह्यसाधूक्तं मम तत् क्षम्यतां सति॥२४॥ ॥श्रीशुक उवाच॥ ॥इति प्रसाद्य गिरिशौ चित्रकेतुररिंदम। जगाम स्वविमानेन पश्यतोः स्मयतोस्तयोः॥२५॥ ततस्तु भगवान्रुद्रो रुद्राणीमिदमब्रवीत्। देवर्षिदैत्यसिद्धानां पार्षदानां च शृण्वतां॥२६॥ ॥रुद्र उवाच॥ ॥दृष्टवत्यसि सुश्रोणि हरेरद्भुतकर्मणः। माहात्म्यं भृत्यभृत्यानां निस्पृहाणां महात्मनां॥२७॥ नारायणपराः सर्वे न कुतश्चन बिभ्यति। स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः॥ ॥

न२

त्वां केवलं प्रसादयामि किंतु शापमोक्षाय तर्हि किं प्रसादनेनात आह। ममोक्तं साध्वपि असाधुवन्मन्यसे। तत्त्वया क्षम्यतां। गिरिशौ भवानीशंकरौ प्रसाद्य स्मयतोर्विस्मयं कुर्वतोः सतोः स्वर्गादिष्वपि तुल्योर्थः प्रयोजनमिति द्रष्टुं शीलं येषां ते तथा॥ ॥ ॥

तत्र तदुक्तमेव हेतुमाह। द्वाभ्यां देहिनां सुखदुःखमिथ्या द्वंद्वानि ईश्वरस्य लीलया मायया भवंति। तेषु च गुणदोषविकल्प इत्येवं तत्त्वयः इष्टानिष्टभेद इव यः स्फुरति स च आत्मन्यर्थभेदः सुखादिभेदः पुंसः स्वप्ने यथा अविवेककृतो भवति। स्रजि वत् सर्पभ्रमः मालादिर्यथा तथैव कृत इत्यर्थः। अव्ययादिति वक्तव्ये अज्ञीत्यार्षपाठांतरे तु स्रुगामं। अतो भागवतानां निस्पृहत्वमुचितमेवेत्याह। वासुदेव इति। ज्ञानवैराग्ययोश्च बलं वीर्यं येषां। व्यपाश्रयः विशिष्टं तु ध्याश्रयणीयो ऽर्थो नास्ति। अस्य च हरि

देहिनां देहसंयोगात् द्वंद्वानीश्वरमायया। सुखं दुःखं मृतिर्जन्म शापोऽनुग्रह एव च। २९॥ अविवेककृतः पुंसो ह्यर्थभेद इवात्मनि। गुणदोषविकल्पश्च भिदेव स्रजिवत्कृतः। ३०॥ वासुदेवे भगवति भक्तिमुद्वहतां नृणां। ज्ञानवैराग्यवीर्याणां नेह कश्चिद्व्यपाश्रयः॥ ३१॥ नाहं विरिंच्यो न कुमारनारदौ न ब्रह्मपुत्रा मुनयः सुरेशाः॥ विदाम यस्येहितमंशकांशका न तत्स्वरूपं पृथगीशमानिनः॥ ३२॥ न ह्यस्यास्ति प्रियः कश्चिन्नाप्रियः स्वः परोऽपि वा॥ आत्मत्वात्सर्वभूतानां सर्वभूतप्रियो हरिः॥ ३३॥ तस्य वायं महाभागश्चित्रकेतुः प्रियोऽनुगः॥ सर्वत्र समदृक्शांतो ह्यहं चैवाच्युतप्रियः॥ ३४॥ तस्मान्न विस्मयः कार्यः पुरुषेषु महात्मसु॥ महापुरुषभक्तेषु शांतेषु समदर्शिषु॥ ३५॥ श्रीशुक उवाच॥ ॥ इति श्रुत्वा भगवतः शिवस्योमाभिभाषितं। बभूव शांतधी राजन्देवी विगतविस्मया। ३६॥ ॥ ॥

दासत्वेन तत्स्वभावान्नैतच्चित्रमिति व कुं ~~स्वस्मिन्नपि महात्म्यमाह। नाहमिति किंतु~~ हरेर्माहात्म्यमाह। नाहमिति द्वाभ्यां ईहितमभिप्रायं लीलां वा यद्वा यस्य वयं न विद्मः यद्वा तस्य स्वरूपं अंशकांशका अपि मंतः पृथगीश्वमानिनो न विदुरेव। अत एव हरिरपि सर्वेषां भूतानां प्रियः। अहं चैवाच्युतस्य प्रियः तस्मान्ममास्मिन्[illegible]भावो नाभूदिति भावः।

॥ चतुर्थ ४

॥ मुयामा[illegible]देवस्यपदं [illegible]हैः ॥ ६ ॥

भा॰ च॰

१

॥श्रीगणेशाय नमः॥ ॥श्रीपरमहंसास्वादितचरणकमलचिन्मकरंदाय भक्तजनमानसनिवासाय श्रीकृष्णाय॥ अथैकत्रिंशताध्यायैर्विसर्गोऽत्र ईर्यते। विसर्गस्त्वीश्वराधीनैर्ब्रह्ममन्वादिभिः कृतः। तत्र तु प्रथमे ध्याये मनुकन्यान्वयाः पृथक्। वर्ण्यन्ते यत्र यज्ञादिमूर्तिभिः प्रभवो हरेः। मनुकन्यान्वयं विस्तरेण वक्तुमाह। मनोस्त्विति। चकाराद्द्वौ पुत्रौ वा ॥१॥ तुशब्दाद्द्व्यतोऽपि पुत्रवत्त्वं सूचितं तद्दर्शयितुमाह। पुत्रिकाधर्ममाश्रि

श्रीमैत्रेय उवाच ॥ ॥ मनोस्तु शतरूपायां तिस्रः कन्याश्च जज्ञिरे। आकूतिर्देवहूतिश्च प्रसूतिरिति विश्रुताः ॥१॥ आकूतिं रुचये प्रादादपि भ्रातृमतीं नृपः। पुत्रिकाधर्ममाश्रित्य शतरूपानुमोदितः ॥२॥ प्रजापतिः स भगवान् रुचिस्तस्यामजीजनत्। मिथुनं ब्रह्मवर्चस्वी परमेण समाधिना ॥३॥ यस्तयोः पुरुषः साक्षाद्विष्णुर्यज्ञस्वरूपधृक्। या स्त्री सा दक्षिणा भूतेरंशभूताऽनपायिनी ॥४॥ आनिन्ये स्वगृहं पुत्र्याः पुत्रं विततरोचिषम्। स्वायंभुवो मुदा युक्तो रुचिर्जग्राह दक्षिणाम् ॥५॥ तां कामयानां भगवानुवाह यजुषां पतिः। तुष्टायां तोषमापन्नोऽजनयद्द्वादशात्मजान् ॥६॥ ॥ ॥

त्येति। अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृताम्। अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति। माषावंधेन कन्यादानं पुत्रिकाधर्मः। स चाभ्रातृकायां कन्यायां भ्रात्रर्थिन एव प्रसिद्धस्तथाऽपि पुत्रवाञ्छया कामस्तथा कृतवानित्याह। भ्रातृमतीमपीति ॥२॥ मिथुनं पुत्रं स्त्रियं च स्वसमाधिना ईश्वरध्यानेन। भूतेर्लक्ष्म्या अंशभूता। अतस्तयोर्विवाहो न विरुद्ध इति भावः ॥४॥ यजुषां यज्ञानां मन्त्राणां वा पतिर्विष्णुः ॥६॥ ॥राम॥

१

द्विषट् द्वादश ॥ ७ ॥ प्रसंगात्स्वायंभुवमन्वंतरगतं षट्कमाह। तुषिता इति द्वाभ्यां। मन्वंतरं मनुर्देवा मनुपुत्राः सुरेश्वरः। ऋषयोंऽशावताराश्च हरेः षड्वि
धमुच्यत इति वक्ष्यति। तत्र स्वायंभुवो मनुः। तुषिता देवाः। मरीचिप्रमुखाः सप्तर्षयः। यज्ञो हरेरवतारः स एव सुरगणेश्वर इंद्रः। प्रियव्रतोत्तानपादौ
मनुपुत्रौ पृथ्वीपालकौ। तदेवं यज्ञस्य देहरूपेण षड्विधत्वं तयोः पुत्रपौत्रनप्तॄणां वंशैरनुवृत्तं ब्रह्मांडं पालितं तन्मन्वंतरं ॥ ९ ॥ कृतप्रायं वाहुल्येन श्रु

तोषः प्रतोषः संतोषो भद्रः शांतिरिडस्पतिः इध्मः कविर्विभुः स्वह्नः सुदेवो रोचनो द्विषट् ॥ ७ ॥ तुषिता नाम ते देवा आसन्स्वायंभु
वांतरे। मरीचिमिश्रा ऋषयो यज्ञः सुरगणेश्वरः ॥ ८ ॥ प्रियव्रतोत्तानपादौ मनुपुत्रौ महौजसौ। तत्पुत्रपौत्रनप्तॄणामनुवृत्तं त
दंतरं ॥ ९ ॥ देवहूतिमदात्तात कर्दमायात्मजां मनुः। तत्संबंधि श्रुतप्रायं भवता गदतो मम ॥ १० ॥ दक्षाय ब्रह्मपुत्राय प्रसूतिं भगवा
न्मनुः। प्रायच्छद्यत्कृतः सर्गस्त्रिलोक्यां विततो महान् ॥ ११ ॥ याः कर्दमसुताः प्रोक्ता नव ब्रह्मर्षिपत्नयः। तासां प्रसूतिप्रसवं
प्रोच्यमानं निबोध मे ॥ १२ ॥ पत्नी मरीचेस्तु कला सुषुवे कर्दमात्मजा। कश्यपं पूर्णिमानं च ययोरापूरितं जगत् ॥ १३ ॥ पूर्णिमासूत
विरजं विश्वगं च परंतप। देवकुल्यां हरेः पादशौचाद्याभूत्सरिद्दिवः ॥ १४ ॥ अत्रेः पत्न्यनसूया त्रीन्जज्ञे सुयशसः सुतान्। दत्तं
दुर्वाससं सोममात्मेशब्रह्मसंभवान् ॥ १५ ॥ विदुर उवाच ॥ अत्रेर्गृहे सुरश्रेष्ठाः स्थित्युत्पत्त्यंतहेतवः। किंचिच्चिकीर्षवो जाता एतदाख्या
हि मे गुरो ॥ १६ ॥

द्विः

तां तत्कन्यावंशानामश्रुतत्वात्प्रायग्रहणं ॥ १० ॥ प्रसूतिप्रसवं पुत्रपौत्रादिविस्तारं ॥ १२ ॥ ययोर्वंशेनापूरितं ॥ १३ ॥ कश्यपस्य वंशं षष्ठे वक्ष्यति। द्वितीयस्य वंशमाह पू
र्णिमेति देवकुल्या नाम कन्यां चाह हरेः पादप्रक्षालनाज्जन्मांतरे या दिवः सरिद्गंगाऽभूत् अत एव देवकुल्या देवकुलयोग्या तां ॥ १४ ॥ आत्मेशब्रह्मसंभवान् विष्णुरुद्रब्रह्म

कुल्यां

भा॰ च॰

ऋक्षं नाम कुलाद्रिं तपसि स्थितः सन् ॥१७॥ तस्मिन्कुलाद्रौ प्रसूनानां स्तवका येषु पलाशाशोकेषु तेषां कानने निर्विंध्याया नाम नदी तस्याः स्रवद्भिर्वार्भिरुद्घुष्टेना

२ एधः

दिते ॥१८॥ प्राणायाम एवैधः संदीपको यस्याग्नेस्तेन मुनेर्मूर्ध्नो निर्गतेनाग्निना तप्यमानं समीक्ष्य तदाश्रमपदं ययुरित्यन्वयः ॥२२॥ अप्सरसः प्रभृतिभिर्वितायमानं विस्तार्यमा

मैत्रेय उवाच ॥ ब्रह्मणा चोदितः सृष्टावत्रिर्ब्रह्मविदां वरः। सह पत्न्या ययावृक्षं कुलाद्रिं तपसि स्थितः ॥१७॥ तस्मिन् प्रसूनस्तबकपलाशा
शोककानने। वार्भिः स्रवद्भिरुद्घुष्टे निर्विंध्यायाः समंततः ॥१८॥ प्राणायामेन संयम्य मनो वर्षशतं मुनिः। अतिष्ठदेकपादेन निर्द्वंद्वोऽनि
लभोजनः ॥१९॥ शरणं तं प्रपद्येहं य एव जगदीश्वरः। प्रजामात्मसमां मह्यं प्रयच्छत्विति चिंतयन् ॥२०॥ तप्यमानं त्रिभुवनं प्राणाया

४

मैधसाग्निना। निर्गतेन मुनेर्मूर्ध्नः समीक्ष्य प्रभवस्त्रयः ॥२१॥ अप्सरोमुनिगंधर्वसिद्धविद्याधरोरगैः। वितायमानयशस
स्तदाश्रमपदं ययुः ॥२२॥ तत्प्रादुर्भावसंयोगविद्योतितमना मुनिः। उत्तिष्ठन्नेकपादेन ददर्श विबुधर्षभान्। प्रणम्य दंडव
द्भूमावुपतस्थेऽर्हणांजलिः। वृषहंससुपर्णस्थान् स्वैः स्वैश्चिह्नैश्च चिह्नितान् ॥२४॥ कृपावलोकेन हसद्वदनेनोपलंभिता
न्। तद्रोचिषा प्रतिहते निमील्य मुनिरक्षिणी। चेतस्तत्प्रवणं युंजन्नस्तावीत्संहतांजलिः। श्लक्ष्णया सूक्तया वाचा सर्वलो
कगरीयसः ॥२६॥ ॥ श्रीरामचंद्राय नमः ॥ ॥ राम ॥ ॥ राम ॥ ॥

णं यशः येषां ते ॥२२॥ तेषां प्रादुर्भावः प्राकट्यं तस्य संयोगः संनिधिः तेन विद्योतितं मनो यस्य उत्कर्षेण तिष्ठन् ॥२३॥ अर्हणं पाद्यादिकमंजलौ यस्य उपतस्थे पू
जयामास वृषाद्यारूढान्। स्वैः स्वैश्चिह्नैः त्रिशूलकमंडलुचक्रादिभिः ॥२४॥ कृपया लोको यस्मिन् हसच्च तद्वदनं च तेन उपलंभितान् प्रसन्नत्वेन ज्ञापितान्
तेषां रोचिषा दीप्त्या ॥२५॥ श्लक्ष्णया मकरया सूक्तया गंभीरार्थया ॥२६॥ ॥

२

अनुयुगं कल्पे कल्पे विभज्य गृहीतो देहो यैस्ते प्रसिद्धा ब्रह्मविष्णुगिरिशाः पूर्वं वः युष्मान् प्रणतोऽस्मि तेभ्यः सकाशादेक एव मे मया उपहूतः शरणं तं प्रपद्ये इत्ये
कस्यैव निर्दिष्टत्वात् । स च युष्मास्वेक इति युष्माभिरेव कथ्यतामित्यर्थः ॥ २७ ॥ अस्य प्रपंच एक इति विविधैः प्रधानैरुपचारैः विभुः प्रधान इति वा पाठः ॥ प्र
जननाय पुत्रोत्पत्त्यै चित्तीकृतः । चित्ते नैकं नीतः । मनसोऽपि दूराः अगोचराः सन्तः कथं नु त्रयोऽप्यत्रागताः ॥ २८ ॥ तेत्वयाय यथा कृतः संकल्पस्तेन तथैव भा

अत्रिरुवाच ॥ विश्वोद्भवस्थितिलयेषु विभज्यमानैर्मायागुणैरनुयुगं विगृहीतदेहाः । ते ब्रह्मविष्णुगिरिशाः प्रणतोऽस्म्यहं वस्तेभ्यः क एव
भवतां म इहोपहूतः ॥ २७ ॥ एको मयेह भगवान् विविधप्रधानैश्चित्तीकृतः प्रजननाय कथं नु यूयम् । अत्रागतास्तनुभृतां मनसोऽपि दूरा
द्ब्रूत प्रसीदत महानिह विस्मयो मे ॥ २८ ॥ मैत्रेय उवाच ॥ इति तस्य वचः श्रुत्वा त्रयस्ते विबुधर्षभाः । प्रत्याहुः श्लक्ष्णया वाचा प्रह
स्य तमृषिं प्रभो ॥ देवा ऊचुः ॥ यथा कृतस्ते संकल्पो भाव्यं तेनैव नान्यथा । सत्संकल्पस्य ते ब्रह्मन् यद्वै ध्यायति ते वयं ॥ ३० ॥ अथा
स्मदंशभूतास्ते आत्मजा लोकविश्रुताः । भवितारोऽङ्ग भद्रं ते विस्रप्स्यंति च ते यशः ॥ ३१ ॥ एवं कामवरं दत्त्वा प्रतिजग्मुः सुरेश्वराः ।
सभाजितास्तयोः सम्यग्दंपत्योर्मिषतोस्ततः ॥ ३२ ॥ श्रीरामचंद्राय नमः ॥

व्यं नान्यथा यतः सत्संकल्पस्य ते संकल्पः । तर्हि कथमेकस्मिन् ध्यायमाने त्रयः प्रतीताः स्थ तत्राहुः यदेकं जगदीश्वरं त्वं तत्त्वं भवान् ध्यायति त ए
ते वयं त्रयोऽपि न दैवैकं ततत्वं नास्माकं भेदोऽस्तीत्यर्थः ॥ ३० ॥ विस्रप्स्यंति विस्तारयिष्यंति । अंतर्भूतणिजर्थः स्पष्टं गतात्वित्यस्य स्वरूपं ॥ ३१ ॥ तालांस
म्यक् सभाजिताः संतः ततः स्थानात् प्रतिजग्मुः ॥ ३२ ॥

मू

भा०च०
३

निबोधवुध्यस्व ॥ ३३ ॥ ताः कन्या निर्दिशति सिनीवालीति ॥ ३४ ॥ पुलस्त्यः हविर्भुविपत्न्यामित्यन्वयः। सोमस्य। दह्नाग्निर्जाठरः। विश्रवा पुलस्त्यस्य सुत इति शेषः ॥ ३६ ॥ तस्य विश्रवस इडिविडायां जातः कुवेरः। अन्यस्यां भार्यायां केशिन्यां रावणादयस्त्रयः सुताः ॥ ३७ ॥ ज्वलतः प्रकाशमानान् ॥ ३८ ॥ चित्रके

कु२ हृ१ बा२

सोमोऽत्रिर्ब्रह्मणोंऽशेन दत्तो विष्णोस्तु योगवित्। दुर्वासाः शंकरस्यांशो निबोधांगिरसः प्रजाः ॥ ३३ ॥ श्रद्धायां त्वंगिरसः पत्नी चतस्रोऽसूत कन्यकाः। सिनीवाली कुहू राका चतुर्थ्यनुमतिस्तथा ॥ ३४ ॥ तत्पुत्रावपरावास्तां ख्यातौ स्वारोचिषेऽन्तरे। उतथ्यो भगवान्साक्षाद्ब्रह्मिष्ठश्च बृहस्पतिः ॥ ३५ ॥ पुलस्त्योऽजनयत्पत्न्यामगस्त्यं च हविर्भुवि। सोऽन्यजन्मनि दह्राग्निर्विश्रवाश्च महातपाः ॥ ३६ ॥ तस्य यक्षपतिर्देवः कुवेरस्त्विलिविलासुतः। रावणः कुंभकर्णश्च तथाऽन्यस्यां विभीषणः ॥ ३७ ॥ पुलहस्य गतिर्भार्या त्रीनसूत सती सुतान्। कर्मश्रेष्ठं वरीयांसं सहिष्णुं च महामते ॥ ३८ ॥ क्रतोरपि क्रिया भार्या वालिखिल्यानसूयत। ऋषीन्षष्टिसहस्राणि ज्वलतो ब्रह्मतेजसा ॥ ३९ ॥ ऊर्जायां यज्ञिरे पुत्रा वसिष्ठस्य परंतप। चित्रकेतुप्रधाना वै सप्त ब्रह्मर्षयोऽमलाः ॥ ४० ॥ चित्रकेतुः सुरोचिश्च विरजा मित्र एव च। उल्बणो वसुभृद्यानो द्युमान्शक्त्यादयोऽपरे ॥ ४१ ॥ चित्तिस्त्वथर्वणः पत्नी लेभे पुत्रं धृतव्रतं। दध्यंचमश्वशिरसं भृगोर्वंशं निबोध मे ॥ ४२ ॥ भृगुः ख्यात्यां महाभागः पत्न्यां पुत्रानजीजनत्। धातारं च विधातारं श्रियं च भगवत्परां ॥ ४३ ॥ आयतिं नियतिं चैव सुते मेरुस्तयोरदात्। ताभ्यां तयोरभवतां मृकंडः प्राण एव च। मार्कंडेयो मृकंडस्य प्राणाद्वेदशिरा मुनिः ॥ ४४ ॥

ऊर्जायां

तुप्रमुखा जज्ञिरे ते च सप्तर्षयो जाताः ॥ ४० ॥ तानेवाह। चित्रकेतुरिति वसुभृद्यानो नामैकः शक्त्यादयोऽपरे अन्यस्याः पुत्राः ॥ ४० ॥ ख्यात्यां पत्न्यां पुत्रान् पुत्रौ पुत्रीं चाजीजनत्। तानेवाह। धातारमिति ॥ ४३ ॥ तयोर्धातृविधात्रोः ॥ ४४ ॥

३

कविश्च भार्गवः भृगोः पुत्रः ॥ ४५ ॥ अजात्मजः ब्रह्मपुत्रः ॥ ४७ ॥ युक्तेभ्यः संयतेभ्यः मिलितेभ्यो वा ॥ ४८ ॥ सर्वेषां गुणानां उत्पत्तिर्यस्यां सा ॥ ५२ ॥ उपतस्थुः मेजुः ॥ ५४ ॥ निजमायया यायस्मिन्नात्मनि खे गगने रूपभेदं गंधर्वनगरमिव इदं विश्वं विरचितं तस्यात्मनः प्रतिबन्धरूणाय प्रकाशनाय आत्मानं यो

कविश्च भार्गवो यस्य भगवानुशना सुतः । सर्वे ते मुनयः क्षत्तर्लोकान् सर्गैरभावयन् ॥ ४५ ॥ एष कर्दमदौहित्रसंतानः कथितस्तव । शृण्वतः श्रद्दधानस्य सद्यः पापहरः परः ॥ ४६ ॥ प्रसूतीं मानवीं दक्ष उपयेमे ह्यजात्मजः । तस्यां ससर्ज दुहितॄः षोडशाऽमललोचनाः ॥ ४७ ॥ त्रयोदशादाद्धर्माय तथैकामग्नये विभुः । पितृभ्य एकां युक्तेभ्यो भवायैकां भवच्छिदे ॥ ४८ ॥ श्रद्धा मैत्री दया शांतिस्तुष्टिः पुष्टिः क्रियोन्नतिः । बुद्धिर्मेधा तितिक्षा ह्रीर्मूर्तिर्धर्मस्य पत्नयः ॥ ४९ ॥ श्रद्धाऽसूत शुभं मैत्री प्रसादमभयं दया । शांतिः सुखं मुदं तुष्टिः स्मयं पुष्टिरसूयत ॥ ५० ॥ योगं क्रियोन्नतिर्दर्पमर्थं बुद्धिरसूयत । मेधा स्मृतिं तितिक्षा तु क्षेमं ह्रीः प्रश्रयं सुतं ॥ ५१ ॥ मूर्तिः सर्वगुणोत्पत्तिर्नरनारायणावृषी । ययोर्जन्मन्यदो विश्वमभ्यनंदत्सुनिर्वृतं ॥ ५२ ॥ मनांसि ककुभो वाताः प्रसेदुः सरितोऽद्रयः । दिव्यऽवाद्यंत तूर्याणि पेतुः कुसुमवृष्टयः ॥ ५३ ॥ मुनयस्तुष्टुवुस्तुष्टा जगुर्गंधर्वकिन्नराः । नृत्यंति स्म स्त्रियो देव्य आसीत्परममंगलं । देवा ब्रह्मादयः सर्वे उपतस्थुरभिष्टवैः ॥ ५४ ॥ यो मायया विरचितं निजयाऽऽत्मनीदं खे रूपभेदमिव तत्प्रतिचक्षणाय । एतेन धर्मसदने ऋषिमूर्तिनाद्य प्रादुश्चकार पुरुषाय नमः परस्मै ॥ ५५ ॥

घप्रादुश्चकार प्रकटितवान् तस्मै पुरुषाय नमः । किं केन रूपेण प्रादुश्चकार ऋषेर्मूर्तिरिकारो यस्मिन् तेनैतेन रूपेण ॥ ॥

भा॰ च॰ सोयं नो स्मान् सुरगणान् अनल्पकरुणायुक्तेन विलोकनेन विशिष्टनेत्रेन दृश्यात् पश्यतु । यच्छ्रीनिकेतममलमरविंदं तत् क्षिपता तिरस्कुर्वता ।
कथंभूतः अनुमेयं शास्त्रतो विचार्यं न तु स्माकं प्रत्यक्षं तत्त्वं यस्य । कथंभूतान् स्मान् । स्थितेर्जगन्मर्यादाया व्यतिकरो ऽन्यथात्वं तस्योपशमाय
सत्त्वेन गुणेन सृष्टान् ॥ ५६ ॥ लब्धोऽवलोको येः सुरगणैः तैरर्चितौ अर्चितौ च संतौ ययतुः ॥ ५७ ॥ भुवो भारस्य व्ययाय नाशाय
चकार एकवाक्यार्थः तौ च सांप्रतमिहागतावित्यर्थः । तदुक्तं तत्रैव अर्जुनेन नरावेशः कृष्णो नारायणः स्वयमिति । यदु इ हः ॥ श्रीस्वालंकृ

४

सोयं स्थितिव्यतिकरोपशमाय सृष्टान् सत्त्वेन नः सुरगणान् अनुमेयतत्त्वो दृश्याददभ्रकरुणेन विलोकनेन यच्छ्रीनिकेतम
मलं क्षिपदरविंदं ॥ ५६ ॥ एवं सुरगणैस्तात भगवंतावभिष्टुतौ । लब्धावलोकैर्ययतुरर्चितौ गंधमादनं ॥ ५७ ॥ ताविमौ वै
भगवतो हरेरंशाविहागतौ । भारव्ययाय च भुवः कृष्णौ यदुकुरूद्वहौ ॥ ५८ ॥ स्वाहाभिमानिनश्चाग्नेरात्मजांस्त्रीनजीजनत् ।
पावकं पवमानं च शुचिं च हुतभोजनं ॥ ५९ ॥ तेभ्योऽग्नयः समभवन् चत्वारिंशच्च पंच च । त एवैकोनपंचाश
त् साकं पितृपितामहैः ॥ ६० ॥ वैतानिके कर्मणि यन्नामभिर्ब्रह्मवादिभिः । आग्नेय्य इष्टयो यज्ञे निरूप्यंतेऽग्नयस्तु ते
॥ ६१ ॥ अग्निष्वात्ता बर्हिषदः सौम्याः पितर आज्यपाः । साग्नयोऽनग्नयस्तेषां पत्नी दाक्षायणी स्वधा ॥ ६२ ॥

ता॰

रूद्वहोऽर्जुनः तावपि कृष्णनामानौ ॥ ५८ ॥ अग्न्यभिमानिनो देवान् स्वाहानामतश्च जायी । हुतभोजनमिति त्रयाणां विशेषणं ॥ ५९ ॥
पितरस्त्रयः पितामह एकः तैः सार्कं सह ॥ ६० ॥ वैतानिके वैदिके कर्मणि यैर्येषां नामभिरभिदेवताका इष्टयो निरूप्यंते क्रियंते तान्
एतेऽग्नयो न लौकिकाः अतो बहूनां नैवयथ्यमिति भावः ॥ ६१ ॥ सोम्याः सोमपाः ये धामयोकरणमस्ति ते साग्नयः तद्रहिता अनग्न
यः ॥ ६२ ॥

४

२ स

तयोस्तु संततिर्नास्ति वत्स जीवन्मुक्तत्वादित्याह। न लेभे इति ॥६३॥ गुणशीलतः आत्मनः सदृशं देवमनुव्रताऽपि सती पुत्रं न लेभे ॥६४॥ तत्र हेतुः। पितरि दक्षे अप्रतिरूपे अदोषे द्वेषप्रतिकूले सतीत्यर्थः। आत्मनाद्य यमेवात्मानं देहमजहान्नुत्यक्तवती। योगसंयुता योगमाश्रित्येति ॥६५॥ ॥ चतुर्थे प्रथमोध्यायः ॥ ॥ द्वितीये प्रथमाध्यायोपक्षिप्त भवदक्षयोः। विद्वेषवर्ण्यते हेतुर्विश्वसृग्यज्ञसंभवः। सतीं सतीनाम्नीं ॥२॥ ॥ नवासौ कस्यचिद्द्वेषार्ह इत्याह। क इति। चराचरगुरुं जगतो दैवतं को द्वेष्टि कथं च निर्वैरं द्वेष्टि। निर्वैरत्वे हेतुः। शांतः। शांतिरेव विग्रहो यस्य। कुतः। आत्मने

तेस्योदधारकच्येदेवपुनांधारणीस्वधा। उभेते ब्रह्मवादिन्यौ ज्ञानविज्ञानपारगे ॥६३॥ भवस्य पत्नी तु सती भवं देवमनुव्रता। आत्मनः सदृशं पुत्रं न लेभे गुणशीलतः ॥६४॥ पितर्यप्रतिरूपे स्वे भवायानागसे रुषा। अप्रौढैवात्मनाऽत्मानमजहाद्योगसंयुता ॥६५॥ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे दाक्षायणंनाम प्रथमोध्यायः ॥ ॥ विदुर उवाच ॥ ॥ भवे शीलवतां श्रेष्ठे दक्षो दुहितृवत्सलः। विद्वेषमकरोत्कस्मादनादृत्यात्मजां सतीं। कस्तं चराचरगुरुं निर्वैरं शांतविग्रहं। आत्मारामं कथं द्वेष्टि जगतो दैवतं महत् ॥२॥ एतदाख्याहि मे ब्रह्मन्नू जामातुः श्वशुरस्य च। विद्वेषस्तु यतः प्राणांस्तत्यजे दुस्त्यजान्सती ॥३॥ श्रीमैत्रेय उवाच ॥ पुरा विश्वसृजां सत्रे समेताः परमर्षयः। तथामरगणाः सर्वे सानुगा मुनयोऽग्नयः ॥४॥ तत्र प्रविष्टं मुनयो दृष्ट्वार्कमिव रोचिषा। भ्राजमानं वितिमिरं कुर्वंतं तन्महत्सदः। उदतिष्ठन्सदस्यास्ते स्वधिष्ण्येभ्यः सहाग्नयः। ऋते विरिंचं शर्वं च तद्भासाक्षिप्तचेतसः ॥६॥

वारामो रतिर्यस्य तं। यद्वा कः प्रजापतिर्दक्षः कथं द्वेष्टि। एवंभूते तस्मिन्द्वेषो युक्तोऽशक्य इत्यर्थः ॥२॥ यतो हेतोर्विद्वेषः। यतो विद्वेषात्प्राणांस्त्याज एतदाख्याहि ॥३॥ तदेवाख्यातुमितिहासं प्रस्तौति। पुरेति। समेता आसन्। प्रविष्टं दक्षमिति शेषः। महत्सदः महती सभा ॥५॥ स्वधिष्ण्येभ्यः

प्राकृसोपवेशनात्सर्वमेव निषसमुपविष्टं मृडं शिवं । नदनात्तः । तेनाभ्युत्थानादितिरस्कृतादरः नाष्टपततेनासहता । वामं वक्रं यथा लवति तथा विवी
क्ष्य ॥ ८ ॥ मेवचनं श्रूयतां । अज्ञानान्मत्सराद्वा न तु वतः ॥ ९ ॥ सद्भिर्नत्वचितक्रियाप्रथ्येनाधृष्टेनेति पाठे लष्टेन ॥ १० ॥ तदेवाह । एषइति । यद्यस्मात् वि
प्राग्निसमक्षं सावित्रीतुल्यायामे दुहितुः पाणिमग्रहीत् ॥ ११ ॥ मृगशावस्य हरिणबालस्याक्षिणी इवाक्षिणी यस्याः । प्रत्युत्थानाभिवादार्हे मयि उचि

सदसस्पतिभिर्दक्षो भगवान्साधु सत्कृतः । अजं लोकगुरुं नत्वा निषसाद तदाज्ञया ॥ प्राङ्निषण्णं मृडं दृष्ट्वा नामृष्यत्तदनादृतः । उवा
च वामं चक्षुर्भ्यामभिवीक्ष्य दहन्निव ॥ ८ ॥ श्रूयतां ब्रह्मर्षयो मे सहदेवाः सहाग्नयः । साधूनां ब्रुवतो वृत्तं नाज्ञानान्न च मत्सरात् ॥ ९ ॥
अयं तु लोकपालानां यशोघ्नो निरपत्रपः । सद्भिराचरितः पंथा येन स्तब्धेन दूषितः ॥ १० ॥ एष मे शिष्यतां प्राप्तो यन्मे दुहितुरग्रहीत् ।
पाणिं विप्राग्निमुखतः सावित्र्या इव साधुवत् ॥ ११ ॥ गृहीत्वा मृगशावाक्ष्याः पाणिं मर्कटलोचनः । प्रत्युत्थानाभिवादार्हे
वाप्यकृत नोचितं ॥ १२ ॥ लुप्तक्रियायाशुचये मानिने भिन्नसेतवे । अनिच्छन्नप्यदां बालां शूद्रायेवोशतीं गिरं ॥ १३ ॥ प्रेतावासेषु
घोरेषु प्रेतैर्भूतगणैर्वृतः । अटत्युन्मत्तवन्नग्नो व्युप्तकेशो हसन्रुदन् ॥ १४ ॥ ॥ श्रीरामचंद्राय नमः ॥ ॥

तं संमानं वाचापि नाकरोत् ॥ १२ ॥ अनर्हाय कन्यादत्तेत्यनुतप्यमानस्याह । लुप्तक्रियायेति सार्द्धैस्त्रिभिः । उशतीं वेदलक्षणां गिरं ॥ १३ ॥
प्रेतावासेषु स्मशानेषु व्युप्ताविकीर्णाः केशा यस्य ॥ १४ ॥ ॥ श्रीरामचंद्राय नमः ॥ ॥ केशवाय नमः वासुदेवाय ॥ ॥ गोपालाय ॥

+ मारकं लोचनं यस्य प्रलये तस्योद्दीपनत्वात् २

चिताभस्मना स्नातं स्नानं येन प्रेतानां स्रजो माल्यानि यस्य सः प्रेतस्रक् नृणां अस्थीनि भूषणानि यस्य शिव इत्यपदेशो नाममात्रं यस्य १५ नमोमात्रात्मकाः केवलं तमोभूता आत्मानः स्वभावो येषां। उन्मादा भूतविशेषास्तेषां नाथाय। दुर्हृदे दुष्टचित्ताय। बतेति खेदे। का साध्वी यमर्थः। १६ लुप्ताः क्रिया यस्मिन् परब्रह्मणि तस्य भूपतात्। अत एव नास्ति शुचिर्यस्मात्। अमानिने अभिन्नसेतवे इति च च्छेदः। तस्य परमेश्वरस्य मदीया मानुषी कन्या कथं योग्या स्यादिति लज्जाहीनादातुमनिच्छन्नपि तं वंशलोभेनैव दत्तवान्। स्मृताय इत्यनर्हत्वमात्रेहिसितः न हीनत्वं पूर्वापरस्य वचनविरोधापत्तेः। एतदुक्तं भवति यथा च

चिताभस्मकृतस्नानः प्रेतस्रङ्न्रस्थिभूषणः। शिवापदेशो ह्यशिवो मत्तो मत्तजनप्रियः। १५ पतिः प्रमथभूतानां तमोमात्रात्मकात्मनां। तस्मा उन्मादनाथाय नष्टशौचाय दुर्हृदे। दत्ता बत मया साध्वी चोदिते परमेष्ठिना १६ मैत्रेय उवाच॥ विनिंद्यैवं स गिरिशमप्रतीपमवस्थितं। दक्षोऽथाप उपस्पृश्य क्रुद्धः शप्तुं प्रचक्रमे १७ अयं तु देवयजन इंद्रोपेंद्रादिभिर्भवः। सह भागं न लभतां देवैर्देवगणाधमः॥ १८॥ ॥ श्रीरामचंद्राय नमः

श्चिक्रूडाय वेदमर्थलोभेनैनं ददातीति हृदि तिष्ठति। प्रेतावासे श्मशाने इत्यादि सर्वं विडंबनमात्रमिति स्वयमेवाह। उन्मत्तवदिति अन्यथा उन्मत्त इत्येव वक्ष्यन्। अशिवः नास्ति शिवो यस्मात्। अमत्तो मत्तजनप्रिय इति च च्छेदः। पतिः प्रमथनाथानामिति भक्तवात्सल्यमाह। तामसानपि दोषमपनीय पातीति निष्ठानामपि शौचं शुद्धिर्यस्मात्। दुष्टे ष्वपि तेमयानुकंप्या इति हृद् मनो यस्य स दुर्हृत् तस्मै। बतेति। हर्षात् ब्रह्मणो वाक्याल्लज्जा भयादिकं परित्यज्य दत्तेत्यर्थः। १६ अप्रतीपं अप्रतीकूलं यथा भवत्येवमवस्थितमपि विनिंद्य १७ देवानां यजने समये देवैः सह भागं न लभतां किंतु तेभ्यः पूर्वमेव लभतां अग्रभोजित्वात्। यद्वा तेषु भुक्तवत्सु लभतां सर्वपोषकत्वात्। तत्र हेतुः देवगणोऽधमो यस्मात्॥ ॥

+ यद्वा अभ्रु श्लोकं द्रावयतीति श्रुद्रः आत्मनिष्ठः तस्य वेदवाणीकर्मविद्याभिर्न +५

सदस्यस्तस्मात्स्थानाद्विनिष्क्रम्य जगाम ह कौरव्य गिरिशस्यानुगणानामग्रणीर्मुख्यः रोषएवकषायं तेन दूषितः आरक्तनेत्र इत्यर्थः ॥ तस्माद्गिरिशस्याव-
ज्ञातां वचनार्हतां निंदामित्यर्थः ॥ तस्यापि शापं विससर्ज ॥ २० ॥ दक्षं शपति सार्द्धैस्त्रिभिः । एतदच्छरीरं त्वगस्थिमयं श्रेष्ठं मत्वा अप्रतिद्रुहि अ-
तिद्रोहमकुर्वति पृथग्दृष्टिः भेददर्शी तत्त्वतः परमार्थात् ॥ २१ ॥ अज्ञत्वमेवाह । गृहेष्विति । कर्मतंत्रं कर्मोपरिकरं । वेदे येवादा अर्थवादा अक्ष-
य्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवतीत्यादयस्तैर्विपन्ना विनष्टा धीर्यस्य ॥ २२ ॥ परो देहादिः तमेवात्मत्वेनाभिध्यायिन्याशीलयंत्या त्वया

निषिध्यमानः स सदस्यमुख्यैर्दक्षो गिरित्राय विसृज्य शापं । तस्माद्विनिष्क्रम्य विवृद्धमन्युर्जगाम कौरव्य निजं निकेतनं ॥ १९ ॥ विज्ञाय
शापं ... गिरिशानुगाग्रणीर्नंदीश्वरो रोषकषायदूषितः । दक्षाय शापं विससर्ज दारुणं ये चान्वमोदंस्तदवाच्यतां द्विजाः ॥
२० ॥ य एतन्मर्त्यमुद्दिश्य भगवत्यप्रतिद्रुहि । द्रुह्यत्यज्ञः पृथग्दृष्टिस्तत्त्वतो विमुखो भवेत् ॥ २१ ॥ गृहेषु कूटधर्मेषु स-
क्तो ग्राम्यसुखेच्छया । कर्मतंत्रं वितनुते वेदवादविपन्नधीः ॥ २२ ॥ बुद्ध्या पराभिध्यायिन्या विस्मृतात्मगतिः पशुः ॥ स्त्रीका-
मः सोस्त्वतितरां दक्षो बस्तमुखोऽचिरात् ॥ २३ ॥ विद्याबुद्धिरविद्यायां कर्ममय्यामसौ जडः । संसरंत्विह ये चामुमनु शर्वा-
वमानिनं ॥ २४ ॥

बुद्ध्या विस्मृता आत्मनो गतिस्तत्वं येन अतः पशुतुल्यः अतितरां स्त्रीकामोऽस्त्विति द्वितीयः । बस्तस्य मुखमिव मुखं यस्येति तृतीयः शापः ॥ अयं च
शापोस्यानुरूप एवेत्याह विद्याबुद्धिः इयमेव तत्वविद्येति बुद्धिर्यस्य अतो जड एव । द्विजानुशपति संसरंत्विति द्वाभ्यां । शर्वमवमन्यत इति त-
थातमनुवर्तंते ये चानुवर्तंते ते संसरंतु जन्ममरणादि अनुभवंत्वित्येकः शापः ॥ २४ ॥

क्रतायाः वेदरूपायाः पुष्पिण्याः पुष्पाणीवार्थवादाः मनःस्तोलकत्वात् तद्वदर्थवादबहुलायाः इत्यर्थः। मधुगंधतुल्येन प्ररोचनेन मथ्रा मनःस्तोलकेन उन्मथितः आत्मा मनो येषां ते संमुह्यंतु कर्मिष्वासक्ता भवंत्विति द्वितीयः॥२५॥ सर्वभक्षाः भक्ष्याभक्ष्यविचारशून्याः वृत्त्यै देहादिपोषणाय धृतानि विद्यातपोव्रतानि यैः। वित्तादिष्वेवारामो रतिर्येषां ते याचकाः। संतो विचरंत्विति शापचतुष्टयं॥२६॥ प्रत्यसृजत् प्रत्यदात्। शापरूपं ब्रह्मदंडं॥२७॥ सच्छास्त्रपरिपंथिनः प्रतिकूलाः॥२८॥ सुरा गौडी पैष्टी माध्वी च आसवः तालादिरसः तद्वमद्यं ह हे क्वापि दत्त्वा यत्र दैवं पूज्यं देवतावदादरणीयमि

गिरः क्रतायाः पुष्पिण्याः मधुगंधेन भूरिणा। मथ्रा चोन्मथितात्मानः संमुह्यंतु हरद्विषः॥२५॥ सर्वभक्षा द्विजा वृत्त्यै धृतविद्यातपोव्रताः। वित्तदेहेंद्रियारामा याचका विचरंत्विह॥२६॥ तस्यैवं वदतः शापं श्रुत्वा द्विजकुलाय वै। भृगुः प्रत्यसृजच्छापं ब्रह्मदंडं दुरत्ययम्॥२७॥ भवव्रतधरा ये च ये च तान्समनुव्रताः। पाषंडिनस्ते भवंतु सच्छास्त्रपरिपंथिनः॥२८॥ नष्टशौचा मूढधियो जटाभस्मास्थिधारिणः। विशंतु शिवदीक्षायां यत्र दैवं सुरासवं॥२९॥ ब्रह्म च ब्राह्मणांश्चैव यद्यूयं परिनिंदथ। सेतुं विधारणं पुंसामतः पाषंडमाश्रिताः॥३०॥ एष एव हि लोकानां शिवः पंथाः सनातनः। यं पूर्वे चानुसंतस्थुर्यत्प्रमाणं जनार्दनः॥३१॥ तद्ब्रह्म परमं शुद्धं सतां वर्त्म सनातनं। विगर्ह्य यात पाषंडं दैवं वो यत्र भूतराट्॥३२॥ ॥

तिवा॥२९॥ ब्रह्म वेदं कथंभूतं सेतुं मर्यादारूपं। तदेवाह पुंसां वर्णाश्रमाचारवतां विधारणं धारकं॥३०॥ सेवत्वं प्रपंचयति हा लोकानां। एष वेदलक्षण एव शिवः पंथाः। यं पूर्वे ऋषयः अनुसंतस्थुः आश्रितवंतः। यत्र यस्मिन् जनार्दनः प्रमाणं मूलं॥३१॥ भूतराट् भूतानां तामसानां पतिः ॥३२॥ ॥राम॥ ॥

भा॰च॰

७

अन्योन्यशापे भवयोर्नाशाद्विमना इवेति तथापि भगवदनुगृहीतानां नाशो न स्यादिति भावः ॥३४॥ ऋषभः सर्वश्रेष्ठो हरिर्यत्रेज्यः पूज्यः तत्सत्रं संविधाय हे महेष्वास विदुर ॥३५॥ यत्र प्रयागे गङ्गा यमुनयान्विता तत्रावभृथस्नानं कृत्वा ततः स्वधाम ययुः ॥३६॥ इति चतुर्थे द्वितीयः ॥ तृतीये तु सती तातयज्ञोत्सवदिदृक्षया । गमिष्यन्ती महेशेन वारितानीतिहेतुभिः ॥ ध्रियमाणयोः वर्तमानयोः ॥१॥ स्तुत्र ब्रह्मा न इत्यस्मान् ॥२॥ हृतीय विहीनो यज्ञो नास्त्येव । तथापि दक्षस्य रुद्रपरित्यागो हेषा द्वेषा च । तत्र द्वेषे हेतुमुक्त्वा गर्वे हेतुमाह । यदा तु प्रजापतीनामाधिपत्ये ति

मैत्रेय उवाच ॥ तस्यैवं वदतः शापं भृगोः स भगवान् भवः । निश्चक्राम ततः किंचिद्विमना इव सानुगः ॥३४॥ तेऽपि विश्वसृजः सत्रं सहस्रपरिवत्सरान् । संविधाय महेष्वास यत्रेज्य ऋषभो हरिः ॥३५॥ आप्लुत्यावभृथं यत्र गङ्गा यमुनयान्विता । विरजेनात्मना सर्वे स्वं स्वं धाम ययुस्ततः ॥३६॥ इति श्रीभागवते महापुराणे चतुर्थस्कन्धे दक्षशापो नाम द्वितीयोऽध्यायः ॥ मैत्रेय उवाच ॥ सदा विद्विषतोरेवं कालो वै ध्रियमाणयोः । जामातुः श्वशुरस्यापि सुमहानतिचक्रमे ॥१॥ यदाभिषिक्तो दक्षस्तु ब्रह्मणा परमेष्ठिना । प्रजापतीनां सर्वेषामाधिपत्ये स्मयोऽभवत् ॥२॥ इष्ट्वा स वाजपेयेन ब्रह्मिष्ठानभिभूय च । बृहस्पतिसवं नाम समारेभे क्रतूत्तमम् ॥३॥ तस्मिन्ब्रह्मर्षयः सर्वे देवर्षिपितृदेवताः । आसन्कृतस्वस्त्ययनास्तत्पत्न्यश्च सभर्तृकाः ॥४॥

षिक्तः तदा तस्य स्मयो गर्वोऽभवत् ॥२॥ गर्वादेव ब्रह्मिष्ठानीश्वरानभिभूय तिरस्कृत्य वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजे तेनेति क्रतेः वाजपेयेनेष्ट्वा समारेभे ॥३॥ कृतस्वस्त्ययनाः कृतमङ्गलाः । सभर्तृका इति दक्षिणादिभिः प्रथममर्हितानामपि पत्न्यर्हणे पुनरर्हणमुक्तं ॥४॥

कं ३ पु २

तत्तदा खेचराणां प्रजल्पतां सतां पितुर्यज्ञमहोत्सवं श्रुत्वा ॥ ५ ॥ तत्र व्रजंतीरुपदेवानां गंधर्वादीनां वरस्त्रियश्च स्वनिलयस्याभ्याशे समीपे दृष्ट्वा औत्सुक्यात्प
तिं सत्यभाषेतेति त्रयाणामन्वयः ॥ कथंभूतास्त्रियो दृष्ट्वा विमानानि यानानि यासां ताः प्रेष्ठैः सहिताः निष्कानि पदकानि यासां शोभनानि वासांसि या
सां । लोलानि चंचलान्यक्षीणि यासां । मृष्टान्युज्ज्वलानि कुंडलानि यासां ताः ॥ ७ ॥ निर्यापितः प्रवर्तितः । हे वाम शिव ते यद्यर्थिता इच्छा तर्हि वयं
तत्राभिसराम गच्छाम । न चाप्रिया गोनि हत्तः । यतो ऽमी विबुधाः व्रजंति ॥ ८ ॥ औत्सुक्यं प्रकटयंत्याह तस्मिन्निति षड्भिः । पित्रा स्वयमुपनीतं द

तदुपश्रुत्य नभसि खेचराणां प्रजल्पताम् । सती दाक्षायणी देवी पितुर्यज्ञमहोत्सवं ॥ ५ ॥ व्रजंतीः सर्वतो दिग्भ्य उपदेववर
स्त्रियः । विमानयानाः सप्रेष्ठा निष्ककंठीः सुवाससः । दृष्ट्वा स्वनिलयाभ्याशे लोलाक्षीर्मृष्टकुंडलाः । पतिं भूतपतिं देवमौ
त्सुक्यादभ्यभाषत ॥ ॥ सत्युवाच ॥ ॥ प्रजापतेस्ते श्वशुरस्य सांप्रतं निर्यापितो यज्ञमहोत्सवः किल । वयं च तत्राभिसरा
म वाम ते यद्यर्थितामी विबुधा व्रजंति हि ॥ ८ ॥ तस्मिन्भगिन्यो मम भर्तृभिः स्वकैर्ध्रुवं गमिष्यंति सुहृद्दिदृक्षवः । अहं च तस्मि

दि २

न्भवताभिकामये सहोपनीतं परिबर्हमर्हितुं ॥ तत्र स्वसॄर्मे ननु भर्तृसंमिता मातृष्वसॄः क्लिन्नधियं च मातरं । द्रक्ष्ये चिरो
त्कंठमना महर्षिभिरुन्नीयमानं च मृडाध्वरध्वजं ॥ ॥

त्तं परिबर्हमलंकारादि इयं भवता सह अर्हितुं स्वीकर्तुं कामये । अर्हितमिति पाठे सत्कृतं तं परिबर्हमिच्छामीति ॥ ९ ॥ स्वसॄर्भगिनीः भर्तृभिः संमिताः
सह शीः क्लिन्नधियं स्नेहार्द्रचित्तां चिरमुत्कंठमुत्सुकं मनो यस्याः साहं द्रक्ष्यामि । हे मृड । उन्नीयमानं प्रवर्त्यमानं अध्वरेषु ध्वजमिव दृश्यं श्रेष्ठ
मध्वरं यज्ञं उत्क्षिप्यमाणं यज्ञे केतुरूपं वा ॥ ॥ रामचंद्राय नमः ॥ ॥

अहो किं तदाश्चर्यं येन तवैतदौत्सुक्यमिति चेत्तत्राह त्वयीति हे अज एतद्विश्वमाश्चर्यं प्रतत्वय्येव त्वन्मायया रचितं विलाति अतो यद्यपि त्वनाश्च
र्यं बुद्धिः तथाप्यहं योषित् तत्कौतुकस्वभावा तत्त्वं न जानामि। अतो दीना कृपणा सती हे भव मे भवक्षितिं जन्मभूमिं दिदृक्षे द्रष्टुमिच्छामि
॥२१॥ दिदृक्षामेव कैमुत्येनाह नमनक्षि पश्यपेति द्वाभ्यां हे अभवेति इह हि योगः स्वं त्वया नास्वादितमिति भावः। अन्या योषितः संबंधरहि
ता अपि प्रयातीः पश्य। कांतसखाः स्वर्दसहिताः वरूथशः संघशः। कथंभूताः। यासां विमानैर्नभो मंडितं तासां। हे शितिकंठ नीलकंठेति राज
ग्रहाय स्वयाविषमपि लक्षितमिति सूचयति॥२२॥ नद्यो हे सुरश्रेष्ठ पितृगेहोत्सवं निशम्य सुतायाः देहं कथं नेंगते इद्धं न प्रचलति। न चाप्यना

त्वय्येतदाश्चर्यमजात्ममायया विनिर्मितं भाति गुणत्रयात्मकं। तथाप्यहं योषिदतत्त्वविच्च ते दीना दिदृक्षे भव मे भवक्षितिं॥२१॥
पश्य प्रयातीरभवान्ययोषितोऽप्यलंकृताः कांतसखा वरूथशः। यासां व्रजद्भिः शितिकंठ मंडितं नभो विमानैः कलहंसपांडुभिः॥
॥२२॥ कथं सुतायाः पितृगेहकौतुकं निशम्य देहः सुरवर्य नेंगते। अनाहुता अप्यभियंति सौहृदं भर्तुर्गुरोर्देहकृतश्च केतनं॥२३॥
तन्मे प्रसीदेदममर्त्य वांछितं कर्तुं भवान् कारुणिको बतार्हति। त्वयाऽऽत्मनोऽर्धेऽहमदभ्रचक्षुषा निरूपिता मानुगृहाण या-
चितः॥२४॥ ऋषिरुवाच॥ एवं गिरित्रः प्रिययाभिभाषितः प्रत्यभ्यधत्त प्रहसन् सुहृत्प्रियः। संस्मारितो मर्मभिदः कुवा-
गिषून् यानाह को विश्वसृजां समक्षतः॥२५॥

हूताः संतः कथं कामं सत्राह। सौहृदं भर्तृहृदः केतनं गृहं तथा भर्त्रादीनां च अनाहूता अप्यभियंति॥२३॥ हे अमर्त्य तत्तस्मात्त्वं प्रसीद
इदं मे वांछितं कर्तुं भवान् अर्हति। कारुणिकत्वमेवाह। हा अदभ्रचक्षुषा अमलज्ञानेनापि त्वया आत्मनो देहस्यार्धे हे निरूपिता स्थापिता यतोऽहं नारी
श्वर इति ख्यातोऽसि अतो मां मां अनुगृहाण याचितः सन्॥२४॥ अभिलाषितोऽभियाचितः कः दक्षः यानाह मर्मभिदं तीयेतानूक्तवाग्निषून् उ
क्तिवाणान् संस्मारितः सन्॥२५॥ श्रीरामचंद्राय नमः॥ ॥

अनादृता अपीति त्वया यदुदितं तच्छीलनमेव किंतु अनात्मपदे हा हा वहंकारस्तत्त्वातो न मदेन मत्तभावे तेवं ध्वयोयद्यनुत्पादितदोषदृष्ट्योलवंतीति हि
न शत्वादिते आरोपिते दोषे दृष्टिर्यपाते ॥ २६ ॥ ननु विद्यादिगुणयुक्तो दक्षः स्यात् दशेषु महत्सु कथं दोषदृष्टिर्भवेन्नत्राह विद्यादिलिरेवस्मृतो हतायाविवेक
ज्ञाने नष्टे मति भूयसाम हत्त्वमानांधामतेजोनपश्यंतिहि ॥ ननु गुणैः कथं विवेकनाश इत्राह ॥ सतां गुणैः विवेकहेतुलिरपि अत्र सतमानामितरैः दोषभू
तैः अत एव ते भृतः धृतः पुष्टो वा अत्र हविद्वान् ताप सइत्यादि मानो गर्वस्तेन दुष्टा दृष्टिर्यपाते ॥ २७ ॥ स्वजनस्यापेक्षया पथं कदष्ट्या गृहान् प्रतीयान् नावलो
कगवान्तवाव ॥ ॥ त्वयोदितं शीलनमेव शीलने अनादृता अथ लियंतिवं कष्टतियद्यनुत्पादितदोषदृष्टयो वलीयसा ज्ञानात्मम
देन मन्धना ॥ २६ ॥ विद्यातपोविवृद्धः सद्वृत्तैः सतां गुणैः षड्भिरस्तं भत तरैश्च स्मृतो हतायां धृतमानदुर्दृशस्तज्ञानपश्यंति
हि धाम भूयसां ॥ २७ ॥ नेतादृशानां स्वजनस्य पेक्षया गृहान्प्रतीयादनवस्थितात्मनां ॥ ये लाभतान् वक्रधिया अलिवच्छाते आ
रोपित भ्रूलिरमर्षणाक्षितिः ॥ २८ ॥ तथारिलिर्नव्यथते शिलीमुखैः शेते दर्दितांगो हृदयेन दूयता ॥ स्वानां यथा वक्रधियांडु
रुक्तिलिर्दिवानिशं तप्यति मर्मताडितः ॥ २९ ॥ यक्तं त्वस्तु तस्मिन् गतेः प्रजापतेः प्रियात्मजानाम सितस्तु सम्मता अथापि
मानं न पितुः प्रपत्स्यसे मदाश्रयात्कः परितप्यते यतः ॥ २१ ॥ ॥
कयेनत्र अनवस्थितचित्तत्वमेवाह ॥ ये वक्रधिया कुटिलया बुध्या पश्यंति आरोपिताभ्रूलिताभ्रूर्ये प्रुता आरोपितभ्रूणितैः आरोपितालिर्भूलिहि
तिवा ॥ २८ ॥ ननु स्वजनानां गृहं मुहुर्द्दिर्गेत्वयंते पाडुश्चेष्टितं तु सोढव्यमू ॥ नत सडुः सहत्वादित्याह ॥ तथेति ॥ अरिलिः शिलीमुखैर्वाणैः र्दर्दितां
गः खंडितगात्रो ऽपि तथा नव्यथते यतः शेते स्वपिति ॥ स्वानां दुरुक्तिलिर्मर्मसु ताडितो यथा दूयता स्वमानेन हृदा दिवानिशं तप्यति ॥ २९ ॥ मयि
त्वगतापाने यशंकेति वेन्नत्राह ॥ यक्तं निश्चितं तु कष्टागतिः स्थितिर्यस्य तस्यात्मजानां कन्यानाम मध्ये त्वं प्रियेति मे संमतासि पितुः सकाशात् मानं न लप्स्य
से मदाश्रयात् मत्संबंधात् ॥ २० ॥ ॥

भा॰च॰

९

नतु लगवंतत याकिमिति द्वाभ्रिं रक्षतः । यतो ऽसौ त्वां द्वेष्टि अत आह । पापच्यमानेन अलं दह्यमानेन हृदा दुःखितेंद्रियः कालिः पुरुषो जीवस्तस्य बुद्धिश्चित्तं तत्सा
क्षिणां निरहंकारिणामित्यर्थः समृद्धिभिः गुणकीर्त्यादिभिः एषां पदं स्थानमैश्वर्यं प्राप्तुमकल्पः अशक्तः सन्परं द्वेष्टि यथासुरा हरिं केवलं वि
द्विषंति ॥२१॥ ननु त्वया प्रत्युत्थानविनयाद्यकरणादवज्ञात एवासौ तत्राह । हे सुमध्यमे प्रत्युद्गमादिकं मिथो जनैर्यद्विधीयते तत्प्राज्ञैः साधु कृ
विधीयते साधुत्वमेवाह । परस्मै श्रीवासुदेवाय गुहाशयायांतर्यामि[णे] एव । तच्च चेतसैव । परिपूर्णे तस्मिन् कायिकव्यापारा[सं]योगात् । अतो
तर्यामिदृष्ट्या मनसा सर्वं कृतमिति भावः ॥२२॥ किंच न केवलम [...] भगि तेषु वासुदेवदृष्ट्या नमनं क्रियते किं तु नित्यमेव मनसि वासुदेवं दृ

पापच्यमानेन हृदातुरेंद्रियः समृद्धिभिः पूरुषबुद्धिसाक्षिणां । अकल्प ए[षा]मधिरोढुमंजसा परं पदं द्वेष्टि यथासुरा ह
रिं ॥२१॥ प्रत्युद्गमप्रश्रयणाभिवादनं विधीयते साधु मिथः सुमध्यमे । प्राज्ञैः परस्मै पुरुषाय चेतसा गुहाशयायैव न देह
मानिने ॥२२॥ सत्त्वं विशुद्धं वसुदेवशब्दितं यदीयते तत्र पुमानपावृतः । सत्त्वे च तस्मिन्भगवान्वासुदेवो ह्यधोक्षजो मे नम
सा विधीयते ॥२३॥

त्वतस्तत्राह । विशुद्धं सत्त्वमंतःकरणं सत्त्वगुणो वा । वसुदेवशब्दितं वसुदेवशब्देनोक्तं । कुतः यद्यस्मात्तत्र तस्मिन्सत्त्वे पुमान्वासुदेव ईयते प्रका
शते । अपगतमावृतमावरणं यस्मात्सः । ~~अयमर्थः । वसुदेवशब्देनोक्तं । कुतः यद्यस्मात्तत्र तस्मिन्सत्त्वे पुमान्वसुदेव ईयते प्रकाशते । अप
गतमावृतमावरणं यस्मात्सः ।~~ अयमर्थः । वसुदेवे भवति प्रतीयत इति हि वासुदेवः परमेश्वरः प्रसिद्धः । स च विशुद्धे सत्त्वे प्रतीयते । अतः प्रत्यया
र्थेन प्रसिद्धेन प्रकृत्यर्थो निर्धार्यते । तत वसुवासयति देवमिति कर्तृत्वावा । वसत्यस्मिन्निति वा वसुः देवः दीव्यति द्योतत इति वा । वसुभिः गुणैः
दीव्यति प्रकाशत इति वसुदेवशब्दवाच्यं शुद्धं सत्त्वं । ततः किमत आह । सत्त्वे च तस्मिन्मे मया मनसा नमस्कारेण तु विधीयते सेव्यत इत्यर्थः । मनसे
ति पाठे मनसा विशेषेण धीयते धार्यते चिंत्यत इत्यर्थः । यतः अधोभूतेषु प्रत्याहृतेषु अक्षेषु जायते प्रकाशते । इंद्रियागोचर इत्यर्थः ॥ ॥ ॥

व्ह

२ वा

९

तस्मात्त्वया न निरीक्ष्यः देहकृदपीति पोषकत्वादिभिरौपचारिकपितृत्वं पारत्यर्थं द्विड्भावः । तद्धेतुमाह हे वरोरु यो दक्षः विश्वसृजां यज्ञगतं मां निरपराधं
तिरस्करोति तिरस्कृतवान् ॥२४॥ विपक्षे दोषमाह यदीति मद्वचोऽतिहाय अतिक्रम्य यतः संभावितस्य सुप्रतिष्ठितस्य यदा स्वजनात्पराभवस्तदा मरणाय
कल्पते ॥२५॥ इति चतुर्थे तृतीयः ॥ ॥ चतुर्थे तु पतिं हित्वा गता पित्रापमानिता । तु षा निर्भर्त्सिता यज्ञे जहौ देहमितीर्यते ॥ उभयत्र अनुज्ञानेऽवलाभितिं वा

तेऽभिनिरीक्ष्यो न पिताऽपि देहकृद्दक्षो मम द्विट् तदनुव्रताश्च ये । यो विश्वसृग्यज्ञगतं वरोरु मामनागसं दुर्वचसाऽकरोत्तिरः ॥२४॥
यदि व्रजिष्यस्यतिहाय मद्वचो भद्रं भवत्या न ततो भविष्यति । संभावितस्य स्वजनात्पराभवो यदा स सद्यो मरणाय कल्पते ॥२५॥
॥ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे उमारुद्रसंवादे तृतीयोऽध्यायः ॥ ॥ मैत्रेय उवाच ॥ ॥ एतावदुक्त्वा वि
रराम शंकरः पत्न्यंगनाशं ह्युभयत्र चिंतयन् । सुहृद्दिदृक्षुः परिशंकिता भवान्निष्क्रामती निर्विशती द्विधाऽस सा ॥१॥ सुहृद्दि
दृक्षाप्रतिघातदुर्मनाः स्नेहाद्रुदत्यश्रुकलातिविह्वला । भवं भवान्यप्रतिपूरुषं रुषा प्रधक्ष्यतीवैक्षत जातवेपथुः ॥२॥
ततो विनिःश्वस्य सती विहाय तं शोकेन रोषेण च दूयता हृदा । पित्रोरगात्स्त्रैणविमूढधीर्गृहान्प्रेम्णाऽऽत्मनो योऽर्द्धमदात्सतां
प्रियः ॥३॥ ॥ रामाय नमः ॥ ॥

रणे वा सुहृद्दिदृक्षुः निःक्रामती भवात्परिशंकिता च न विशति एवं तदा सा सती द्विधा आस बभूव ॥१॥ सुहृदां दिदृक्षायाः प्रतिघातेन दुर्मनाः अश्रूणां
कला लेशैः रतिविह्वला भवान्यात् अप्रतीपूरुषं समानपूरुषांतररहितं प्रधक्ष्यतीव भस्मीकरिष्यतीव रुषा जातो वेपथुः कंपो यस्याः ॥२॥ ततस्तं वि
हाय पित्रोर्गृहान् गतवती । कथंभूतं यः प्रीत्या सत्यै आत्मनो देहस्यार्धं अदात् त्यागे हेतुः स्त्रैणं स्त्रीस्वभावः तेन विमूढा धीर्यस्याः सा ॥३॥ ॥ ॥

भा॰खं॰ द्रुतविक्रमांशी घ्रंगच्छंतीः सह पार्षदैः यत्र वर्तमानाः मणिमन्मदश्च आदिर्येषां ते पुरः पुरतो हर्षेणोर्द्वये येषां ते ॥ गतव्यथा निर्लयाः रुद्गातिक्रमेण तस्यागमनात् हगतव्यथा इति वा ४ ॥ ततो हर्षेण दूरमारोप्य मारिकादिभिः क्रीडोपकरणैः श्वेतातपत्रादिभिश्च महाराज महाविभूतिभिः सहविटंकिताः शोभिताय धुः ॥ मारिका पठनविनिरूपिता पक्षिणीगीतायनेः गीताश्रये ५ ॥ आसमंताद्घोषैर्वदघोषैर्नोर्जितं शोभमानं यत्र सर्वं विषयविशसनं यस्मिन् यज्ञातो नोर्जितं अतिशयितं यज्ञवेशं संपरस्परस्य धर्षयस्मिन् तद्यजनं यत्र संस्थानं समाविशद्देवी विबुधेश्च जुष्टं मुदा दिति

९०

तामन्वगच्छन्न द्रुतविक्रमां सतीमेकां त्रिनेत्रानुचराः सहस्रशः सपार्षदयक्षामणिमन्मदादयः पुरो वृषेंद्रास्तरसा गतव्यथाः ॥ २४ ॥ तां मारिकाकंदुकदर्पणांबुजैः श्वेतातपत्रव्यजनस्रगादिभिः गीतायनैः दुंदुभिशंखवेणुभिर्वृषेंद्रमारोप्य विटंकिता ययुः ॥ २५ ॥ आब्रह्मघोषोर्जितयज्ञवैशसं विप्रर्षिजुष्टं विबुधैश्च सर्वशः । मृद्दार्व्ययःकांचनदर्भचर्मभिर्निसृष्टभांडं यजनं समाविशत् ॥ २६ ॥ तामागतां तत्र न कश्चनाद्रियद्विमानितां यज्ञकृतो भयाज्जनः ऋते स्वसृर्वै जननीं च सादराः प्रेमाश्रुकंठ्यः परिषस्वजुर्मुदा ॥ २७ ॥ सौदर्यसंप्रश्नसमर्थवार्तया मात्रा च मातृष्वसृभिश्च सादरं दत्तां सपर्यां वरमासनं च सा नादत्त पित्राप्रतिनंदिता सती ॥ २८ ॥

निसृष्टानि निर्मितानि भांडानि पात्राणि यस्मिन् ॥ २६ ॥ कश्चन नाद्रियत् नादृतवान् यज्ञकृतो दक्षान् भयतः । तस्मात् तत्र हेतुः ते न विमानितां ॥ स्वसृर्जननीं च ऋते विना ॥ ता स्त्रः सादराः परिषस्वजुः आलिंगितवंत्यः प्रेमाश्रुभिः कंठो यासां ता ॥ २७ ॥ अप्रतिनंदिता अनादृता सती मातृदत्तां न गृहीतवती ॥ सोदर्येण सोदरत्वेन भगिनीनां यः संप्रश्नः तत्र समर्था योग्या या वार्ता तया सह तां च नादत्त नाग्रहीदित्यर्थः २८ ॥

ख॰ ४
२१
९०
राम ॥

नविद्यते यद्यपि लागो यस्मिन् तां देवं तु द्वेष्टारं हेलनं अवज्ञां आह्वानायक रणान् राज गर्हं निंदितवती ॥ ९ ॥ अमर्षेण कोपेन विपन्नाया अव्यक्ताया शिवं द्वे
ष्टि शिव द्विट् तं । धूमपथः कर्ममार्गः स एव श्रमो ग्लानिः स क्षेन स्म यो गर्वीयस्या दक्षवधाय स्मृ भुक्तिं तां न प्रीया प्रिया गृह्य निवार्य ॥ १० ॥ निंदामेवाह न यस्मैतिश
यो दश क्तिः मुक्तवैरके त्यक्त विरोधे तस्मिन् शिवे लब्धं तं अतेविनाकतमः प्रतीपयेत् । प्रतिकूलमाचरेत् तव वैराभावे हेतवः यस्य लोके अतिशायन अतिशयि
तो नास्ति तथा प्रियश्च नास्ति । समास पाठे अतिशयेन प्रियो नास्ति देह स्य तां प्रियोयमात्मा तस्य समस्य स्यात्मनि कारण स्य ते समस्य स्वरूप इतिवा ॥ ११ ॥ तस्यवच

आस्तु इलागं तमवेक्ष्य चाग्ररं पित्रा च देवेशं हतां हेलनं विलोक्य नाहताय ज्ञ सदस्य धीश्वरी तु कोपलोकानिवधस्ती तु षा ॥ ९ ॥ जगर्ह सा
मर्ष विपन्नया गिरा शिवद्विषं धूमपथश्रमस्य यो वेतेज सा धृत गणान् समुद्धि तान् निगृह्य देवी जगतो विशिष्ट एव नः ॥ १० ॥ दिवक्ष वाच
न यस्य लोके स्व्यतिशायनः प्रियस्तथा प्रियो देह भृतां प्रियात्मनः तस्मिन् समस्तात्मनि मुक्त वैरके ऋते भवं तं क तमः प्रतीपयेत् ॥ ११ ॥
दोषान् परेषां हि गुणेषु साधवो गृह्णंति केचिन्न भवादृशाहि जा गुणांश्च फल्गून् बहुली करिष्णवो महत्तमास्तेषु विद इवानघं
॥ १२ ॥ रामायनमः ॥ ॥

साद्यान्त क्रोहेण०

निश्चलकरणं हे धाम हत्तम इहे हे नैवेत त्र तु गुणां वा तुर्विधं वदंती महत्मंडो हमाहा दोषान् ति द्विता तां हेहि जेत्यधिक्षेपः लवाहर्ष ॥ त्वद्विधा अस्मृयकाः परेषां
गुणेषु दोषानेव गृह्णंती न तु गुणान् । के चिन्मध्यस्था गुणेषु दोषान्न गृह्णंति किं तु यथा स्थितान् गुणदोषान्विवेकेन गृह्णंति ते तु महान्तः उच्यंते । साधवस्तु केवलं
गुणानेव गृह्णंति न दोषान् ते महत्तरा उच्यंते । महत्तमास्तु दोषानग्रहण्ये अल्पतुत फलगुल्न तुच्छानपि गुणान् बहुली करिष्णवो भवति ते तु लव न अघम
विदन्न विदितवान् कल्पित वानित्यर्थः तच्च तव क्षिष्टाना निश्चयेत्य नेन सूचितं ॥ १२ ॥

३

सिद्ध

एतच्चडुर्जनिषु प्रयुक्तमेवेत्याह । नेतीति । कृपणं जडं शरीरं तदेवात्मेति वदन्ति ये ते पुरुषा ईर्ष्याग्रस्ताः किं सेर्ष्यं यथा भवन्त्येवं महतां विनिंदेति । यन्नु एतदाश्चर्यं न भवति । सेर्ष्या निर स्तं तेजः प्रभावो येषामिति वा । यद्यपि महापुरुषाः परनिंदां सहन्ते तथापि तत्पादरेणवस्तदसमाना येषां ते तेजो निरस्यंति । अतोऽशनैः प्रमहत्त्विदं न मे बोधित मित्यर्थः ॥ २३ ॥ तदेवं महद्द्रोहे दुःखत्वात् तस्मिन्नेवोक्तं तं द्रोहमाह यदिति । हा लोक यस्य हरमात्रेण शिव इति तत्परित्यज्य नाम ... णां सर्वेषां मामुत्र अघं सर्वं हंति । केवलं गि रैवेरितमुच्चारितं न तु मनःपूर्वकं तदपि सकृदपि प्रसंगादपि तं शिवं द्वेष्टि न लंघ्यं शासनं आज्ञा यस्य अहो शिवेतरः अमंगलरूपः ॥ २४ ॥ पापहरत्वमुक्तं तं कि

नाश्चर्यमेतद्यदसत्सु सर्वदा महद्विनिंदा कृपणात्मवादिषु । सेर्ष्यं महापूरुषपादपांसुभिर्निरस्ततेजःसु तदेव शोभनं ॥ २३ ॥ यद्द्व्य क्षरं नाम गिरेरितं नृणां सकृत्प्रसंगादघमाशु हंति तत् । पवित्रकीर्तिं तमलंघ्यशासनं भवानहो द्वेष्टि शिवं शिवेतरः ॥ २४ ॥ यत्पादपद्मं म हतां मनोलिभिर्निषेवितं ब्रह्मरसासवार्थिभिः । लोकस्य यद्वर्षति चाशिषोऽर्थिनस्तस्मै भवान्वा द्रुह्यति विश्वबंधवे ॥ २५ ॥ किं वा शिवाख्य मशिवं न विदुस्त्वदन्ये ब्रह्मादयस्तमवकीर्य जटाः श्मशाने । तन्माल्यभस्मनृकपाल्यवसत्पिशाचैर्ये मूर्ध्नि दधति तच्चरणावसृ ष्टं ॥ २६ ॥ ॥ श्रीशिवाय नमः ॥

किं च द्रुह्यत्वे न शिवं वर्णयन्नाह । यस्य पादपद्मं मनांस्येवालयस्तैः । ब्रह्मरसो ब्रह्मानंदः स एवासवो मकरंदः तदर्थिभिः । यच्चार्थिनः सकामस्य लोक स्य ताश्चाशिषो वर्षति ॥ २५ ॥ यदुक्तं शिवापदेशो ह्यशिव इति यच्चोक्तं प्रेतावासे स्थित्यादि तद्दाक्षिपंत्याह । किं चेति । ये जटा अवकीर्य श्मशाने त्वत्र वस त्रिव सति स्मृतस्य श्मशानस्य माल्यानि तस्यानि नृकपालानि धूषणत्वेन पवित्रयस्यतं त्वदन्ये न विदुः किं न विदंत्येवेति चेन्न । न तथा सति तेषां त्वद्दासा नुपपत्तेरित्याह । तच्चरणादवसृष्टं गलितं निर्माल्यं ये मूर्द्धि तिर्धारयंतिति ॥ २६ ॥

ना२

इदानीं देहं त्यक्तुकामा धर्म्मतत्वमाह। कर्णेवा छ्वा द्यनिर्गछेत्। यद्यदि मर्त्तुमाप्यितं कल्पोन लवति कदा धर्म्मा वितरिधर्म्म स्कोकेइ शेस्वामिनि अष्टाएणिलिः निरंल
शेदृतिरस्यमाने अधिक्षिप्यमाणे अ अ्ः शन्ताश्वे उपेतौ अकल्याणवादिनां अ सह्यवलान्न छिंद्यात्। ततोऽपि द्वयं ज्ञाएणनू विद्दजे दितियत्सधर्म्मः २७॥ त
वत्वन्न उत्पन्नं शितिकंठो नीलकंठः न छिंदकात्। अमादापन्न स्यापवित्रस्य त्यागं विना न शुद्धिरितिदृष्टां तेनाह। जग्धस्य भक्षितस्यान्नस्योद्धरणं वनेमेवशुद्धः
शुद्धिः प्रवक्ते। २८॥ यदुक्तं लु प्रक्रिया यास्त्रवयइतित त्राचाह। नेति वेदवादानुविधिनिषेधरूपानूत्र एवलोकेष्वात्मन्येवरममाणस्य महतो मुनेः सम्यक्विरक्तौ

कर्मोपिधायनिरयाद्यदकल्पइेशेधर्म्मा वितर्ष्णः एणिलिर्दृतिरस्यमानो छिंद्यात्सह्युउ शतीमसर्ताप्रभ्रेश्जिद्धा मस्तनपि
ततो विद्दजेत्सधर्म्मशः २७॥ अतस्रवोत्पन्नमिदं कालेवरंन धारयिष्ये शितिकंठगर्हिणः॥ जग्धस्य मोहाद्धि विशुद्धिमंधसो ह्युउ
प्तितस्योद्धरणं प्रवक्ते २८॥ न वेदवादाननुवर्त्ततेमतिः स्व एवलोके रमतो महामुनेः॥ यथा गतिर्देवमनुष्ययोः पृथ
कू स्व एव धर्म्मेन परं क्षिपेत्स्थितः २९॥ ॥

स्वमतिर्न्नानुवर्त्ततो नि इत्ताधिकारित्वात्। अधिकारलेदे हस्यांतः। यथा देवानां गतिराकाश एव। मनुष्याणां पृथिव्यामेवोच्चतः स्व धर्म्म एव प्रदत्तिलक्षणे नि
दत्तिलक्षणः निदत्तिलक्षणेवास्थितः सन्परमन्य धर्म्मं प्रदत्तं वान क्षिपेत् न निंदेत्। स्वस्वाधिकारत्वेनोभयोः सत्यत्वान्न क्षिपेदेवेति वाक्यार्थः॥ २९॥

ना

वा१

ल्ग॰ ष॰

१२

एतदेवोपपादयंत्याह। प्रवृत्तं मग्निहोरात्रादिनिवृत्तं शमदमादिकं तं सत्यमेवायतः वेदे आश्रितं विहितं तन्नविविक्तंयवस्था याश्रितं न तत्वविशेषेण। व्यवस्थामोह।उभयं रागवैराग्यलक्षणं लिंगं चिह्नमधिकारिविशेषणं यस्मिन्। नन्वयावज्जीवमग्निहोत्रं जुहोति। शांतोदांत इत्यादिषु नैवं व्यवस्थाप्रतीयते। सत्यं तथापु लयोरेकाधिकारविरोधान्तथापर्यवसतीत्याह। उगपद्भावो यौगपद्यं योगपद्येनैकस्मिन्नकर्त्तरि तत्कर्मद्वयं विरोधि। ननु तर्हि निवृत्तं कर्मशिवेनापि कर्त्तव्यमेव नेत्याह। ~~अथातिशिवेनापि कर्त्तव्यमेवेत्याह~~ । उद्दानि समदाशिवे किंचिदपि कर्म न इति नप्राप्नोति। अतो यथा प्रवृत्तनिवृत्तयोः। परस्परधर्मी करणेन दोषः। तथेश्वरेतदुभयधर्म्मीकरणेपीति भावः॥ २०॥ चिता तस्य कृतप्राग्नः तथा न मइत्यादिनायोमोगाद्य भावं उक्तमत्राह। हेपितः अस्मात्तिरुच्छि

कर्म्मप्रवृत्तं च ... निवृत्तमप्युक्तं वेदे विविच्योभयलिंगमाश्रितं। विरोधितयौगपद्यैकक... र्त्तरि द्वयं तथा ... क्षणिकर्म्मनर्हति॥ २०॥ मा वः पदव्यः परिस्पृष्टा चिता या यज्ञशालासु नधूमवर्त्मभिः। तस्मात् द्रष्टव्यः ईदृग्भिः हिता अव्यक्तलिंगा अत्र न धूर्तसेविताः॥ २१॥ नैतन्न देहेन हरेणता गसो देहो इवेनाल मलंकृ जन्मना। व्रीडाम मा भूत्कुजनप्रसंगतस्व जन्मधिक् यो महतामवद्य कृत्॥ २२॥ ॥

ताश्चाश्रिताः पदवंश्रणि ... मादिसंप्रहृष्यः। वोऽस्माकं मा न संतीत्यर्थः। यतो वो पदव्यो यज्ञशालास्वेव लवंतिताश्चतदन्नेनयज्ञगतेनात्वेनतदैष्ठकेवलमी डिता धूमवर्त्मभिश्च भुजंगेऽयाश्च समत्यदव्यस्ताः कनैवं भूताः किंतु अव्यक्तलिंगाः अव्यक्तं लिंगं हेतुर्यासां इच्छामात्रप्रभावत्वात्। अवध्धूतैर्ब्रह्मविद्भिरेवि ताः। अतो ... हमा ... इ... इति गर्वमा कथा इति भावः॥ २१॥ किंवहुनोक्तेन इदं देहं त्यक्त्वामेवेत्याह। हा भ्रां। एतेन नालं न पूर्यते किं। अपि त्व ल मेव। कथं भूतेन कुजन्मना तदेवाह। हरेण कृतापराधस्य तद्देहात् उद्भूतेन। नहि श्लाघ्यो यं देहः। कथं त्याज्य इत्याह। कुजनस्य तव प्रसंगतः संबंधात्। मम लज्जा भूदा अतः यो महतां अप्रियकर्त्ता तस्माद्धि जन्मत् धिक् विलसंबंधादस्माद्धयमित्यर्थः॥ २२॥ ॥

त॰ दि १२ व॰

किंच परिहासादिषु विनोदेन मां दाक्षायणीति संबोधयन् त्वदीयं त्वत्संबंधवाचकं गोत्रं नाम यदाह वृषभध्वजः आह गृह्णाति तदाहं व्यपेतनर्मस्मितं यथा
लवत्येव सुदुर्मना अतिदुःखितचित्ता भवामि। तत्र स्मात् हि निश्चितं एतत्कुणपं प्रायं व्युत्स्रक्ष्ये त्यक्ष्यामि २३ दक्षं प्रत्युक्त्वा दक्षं कृत्वा शत्रुहन् कौ
क्षादिरिपुघातिन्। उदीची उदीच्यां दिशि पीतवस्त्रेण दक्षु खीशान्तवाचं गृहीतमौना जलं स्पृष्ट्वा आचम्य हक् दृशं २४ योगमार्गमेवाह। कौ
त्वेति। अनिलौ प्राणापानौ उर्द्ध्वोर्ध्वतिकरौ निरोधेन समानौ एकरूपौ नाभिचक्रे कृत्वा ततः उदानमुत्थाप्य धिया सह हृदि स्थापयित्वा कंठमार्गे

दानमु

गोत्रं त्वदीयं भगवान् वृषध्वजो दाक्षायणीत्याह यदा सुदुर्मना। व्यपेतनर्मस्मितमाशु तद्ध्यहं व्युत्स्रक्ष्य एतत्कुणपं त्व
दंगजं २३ ॥ श्रीमैत्रेय उवाच ॥ इत्यध्वरे दक्षमनूद्य शत्रुहन् क्षितावुदीचीं निषसाद शान्तवाक् स्पृष्ट्वा जलं पीतदुकूल
संवृता निमील्य दृग्योगपथं समाविशत् २४ कृत्वा समानावनिलौ जितासना सोदानमुत्थाप्य च नाभिचक्रतः शनैर्हृदि स्थाप्य धियोर
सि स्थितं कंठाद्भ्रुवोर्मध्यमनिंदितानयत् २५ एवं स्वदेहं महतां महीयसा मुहुः समारोपितमंकमादरात् जिहासती दक्ष
रुषा मनस्विनी दधार गात्रेष्वनिलाग्निधारणां २६ ततः स्वभर्तुश्चरणांबुजासवं जगद्गुरोश्चिंतयती न चापरं ददर्श देहो हत
कल्मषः सती सद्यः प्रजज्वाल समाधिजाग्निना २७ तत्पश्यतां खे भुवि चाद्भुतं महद्धाहेति वादः सुमहानजायत। हंत
प्रिया दैवतमस्य देवी जहावसून् केन सती प्रकोपिता २८ ॥ ॥

एवं भ्रुवोर्मध्यमनयत् ॥ २५ ॥ महतां पूज्यतमेन ॥ २६ स्वचरणांबुजे आसवं जलजनानंदं त्वर्तुरपरं न ददर्श। देहश्च सद्यः प्रज्वालितोऽभूत्। समाधिनायो
ग्निस्तेन ॥ २७ ॥ खे भुवि च हाहेत्यादिवादः। तमेवाह। हंतेति विषादे दैवतमस्य पूज्यतमस्य प्रिया केन दक्षेण प्रकोपिता सती २८ ॥ ॥

कृ

महदनादिंदौर्जन्यं ब्रह्मस्वर्ग्रंथ इह एव ख्याप्यइत्याहुः॥ यस्मैतियेन विमता अवज्ञाता॥ २९॥ दुर्मर्षमत्यसहनं हृदयं यस्य लोके जनमध्ये अवशाह्यो नरकं च॥ य यतः द्वितीयामंगजांसुतां अपश्यत्‌ तः श्वासस्तयाम्रतयेमरणाययोग्यतां न निवारितवान् पुरुषद्विट् शिवद्वेषी॥ ३०॥ अद्भुतं दृष्ट्वा च॥ ३१॥ यज्ञघ्नाः हंतीतियज्ञघ्नं ते न अपहंतरक्षरत्यादिना॥ ३२॥ अध्वर्युणा भृगुणा येन पसा सोमं प्राप्ताः भवोनामदेवा उत्थिताः॥ ३३॥ ब्रह्मतेजसा उशद्भिर्दीप्यमानैः॥ ॥ चतुर्थेचतु

अहोत्वनात्ममहदस्य पश्यत प्रजापतेर्यस्य चराचरं प्रजाः॥ जहाव सन्नूयद्विमता त्मजा सती मनस्विनी मानमभीक्ष्णमर्हति॥ २९॥ सोयं दुर्मर्षहृदयो ब्रह्मध्रुक् च लोकेपकीर्तिं महतीमवाप्स्यति। यदंगजां स्वां पुरुषद्विडुद्यतां न प्रत्यषेधन्मृतयेपराधतः॥ ३०॥ वदत्येवं जने सत्याद्दृष्ट्वासुत्यागमद्भुतं। दक्षं तत्पार्षदा हंतुमुदतिष्ठन्नुदायुधाः॥ ३१॥ तेषामापततां वेगं निशम्य भगवान् भृगुः। यज्ञघ्नघ्नेन यजुषा दक्षिणाग्नौ जुहाव ह॥ ३२॥ अध्वर्युणा हूयमाने देवा उत्पेतुरोजसा॥ ऋभवो नाम तपसा सोमं प्राप्ताः सहस्रशः॥ ३३॥ तैरलातायुधैः सर्वैः प्रमथाः सहगुह्यकाः॥ हन्यमाना दिशो भेजुरुशद्भिर्ब्रह्मतेजसा॥ ३४॥ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे सतीदेहोत्सर्गश्चतुर्थोध्यायः॥ ॥ मैत्रेय उवाच॥ ॥ भवो भवान्या निधनं प्रजापतेरसत्कृताया अवगम्य नारदात्। स्वपार्षदसैन्यं च तदध्वरर्भुभिर्विद्रावितं क्रोधमपारमादधे॥ १॥ क्रुद्धः सुदष्टोष्ठपुटः स धूर्जटिर्जटां तडिद्वह्निसटोग्ररोचिषं। उत्कृत्य रुद्रः सहसोत्थितो हसन् गंभीरनादो विससर्ज तां भुवि॥ २॥ ॥

र्थोध्यायः॥ ॥ पंचमेतु सती देहत्यागमाकर्ण्य शंकरः॥ वीरभद्रं उत्पाद्य तेन दक्षमघातयत्। प्रजापतेर्हेतोर्निधनं कृतः तेनासत्कृतायाः तस्याः अपेक्षा भवो देवाः ते॥ १॥ स धूर्जटिः रुद्रः घोरः स्वजटा मुत्कृत्योत्पाद्योत्थितः सन् तां भुवि विससर्ज तडिद्दष्टे द्विष्ठपुटो येन तडितां वह्नीनां च सटा ज्वाला स्तद्वत् उग्रं रोचिर्यस्याः तां॥ २॥ ॥

मे २

ततो जरायाः सकाशात् अतिकायो वीरलङ्को जात इति शेषः तत्रवातत्त्वादेहेन दिवं स्पृशत् अस्पृशदित्यर्थः। घनतुल्यः कृष्णवर्णः त्रयः सूर्या इव दृशो यस्य कराला स्फं मा दंष्ट्रा यस्य। ज्वलन्तुल्या ग्निरिव मूर्द्धजा यस्य कपालमालायुक्तः विविधान्युद्यतान्यायुधानि यस्य ॥ ३ ॥ हे उड्डहेलद सुदृढके शलमङ्गदानात्व मग्रणीः सन्नसयज्ञं दर्त्तुं ब्रूहि। अद्य तेजो डु र्जयमिति मामं स्वाः यत स्त्वं मेत्रे ॥ कः ॥ ४ ॥ मन्युना उड्डेणं परिवक्रे प्रदक्षिणी

ततोतिकायस्तनुवास्पृशन् दिवं सहस्रबाहुर्घनतुल्यकृष्णित्रिसूर्यदृक्। करालदंष्ट्रो ज्वलदग्निमूर्द्धजः कपालमाली विविधोद्यतायुधः ॥ ३ ॥ तं किं करोमीति गृणन्नमा वह बद्धाञ्जलिं सगवानुभूतनाथः। दक्षं सयज्ञं जहि मद्भटानां त्वमग्रणीरुद्भटदांशको मे ॥ ४ ॥ आज्ञप्त एवं कुपितेन मन्युना स देवदेवं परिचक्रमे विभुम्। मेने तदात्मानमसंगरंहसा महीयसां तात सहः सहिष्णुं ॥ ५ ॥ अन्वीयमानः स तु रुद्रपार्षदैर्भृशं नदद्भिर्व्यनदत्सुभैरवम्। उद्यम्य शूलं जगदन्तकान्तकं सम्प्राद्रवद्घोषणभूषणाङ्घ्रिः ॥ ६ ॥ अथर्त्विजो यजमानः सदस्याः ककुभ्युदीच्यां प्रसमीक्ष्य रेणुम्। तमः किमेतत्कुत एतद्रजोऽभूदिति द्विजा द्विजपत्न्यश्च दध्युः ॥ ७ ॥ वाता न वान्ति न हि सन्ति दस्यवः प्राचीनबर्हिर्जीवति होग्रदण्डः। गावो न काल्यन्त इदं कुतो रजो लोकोऽधुना किं प्रलयाय कल्पते ॥ ८ ॥

वकारात्र संगमप्रतीघातं यद्रंहो वेगः तेन लोकान् महीयसां वलीयसामपि सहः सहिष्णुं बलं सोढुं क्षमं मेने ५ जगदन्तकोऽन्तकः मृत्युः तस्याप्यन्तकं शूलं घोषयन्ति शब्दं कुर्वन्तीति घोषणानि नूपुरादीनि भूषणानि ययोः तावङ्घ्रीयस्य ६ ककुभि दिशि तमोनभसि किं उ रज इति ज्ञात्वा ऊचुः रज एतत्कुतोऽभूदध्युः चिंतयामासुः ॥ ७ ॥ हे वत्तत्र रासं लवेनोत्पातिकत्वं कल्पयन्ति वाता इति। दस्यूनामभावे हेतुः प्राचीन

पु२

ला॰च॰
१४

प्रसूतिर्दक्षपत्नी सा मिश्रा अश्रुरूपा या सा विपाकः फलं । पशुपतीनामिति तस्या दुःखाधिक्ये हेतुः । अवद्ध्यौ अवज्ञातवानु अत्र नागा अनागसं ॥१॥ न चेदं श्रुत्वा वज्ञा मात्रं किंतु इडावज्ञानं । अतो नास्य भद्रं लवि श्यतीत्या दुः । यस्त्विति द्वाभ्यां कृश्नोवि कीर्णजटा कपालो यस्य स धूर्जटिः स्पष्ट च येषामर्पिताः प्रोता दिग्गजेंद्रा यस्य । उदिता सुत्र मिता निःश्वासाणि येषां दोषाकाल्हवस्य एवं च्छूजा स्तस्त्वितत्पाह स्वेणकृत्यतिर्नवेः अट्टहासः कठोरो हासः एवंभूतनपत्सु गर्जितं तेन भिन्ना विदीर्णा दिशो येन सः ॥१०॥ अमर्षयित्वा असहनयुक्तो सत्वा मन्युः कृत क्रोधस्तसं दृग्द्द्रसं गद्दितोम

प्रसूतिमिश्राः स्त्रियस्त्विद्द्धिर्यजित्ता अशुभविर्पाकोपजिनष्येषतस्यापत्पशुपतीनां दुहितृणां प्रजेशः सुतां सतीमवदध्यावनागाम् ॥९॥ यस्त्वंतकालेव्युप्त जटा कलापः स्वशूलसूच्यर्पितदिग्गजेंद्रः ॥ वितत्य नृत्यत्युदितास्त्रदोर्ध्वजा नुच्चाट्टहासस्तनयित्नुभिन्नदिक् ॥१०॥ अमर्षयित्वा तमसह्यतेजसं मन्युप्लुतं दुर्विषहं भ्रुकुट्या । करालदंष्ट्राभिरुदस्त भागणं स्यात्स्वस्ति किं कोपयतो विधातुः ॥११॥ बह्वेवमुद्विग्नदृशोच्यमाने जनेन दक्षस्य मुहुर्महात्मनः । उत्पेतुरुत्पाततमाः सहस्रशो भयावहा दिवि भूमौ च पर्यक् ॥१२॥ तावत्स रुद्रानुचरैर्मखो महान् नानायुधैर्वामनकैरुदायुधैः । पिंगैः पिशंगैर्मकरोदराननैः पर्याद्रवद्भिर्विदुरान्वरुध्यत ॥१३॥ केचिद्बभंजुः प्राग्वंशं पत्नीशालां तथापरे । सद आग्नीध्रशालां च तद्विहारं महानसं

॥२४॥ राम ॥ ॥

गणेन रुद्रस्य संघो येन स उनश्चर्तं कोपयतो विधातुरपि किं स्वस्ति स्यात् न स्यादेव वाच्यस्य कथा ॥११॥ उद्विग्ना प्रचलिता दृग्दृग्यस्य जनेन बहु यथा लक्ष्येवमुच्यमाने सति उत्पाता तत मा महोत्पाता उत्थिताः । पर्यक् सर्वतश्च । कथंभूताः महात्मनो पि दक्षस्य भयावहाः ॥१२॥ नानायुधा नि येषां वामनकैः हृस्वैः उद्यतायुधैः । पिंगैः कपिलैः पिशंगैः पीतैः मकरस्येवोदरमाननं च येषां तैः परितो धावद्भिरवरुद्धः ॥१३॥ यज्ञशालायाः पूर्व पश्चिमसंतयोः अर्पितं पूर्वपश्चिमायतं काष्ठं प्राग्वंशः संयज्ञशालायाः पश्चिमतः पत्नीशाला यज्ञशालायाः पुरतः स्थितं सदो मंडपं सदः सः उत्तरतो हविर्धानं ततो मोत्तरत आग्नीध्रशाला तद्विहारं यजमानगृहं । महानसं पाकभोजनशाला ॥१४॥

१४

रुरुजुः बभंजुः । भिन्नर्वेदीमेखलाः सीमासूत्राणि १५ ग्रावभिरर्द्यमानाः नैकधा अनेकधा द्रुद्रुवुः १८ स्रुवो हस्ते यस्य । लुलुंचे उत्पाटितवान् १९ उज्जहार उद्धृतवान् । सदस्थः सभायां स्थितः सन् शपंतं शिवनिंदकं दक्षं अक्ष्णा नेत्रेण असूसुचत् प्रेरितवान् २०
कलिंगदेशराजस्य नितरां द्वेषो हा हे बललक्षो यथा घूते दंतान्पातितवान् । गरिमणि उन्नतत्वे निंद्यमाने दतः दंतान् दर्शयन् यो जहास पूष्णो रिति

रुरुजुर्यज्ञपात्राणि तथैके ऽग्नीननाशयन् । कुंडेष्वमूत्रयन्केचिद्बिभिदुर्वेदिमेखलाः ॥ १५ ॥ अबाधंत मुनीनन्ये एके पत्नीरतर्जयन् । अपरे जगृहुर्देवान्प्रत्यासन्नान्पलायितान् ॥ १६ ॥ भृगुं बबंध मणिमान्वीरभद्रः प्रजापतिं । चंडीशः पूषणं देवं भगं नंदीश्वरोग्रहीत् । सर्व एवर्त्विजो दृष्ट्वा सदस्याः सदिवौकसः । तैरर्द्यमानाः सुभृशं ग्रावभिर्नैकधाद्रवन् १८ जुह्वतः स्रुवहस्तस्य श्मश्रूणि भगवान्भवः । भृगोर्लुलुंचे सदसि यो हसत् श्मश्रु दर्शयन् ॥ १९ ॥ भगस्य नेत्रे भगवान्पातितस्य रुषा भुवि । उज्जहार सदस्थो ऽक्ष्णा यः शपंतमसूसुचत् ॥ २० ॥ पूष्णो ह्यपातयद्दंतान्कालिंगस्य यथा बलः । शप्यमाने गरिमणि यो हसद्दर्शयद्दतः ॥ २१ ॥ आक्रम्योरसि दक्षस्य शितधारेण हेतिना । छिंदन्नपि तदुद्धर्तुं नाशक्नोत्त्र्यंबकस्तदा ॥ २२ ॥

पाठे हि वचनमैंद्रापौष्णश्चरुर्भवतीत्यत्र तत्सहितस्यापि पूष्णो दंतपातप्राप्त्यर्थं सूचितवान् । तथाहि पूषा प्रपिष्टभोगो दंतको हि तं देवं दृष्टेनेन हविर्वचनेन ज्ञाप्यते । अत एव पूष्णोऽनुग्रहं हेधावस्यति । पूषा तु यजमानस्य दंतैर्भक्षयतीति विष्णुगिति केवलं चेत्पिष्टभुक् भविष्यति । अन्यसहितश्चेद्यजमानस्य दंडैर्भक्षयिष्यतीत्यर्थः । २२ छिंदन्नपीत्यत्र शिरः इत्युपरि मंत्रो भविष्यति । अव

॥ २२ ॥

अस्त्रान्वितैर्मंत्रैसहितैः न निर्भिन्ना त्वक् यस्य तथाभूतं दृष्ट्वेति शेषः ॥ २३ ॥ स पशूनां पतिर्मखे संज्ञपनं योगं कंठनिष्पीडनादिरूपं मरणोपायं दृष्ट्वा ते
नोपायेनाहरत् ॥ २४ ॥ अन्येषां ब्राह्मणादीनां तद्विपर्ययः असाधुवादः ॥ अत्र तदिति शेषः ॥ २५ ॥ गुह्यकालयं कैलासं ॥ २६ ॥ इति चतुर्थे पंचमः ॥
षष्ठे तु देवसंघेन सह गत्वालकं विधिः । सांत्वयामास दक्षादिजीवितार्थमादरात् ॥ अथ देवगणाः स्वयंभुवे न्यवेदयन्निति संबंधः । येनाचवयः ।

शस्त्रैरस्त्रान्वितैरेवमनिर्भिन्नत्वचं हरः ॥ विस्मयं परमापन्नो दध्यौ पशुपतिश्चिरं ॥ २३ ॥ दृष्ट्वा संज्ञपनं योगं पशूनां स पतिर्मखे । यजमानपशोः कस्य कायात्तेनाहरच्छिरः ॥ २४ ॥ साधुवादस्तदा तेषां कर्म तत्तस्य पश्यतां । भूतप्रेतपिशाचानामन्येषां तद्विपर्ययः ॥ २५ ॥ जुहावैतच्छिरस्तस्मिन्दक्षिणाग्नावमर्षितः ॥ तद्देवयजनं दग्ध्वा प्रातिष्ठद्गुह्यकालयं ॥ २६ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे दक्षयज्ञविध्वंसनं नाम पंचमोध्यायः ॥ ॥ मैत्रेय उवाच ॥ ॥ अथ देवगणाः सर्वे रुद्रानीकैः पराजिताः ॥ शूलपट्टिशनिस्त्रिंशगदापरिघमुद्गरैः ॥ संछिन्नभिन्नसर्वांगाः ॥ सर्त्विक्सभ्या भयाकुलाः ॥ स्वयंभुवे नमस्कृत्य कार्त्स्न्येनैतन्न्यवेदयन् ॥ २ ॥ उपलभ्य पुरैवैतद्भगवानब्जसंभवः ॥ नारायणश्च विश्वात्मा न कस्याध्वरमीयतुः ॥ ३ ॥ तदाकर्ण्य विभुः प्राह तेजीयसि कृतागसि । क्षेमाय तत्र सा भूयान्न प्रायेण बुभूषतां ॥ ४ ॥ अथापि यूयं कृतकिल्बिषा भवं ये बर्हिषो भागभाजं पराडुः । प्रसादयध्वं परिशुद्धचेतसा क्षिप्रप्रसादं प्रगृहीतांघ्रिपद्मं प

शूलादिभिः संछिन्नानि त्रुटितानि भिन्नानि विदीर्णानि येषां ते सह ऋत्विग्भिः सभ्यैश्च वर्तमानाः ॥ १ ॥ कस्यापि दक्षस्य न यज्ञं न जग्मतुः ॥ २ ॥ विभुर्ब्रह्मा तेजीयसि त्र
तिमे ज्ञात्वैव निषेधकृतागसि सत्यपि स्वयं तत्र कृतागसि तु बुभूषतां अपराधं कर्तुमिच्छतां ॥ सा तथा बुभूषतां तेषां क्षेमाय न भूयात् ॥ प्रायेणेति लोकोक्तिः ॥
न भवेदेवेत्यर्थः ॥ ४ ॥ अथापि प्रसादयध्वमित्यन्वयः । ये भवंतं बर्हिषो यज्ञस्य भागभाजं पराडुः दूरात् खंडितवंतः प्रगृहीतांघ्रिपद्मं पादोपग्रहेणेत्यर्थः ॥

अघरक्षाजीवितं पुनः संधानं प्रार्थयमानाः संतः यस्मिन्कुपिते सति सपालो लोकः नश्येत्नश्येदित्यर्थः इ वयं तु तत्र गंतुं बिलिमः त्वमेव कंचिदुपायं विधत्स्वेति वेत्तुं श्रुत आह नेति । यज्ञस्तदानीं तन इंद्रः । यश्चात त्वं बलवीर्ययोः प्रमाणमियत्तां च न विद्मः वीर्यं पराक्रमः पापमिति पाठे त्र पराधं ॥ ७ ॥ कैलासं वर्णयति जन्मौषधीत्यादि चतुर्दशश्लोकैः । नरैरेतैर्दैवैर्जुष्टे ॥ ८ ॥ शृंगै रमणं रतिप्रदमिस्तु तेरेणान्वयः । कथं भूतैः । नानाधातुभिर्विचित्रैः । नानाद्रुमलतागुल्मा येषु ॥ १० ॥ नानामल्लानि प्रस्रवणानि येषु । नानाकंदराः सानवश्च येषु । रमणैः सहक्रीडंतीनां ॥ ११ ॥

आशासानाजीवितमघरस्य लोकः सपालः कुपितेन यस्मिन्भूतमात्रदेवं प्रिययाविहीनं क्षमापयद्भ्यं हृदि विद्वं दुःखेन तेः ॥ ६ ॥ नाहं न यज्ञो न च यूपमन्ये येदेह भाजो भुन यस्त्वतत्वं विद्मः प्रमाणं बलवीर्ययोर्वा यस्यात्म तंत्रश्च क उपायं विधित्से ॥ ७ ॥ मङ्गल्यमादिश्य [illegible] जस्तैः समन्वितः प्रियतलैः सपूजेशैः । यमो स्वधिष्ण्यान्निलयं पुरद्विषः कैलासमद्रिप्रवरं प्रियंप्रलोः ॥ ८ ॥ जन्मौषधीतपोमंत्रयोगसिद्धैर्नरेतरैः । जुष्टं किन्नरगंधर्वैरप्सरोभिर्वृतं सदा ॥ ९ ॥ नानामणिमयैः शृंगैर्नानाधातुविचित्रितैः । नानाद्रुमलतागुल्मैर्नानामृगगणावृतैः ॥ १० ॥ नानामलप्रस्रवणैर्नानाकंदरसानुभिः । रमणं विहरंतीनां रमणैः सिद्धयोषितां ॥ ११ ॥ मयूरकेकाभिरुतं मदांधालिविमूर्छितं । प्लावितै रक्तकंठानां कूजितैश्च पतत्रिणां ॥ आह्वयंतमिवोद्धस्तैर्द्विजान्कामदुघैर्द्रुमैः । व्रजंतमिव मातंगैर्गृणंतमिव निर्झरैः ॥ १२ ॥

मयूराणां केकाभिः शब्दैर्नादितं मदांधैरलिभिर्विमूर्छितं मूर्छना रागगतिविशेषः तद्युक्तं संकृतो रक्तकंठानां कोकिलानां प्लावितैः प्लुतत्वं नीतैः स्वरैः अन्येषां पतत्रिणां च कूजितैः । उद्धस्तैरुन्नतशाखैर्द्रुमैः द्विजान्पक्षिण आह्वयंतमिव लोके हि हस्तमुत्क्षिप्याह्वयेत्स्वरेणाह्वानमर्थिनां कुर्वंति । अद्रिश्चोद्धस्तैर्हस्ताकारैर्द्रुमैः तत्रत्यपक्षिवनेश्च तथालक्ष्यत इत्यर्थः । व्रजद्भिर्मातंगैर्गजैर्व्रजंतमिव निर्झरैः ध्वनिति गृणंतं भाषमाण

१९ मे

मा

२ वेणुकीचकयोर्ध्वनी रंध्रसरंध्रयोर्वे भेद २ १ स्वर्णाणौ स्वर्णपत्रपर्णैः रात्नपत्रैर्मंडितं।

सर्वम् ॥

ती १

सा·च वेणुकीचकयोर्ध्व नीरंध्रत्वं १८ भेदः

चूताम्रयोरवां तु रजातिभेदैर्वेणुकीचकयोश्च निरंध्रसरंध्रत्वे भेदः ॥ १८ वेणुकजातिभिरित्यत्र वेणुकाएलाञ्जातिर्मालेडुमजातिरित्यत्र जातिरवान्तरैस्सामान्यांकि मुदादिसम्पादितिर्हेतुलितिनी शुभसरः सुकलं मधुरं यथा भवत्येवं कृजंति या निपक्षिहंदानि तेनुपशोभितं १९ मृगादिभिर्निर्द्दिष्टं निषेवितं नालिकृष्टरी मृगं गमणः मृगविशेषणएत्वेनोक्ताः इदानीं प्राप्तं तत्रैणोत्यपोनं नदमपा २० कदलीखंडैः संकुचानि श्रीहत्वानि नलिनीनां पुलीनानि तैः श्रीशोलायाम्रिनूनं दयाग गतया पर्यस्रं परिवेष्टितं सत्याः लगान्याः भ्रानं ... ण्य

मंदारैश्च पारिजातैश्च सरलैश्चापशोभितैः तमालैः शालतालैश्च कोविदारासनार्जुनैः २४ चूतैः कदंबनीपैश्च नागपुन्नागचंपकैः पाटलाशोकबकुलैः कुंदैः कुरबकैरपि २५ स्वर्णपर्णशतपत्रैश्च वरवेणुकजातिभिः। कुब्जकैर्मल्लिकाभिश्च माधवीभिश्च मंडितं २६ पनसोदुंबराश्वत्थ प्लक्षन्यग्रोधहिंगुभिः भूर्जैरोषधिभिः पूगैः राजपूगैश्च जंबुभिः ॥ २७ खर्जूराम्रातकाम्राद्यैः प्रियालमधुकेंगुदैः ... जातिभिर्श्चारा जितं वेणुकीचकैः। कुमुदोत्पलकल्हारशतपत्रवनर्द्धिभिः। नलिनीषु कलं कूजत्खगवृंदोपशोभितं १९ मृगैश्शाखामृगैः क्रोडैर्मृगेंद्रैः ऋक्षशल्लकैः। गवयैर्नीलशरभैर्द्विपिभिर्जुष्टं महिषादिभिः। २० कदलीखंडसंरुद्धनलिनीपुलिनश्रियं पर्यस्तं नंदया सत्याः स्नानकुणपतरोदया २१ विलोक्य भूतेशगिरिं विबुधा विस्मयं ययुः। ददृशुस्तत्र ते रम्यामलकां नाम वै पुरीं ॥ २२ वनं सौगंधिकं चापि यत्र तन्नाम पंकजं नंदा चालकनंदा च सरितौ बाह्यतः पुरः। तीर्थपादपदांभोजरजसातीव पावने ॥ २३ ययोः सुरस्त्रियः ... रवरूहात्स्वधिष्ण्यतः। क्रीडंति पुंसः सिंचंत्यो विगाह्यतरमति... २१ तत्रागिरीवनं च दहकः रतिकपिता: २४ २२ यत्र वने तन्नामसौगंधिकं पंकजं तत्र वतिजाता विकवत्रना ॥ २२ ... यतिनंदा चेति तदोर्भिः सरितो ... तो भवतः तीर्थपादस्य हरेः पादांभोजरजसा। ययोर्विगाह्य ... पत्क्रीडं

नलिनं

न

१६

ती

ययो रंभोविगमत्तयोऽपिगंगाः पिबंति। तत्र हेतुः तासांस्वस्त्रीणांस्नानेन स्त्रष्टं गलितं यन्नवंकुंकुमं तेनपिंजरं पीतवर्णा गंगाः कारिण्यः। तारं दं
ष्टं तारादिमयविमानानां शतैः संकुलोत्तडितुभिः स्त्रीणांघनैर्विमानानां खेन तुल्याः साहश्यं ॥२६॥ यत्रेश्वरसुंदरीं हित्वा अतिक्रांत्य तद्धने हृष्ट्वा
नैदेवाआरान् इराद्ददंद दृष्ट्वारितिचतुर्थनान्वयः। कथं सूतं वने चित्राणि माल्यानि फलानि छदाश्रयेषु तेर्हृष्टा खवकांरं ॥२७॥ रक्ताकंठ खगा
गानामनीकस्वरैर्मंडिताः षट्पदस्वरा यस्मिन्न् कलहंसानां कुलस्य प्रेंखं खरदंडानि पद्मानि तैर्व्याकुलाशयायस्मिन् ॥२८॥ वनकुं

यत्रेषु स्नानविलुप्तनवकुंकुमपिंजरांवितप्योऽपि पिबंत्यं स्तःपापं यंतोगंगा गंगाः ॥२५॥ तारहेममहारत्नविमानशतसंकुलाः
तुष्टं तु एपजनस्त्रीलियथा खंसतडिद्घनं ॥२६॥ हित्वायत्रेश्वरसुंदरीं वनं सौगंधिकं चत तान् ॥ द्रुमैः कामदुघैर्हृष्टं चित्रमाल्यफ
लच्छदैः ॥२७॥ रक्ताकंठखगानीकस्वरमंडितषट्पदं कलहंसकुलप्रेंखं खरदंडजलाशयम् ॥२८॥ वनं कुंजरसंघृष्ट
हरिचंदनवायुना। अधितुएपजनस्त्रीणां मुहुरुन्मथयन्मनः ॥२९॥ वैडूर्यकृतसोपानावाप्यउत्पलमालिनीः प्राप्तं
किंपुरुषैर्हृष्ट्वातआराद्ददृशुर्वटं ॥३०॥ सयोजनशतोत्सेधः पादोनविटपायतः। पर्यक्कृताचलच्छायोनिर्नीडस्तापव
र्जितः ॥३१॥ तस्मिन्महायोगमये मुमुक्षुशरणे सुराः। ददृशुः शिवमासीनं त्यक्तामर्षमिवांतकं ॥३२॥ ॥
जरैः संघृष्टायेहरिचंदनद्रुमाः तत्संबंधिनावायुनाउपजनस्त्रीणां मनः अधिअधिकमुन्मथयन् ॥२९॥ यत्रउत्पलमालिन्योवाप्यस्ता
नुकिंपुरुषैः प्राप्तं वनैर्हृष्ट्वा पार्गंतरेकिंपुरुषैः आप्तावापीश्च दृष्ट्वेत्यर्थः ॥३०॥ योजनशतमुत्सेधउच्छ्रयोयस्य। पादोनेः सर्वतः प
वसहतियोजनप्रमाणैर्विटपैः शाखाभिरायतोविस्तृतः पर्यक्कृसर्वतः। कृताअचलाछायायेननिर्गतंनीडंयस्मात् ॥३१॥ मुमुक्षू
णांशरणे। आश्रये त्यक्तामर्षोऽंतकसतुल्यम् ॥३२॥ ॥

पत्र
या
दूर

सव्यं

भा॰च॰ तं विशिनष्टि सनंदनाद्यैरिति पंक्तिभिः। सख्या च कुबेरेणोपास्यमानां विद्यातपसा तपश्चितैकाग्र्यं योगः समाधिः तेषां पंथानं तद्वर्त्म न हारं
लोकस्य मंगलं हितं तापोवात्सल्यात् स्नेहाद्वा चरंतं॥३४॥ संध्याभ्ररुचा रक्तवर्णेनांगेन भस्मादि लिंगं चंद्रलेखां च बिभ्रतं॥३५॥ बृसिर्व्रतिनामास-

२७

नं दर्भमयी तस्यां ब्रह्म प्रवोचंतं॥३६॥ सव्यं पादपद्मं दक्षिणे ऊरौ कृत्वा विन्यस्य जानुनि च सव्ये वाहुं कृत्वा दक्षिणबाहुप्रकोष्ठे मणिबंधस्थाने अ-
क्षमालां कृत्वा दक्षिणहस्तकृतया तर्कमुद्रयोपलक्षितमासीनमित्यर्थः। तदुक्तं योगशास्त्रे। एकपादमथैकस्मिन्विन्यस्योरुणि संस्थितं।

सनंदनाद्यैर्महासिद्धैः शांतैः संशांतविग्रहां उपास्यमानं सख्या च भर्त्रा गुह्यकरक्षसां॥३३॥ विद्यातपोयोगपथमास्थितं
तमधीश्वरं। चरंतं विश्वसुहृदं वात्सल्याल्लोकमंगलं॥३४॥ लिंगं च तापसाभीष्टं भस्मदंडजटाजिनं। अंगेन संध्याभ्ररु-
ब
चा चंद्रलेखां च बिभ्रतं॥३५॥ उपविष्टं दर्भमय्यां बृस्यां ब्रह्म सनातनं। नारदाय प्रवोचंतं पृच्छते शृण्वतां सतां॥३६॥ कृत्वो-
रौ दक्षिणे सव्यं पादपद्मं च जानुनि। बाहुं प्रकोष्ठेऽक्षमालामासीनं तर्कमुद्रया॥३७॥ तं ब्रह्मनिर्वाणसमाधिमाश्रितं व्यु-
पाश्रितं गिरिशं योगकक्षां। सलोकपाला मुनयो मनूनामाद्यं मनुं प्रांजलयः प्रणेमुः॥३८॥ स तूपलभ्यागतमात्म-
योनिं सुरासुरेशैरभिवंदितांघ्रिः। उत्थाय चक्रे शिरसाभिवंदनमर्हत्तमः कस्य यथैव विष्णुः॥३९॥ तथापरे सिद्धगणा
महर्षिभिर्ये वै समंतादनुनीललोहितं। नमस्कृतः प्राह शशांकशेखरं कृतप्रणामं प्रहसन्निवात्मभूः॥४०॥ ॥

इतरस्मिंस्तथा वाहुं वीरासनमिदं स्मृतं। तर्कमुद्रा चोक्ता तर्जन्यंगुष्ठयोरग्रे मिथः संयोज्य चांगुलीः। प्रसार्य वै धनं प्राहुस्तर्कमुद्रेतिमां बो॰
त्रिका इति। ब्रह्मनिर्वाणं ब्रह्मानंदः तत्र समाधिरेकाग्र्यमाश्रितं योगकक्षां योगपट्टं वामजानुबद्धटीकरणार्थं विशेषेणोपाश्रितं वृं
मननशीला मनवस्तेषामाद्यं मनुं स्वयं॥३८॥ अर्हत्तमो विष्णुर्वामनमूर्तिर्यथा कस्यपस्य॥३९॥ महर्षिभिः सहिताः ये नीललो- २७
हितमनुवर्तंते तेपि तस्मै वंदनं चक्रुः एवं सर्वैर्नमस्कृतः। प्राह। कृतप्रणामो देवैर्विस्मितो॥४०॥ ॥

यद्यपि त्वं नीचवन्मां नमस्करोषि। तथापि त्वैश्वर्यमहं वेद्मीत्याह। जाने इति विश्वस्येशं जाने। तत्र हेतुः जगतो योनिर्या शक्तिः प्रकृतिर्वीजं च शिवः पुरुषः तयोः कारणं तथापि निर्भेदं यत् उज्ज्वलं निर्विकारं तदेव त्वमिति जाने। ननु विश्वमेतत् कुतस्तत्राह ॥ ४१ ॥ त्वमेव ... रूपयोः रविलक्ष्म्योः शिवशक्त्योः क्रीडन् विश्वसृष्ट्यादि करोषि। ऊर्णनाभिरिव। स्वरूपयोरिति पाठे स्वांशयोः। अतो न विरोधः ॥ ४२ ॥ धर्ममर्यादा ... त्रयी तस्या अलिपत्रये रक्षणाय अध्वरं सृष्टवानसि। यद्वा हे धर्म मार्य दुघ धर्माद्यालिपत्रये तत्त्राणाय। दक्षेण सूत्रेण सेतवो वर्णाश्रममर्यादाश्च अवसिताः

ब्रह्मोवाच ॥ जाने त्वामीशं विश्वस्य जगतो योनिबीजयोः शक्तेः शिवस्य च परं यत्तद्ब्रह्म निरंतरं ॥ ४१ ॥ त्वमेव भगवन्नेतच्छिवशक्त्योः स्वरूपयोः। विश्वं सृजसि पास्यत्सि क्रीडन्नूर्णपटो यथा ॥ ४२ ॥ त्वमेव धर्मार्थदुघाभिपत्तये दक्षेण सूत्रेण ससर्जिथाध्वरं। त्वयैव लोकेऽवसिताश्च सेतवो यान्ब्राह्मणाः श्रद्दधते धृतव्रताः ॥ ४३ ॥ त्वं कर्मणां मंगल मंगलानां कर्तुः स्म लोकं तनुषे स्वः परं वा। अमंगलानां च तमिस्रमुल्बणं विपर्ययः केन तदेव कस्यचित् ॥ ४४ ॥ न वै सतां त्वच्चरणार्पितात्मनां भूतेषु सर्वेष्वभिपश्यतां तव। भूतानि चात्मन्यपृथग्दिदृक्षतां प्रायेण रोषोऽभिभवेद्यथा पशुं ॥ ४५ ॥

णि वद्धाः निर्णीता इति वा श्रद्दधते श्रद्धया अनुतिष्ठंति ॥ ४३ ॥ सर्वकर्मफलदातापि त्वमेवेत्याह। हे मंगल मंगलानां शुभानां कर्मणां कर्तुः स्वर्गं परं मोक्षं वा तनुषे। अमंगलानां अशुभानां कर्मणां कर्तुः तमिस्रं तनुषे। तत्र केन हेतुना तदेव तस्मिन्नेव कस्यचिद्विपर्ययो भवति ॥ ४४ ॥ त्वत्कोपोत्र हेतुरित्यसंभावितमिति कैमुत्यन्यायेनाह। न वै सतां सतः रोषोऽभिभवेत्। नवत्वां हित्वा यार्थे षष्ठी। पशुं अज्ञं यथाभिभवति

त

अतः ये पृथग्धियः ४६ ते दैवहताः । अतः कर्मदृश एव हि दृष्टिर्येषां परेषामुदयेन संपदा अर्पिता हृद्रुक् येषां अरुंतुदा मर्मच्छिदः । दैवेनैव वधो येषां त
न् भवद्विधः निरुपमः साधुः मा वधीत् न हन्यात् ॥ ४६ ॥ प्रत्युत साधूनां वृत्तमालोक्यानुग्रहमेव कर्तुमर्हसीत्याह । द्वाभ्यां यस्मिन्निति देशे यदा काले स्पृ
ष्टधियो मोहितचित्ताः पृथग्दृशो भवंति तत्रापराधे साधवो हि अनुकंपया अनंतरमेव परदुःखासहिष्णुतया चित्तप्रकंपेन कृपां कुर्वंति न तु
क्रमं पराक्रमं । कुतः दैवबलात्कृते अर्थे । ममैव दैवमेवं कृतं को वापराधस्तेषामिति मत्वा तेन नं कुर्वंत इत्यर्थः ॥ ४८ ॥ भवांस्त्वस्पृष्टमतिः । अतः

पृथग्धियः कर्मदृशो दुराशयाः परोदयेनार्पितहृद्रुजोऽनिशं । परान्दुरुक्तैर्वितुदंत्यरुंतुदास्तान्मावधीद्दैववधान्भवद्विधः
। यस्मिन्यदा पुष्करनाभमायया दुरंतया स्पृष्टधियः पृथग्दृशः । कुर्वंति तत्र ह्यनुकंपया कृपां न साधवो दैवबलात्कृते क्र
मं ॥ ४७ ॥ भवांस्तु पुंसः परमस्य मायया दुरंतयाऽस्पृष्टमतिः समस्तदृक् । तया हतात्मस्वनुकर्मचेतःस्वनुग्रहं कर्तुमिहार्हसि
प्रभो ॥ ४८ ॥ कुर्वध्वरस्योद्धरणं हतस्य भोस्त्वयाऽसमाप्तस्य मनो प्रजापतेः । न यत्र भागं तव भागिनो ददुः कुयाजिनो येन मखो
निनीयते ॥ ४९ ॥ जीवताद्यजमानोऽयं प्रपद्येताक्षिणी भगः । भृगोः श्मश्रूणि रोहंतु पूष्णो दंताश्च पूर्ववत् ॥ ५० ॥ देवानां भग्नगा
त्राणामृत्विजां चायुधाश्मभिः । भवतानुगृहीतानामाशु मन्योऽस्त्वनातुरं ॥ ५१ ॥ ॥

समस्तदृक् सर्वज्ञः । तया मायया हत आत्मा येषां तेषु । अत एव कर्मण्येव चित्तेषु इह अपराधे अनुग्रहं कर्तुमर्हसि ॥ ४८ ॥ एवं सामान्येनोक्त्वा प्रकृ
तमाह । कुर्विति त्रिभिः । त्वं हतस्य अत एव असमाप्तस्य प्रजापतेरध्वरस्य हे मनो यत्राध्वरे कुयाज्ञिकाः । भागिनोऽपि भागं न ददुः भागा[illegible] त्वमाह
येन त्वां मखो निनीयते । फलं प्राप्यते । हे मन्यो अनातुरं आरोग्यमस्तु ॥ ॥ राम ॥ ॥

अजेन

लागश्चतवास्त्वित्याहाएषइति हेतुइ। यावदित्यर्थे यदित्यव्ययं यज्ञे कृते यावानुच्छिष्टः अवशिष्टोर्थः तावानेषतवभागो नाद्य यज्ञः कल्पतां संपद्य
तां ५३॥ चतुर्थे षष्ठः॥ सप्तमे विरूपः रुद्रतः क्रतोर्दक्षतवादिनिशायज्ञं प्रवर्तयामास मद्देश्रेणेति निरूप्यते १ योऽनुनीतः प्रार्थितो लवस्वेनाभि
हितां हे महाबाहो विदुर। २॥ अब्रमपराधं श्रीपराधं मैपदक्षत्यागाद्रुद्र इत्यादि। दग्धं शीर्षयस्य तस्य प्रजापतेः अजस्य मुखं यस्मिन् तत्तथा भूतं

एष ते रुद्र भागोऽस्तु यदुच्छिष्टोऽध्वरस्य वै। यज्ञस्ते रुद्र भागेन कल्पतामद्य यज्ञहन्॥ ५३॥ इति श्रीभागवते महापुरा
णे चतुर्थस्कंधे रुद्रसांत्वननाम षष्ठोऽध्यायः॥ ६ ॥ श्रीमैत्रेय उवाच॥ इत्यजेनानुनीतेन भवेन परितुष्यता। अभ्यधायि म
हाबाहो प्रहस्य श्रूयतामिति॥ १॥ श्रीमहादेव उवाच॥ नाघं प्रजेश बालानां वर्णये नानुचिंतये। देवमायाभिभूतानां
दंडस्तत्र धृतो मया॥ २॥ प्रजापतेर्दग्धशीर्ष्णो भवत्वजमुखं शिरः। मित्रस्य चक्षुषेक्षेत भागं स्वं बर्हिषो भगः॥ ३॥ पूषा तु य
जमानस्य दद्भिर्जक्षतु पिष्टभुक्। देवाः प्रकृतसर्वांगा ये म उच्छेषणं ददुः॥ ४॥ बाहुभ्यामश्विनोः पूष्णो हस्ताभ्यां कृत
बाहवः। भवंत्वध्वर्यवश्चान्ये बस्तश्मश्रुर्भृगुर्भवेत्॥ ५॥ मैत्रेय उवाच॥ तदा सर्वाणि भूतानि श्रुत्वा मीढुष्टमोदि
तं। परितुष्टात्मभिस्तात साधु साध्वित्यथाब्रुवन्॥ ६॥ ततो मीढ्वांसमामंत्र्य शुनासीराः सहर्षिभिः। भूयस्तद्देवयजनं समी
ढ्वद्वेधसो ययुः॥ ७॥

शिरोऽस्तु बर्हिषः संबंधिनं भागं मित्रनामा देवस्य ३ प्रकर्षेण कृतानि लब्धान्यंगानि येषां ते लब्धं तु उच्छेषणं यज्ञावशिष्टं ४ येषां त्वं गाभि
विनष्टभिन्ने तु अश्विनोर्बाहुभ्यां कृतबाहवः पूष्णो हस्ताभ्यां कृतहस्ताश्च भवंतु अध्वर्यवः अन्ये च ऋत्विजः बस्तस्य श्मश्रूणि श्मश्रूणि
यस्य ५ मीढुष्टमः शिवः तेनोक्तं परितुष्टैश्चित्तैः ६ मीढ्वांसं शिवं त्वया आगत्य सर्वं कार्यं इत्यामंत्र्य संप्रार्थ्य शुनासीरा देवाः सह भृग्वा

भा॰च॰ १९

कार्म्मेन कहस्तवान् इत्यादिसाधारण्यं विधाय ॥ पूर्वं दृष्टध्वजद्वेषेण कलिलः कलुषीकृत आत्मा यस्य सः। तदा शरत्कालीनो ह्रद इवामलो भवत्। यदपि यद्यपि विप्रलब्धः प्रतारितो मया भवान्। तथापि त्वया दंडो धृतः। मित्राहृतानां नुपेक्षितोऽस्मि। ज्ञक्रमेवैतदित्याह। ब्रह्मवंधुषु च वां ब्राह्मणाभासेष्वपि तु भ्यं तव हरेश्चेति वां युवयोरवज्ञाऽपेक्षा नास्ति ॥ १४ ॥ तत्र हेतुमाह। विद्येति। ब्रह्माभूत्वात्वमस्राक्षीः किमर्थमात्मत

पामाद्यः

विश्वायकार्म्मेनयतत्यतीं दाह भगवान् भवः। संदधुः कस्य कायेन सवनीयपशोः शिरः ॥ ८ ॥ संधीयमाने शिरसि दक्षो रुद्राभिवीक्षितः। सद्यः सुप्त इवोत्तस्थौ ददृशे चाग्रतो मृडं ॥ ९ ॥ तदा वृषध्वजद्वेषकलिलात्मा प्रजापतिः। शिवावलोकादभवच्छरद्ध्रद इवामलः ॥ १० ॥ भवस्तवाय कृतधीर्न्नाशक्नोदनुरागतः। औत्कंठ्याद्बाष्पकलया संपरेतां स्मरन् ॥ ११ ॥ कृच्छ्रात्संस्तभ्य च मनः प्रेमविह्वलितः सुधीः। शशंस निर्व्यलीकेन भावेनेशं प्रजापतिः ॥ १२ ॥ दक्ष उवाच ॥ भूयाननुग्रह अहो भवता कृतो मे दंडस्त्वया मयि भृतो यदपि प्रलब्धः। न ब्रह्मबंधुषु च वां भगवन्नवज्ञा तुभ्यं हरेश्च कुत एव धृतव्रतेषु ॥ १३ ॥ विद्यातपोव्रतधरान् मुखतः स्म विप्रान् ब्रह्मात्मतत्त्वमवितुं प्रथमं त्वमस्राक्। तद्ब्राह्मणान् परम सर्वविपत्सु पासि पालः पशूनिव विभो प्रगृहीतदंडः ॥ १४ ॥ योऽसौ मयाविदिततत्त्वदृशा सभायां क्षिप्तो दुरुक्तिविशिखैर्विगणय्य तन्मां। अर्वाक्पतंतमर्हत्तमनिंदया पात् दृष्ट्यार्द्रया स भगवान् स्वकृतेन तुष्येत् ॥ १५ ॥

मौ सुता

त्वमवितुं यद्वा ब्रह्म वेदं आत्मतत्त्वं च अवितुं संप्रदायप्रवर्त्तनेन ज्ञापयितुमित्यर्थः। तस्मात्। हे परम तत्पालक ॥ १४ ॥ अत्र च प्रत्युपकारेण तुष्टित्याह। योऽसाविति। अविदिततत्त्वदृशा अप्राप्ततत्त्वज्ञानेन तत्त्वं एणाप्यविस्मृत्य अर्हत्तमस्य निंदया। अर्वाक् अधः पतंतमपात् रक्षितवान्। स्वकृतेनैव परानुग्रहेणैव तुष्येत्। न मया प्रतिकर्त्तुं शक्यमित्यर्थः ॥ ॥ राम ॥ श्रीराम ॥ श्रीराम ॥ ॥ १९

दग

अनुमंत्रितोऽनुज्ञातः उपाध्याय सहितैः ऋत्विगादिभिः अनुवर्त्तयामास॥१६॥ वीराणां प्रमथादीनां संसर्गकृतदोषस्य शुद्धये निष्कृत्यर्थे॥१७॥ उपात्त
हविषा अध्वर्युणा सह विष्णुर्याद् ध्यौ हे विशांपते विदुर॥१८॥ स्वया प्रभया तेषां तेजो मुष्णन् तिरस्कुर्वन् उपानीतः समीपं प्रापितः स्तोत्रे रहद्रथं
तरे एवा जौ पक्षौ तस्य तेन वृहद्रथंतरे पक्षाविति श्रुतेः॥१९॥ तमेवानुवर्णयति। श्याम इति द्वाभ्यां। हिरण्मयं रसनाय सितिव श्रुंलह्यते अर्कतुल्येन कि
रीटेन जुष्टः। नीलालका एव भ्रमरास्तैर्मंडितं कुंडलयुक्तम् आस्यं यस्य सः कंबवादिभिरायुधैः व्यग्रैः सव्याग्रैः हिरण्मयैर्भुजैः भूषितः कर्णिकार

॥श्रीमैत्रेय उवाच॥ क्रमाथैवं समीक्ष्यैवं ब्रह्मण्याचार्यमंत्रिणः। ततः कर्मसंतानयामास सोपाध्यायर्त्विगग्निभिः॥१६॥ वैष्णवं यज्ञसं
तत्यै त्रिकपालं द्विजोत्तमाः। पुरोडाशं निरवपन् वीरसंसर्गशुद्धये॥१७॥ अध्वर्युणात्तहविषा यजमानो विशांपते। यथा विष्णुर्याद
ध्यौत तथा प्रादुरभूद्धरिः॥१८॥ तदा स्वप्रभया तेषां द्योतयंत्या दिशो दश। मुष्णंस्तेज उपानीतस्तार्क्ष्येण स्तोत्रवाजिना॥१९॥ श्यामो हिरण्य
रसनोऽर्ककिरीटजुष्टो नीलालकभ्रमरमंडितकुंडलास्यः। कंबुब्जचक्रशरचापगदासिचर्मव्यग्रैर्हिरण्मयभुजैरिव कर्णिका
रः॥२०॥ वक्षस्याधिश्रितवधूर्वनमाल्युदारहासावलोककलया रमयंश्च विश्वं। पार्श्वभ्रमद्व्यजनचामरराजहंसः श्वेतातप
त्रशशिनोपरि रज्यमानः॥२१॥ तमुपागतमालक्ष्य सर्वे सुरगणादयः। प्रणेमुः सहसोत्थाय ब्रह्मेंद्रत्र्यक्षनायकाः॥२२॥ तत्तेज
सा हतरुचः सन्नजिह्वाःससाध्वसाः। मूर्ध्ना धृतांजलिपुटा उपतस्थुरधोक्षजं॥२३॥ ॥

इव शोभमानः सुजानो हिरण्मयं त्वं केशरं कंकणं कुंडिका घलंकारैः॥२०॥ वक्षसि अधिश्रिता वधूर्लक्ष्मीर्यस्य सः। उदारो हासो ऽवलोकश्च तयोः क
लया लेशेन। पार्श्वे चलयतो भ्रमतीव्यजनचामरे वा मरव्यजने एव राजहंसो यस्मिन् सः रज्यमानः शोभातिशयं दीनीयमानः॥२१॥ ब्रह्मेंद्रत्र्यक्षना
नायकाः मुख्याये षांते॥२२॥ हतरुचः तिरस्कृतप्रभाः सन्नजिह्वा गद्गदवाचः ससाध्वसाः तन्महिम्ना हुभिताः उपतस्थुः तुष्टुवुः॥२३॥

भा॰च॰

२॰ ना

ति॰

यस्य महिम महिमानं प्रतिज्ञ अर्वागेव वर्तिर्ये षांते पियथामति गृणंति स्म अक्रावता हृतः प्रकटीकृतोनुग्रहार्थे विग्रहो येन तं । यद्वा तेषां अर्वाग्वर्तित्वे हेतुः
ते अप्यस्य महिम महिमा । विभूतिमात्ररूपा इत्यर्थः ॥२३॥ तत्र तावद्दक्षः ...मित्रप्रकारमाह । दक्ष इति । गृहीतमर्हणसादनोत्तमं येन तं । उत्तमे पात्रे ...म
...आसं या अर्हणेषु समर्पितेषु प्रीत्या मार्हणपात्रमेव येन गृहीतमित्यर्थः । यद्वा कथं प्रपदे । गृहीतमर्हणसादनोत्तमं यथा भवति तथा । तद्गृही
त्वा प्रपेद इत्यर्थः । गृहीत्वेति पाठस्तु सुगमः । गृणन्नुक्तवन् प्रपेदे शरणं जगाम ॥२५॥ दक्ष आत्मविक्लवदस्पृशत्पुत्रवल्लेंद्र योषितः । अघयज्ञतथासिद्धा
यजमानी च लोकपाः । योगिब्रह्मा स्मि देवाश्च स्तुवंति जगदीश्वरं । तथा गेधर्वविद्याधरा ब्राह्मणाश्च इत्यश्रुतैः । न तु सा कृतात्परमेश्वर एव तु दक्षः । तत्पुत्र
ह्मपुत्रत्वेन जीवत्वमहंकारमात्रं । हंत किमिति त्वया भेददृष्ट्यासौ अवज्ञात इति मां भगवान् आक्षेप्स्यतीत्याशंक्याविकृतस्वरूपस्य जीवधर्मनाद्धंन

अथार्चां कृतवन्तो यो यस्य महित्वात्मस्तुवादयश्च यथामति गृणंति स्म कृतानुग्रहविग्रहं ॥२४॥ दक्षो गृहीतार्हणसादनोत्तमं य
ज्ञेश्वरं विश्वसृजां परं गुरुं । सुनंदनंदाद्यनुगैर्वृतं मुदा गृणन्नुपप्रपेदे प्रयतः कृतांजलिः ॥२५॥ दक्ष उवाच ॥ शुद्धं स्वधाम्नु
परताखिलबुद्ध्यवस्थं चिन्मात्रमेकमभयं प्रतिषिध्य मायां । तिष्ठंस्तयैव पुरुषत्वमुपेत्य तस्यामास्ते भवानपरिशुद्ध इ
वात्मतंत्रः ॥२६॥

दैवसंगच्छतेनान्यस्येत्याह । शुद्धमिति । स्वधाम्नि स्वस्वरूपे तिष्ठन्नुक्तवान् शुद्धं चिन्मात्रं चैतन्यघनः शुद्धत्वे हेतुः उपरतानि त्यक्तानि निहन्ता अखिला
बुद्ध्यवस्था यस्मात् । अतः एकं तेद्दस्यन्यं अत एवाभयं द्वितीयाद्वै भयं भवतीति श्रुतेः । जीवस्यापि वक्ष्यत एवं त्वन्तत्वान्न्हैल क्षणार्थमुक्तं । मा
स्व॰ यां प्रतिषिध्य अलिप्य यद्वैतं तत्र एव सन्नुत यामायया पुरुषत्वमहंष्यनाघमुपेत्य तस्यां मायायां तिष्ठन् अपरिशुद्ध इव रागादिमानिवास्ते । रा
गद्वेषाववतारे तथा प्रतीयते भवानित्यर्थः । अयंत्वविद्योपाधयो मायालिप्ताः संसरंति । अतस्त्वमेवेश्वरो न तु ब्रह्मादय इति भावः । अत एव
मां भेददृष्टिं भगवान्वारयिष्यति । अहं ब्रह्मा च शर्वश्च जगतः कारणं परमित्यादिना ॥२६॥ ॥

स्वम ३

२॰

भा॰ दे॰

ऋत्विजोऽपि स्वस्यापराधं परिहरंतः स्तुवंति। हे अनंजन उपाधिमलशून्य यद्यपि त्वमेव तु ज्ञाद्दिवेतारूपः। तथापि नंदीश्वरशापात्कर्म्मण्येव दुराग्रहधियः संतः स्ववत्तत्त्वं न विद्मः। किंतु धर्म्मस्योपलक्षणभूतं त्रिवृत् त्रयीप्रतिपाद्यमध्वराख्यं तवरूपमस्माभिर्ज्ञातं कीदृशं। यदर्थं यस्य सिद्धये अधिदैवं देवताधिकारेण अदो व्यवस्थाः अंशभागव्यवस्थाः अत्रेदमेव देवतानान्येत्येवं भूतानि समाइमत्यर्थः। यद्वा व्यवस्था इत्याख्याते अंशभागमाद्यभाव आर्षः। यदर्थं अदइदं इंद्राद्यधिदैवं रूपं विशेषेण क्लृप्तवानसीत्यर्थः॥ २७॥ सदस्यास्तु नीरीश्वरे पिदक्षाध्वरेधनलालेन

ऋत्विज ऊचुः॥ ॥ तत्त्वं न ते वयमनंजन रुद्रशापात्कर्म्मण्यवग्रहधियो भगवन्विदामः। धर्म्मोपलक्षणमिदं त्रिवृदध्वराख्यं ज्ञातं यदर्थमधिदैवमदो व्यवस्थाः॥ २७॥ सदस्या ऊचुः॥ ॥ उत्पत्त्यध्वन्यशरण उरुक्लेशदुर्गेंतकोग्रव्यालान्विष्टे विषयमृगतृष्ण्यात्मगेहोरुभारः। द्वंद्वश्वभ्रे खलमृगभये शोकदावेऽज्ञसार्थः पादौकस्ते शरणद कदा याति कामोपसृष्टः॥ २८॥ श्रीरामचंद्राय नमः॥ ॥ श्रीमहाभागवतेन मः॥ ॥

सदस्यास्तु मनुष्यत्वात्तत्र विरक्तिमाशाशाना स्तुवंति हे शरणद आश्रयप्रद आपत्यध्वनि संसारमार्गे वर्तमानो अज्ञानां सार्थः समूहस्ते पादौकः तव पादरूपं निवासं कदा यास्यति अशरणे विश्रामस्थानशून्ये। उरुक्लेशा एव दुर्गमस्थानानि यस्मिन् अंतक एवोग्रो व्यालस्तेनान्विष्टे लक्षीकृते यस्मिन् विषयरूपा मृगतृष्णिका यस्मिन् आत्मा अहंकारास्पदं शरीरं ममत्वास्पदं गेहं तस्य एवोरुभारो यस्य सः। द्वंद्वानि सुखदुःखादीन्येव श्वभ्राणि गर्त्ता यस्मिन् च। खला एव मृगा व्याघ्रादयस्तेभ्यो भयं यस्मिन्। शोक एव दावाग्निर्यस्मिन् कामेनोपसृष्टः पीडितः॥ ॥ २८॥ ॥

व॰

त्रैवं व्यासतः मायामयात्वयि तिरिक्तो ऽसि तं +५ नि४

भा॰सू॰

श्रीतुइन्द्रः पूर्वं मम निंदां दुःसहां सोढ्वा। इदानीं स्तुतो नगणयामीत्याह। तवेति। आशिषां कामेन। आसक्तैर्निष्कामैः रचितं धियं अशिनि वेशितम् चित्तं यैः। अविद्या वि-
द्याहीनो लोकः यद्विश्वप्रविष्टं जल्पति। आचारलब्धं जल्पतीति तज्जल्पनं तवयः परोक्ष्यहः त्वत्परायणो ब्रवीयो नुग्रहस्तेन ॥२९॥ स्तुत्यं स्वलावतं ज्ञानहीना
जीवाः। अतो ज्ञानकृतं मम दुष्विष्टितं क्षमस्वेत्याह। यन्माययेति। आत्मनात्मनि श्रितं अनुगतं तत्त्वं न विदंति। प्र एतानां मात्मा वधकस्त्व ॥३०॥ ब्रह्मादयो न
विदंतीति यद्यदीशो क्षेतदसहमानो ब्रह्मा तत्त्वज्ञानमाविष्कुर्वन्नाह। नेतदिति। पदार्थच्छेदग्राहके इंद्रिये। गुणस्य इंद्रियस्य यद्वा ज्ञानार्थयोः कारण-
स्य सत्वादेः ॥३१॥ इंद्रकृतं इंद्रियविषयः सर्वोपि मिथ्येति ब्रह्मणोक्तं असहमान आह। इदं तव खचरणे उपक्रमेव। नन्वत्र पंचवदनीर्वचनीयत्व याऽरूपत्वं

इंद्र उवाच ॥ तव वरद वरांघ्रावाशिषेहाखिलार्थे ह्यपि मुनिभिरसक्तैरादरेणार्हणीये। यदि रचितधियं माऽविद्यलोकोपविद्धं जप-
ति न गणये तत्त्वत्पराऽनुग्रहेण ॥२९॥ ब्रह्मोवाच ॥ यन्मायया गहनयाऽपहृतात्मबोधा ब्रह्मादयस्तनुभृतस्तमसि स्वपंतः। नात्म-
न्श्रितं तव विदंत्यधुनापि तत्त्वं सोयं प्रसीदतु भवान्प्रणतात्मबंधुः ॥३०॥ ब्रह्मोवाच ॥ नैतत्स्वरूपं भवतोऽसौ पदार्थभेदग्रहैः
पुरुषो यावदीक्षेत्। ज्ञानस्य चार्थस्य गुणस्य चाश्रयो मायामयाद्व्यतिरिक्तो मतस्त्वं ॥३१॥ इंद्र उवाच ॥ इदमप्यच्युत विश्वभा-
वनं वपुरानंदकरं मनोदृशां। सुरविद्विट्क्षपणैरुदायुधैर्भुजदंडैरुपपन्नमष्टभिः ॥३२॥ पत्न्य ऊचुः ॥ यज्ञोयं तव यजना-
यकेन सृष्टो विध्वस्तः पशुपतिनाद्य दक्षकोपात्। तं नस्त्वं शवशयनाभशांतमेधं यज्ञात्मन्नलिनरुचा दृशा पुनीहि ॥३३॥ ॥

सुराणां विद्विषः क्षपयंतीति तथा तैर्भुजदंडैरुपलक्षितं ॥ त्रिभिरेवं पत्न्यः ऊचुः यज्ञ इति। यजनाय त्वाय दक्षेण ब्रह्मणा पूर्वं सृष्टः हे यज्ञात्मन्न-
लिनकांत्या दृशा नेत्रेण पुनीहि पवित्रं कुरु। कथंभूतं। अयज्ञं शवाः शेरते यस्मिन्निति शवशयनं श्मशानं तद्वदाभा प्रतीतिर्यस्य। अस
चासौ शांतमेधश्च उपरतोत्सवः मेधशब्देन पशुहिंसा धक्रतुवोलक्ष्यते। शवस्पृदकं तत्र शांतमिति तथा प्रयुक्तं तम्मा भेति संबोधनं वा ॥ ॥

पां॰२ २१ धा॰ २१

ऋषय इति। कर्माण्यनुतिष्ठंतस्तत्तुण्ये न तत्फलेन च युज्यंते। न भवति तत्तदस्मभ्यमालक्ष्य विस्मिता ऊचुरिति। अनन्वितं अघटमानं यद्यस्मात्। आत्मना चरसि अनुतिष्ठसि न त्वज्यसे लिप्यसे। यतश्च अहो विभूतये संपदे ईश्वरीं लक्ष्मीं उपसेदुः भेजुः याच्ञया तद्विति। सर्वा विलक्षितक्रमतिः आश्रितेत्यर्थः। लवांशमप्ययमेवानुवर्तमानां तां न मन्यते नाद्रियते ॥२४॥ सिद्धा इति। त्वत्कथा सुखमपि न दंतक्रवंति। अयं नो मनोगजः त्वत्कथैव मृष्टं मृष्टं पीयूषं तन्मया या पानदी तस्यां अवगाढः प्रविष्टो दावाग्निजल्पं संसारं तापं न स्मरति स्म न च ततो निर्गच्छति। ब्रह्मसंपन्नवत् ब्रह्मैक्यं प्राप्त इव ॥२५॥ यजमा

न ऋषय ऊचुः ।। अन्वितं ते भगवन्विचेष्टितं यदात्मना चरसि हि कर्म नाज्यसे । विभूतये यत उपसेदुरीश्वरीं न मन्यते स्वयमनुवर्ततीं भवान् ॥ सिद्धा ऊचुः ॥ अयं त्वत्कथामृष्टपीयूषनद्यां मनोवारणः क्लेशदावाग्निदग्धः । तृषार्तोऽवगाढो न सस्मार दावं न निष्क्रामति ब्रह्मसंपन्नवन्नः ॥२५॥ यजमान्युवाच ॥ स्वागतं ते प्रसीदेश तुभ्यं नमः श्रीनिवास श्रिया कांतया त्राहि नः । त्वामृते धीश नांगैर्मखः शोभते शीर्षहीनः कबंधो यथा पूरुषः ॥२६॥ लोकपाला ऊचुः ॥ दृष्टः किं नो दृग्भिरसद्ग्रहैस्त्वं प्रत्यग्द्रष्टा दृश्यते येन

ह्ये दृश्यं । मायात्वेषा भवदीया हि भूमन् यस्त्वं षष्ठः पंचभिर्भासि भूतैः ॥२७॥ नो

त्री नीदत्त्वपि तदा नैपोतिति। ते आगतं भद्रमागमनं जातं। हे अधीश यथा शिरसा हीनः कबंधमात्रः पुरुषोंगैः करचरणादिभिरवयवैः शोभते न तथा त्वां विना केवलं प्रयाजाद्यंगैर्मखो न शोभते। अतो नः श्रिया सह त्रायस्व त्व इत्यनुक्तार्थः ॥२६॥ लोकपाला इति। शरीरत्वाभिमानान्नुद्धा भगवंतं अपश्यंत ऊचुः। दृष्टः किं न दृष्ट इत्यर्थः। कुतः असद्ग्रहैः प्रस्वमाविष्टलिंगत्वात् स प्रकाशनूपाधिः दृग्भिरिंद्रियैः। अयं भावः। द्रष्टृत्वेन तानां इसत्वभासि। अस्माकं तु बहिर्मुखेंद्रियाणां पंचभूतोपलक्षितो जीवविशेष इवावभासि। अतस्त्वमस्मदिंद्रियगोचरेण न भवसि धिगस्मज्ञी

वितमिति ॥२७॥

जं१

भा॰च॰

२२

योगेश्वरास्तदलेदेन लेनामनुग्रहलाभं मन्यमानाः स्वामित्वत्यलावेन लज्जतामप्यनुग्रहं प्रार्थयमानाः स्तुवंति द्वाभ्यां प्रेयानिति विश्वात्मनि परब्रह्मणि त्वयि यत्रा त्मनः पृथक् नेक्षेत श्रमुतः श्रपत्र प्रादेस्यः ते प्रेष्ठोनास्ति श्रात्मनो जीवात् पृथक् न नेक्षेतेति वा वत्सल लक्ष्मप्रियस्त्र ननन्यवृत्त्या भक्त्या श्रव्यभिचारिलक्ष्या लज्जतो ऽनुग्रहाणेत्यर्थः॥ ३८॥ श्रव्यभिचारिणी भक्तिः कथं स्यात् भजनीयानां बहुत्वादित्याशंक्याहुः। जगत इद्भवादिषु निमित्तेषु देवतो जीवाद्दष्टात् बहुधा भिद्यमाना गुणा यस्याः तया स्वमायया ऽत्मनि स्वरूपे रचितात्व द्वादिलेदमतिर्येन नातस्मै स्वसंस्थया केवलस्वरूपावस्थानेन येन विनिवर्तितो भ्रमो गुणप्रतिहेतवश्रात्मनि येन तस्मै॥ ३९॥ शद्ध्रह्मस्तौ तिन मस्ते इति श्रितं सत्त्वं येन

योगेश्वरा ऊचुः॥ ॥ प्रेयान्नतेन्यो ऽस्त्यमुतस्त्वयि प्रभो विश्वात्मनीक्षेन्न पृथग्य श्रात्मनः श्रथापि भक्त्येश तयोपधावताम नन्यवृत्त्या ऽनुगृ हाण वत्सल॥ ३८॥ जगदुद्भवस्थितिलयेषु दैवतो बहुभिद्यमानगुणया ऽत्ममायया। रचितात्मभेदमतये स्वसंस्थया विनिवर्तितभ्रम गुणात्मने नमः॥ ३९॥ ब्रह्मोवाच॥ नमस्ते श्रितसत्त्वाय धर्मादीनां च सूतये। निर्गुणाय च यत्काष्ठां नाहं वेदापरे ऽपि च॥ ४०॥ श्रग्निरु वाच॥ ॥ यत्तेजसाहं सुसमिद्धतेजा हव्यं वहे स्वध्वर श्राज्यसिक्तं। तं यज्ञियं पंचविधं च पंचभिः स्विष्टं यजुर्भिः प्रणतोस्मि यज्ञं॥ ४१॥ ॥

धर्मा

श्रतः सत्त्वादिफल प्रसवित्रे सत्त्वगुणत्वे निर्गुणत्वं च कथमित्याशंक्याह यस्य काष्ठां तत्त्वं नाहं वेद्मि श्रपरे ब्रह्मादयश्च न विदुः तस्मै॥ ४०॥ श्रग्निस्तु यज्ञमूर्तिं प्रणमति यस्य तेजसा सुसमिद्धं प्रदीप्तं तेजो यस्य सो ऽहं सुष्ठु श्रध्वरे हविर्वहामि। तं यज्ञियं यज्ञाय हितं पालकं। यज्ञं यज्ञमूर्तिं पंच विधत्वमैतरेयक उक्तं। स एष यज्ञः पंचविधो ऽग्निहोत्रं दर्शपौर्णमासौ चातुर्मास्यानि पशुः सोम इति। पंचभिर्यजुर्मंत्रैः स्विष्टं सुपूजितं तथा च श्रु तिः। श्राश्रावयेति चतुरक्षरं श्रस्तु श्रौषडिति चतुरक्षरं यजेति द्व्यक्षरं ये यजामह इति पंचाक्षरं द्व्यक्षरो वषट्कार इति। स्मृतिश्च। चतुर्भिश्च च तुर्भिश्च द्वाभ्यां पंचभिरेव च। हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदत्विति॥ ४१॥ ॥

श्री

२२

श्री

श्री

शय्यासस्मिन्सरोपेशयने २
यो १

देवास्तु सर्वं वयमिति देवाः तथापि जगदाधारस्त्वमेव नान्यः कश्चिदित्याहुः। पुरेति। कल्पापाये प्रलये विकृतं कार्यं जातं उदरीकृत्य संहृत्य त्वमेवाद्यः
पुमान् उरगेंद्र एवाधिकं शयनं करोषि। सिद्धैर्जनलोकादिवासिभिः विमृष्टा विचिंतिता ऽध्यात्मपदवी ज्ञानमार्गो यस्य स एव त्वं य इदानीमक्ष्णोः
पथि चरसि भृत्यान्नोऽस्मिन् अवसि रक्षसि ॥४॥ गंधर्वास्तु वयं लीलया केवलं स्थानपि परमेश्वरत्वेनोपश्लोकयामः त्वमेव तु परमेश्वरः अ
त्रये तु त्वदंशा एवेत्याहुः। अंशांशा इति। हे विभू मम नु महत्व मे। क्रीडालांडं क्रीडोपकरणं विश्वं ब्रह्मांडं यस्य तस्मै तेन मः॥ कर्मभिः विद्याधरास्तु के

देवा ऊचुः ॥ ॥ पुरा कल्पापाये स्वकृतमुदरीकृत्य विकृतं त्वमेवाद्यस्तस्मिन् सलिल उरगेंद्राधिशयने। पुमान् शेषे सिद्धैर्हृदि
विमृष्टाध्यात्मपदविः स एवाद्याक्ष्णोर्यः पथि चरसि भृत्यानवसि नः ॥४२॥ ॥ गंधर्वा ऊचुः ॥ ॥ अंशांशास्ते देव मरीच्यादय ए
ते ब्रह्मेंद्राद्या देवगणा रुद्रपुरोगाः। क्रीडालांडं विश्वमिदं यस्प वित्तमरुत तस्मै नित्यं नाथ नमस्ते करवाम ॥ ॥ विद्याधरा ऊचुः
त्वन्माययार्थमतिपद्य कलेवरेऽस्मिन् कृत्वा ममाहमिति दुर्मतिरुत्पथैः स्वैः। क्षिप्तो विपथ ऽसद्विषयलालस आत्ममोहे युष्म
त्कथामृतनिषेवक उद्व्युदस्येत् ॥४४॥ ॥ श्रीरामचंद्राय नमः ॥ ॥ प्तो

रा

वलं विद्यासिः संपदः प्राप्यंते अहंकारादिव्यामोहनिवृत्तिस्तु त्वत्कथाश्रवणं विना नासीत्याहुः। त्वन्माययेति। पुरुषार्थसाधनं कलेवरं प्रतिपद्य प्राप्य
त्वन्मायया अस्मिन्नु ममेत्यहमिति वा अभिमानं कृत्वा इमम् आत्ममोहं युष्मत्कथामृतनिषेवकः। न तु उद्व्युदस्येत् परित्यजेत् तां नान्यः। नन्वेवं स्वैः उ
त्पादितरधिक्षिप्तो ऽदुःखितः सन् परित्यजेदेवेत्याहुः। क्षिप्तो विदुर्मतिः। असद्विषयेषु च लालसा तृष्णा यस्य सः॥ ॥ ॥

भा॰ च॰
२३

ब्राह्मणाः स्तुवंति त्वमिति त्रिभिः। सदस्या ऋत्विजः। त्वं गां पृथ्वीं रसायाः रसातलाद् दंष्ट्रया कजहर्थ विशेषेणोद्धृतवानसि योगिभिः स्तूयमानः। हे त्रयीगात्र वे
दमूर्ते यज्ञो यागः स यूपस्त्वं हि शेषः क्रतुः सैव रूपी। यज्ञसंकल्परूप इति वा। यज्ञः क्रतुः कर्म यस्येति वा॥४६॥ स त्वमस्माकं त्वद्दर्शनमाकांक्षतां प्रसीद। अ
स्मायज्ञमपहरेत्यर्थः। न चाशक्यं तद्वै तन्नाम। यतस्तव नाम्नि कीर्त्यमाने एव यज्ञविघ्नाः क्षयं यांति एवं प्रभावो यस्य तस्मै नमः॥४७॥ इत्यनेन प्रकारे
ण सर्वैः कीर्त्यमाने हे भद्र विदुर दक्षस्त्रितये प्रवर्त्तयामास॥४८॥ सर्वात्मतया सर्वभागभोक्तापि भगवान् निजानंदतृप्तोऽपि स्वेन भागेन त्रिकप

ब्राह्मणा ऊचुः॥ ॥ त्वं क्रतुस्त्वं हविस्त्वं हुताशः स्वयं त्वं हि मंत्रः समिद्दर्भपात्राणि च। त्वं सदस्यर्त्विजो दंपती देवता अग्निहोत्रं स्वधा सोम आ
ज्यं पशुः॥४५॥ त्वं पुरा गां रसाया महासूकरो दंष्ट्रया पद्मिनीं वारणेंद्रो यथा। स्तूयमानो नदं लीलया योगिभिर्व्युज्जहर्थ त्रयीगात्र यज्ञक्रतुः॥
४६॥ स प्रसीद त्वमस्माकमाकांक्षतां दर्शनं ते परिभ्रष्टसत्कर्मणां। कीर्त्यमाने नृभिर्नाम्नि यज्ञेश ते यज्ञविघ्नाः क्षयं यांति त
स्मै नमः॥ ॥मैत्रेय उवाच॥ ॥ इति दक्षः कविर्यज्ञं भद्र रुद्राभिमर्शितं। कीर्त्यमाने हृषीकेशे संनिन्ये यज्ञभावने॥४८॥ भगवान् स्वे
न भागेन सर्वात्मा सर्वभागभुक्। दक्षं बभाष आभाष्य प्रीयमाण इवानघ॥४९॥ ॥श्रीभगवानुवाच॥ ॥ अहं ब्रह्मा च शर्वश्च जगतः
कारणं परं। आत्मेश्वर उपद्रष्टा स्वयंदृगविशेषणः॥५०॥ आत्ममायां समाविश्य सोऽहं गुणमयीं द्विज। सृजन् रक्षन् हरन् विश्वं
दध्रे संज्ञां क्रियोचितां॥५१॥ तस्मिन् ब्रह्मण्यद्वितीये केवले परमात्मनि। ब्रह्मरुद्रौ च भूतानि भेदेनाज्ञोऽनुपश्यति॥ ॥ ॥

लपुरोडाशेन प्रियमाण इव दक्षमालाप्य संबोध्य बभाषे॥४९॥ योऽहं जगतः कारणं आत्मा ईश्वर उपद्रष्टा साक्षी च स्वप्रकाशश्च निरुपाधिश्च स एव
ब्रह्मा च शर्वश्चेत्यन्वयः॥५०॥ कथमित्यत आह। अहमेवात्ममायामधिष्ठाय जगत्सृष्ट्यादिकं कुर्वन् तत्तत्क्रियोचितां संज्ञां धारयामि। तस्मि
न् केवले द्वितीये समानासमानसजातीयभेदरहिते ब्रह्मणि मयि ब्रह्मरुद्रौ भूतानि च भेदेनाज्ञः पश्यतीत्यर्थः॥ ॥

२३

नेन्२८

४५

विद्वांस्तु भेदं न पश्यतीति सदृष्टांतमाह यथेति पंच ॥ तस्माद्देवैरैक्यं पश्यन्नुद्दिष्टार्थं लभेतेत्याह । त्रयाणामेको भावः स्वरूपं येषां ॥५४॥ स्वेन स्वकीयेनात्रिकपालेष्टा
नुलयतः ऋंगैः प्रधानेन च । स्वेन भागेन यज्ञावशिष्टेन । उदवस्यते समाप्यते नेनेत्युदवसानं तेन कर्मणा । सोमपानितरानपि उपाधावदित्यनुषंगः ॥ ५६ ॥ ततश्चोदव
स्य कर्म समाप्य ॥ ५६ ॥ तस्मै रूपं यथा भवति तथा स्नातवान् । स्वेनैवानुभावेनावाप्तराधसे प्राप्तसिद्धये तस्मा अपि ॥ ५७ ॥ आवृंक्ते भजे स्म अनन्यभावानामेकैव गतिः श्रयः

स्व

यथा प्रमानं स्वांगेषु शिरःपाण्यादिषु क्वचित् । पारक्यबुद्धिं कुरुते एवं भूतेषु मत्परः ॥ ५३ ॥ त्रयाणामेकभावानां यो न पश्यति वै भिदा
म् । सर्वभूतात्मनां ब्रह्मन् स शांतिमधिगच्छति ॥ ५४ ॥ मैत्रेय उवाच ॥ एवं भगवतादिष्टः प्रजापतिपतिर्हरिं । अर्चित्वा क्रतुना स्वे
न देवानुभयतोयजत् ॥ ५५ ॥ रुद्रं च स्वेन भागेन ह्युपाधावत्समाहितः । कर्मणोदवसानेन सोमपानितरानपि ॥ ५६ ॥ उदवस्य सहर्त्वि
ग्भिः सस्नाववभृथं ततः । तस्मा अप्यनुभावेन स्वेनैवावाप्तराधसे ॥ ५७ ॥ धर्म एव मतिं दत्वा त्रिदशास्ते दिवं ययुः ॥ ५८ ॥ एवं दाक्षा

व

यणी हित्वा सती पूर्वकलेवरं । जज्ञे हिमवतः क्षेत्रे मेनायामिति शुश्रुम ॥ तमेव दयितं भूय आवृंक्ते पतिमंबिका । अनन्यभावै
कगतिं शक्तिः सुप्तेव पूरुषं ॥ ५९ ॥ एतद्भगवतः शंभोः कर्म दक्षाध्वरद्रुहः । श्रुतं भागवताच्छिष्यादुद्धवान्मे बृहस्पतेः ॥ ६० ॥ इ
दं पवित्रं परमीशचेष्टितं यशस्यमायुष्यमघौघमर्षणं । यो नित्यदाकर्ण्य नरोनुकीर्तयेत् धुनोत्यघं कौरव भक्तिभावितः ॥ ६१ ॥
इति श्रीभागवते महापुराणे चतुर्थस्कंधे दक्षयज्ञसंधानं नाम सप्तमोध्यायः ॥ ॥

तां शक्तिः प्रलयकालेषु नां शक्तिरीश्वरमिवा ॥ ५९ ॥ बृहस्पतेः शिष्यान्मया श्रुतं ॥ ६० ॥ परं पवित्रं यत आकर्ण्य तथानुकीर्तयेत् सः आत्मनः परस्यापि
अघं संसारगमनं सर्वदा कृंतति ॥ ॥ चतुर्थे सप्तमः ॥ ॥ श्रीरामचंद्राय नमः ॥ ॥ ७ ॥ ॥ श्री ॥ श्री ॥ ॥ ७ ॥ ॥ श्री ७ ॥ ॥

ला॰च॰
२४
भ॰

दक्षकन्यान्वये प्राधान्याद्दक्षयज्ञकथोदिता। मनुपुत्रान्वये प्राप्ते ध्रुवचर्या च पंचभिः॥१॥ अष्टमे गुरुदारोक्तिरोषमत्सरतः पुरात्। निर्गतेन ध्रुवेणाह तपसा तोषणं हरेः॥ एवं तावत्त्रिषु मनुकन्यान्वयोक्त्यैव मरीच्यादीनां ब्रह्मपुत्राणां वंशा वर्णिताः। तत्रावशिष्टं किंचिदाह। सनकाद्या इति। नावसन् नाश्रिताः। ऊर्ध्वरेतसो नैष्ठिकाः। अतस्तेषां वंशो नास्ति॥१॥ अधर्मोऽपि ब्रह्मपुत्रस्तस्य वंशमाह। मृषेति चतुर्भिः। दंभः पुरुषस्तारणं माया। तदुचिता चेष्टान्तयोः सोदरयोरपि दांपत्यमधर्मत्वात्

श्रीमैत्रेय उवाच॥ सनकाद्या नारदश्च ऋभुर्हंसोऽरुणिर्यतिः। नैते गृहान् ब्रह्मसुता ह्यावसन्नूर्ध्वरेतसः॥१॥ मृषाऽधर्मस्य भार्यासीद्दंभं मायां च शत्रुहन्। असूत मिथुनं तत्तु निर्ऋतिर्जगृहेऽप्रजः॥२॥ तयोः समभवल्लोभो निकृतिश्च महामते। ताभ्यां क्रोधश्च हिंसा च यद्दुरुक्तिः स्वसा कलिः॥३॥ दुरुक्तौ कलिराधत्त भयं मृत्युं च सत्तम। तयोश्च मिथुनं जज्ञे यातना निरयस्तथा॥४॥ संग्रहेण मयाख्यातः प्रतिसर्गस्तवानघ। त्रिः श्रुत्वैतत्पुमान्पुण्यं विधुनोत्यात्मनो मलं॥५॥ अथातः कीर्तये वंशं पुण्यकीर्तेः कुरूद्वह। स्वायंभुवस्यापि मनोर्हरेरंशांशजन्मनः॥६॥ प्रियव्रतोत्तानपादौ शतरूपापतेः सुतौ। वासुदेवस्य कलया रक्षायां जगतः स्थितौ॥७॥ जाये उत्तानपादस्य सुनीतिः सुरुचिस्तयोः। सुरुचिः प्रेयसी पत्युर्नेतरा यत्सुतो ध्रुवः॥८॥ ॥श्रीरामचंद्र उवाच॥ ॥श्रीकृष्णायनमः॥ ॥राम॥ ॥

या एव तु पर्यग्रहीत् अप्रजः अपुत्रः॥२॥ निकृतिः शठता। यतस्ताभ्यां कलिः स्वसा दुरुक्तिश्चेत्यर्थः॥३॥ यातना तीव्रवेदना॥४॥ प्रतिसर्गो ध्वंससर्ग एवायं हि प्रतिसर्गः प्रलयः अधर्मस्य प्रलयहेतुत्वात् प्रतिसर्गत्वं। एतच्छ्रवणमधर्मवंशश्रवणमिति विवर्जनद्वारा पुण्यहेतुत्वात्॥५॥ मनोः पुत्रवंशं हरेरंशो ब्रह्मा तस्यांशात् देहात् जन्म यस्य। जगतो रक्षायां स्थितौ॥ सुनीतिः सुरुचिश्च जायेते योर्मध्ये॥ ॥

२४

ल२

मा गी २३

ला च॰ २५

पितृत्वार्यात्वेन सा मात्रा मातुः सपत्नी तयापि यद् उक्तं तप साराध्य उत्तमपमित्यादि ततो आतिष्ठ कृतं अध्यासनं यदीच्छसि ॥ १९ परिचर्य निषेव्य विश्वस्य विभावनाय पालनाय आत्ता स्वीकृता गुणाभिपत्तिः सत्वगुणाधिष्ठानं येन तस्य जित आत्मा मनः श्वसनः प्राणश्च येः तैरभिवंद्यं २० एकमत्या सर्वांतर्यामि दृष्ट्या २१ मृग्या पदाब्जयोः पद्धतिर्मार्गो यस्य तमेवाश्रय शरणं व्रज ततो भजस्व ना अस्मिंतो वा यस्य तस्मिन् निजधर्मेण भाविते

आतिष्ठ तत्तात विमत्सरस्त्वमुक्तं समात्रापि यदव्यलीकं। आराधयाधोक्षजपादपद्मं यदीच्छसेध्यासनमुत्तमो यथा ॥ १९ यस्यांघ्रिपद्मं परिचर्य विश्वविभावनायात्तगुणाभिपत्तेः। अजोध्यतिष्ठत् खलु पारमेष्ठ्यं पदं जितात्मश्वसनाभिवंद्यं। तथा मनुर्वो भगवान् पितामहो यमेकमत्या पुरुदक्षिणैर्मखैः। इष्ट्वाभिपेदे दुरवापमन्यतो भौमं सुखं दिव्यमथापवर्ग्यं ॥ २१ तमेव वत्साश्रय भृत्यवत्सलं मुमुक्षुभिर्मृग्यपदाब्जपद्धतिं। अनन्यभावे निजधर्मभाविते मनस्यवस्थाप्य भजस्व पूरुषं ॥ २२ नान्यं ततः पद्मपलाशलोचनाद् दुःखच्छिदं ते मृगयामि कंचन। यो मृग्यते हस्तगृहीतपद्मया श्रियेतरैरंग विमृग्यमाणया ॥ २३ ॥ श्रीमैत्रेय उवाच ॥ एवं संजल्पितं मातुराकर्ण्यार्थागमं वचः। संनियम्यात्मनात्मानं निश्चक्राम पितुः पुरात् ॥ २४ ॥ नारदस्तदुपाकर्ण्य ज्ञात्वा तस्य चिकीर्षितं। स्पृष्ट्वा मूर्द्धन्यघघ्नेन पाणिना प्राह विस्मितः ॥ २५ अहो तेजः क्षत्रियाणां मानभंगममृष्यतां बालोप्ययं हृदा धत्ते यत्समातुरसद्वचः ॥ २६ ॥ श्रीनारद उवाच ॥ ॥ नाधुनाप्यवमानं ते संमानं वापि पुत्रक लक्षयामः कुमारस्य सक्तस्य क्रीडनादिषु ॥ २७ विकल्पे विद्यमानेपि न ह्यसंतोषहेतवः। पुंसो मोहमृते भिन्ना यल्लोके निजकर्मभिः ॥ २८ ॥ ॥

शोधिते २२ तमेवेत्यनेन सूचितं सर्वं विभक्तं प्रपंचयति नान्यमिति हस्तेन गृहीतं दीपवत्पद्मं यया इतरैर्ब्रह्मादिभिः ॥ २३ संजल्पितं विलापं तदर्थस्यागमो यस्मात् तथाभूतं वच आकर्ण्य २४ विस्मितः तदेव स्फुटं तदेवाह अहो तेजः प्रभावः ॥ २६ ॥ विकल्पे मानापमान विवेके सत्यं भिन्नौ न संति। किंतु मोहकल्पिता एव इत्यर्थः कुतः। यद् सुखं दुःखं वा तन्निजकर्मभिरेव भवति यतः ॥ २८ ॥

श्री

धु

मात्रासपत्नी तस्याः

२५

पि

तृ१

तुपशमोपदेशेन निवर्त्तयति। परितुष्येदिति षड्भिः। ईश्वरगतिं वीक्ष्य २९ ईश्वरस्तु कृत्यं विना नोद्यमाः फलहेतव इति ज्ञात्वा। दुष्करश्च तव समुद्यम इत्या
हा। अर्थेति द्वाभ्यां। यस्य प्रसादमवरोढुं प्राक्रमितुमसि। निःसंगेन तीव्रयोगयुक्तेन समाधिना मृगयंतोऽपि यस्य पदवीं मार्गं न विदुः स देवो दुराराध्यः ३१
श्रेयसां काले दृष्टत्वे। ३२ सुखदुःखयोर्मध्ये। सुखेति सुखं प्रदीयत इति दुःखं सति पापं दीयत इत्यात्मानं तोषयन्नात्मनः पारं मोक्षं प्राप्नोति। किंच

परितुष्येत्ततस्तात तावन्मात्रेण पूरुषः। दैवोपसादितं यावद्वीक्ष्येश्वरगतिं बुधः २९ अथ मात्रोपदिष्टेन योगेनाऽवरुरुत्ससि। यत्प्रसादं
स वै पुंसां दुराराध्यो मतो मम ३० मुनयः पदवीं यस्य निःसंगेनोरुजन्मभिः। न विदुर्मृगयंतोऽपि तीव्रयोगसमाधिना ३१ अतो निव
र्त्ततामेष निर्बंधस्तव निष्फलः। यतिष्यति भवान्काले श्रेयसां समुपस्थिते ३२ यस्य यद्दैवविहितं स तेन सुखदुःखयोः। आत्मा
नं तोषयन्देही तमसः पारमृच्छति ३३ गुणाधिकान्मुदं लिप्सेदनुक्रोशं गुणाधमात्। मैत्रीं समानादन्विच्छेन्न तापैरभिभूयते।
ध्रुव उवाच ॥ सोऽयं [illegible]मो भगवता सुखदुःखहतात्मनां। दर्शितः कृपया पुंसां सोऽदर्शीऽस्मद्विधैस्तु यः २५ अथापि मेऽविनी
तस्य क्षात्रं घोरमुपेयुषः। सुरुच्या दुर्वचोबाणैर्न भिन्ने श्रयते हृदि २६ पदं त्रिभुवनोत्कृष्टं जिगीषोः साधुवर्त्म मे। ब्रूह्यस्म
त्पितृभिर्ब्रह्मन्नन्यैरप्यनधिष्ठितं २७ नूनं भवान्भगवतो योऽङ्गजः परमेष्ठिनः। वितुदन्नटते वीणां हिताय जगतोऽर्कवत् २८
मैत्रेय उवाच ॥ इत्युदाहृतमाकर्ण्य भगवान्नारदस्तदा। प्रीतः प्रत्याह तं बालं सद्वाक्यमनुकंपया ३९ ॥

गुणैरधिकात्पुंस इति ल्यब्लोपे पंचमी। तं दृष्ट्वा प्रीतिं कुर्यात् तानत्व दृष्ट्यामित्यर्थः। अनुक्रोशं कृपां कुर्यात् लिप्सेत् न तु तिरस्कारं समानान्मैत्रीं न तु
स्पर्धां ३४ क्षात्रं स्वभावं प्राप्तवतो अत एवाविनीतस्य दुर्वाक्यबाणैर्भिन्ने हृदि न श्रयते न तिष्ठति ३६। अन्यैरनधिष्ठितं। त्रिभुवनउत्कृष्टं पदं जे
तुमिच्छोः साधुवर्त्म मार्गं ब्रूहि। ३६ अंकज इति पाठे अंगाज्जातो यो नारदः स भवान् तत्र लिंगं वितुदन्वादयन् हिताय अटति ३८

तयोः प्रियाप्रियत्वे प्रपंचयन् ध्रुवचरित्रमाह पंचभिरध्यायैः सुनीतेः पुत्रमुत्तमसंज्ञं लालयन्तं मत्वंकारोहणं चिकीर्षमाणं ॥९॥ गर्वोक्तिमेवाह त्रिभिः नेति। नृपतेर्धिष्ण्यमासनं नृपात्मजोऽपि भवान्नारोढुमर्हति ॥११॥ पुरुषमीश्वरं ॥१३॥ मिषंतं पश्यंतं। सन्नवाचं कुंठितवाचं ॥१४॥ उदूह्य आरोप्य अंतःपुरजनस्य मुखात् श्रुत्वा ॥१५॥ शोक एव दावाग्निस्तेन दावाग्निगता लतेव स्थिता सा बाला विलापं चकार ॥१६॥ वृजिनस्य दुःखस्य। अमंगलम्

एकदा सुरुचेः पुत्रमंकमारोप्य लालयन् उत्तमं नारुरुक्षंतं ध्रुवं राजाभ्यनंदत ॥९॥ तथा चिकीर्षमाणं तं सपत्न्यास्तनयं ध्रुवं सुरुचिः शृण्वतो राज्ञः सेर्ष्यमाहातिगर्विता ॥१०॥ न वत्स नृपतेर्धिष्ण्यं भवानारोढुमर्हति। न गृहीतो मया यत्त्वं कुक्षावपि नृपात्मजः ॥११॥ बालोऽसि बत नात्मानमन्यस्त्रीगर्भसंभृतं। नूनं वेद भवान्यस्य दुर्लभेऽर्थे मनोरथः ॥१२॥ तपसाऽऽराध्य पुरुषं तस्यैवानुग्रहेण मे गर्भे त्वं साधयात्मानं यदीच्छसि नृपासनं ॥१३॥ मैत्रेय उवाच ॥ मातुः सपत्न्याः स दुरुक्तिविद्धः श्वसन्रुषा दंडहतो यथाहिः। हित्वा मिषंतं पितरं सन्नवाचं जगाम मातुः प्ररुदन्सकाशं ॥१४॥ तं निःश्वसंतं स्फुरिताधरोष्ठं सुनीतिरुत्संग उदूह्य बालं। निशम्य तत्पौरमुखान्नितांतं सा विव्यथे यद्गदितं सपत्न्या ॥१५॥ सोत्सृज्य धैर्यं विललाप शोकदावाग्निना दावलतेव बाला। वाक्यं सपत्न्याः स्मरती सरोजश्रिया दृशा बाष्पकलामुवाह ॥१६॥ दीर्घं श्वसंती वृजिनस्य पारमपश्यती बालकमाह बाला। माऽमंगलं तात परेषु मंस्था भुंक्ते जनो यत्परदुःखदस्तत् ॥१७॥ सत्यं सुरुच्याभिहितं भवान्मे यद्दुर्भगाया उदरे गृहीतः। स्तन्येन वृद्धश्च विलज्जते यां भार्येति वा वोढुमिडस्पतिर्मां ॥१८॥ ॥श्रीरामचंद्राय नमः॥ ॥श्रीरामचंद्राय नमः॥ ॥

परेषु अमंगलं मा मंस्थाः। यद्यतः परेभ्यो दुःखं ददाति यः सः स्वदत्तमेव दुःखं भुंक्ते ॥१७॥ दुर्भगाया मया उदरे गृहीतः। तस्या एव स्तन्येन वृद्धश्च। दुर्भगत्वमेवाह। यां मामिडस्पतिः भूपतिः भार्येति वोढुं स्वीकर्तुं विलज्जते। दासीत्यपि ॥१८॥ ॥

ध्रु दि

निःश्रेयसस्य अभिप्रेतार्थस्य पंथाः कोसावित्यत आह भगवान्वासुदेवः अत एव तं तज्ज्ञ ॥४०॥ मधुवनाख्यं तटं गच्छ यत्र मधुवने ॥४१॥ अध्ययनाद्यलौवा
पि। आत्मन उचितानि योग्यानि देवतानमस्कारादीनि कृत्वेति यमनियमाद्युक्ताः। आसनं कल्पेनं च कुशादिभिः स्वस्तिकादिभिश्च ॥४२॥ प्राणेंद्रियम
नसां मलं चाचल्यं व्युदस्येति प्राणायामप्रत्याहारैः ॥४४॥ धारणामाह। अतिध्याये दित्यादिपद्भिः। गुरुणा धीरेण मनसा गुरुं श्रीहरिं ॥

श्रीनारद उवाच ॥ ॥ जनन्याभिहितः पंथाः स वै निःश्रेयसस्य ते। भगवान्वासुदेवस्तं भज तं प्रवणात्मना ॥४०॥ धर्मार्थकाममो
क्षाख्यं य इच्छेच्छ्रेय आत्मनः। एकं ह्येव हरेस्तत्र कारणं पादसेवनं ॥४१॥ तत्तात गच्छ भद्रं ते यमुनायास्तटं शुचि। पुण्यं मधुवनं य
त्र सान्निध्यं नित्यदा हरेः ॥४२॥ स्नात्वानुसवनं तस्मिन्कालिंद्याः सलिले शिवे। कृत्वोचितानि निवसन्नात्मनः कल्पितासनः ॥४३॥ प्रा
णायामेन त्रिवृता प्राणेंद्रियमनोमलं। शनैर्व्युदस्याभिध्यायेन्मनसा गुरुणा गुरुं ॥४४॥ प्रसादाभिमुखं शश्वत्प्रसन्नवद
नेक्षणं। सुनासं सुभ्रुवं चारुकपोलं सुरसुंदरं ॥४५॥ तरुणं रमणीयांगमरुणोष्ठेक्षणाधरं। प्रणताश्रयणं नृम्णं शरण्यं
करुणार्णवं ॥४६॥ श्रीवत्सांकं घनश्यामं पुरुषं वनमालिनं। शंखचक्रगदापद्मैरभिव्यक्तचतुर्भुजं। किरीटिनं कुंडलिनं केयू
रवलयान्वितं। कौस्तुभाभरणग्रीवं पीतकौशेयवाससं ॥४८॥ कांचीकलापपर्यस्तं लसत्कांचननूपुरं। दर्शनीयतमं शांतं म
नोनयनवर्द्धनं ॥४९॥ पद्भ्यां नखमणिश्रेण्या विलसद्भ्यां समर्चतां। हृत्पद्मकर्णिकाधिष्ण्यमाक्रम्यात्मन्यवस्थितं ॥५०॥ ॥

सुंदरं ॥४५॥ परमणीयान्यंगानि यस्य अरुणौ ओष्ठश्च ईक्षणे च ईक्षणे च अरुणे ओष्ठेक्षणे धारयतीति यातं। अरुणमोष्ठमीक्षणं वा धारयती
ति वा ... सुखकरो यद्वा नृम्णं धनं सर्वपुरुषार्थनिधिमित्यर्थः ॥४६॥ पुरुषं पुरुषलक्षणयुक्तं ॥४७॥ कौस्तुभाख्यमाभरणं ग्रीवायां य
स्य। कांचीकलापेन पर्यस्तं परिवेष्टितं। मनोनयनयोर्वर्द्धनं हर्षकरं। हृत्पद्मकर्णिकायां धिष्ण्यं मध्यस्थानं तदाक्रम्य समर्चतामा
त्मनि मनसि स्थितं ॥५०॥ ॥

त.४

ध्यानमाह। स्मयमानमिति। नियतेन प्राग्युक्तया धारणया सुस्थिरेण अत एक भूतेन एकाग्रेण धारणोक्तानि विशेषणानि ध्यानोपि द्रष्टव्यानि यद्वा यथोक्तमात्रमेव। तदुक्तमेकादशस्कंधेन। ध्यानि चिंतयेद्द्यः सुस्मितं तावदेन्मुखमिति। ५१। समाधिमाह। एवमिति। तदेशी ध्रुवं संपन्नं सत्। ५२। अथो मंत्रः॥ ॥५३॥ द्रव्याण्येवाह। सालिलैरिति। शस्तैर्दुर्वांकुरैः गंधैरैवांशुकैः भूर्जैत्वगादिभिः। अधिष्ठानमाह। लब्धासे पाद्द्रव्यमयी शिलादिभिर्निर्मिता पूजा साहूणएह। हेमनाह। साहर्भ्यां आस्थता तां ध्यत विद्भिः भितं वक्ष्ये भुक्तइतितथा। यत्कोरेतियत्कि

श्री

स्मयमानमभिध्यायेत्सानुरागावलोकनं। नियतेनैकभूतेन मनसा वरदर्षभं॥ ५३॥ एवं भगवतो रूपं सुभद्रं ध्यायतो मनः। निर्वृत्या परयात्तूर्णं संपन्नं न निवर्तते॥ जप्य श्च परमो गुह्यः श्रूयतां मे नृपात्मज। यं सप्तरात्रं प्रपठन् पुमान् पश्यति खेचरान्॥ ॐ नमो भगवते वासुदेवाय। मंत्रेणानेन देवस्य कुर्याद्द्रव्यमयीं बुधः। सपर्यां विविधैर्द्रव्यैर्देशकालविभागवित्॥ ५४॥ सलिलैः शुचिभिर्माल्यैर्वन्यैर्मूलफलादिभिः। शस्तांकुरांशुकैश्चार्चेत्तुलस्या प्रियया प्रभुं॥ ५५॥ लब्ध्वा द्रव्यमयीमर्चां क्षित्यंब्वादिषु वार्चयेत्। आभृतात्मा मुनिः शांतो यतवाक् मितवन्यभुक्॥ ५६॥ स्वेच्छावतारचरितैरचिंत्यनिजमायया। करिष्यत्युत्तमश्लोकस्तद्ध्यायेद्धृदयंगतं॥ ५७॥ परिचर्या भगवतो यावत्यः पूर्वसेविताः। ता मंत्रहृदयेनैव प्रयुंज्यान्मंत्रमूर्तये॥ एवं कायेन मनसा वचसा च मनोगतं। परिचर्यमाणो भगवान् भक्तिमत्परिचर्यया॥ ५८॥ पुंसाममायिनां सम्यग्भजतां भाववर्धनः। श्रेयो दिशत्यभिमतं यद्धर्मादिषु देहिनां॥ ६०॥ विरक्तश्चेंद्रियरतौ भक्तियोगेन भूयसा। तं निरंतरभावेन भजेताद्धा विमुक्तये॥ ६१॥ इत्युक्तस्तं परिक्रम्य प्रणम्य च नृपार्भकः। ययौ मधुवनं पुण्यं हरेश्चरणचर्चितं॥

प्यतीति। तदानीमचारप्राग्यीलावातां पूर्वसेविताः सेवनं करिताः कार्यत्वेन विहिता इत्यर्थः॥ मंत्रहृदयेन द्वादशाक्षरेण ५८ एवमुक्तरीत्या मनोगतां यथा भवति तथा कायादिभिः भक्तिमत्या परिचर्यया परिचर्यमाणो धर्मार्थकामेषु यदभिमतं तत् नृप श्रेयो दिशतीति द्वयोरन्वयः ६०॥

सम

र्हितं सत्कृत्य समर्पितं अर्हणं अर्घादि यस्मै ॥६३॥ किं वा नरिष्यते न नश्यतीति सवितर्कः प्रश्नः ॥६४॥ मात्रा सह निर्वासित इति तस्य अनाथत्वात् ॥६५॥ मास्मादं
तिकिं छिन्नं खादंतीत्यर्थः ॥६६॥ यस्य यशो जगत्स्वाप्तं इंकोव्याप्नोति ॥६८॥ विभुं लयन् विस्तारयन् ॥६९॥ क्व वा मे क्व वने किमकरोदित्यपेक्षायामाह

तपोवनं गते तस्मिन् प्रविष्टोतः पुरं मुनिं। अर्हणेनार्हितो राज्ञा सुखासीन उवाच हा ॥६३॥ नारद उवाच ॥ राजन् किं ध्यायसे दीर्घं मुखे
न परिशुष्यता। किं वा न रिष्यते कामो धर्मो वार्थेन संयुतः ॥६४॥ राजोवाच ॥ सुतो मे बालको ब्रह्मन् स्त्रैणेनाकरुणात्मना। निर्वासितः
पंचवर्षः सह मात्रा महान् कविः ॥ अप्यनाथं वने ब्रह्मन् मास्मादंत्यर्भकं वृकाः। श्रांतं शयानं क्षुधितं परिम्लानमुखांबुजं ॥६६॥ अहो मे
बत दौरात्म्यं स्त्रीजितस्योपधारय। यो कं प्रेम्णारुरुक्षंतं नाभ्यनंदमसत्तमः ॥६७॥ श्रीनारद उवाच ॥ मा मा शुचः स्वतनयं देवगुप्तं विशांपते
तत्प्रभावमविज्ञाय प्रावृङ्क्ते यद्यशो जगत् ॥६८॥ सुदुष्करं कर्म कृत्वा लोकपालैरपि प्रभुः। एष्यत्यचिरतो राजन् यशो विपुलयंस्तव ॥६९॥
श्रीमैत्रेय उवाच ॥ इति देवर्षिणा प्रोक्तं विश्रुत्य जगतीपतिः। राजलक्ष्मीमनादृत्य पुत्रमेवान्वचिंतयत् ॥७०॥ तत्राभिषिक्तः प्रयतस्तामु
पोष्य विभावरीं। समाहितः पर्यचरदृष्यादेशेन पूरुषं ॥७१॥ त्रिरात्रांते त्रिरात्रांते कपित्थबदराशनः। आत्मवृत्त्यनुसारेण मासं निन्ये
र्चयन् हरिं ॥७२॥ द्वितीयं च तथा मासं षष्ठे षष्ठेर्भकोदिने। तृणपर्णादिभिः शीर्णैः कृतान्नोभ्यर्चयन् विभुं ॥७३॥ तृतीयं चानयन्मासं नवमे
नवमे हनि। अब्भक्ष उत्तमश्लोकमुपाधावत्समाधिना ॥७४॥ चतुर्थमपि वै मासं द्वादशे द्वादशे हनि। वायुभक्षो जितश्वासो ध्यायन् देवमधा
धारयत् ॥७५॥ पंचमे मास्यनुप्राप्ते जितश्वासो नृपात्मजः। ध्यायन् ब्रह्म पदैकेन तस्थौ स्थाणुरिवाचलः ॥७६॥ सर्वतो मन आकृष्य हृदि भू
तेंद्रियाशयं। ध्यायन् भगवतो रूपं नाद्राक्षीत्किंचनापरं ॥७७॥

तत्रेत्यादिना अभिषिक्तः स्नातः प्रयतः पूतः तां। कपित्थानि बदराणि चाशनं यस्य। आत्मवृत्तिः देहस्थितिः। तदनुसारेण तृतीयं चानयत् ईषदिवनयत्, उपा
धावदित्यन्वयः ॥७४॥ प्रतिमासमाहारसंकोचं तपोतिरेकं च कृतवानित्यर्थः। भूतानि शब्दादीनि इंद्रियाणि च आशेरते च यस्मिन् तन्मन आकृष्य ब्रह्म ध्यायन्

ला॰च॰
२७
सम कृतार्हणो
...
नह

दरा रा
२७
२८

॥७४॥

धार्यमाणस्य सतः। तस्य तेजसा सोद्दुम्रः शक्रुवंतः कंपिताः ॥ ७८ ॥ तस्यांगुष्ठेन निपीडिता। आक्रांता सती मही तत्र तदा अर्द्धेन नामास मेंः शके अर्द्धशब्दः स्थनडुं सकत्वादंशी शिनोः रत्नेदाद्वैवं सामा नाधिकरण्यं। इभेंद्रेणाधिष्ठिता तरी नौर्यथा पदे पदे सव्यतो दक्षिणतश्च नमति तद्वत् ॥ ७९ ॥ अन्यद् दृष्टार्थमाहात स्मिन्नभिध्यायति विश्वं विश्वात्मकं विष्णुं आत्मनः सकाशात्। अनन्ययाधिया आत्माभेद दृष्ट्या अभिध्यायति सति किं द्वारं नौ। असुं प्राणं तद्द्वारं च निरुध्य विश्वमात्मन्येकी। कृत्य यस्य प्राणनिरो

आधारं मूर्द्धादीनां प्रधानं। उक्तं शेषेश्वरं। ब्रह्मधार्यमाणस्य त्रयो लोकाश्चकंपिरे ॥ ७८ ॥ यदैकपादेन स पार्थिवार्भकस्तस्थौ तदं गुष्ठनिपीडिता मही। ननाम तत्रार्द्धमिभेंद्रधिष्ठिता तरीव सव्येतरतः पदे पदे ॥ तस्मिन्नभिध्यायति विश्वमात्मनो द्वारं निरुध्यासुम नन्यया धिया। लोका निरुच्छ्वासनिपीडिता भृशं सलोकपालाः शरणं ययुर्हरिं ॥ देवा ऊचुः ॥ नैवं विदामो भगवन् प्राणरोधं चराचरस्याखिलसत्त्वधाम्नः। विधेहि तन्नो वृजिनाद्विमोक्षं प्राप्ता वयं त्वां शरणं शरण्यं ॥ ८१ ॥ श्रीभगवानुवाच ॥ मा भैष्ट बालं तपसो दुरत्ययान्निवर्तयिष्ये प्रतियात स्वधाम। यतो हि वः प्राणनिरोध आसीदौत्तानपादिर्मयि संगतात्मा ॥ ८२ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे ध्रुवचरिते अष्टमोऽध्यायः ॥ ॥

धेहतो विश्वस्य प्राणनिरोधो जात इति भावः ॥ ८० ॥ एवं प्राणनिरोधं कदाचिदपि न विद्मः। अखिलसत्त्वधाम्नः सर्वप्राणिशरीरस्य। तत्तस्मात् वृजिनात् क्लेशात् ॥ ८१ ॥ यतो बालात्। कोसौ बालः कथं च तस्मात् प्राणनिरोध इत्यत आह। उत्तानपादस्य पुत्रो मयि विश्वरूपे संगतात्मा एकं प्राप्तो ध्रुवः इति ॥ ८२ ॥ ॥ चतुर्थेऽष्टमः ॥ ॥ श्रीरामचंद्राय नमः ॥ ॥ केशवाय ॥ ॥ ॥ ८ ॥

भा॰च॰
२८

नवमे तु हरिंस्तुत्वा लब्ध्वात्र स्माहरात ध्रुवः। प्रत्यागत्याकरोद्राज्यं पित्रादत्तमितीर्यते॥ एवं भगवद्वाक्येन गतभयाः॥१॥ स वै ध्रुवः। योगविपाकेन दार्ढ्येन निश्चलया।
गरुडाधिरूढं पुरतः स्थितमपि यदा तद्दृष्टित्वादसौ नापश्यत्तदा भगवतैवांतः स्वरूपमाहृत्य इत्यतः तिरोहितमुपलक्ष्य बहिःस्थितः सन् तदवस्थं यथा हृद्गतः स्फु-
रितः तादृशं॥२॥ आगतसाध्वसः जातसंभ्रमः। विनमय्य आनतं कृत्वा। संभ्रममेवाह। दृग्भ्यामपि विविधं पश्यन्नवंदत। आस्येन चुंबन्निवावंदत। भुजाभ्यामाश्लि-
षन्निवावंदतेत्यर्थः॥३॥ विवक्षंतं तं तद्गुणान् क्रमितुमिच्छंतं। अतद्विदं स्तुत्यादिकमजानंतं। ब्रह्मस्पर्शकवस्य च हृद्यवस्थितत्वात्तज्ज्ञात्वा। ब्रह्ममयेन वेदात्मकेन शंखे-

तां

पादि

श्रीमैत्रेय उवाच॥ त एवमुत्सन्नभया उरुक्रमे कृतावनामाः प्रययुस्त्रिविष्टपं। सहस्रशीर्षापि ततो गरुत्मता मधोर्वनं भृत्यदिदृक्ष-
या गतः॥१॥ स वै धिया योगविपाकतीव्रया हृत्पद्मकोशे स्फुरितं तडित्प्रभं। तिरोहितं सहसैवोपलक्ष्य बहिःस्थितं तदवस्थं ददर्श॥२॥ तद्द-
र्शनेनागतसाध्वसः क्षिताववंदतांगं विनमय्य दंडवत्। दृग्भ्यां प्रपश्यन् प्रपिबन्निवार्भकश्चुंबन्निवास्येन भुजैरिवाश्लिषन्॥३॥ स तं वि-
वक्षंतमतद्विदं हरिर्ज्ञात्वाऽस्य सर्वस्य च हृद्यवस्थितः। कृतांजलिं ब्रह्ममयेन कंबुना पस्पर्श बालं कृपया कपोले॥४॥ स वै तदै-
व प्रतिपादितां गिरं दैवीं परिज्ञातपरात्मनिर्णयः। तं भक्तिभावोऽभ्यगृणादसत्वरं परिश्रुतोरुश्रवसं ध्रुवक्षितिः॥५॥ ध्रुव उवाच॥
यो अंतः प्रविश्य मम वाचमिमां प्रसुप्तां संजीवयत्यखिलशक्तिधरः स्वधाम्ना। अन्यांश्च हस्तचरणश्रवणत्वगादीन् प्राणान्नमो भगव-
ते पुरुषाय तुभ्यं॥६॥

न ब

ना॥४॥ भगवता प्रतिपादितां गिरं प्रतिपद्येति शेषः। प्रतिपद्यतामिति पाठे तां वेदात्मिकां परिज्ञातः परात्मनोरीश्वरजीवयोर्निर्णयो येन सः। अत एव तन्मय-
भावः प्रेमैकस्वभावः असत्वरं स्थैर्येण परितः श्रुतं विख्यातं उरुश्रवः कीर्तिर्यस्य तं। ध्रुवा क्षितिः स्थानं यस्येति भाविनिर्देशः॥५॥ ईशानु-
ग्रहसंप्राप्तवाग्भावाद्भुतवृत्तिभिः। द्वादशादित्यसंकाशैः श्लोकैस्तोष्टुं हरिं ध्रुवः॥ यो मे प्रसुप्तां लीनां वाचं अन्यांश्च प्राणानींद्रियाणि स्वधाम्ना चि-
द्रूपया संजीवयति। यतः अखिलांकुरादि[illegible] क्रियाशक्तीर्धारयतीति तथा॥ पुरुषाय त्वां नमामि ए॥६॥

२८

ननु वागादींद्रियशक्तिधरा वह्न्यादयः प्रसिद्धा नाहमित्यत आह। एक इति। अनुविश्य पुरुषोऽन्तर्यामी त्वमेक एव तत्तन्मायायाः असत्सु गुणेषु इंद्रियादिषु स्थितः सन् तत्तद्देवतारूपो नानेव भासि न तु त्वद्व्यतिरेकेण ज्ञानक्रियाशक्तिधरः कश्चिदस्तीत्यर्थः। अपि च। किं वक्तव्यं वृह्मादयो ज्ञानादिशक्तिधरा न भवंतीति यस्मात् ब्रह्मणोऽपि ज्ञानं त्वदधीनमित्याह। त्वद्दत्तयेति वयुनया ज्ञानेन भवंतं शरणं प्रपन्नो ब्रह्मा इदं विश्वं अचष्ट अपश्यत्। कथं सुप्तः प्रबुद्धः सन् यथा पश्यति तद्वत्। अपवर्गो मुक्तास्तेषामपि शरणं। कृतविदा सर्वेंद्रियजीवनेन त्वत्कृतमुपकारं जानता कथं विस्मर्यते। एवं स्तुत्वा भजंतः कृतघ्ना इत्यर्थः ॥८॥ ये च मादृशाः कामाद्यर्थं भजंति ते विमूढा इत्याह नूनमिति

एकस्त्वमेव भगवन्निद मात्मशक्त्या मायाख्ययोरुगुणया महदाद्यशेषं सृष्ट्वानुविश्य पुरुषस्तदसद्गुणेषु नानेव दारुषु विभावसुवद्विभासि। त्वद्दत्तया वयुनयेदमचष्ट विश्वं सुप्तप्रबुद्ध इव नाथ भवत्प्रपन्नः। तस्यापवर्ग्यशरणं तव पादमूलं विस्मर्यते कृतविदा कथमार्तबंधो ॥८॥ नूनं विमुष्टमतयस्तव मायया ते ये त्वा भवाप्ययविमोक्षणमन्यहेतोः अर्चंति कल्पकतरुं कुणपोपभोग्यमिच्छंति यत्स्पर्शजं नरकेऽपि नृणां ॥९॥ या निर्वृतिस्तनुभृतां तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात्। सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत् किं त्वंतकासिलुलितात्पततां विमानात् ॥ ॥

ति। भवाप्ययो जन्ममरणे ताभ्यां विमोक्षणे हेतुं त्वामन्यहेतोः कामाद्यर्थं भजंति ते नूनं विमुष्टमतयः वंचितचित्ताः यतः कल्पतरुं त्वामर्चंति ततः कुणपतुल्येन देहेनोपभोग्यं सुखमिच्छंति। न चैवं योग्यं तदित्याह। यत्स्पर्शजं विषयसंबंधजं तत्सुखं तु नरकेऽपि भवति। ननु स्वर्गादि सुखं सकामैः प्राप्यते निष्कामभजनेन तु न स्यादित्यत आह। येति। स्वे महिमनि निजानंदरूपेऽपि मा भूत् न भवतीत्यर्थः। अंतकस्यासिना कालेन लुलितात् खंडितात् विमानात्पततां सा नास्तीति किं वक्तव्यं ॥ ॥

अतः कथाश्रवणाय सत्संगतिं देहीत्याह । तस्मिंस्त्वयि प्रवहतां सोऽतंतत्येन कुर्वतां नष्टमोहं किं नयाम्यसेत अत आहायेन महत्प्रसंगेन अंजसा अंभस्त्वत एव
उरूणि व्यसनानि यस्मिन् । तं नेष्ये पारं गमिष्यामि । त्वद्गुणकथैवामृतं तस्य पानेन मत्तः सन् २१ कथामृतपानस्य मादकत्वमाह । ते अतितरां प्रियमपि मर्त्यदेहं न स्म

रंति । नानु तं दधते ये च सुतादयः अदः मर्त्यमनु संबद्धाः तानपि । के ते न स्मरंति ये कृतपुण्यसंगाः के ये तु त्वदीयपदारविंदसौगंध्यलुब्धहृदयेषु ये तेषु । तु शब्द नान्येषां के
वलयोगादिनिष्ठानां देहाभिमानानिवृत्तिं दर्शयति २२ [illegible] चं विद्वानपि त्वं किमित्यभिमानं वहसि अत आह । तिर्यगादिभिः परिचितं व्याप्तं संतोऽसंतश्च विशेषाय स्पम

तस्मिन्भृशं प्रवहतां त्वयि मे प्रसंगो भूयादनंत महताममलाशयानां । येनांजसोल्बणमुरुव्यसनं भवाब्धिं नेष्ये भवद्गुणकथामृतपानम
त्तः ॥ २१ ॥ ते न स्मरंत्यतितरां प्रियमीश मर्त्यं ये चान्वदः सुतसुहृद्गृहवित्तदाराः । ये त्वब्जनाभ भवदीयपदारविंदसौगंध्यलुब्धहृदयेषु कृत
प्रसंगाः ॥ २२ ॥ तिर्यङ्नगद्विजसरीसृपदेवदैत्यमर्त्यादिभिः परिचितं सदसद्विशेषम् । रूपं स्थविष्ठमज ते महदाद्यनेकं नातः परं परम वेद्मि न यत्र वा
दः ॥ २३ ॥ कल्पांत एतदखिलं जठरेण गृह्णन् शेते पुमान्स्वदृगनंतसखस्तदंके । यन्नाभिसिंधुरुहकांचनलोकपद्मगर्भे [illegible] मान्भगवते
प्रणतोऽस्मि तस्मै ॥ २४ ॥ ॥ श्रीरामचंद्राय नमः ॥

हृदादीन्यनेकानि कारणानि यस्य हे परम अज ते इदं स्थविष्ठं [illegible] रूपं केवलं वेद्मि अतः परमीश्वरस्वरूपं न वेद्मि यत्र वादः शब्दव्यापारो नास्ति तत्ब्रह्मस्वरूपं न वेद्मि । अ
तोऽभिमानो न विवर्तत इति भावः ॥ २३ ॥ तदेवं भगवदनुकंपया तद्रूपद्वयं ज्ञात्वेश्वरस्वरूपमनुवर्णयन्नमस्करोति । कल्पांत इति । एतत्त्रैलोक्यं यः पुमान् शेते । स्वस्मिन्ने
व हद्रुन वहिर्यस्य योगनिद्रा रुद्धत्वा तथा अनंतसखः शेषसहायः । तदंके शेषोत्संगे यस्य नाभिरेव सिंधुः समुद्रः तस्मिन् रोहतीति तथा । तस्मिन्कांचनलोकप
द्मस्य गर्भे कर्णिकायां द्युमान् तेजस्वी ब्रह्मा भवति तं प्रणतोऽस्मीत्यर्थः ॥ ॥ २४ ॥ ॥

ननुममापिस्वापाद्यवस्थावत्वेकोजीवाद्विशेषइत्यतआह।त्वंतुव्यतिरिक्तःजीवविलक्षणः।आस्सेतिष्ठसि।वैलक्षण्यमेवाह।त्वंनित्यमुक्तोजीवस्तुत्वत्प्रसादान्मुच्यते।त्वं परिशुद्धःसतुमलिनः।त्वंविबुद्धःसत्वज्ञः।त्वमात्मासतुजडः।त्वंकूटस्थःसतुविकारी।त्वमादिपुरुषःसत्वादिमान्।त्वंतुभगवान्सतुभगहीनः।त्वंत्रयाणांगुणानाम धीशःसतुपरतंत्रः।कुतएवंलक्षणत्वंबुद्ध्यवस्थितिंबुद्धेरवस्थाअखंडितयास्वदृष्ट्याविच्छिन्नयाद्रष्टापश्यसिद्रष्टृत्वेतत्रप्रयोजकतःअतोबुद्ध्यवस्थितिमि त्यर्थः।स्थिताविति।तथाभूतएवंस्थितौपालनेअधिमखःयज्ञाधिष्ठाताधिष्ठितः॥१५॥तमेवब्रह्मरूपेणज्ञात्वानमस्करोति।यस्मिन्निति।पतंतिअकस्मादुद्भवंति।विश्वस्य

प व

त्वंनित्यमुक्तपरिशुद्धविबुद्धआत्माकूटस्थआदिपुरुषोभगवांस्त्र्यधीशः।यद्बुद्ध्यवस्थितिमखंडितयास्वदृष्ट्याद्रष्टास्थिता वधिमखोव्यतिरिक्तआस्से॥१५॥यस्मिन्विरुद्धगतयोह्यनिशंपतंतिविद्यादयोविविधशक्तयआनुपूर्व्यात्।तद्ब्रह्म विश्वभवमेकमनंतमाद्यमानंदमात्रमविकारमहंप्रपद्ये॥१६॥सत्याशिषोहिभगवंस्तवपादपद्ममाशीस्तथानुभजतः पुरुषार्थमूर्तेः।अप्येवमार्यभगवान्परिपातिदीनान्वाश्रेववत्सकमनुग्रहकातरोऽस्मान्॥१७॥ ॥मैत्रेयउवाच॥ ॥ अथाभिष्टुतएवंवैसत्संकल्पेनधीमता।भृत्यानुरक्तोभगवान्प्रतिनंद्येदमब्रवीत्॥१८॥ ॥

भवोयस्मात्।एकमखंडम्।आद्यंअनादि॥१६॥सकामस्तज्जनादपिमोक्षमाशासानआह।हेभगवन्पुरुषार्थःपरमानंदःसएवमूर्तिर्यस्यतवसत्तवपादपद्मं पुरुष आशिषोराज्यादेःसकाशात्सत्याआशीःपरमार्थफलंहिनिश्चितं।कस्य।तथातेनप्रकारेणत्वमेवपुरुषार्थइत्येवंनिष्कामतयाअनुभजतः। यद्यप्येवंतथाऽपिहेआर्यस्वामिन्दीनान्सकामानप्यस्मान्भगवान्भगवांस्त्वमेवपरिपासिसारस्येत्यध्याहार्यमेवयतःअनुग्रहेहिताचरणेकातरः पराधीनःपरवशः।यथानवप्रसूतावाश्राधेनुर्वत्संक्षीरंपाययति।वृकादिभ्योरक्षतितद्वत्॥१७॥ ॥ ॥

प्रति

सा·च०
३०

व्यवसितं संकल्पितम्॥१९॥ तत्र यच्छामीत्यर्कं किंतदित्यपेक्षायामान्यैरिति साक्षीभ्याम्। द्रष्टुं वा इति निर्वासोयास्मि न। आहितमर्पितं। धान्यं क्रमणायभ्राम्यमाणानां पशूनां वधस्तस्मो मेढीतस्यां वलीवर्दस्य मूढ वन्ना। अर्वाचीनरकस्य वासिनां परस्तादपि स्थास्नुलोकत्रयनाशेपि नश्वरा॥२०॥ घर्म्मावादयो नक्षत्ररूपाः वनौकसः सप्तर्षयः यस्य दक्षिणीकृत्य भ्रमंतः चरंति॥२१॥ एतद्धराज्यानां नरसत्त विष्णुनीत्याहा प्रस्थितइति तु भ्यं पृथ्वीदत्वाव
म
सगवानुवाच॥ ॥वेदाहं ते व्यवसितं हृदि राजन्यबालक। तत्प्रयच्छामि भद्रं ते दुरापमपि सुव्रत॥१९॥ नान्यैरधिष्ठितं भद्र यद्भ्राजिष्णु ध्रुवक्षिति। यत्र ग्रहर्क्षताराणां ज्योतिषां चक्रमाहितम्॥ मेढ्यां गोचक्रवत्स्थास्नु परस्तात्कल्पवासिनां॥२०॥ धर्मोऽग्निः कश्यपः शुक्रो मुनयो ये वनौकसः। चरंति दक्षिणीकृत्य भ्रमंतो यत्सतारकाः॥२१॥ प्रस्थिते तु वनं पित्रा दत्वा गां धर्मसंश्रयः। षट्त्रिंशद्वर्षसाहस्रं रक्षिताऽव्याहतेंद्रियः॥२२॥ त्वद्भ्रातर्युत्तमे नष्टे मृगयायां तु तन्मना। अन्वेषंती वनं माता दावाग्निं सा प्रवेक्ष्यति॥२३॥ इष्ट्वा मां यज्ञहृदयं यज्ञैः पुष्कलदक्षिणैः। भुक्त्वा चेहाशिषः सत्या अंते मां संस्मरिष्यसि॥२४॥ ततो गंतासि मत्स्थानं सर्वलोकनमस्कृतं। उपरिष्टादृषिभ्यस्त्वं यतो नावर्त्तते यतिः॥२५॥ मैत्रेय उवाच॥ ॥इत्यार्चितः स भगवानतिदिश्यात्मनः पदं। बालस्य पश्यतो धाम स्वमागाद्गरुडध्वजः॥२६॥ सोपि संकल्पजं विष्णोः पादसेवोपसादितम्। प्राप्य संकल्पनिर्वाणं नातिप्रीतोऽभ्यगात्पुरं॥२७॥ ॥
कल्प २

तुभ्यं

नंप्रस्थिते सावेत्कश्चवनंप्रतिदीर्घगमने कृते सतिरक्षिता रक्षिष्यसि॥२२॥ त्वया यः संकल्पितमपि मद्भक्तस्य तच्छ्रोहादेवं स विष्णुनीत्याहा त्वद्भ्रा रयां पादसेवया प्रापितां संकल्पस्य निर्वाणं समाप्तिर्यस्मात्॥२३॥ किंच इष्ट्वा मां यज्ञो हृदयं प्रियामूर्त्तिर्यस्य तं॥२४॥ यतः स्थानात्॥२५॥ अतिश्य दत्वा॥२६॥ संकल्पजं मनो ॥२७॥ ॥
॥

राम
३०

मायाविनः सकाशात्स्य यत्सुदुर्लभं हरेः पदं तदेकेनैव जन्मना लब्ध्वापि स्वमात्मानं मन्वः असिद्धार्थमप्राप्तमनोरथमिव कथममन्यत। उत्तमार्थविदपि॥२८॥ ताप
मेवाह समाधिनेति सार्धषड्भिः। नैके अनेके भवा यस्मिन् बहुजन्मालभ्येनेत्यर्थः। अरण्यम् इत्यादिसमये गच्छतो दिदृक्षस्य हरेः पादच्छायायां स्थितमात्मानं स्म
त्वा हा छायामुपेत्येति पृथक्मतिः भेददृष्टिः सा नाशमिति भावः॥३०॥ अनात्म्यमात्मज्ञत्वं भवच्छेदनं पदं तद्वत् तदयाचिषमिति वा नास्मि॥३१॥ अज्ञत्वकारणं संभा
वयति। मतिरिति पंचभिः निर्मत्सरत्वात् पतद्भिः आरूढैः अत एव असहनशीलैः नाकृनाथवमानं इत्यादि सत्यमपि नारदस्य वचो येन गृहीतवानस्मि तस्य मे मतिर्वि

विदुर उवाच॥ ॥सुदुर्लभं यत्परमं पदं हरेर्मायाविनस्तच्चरणार्चनार्जितं। लब्ध्वाऽप्यसिद्धार्थमिवैकजन्मना कथं स्वमात्मानममन्यताऽ
र्थवित्॥२८॥ ॥मैत्रेय उवाच॥ ॥मातुः सपत्न्याः वाग्बाणैर्हृदि विद्धस्तु तान्स्मरन्। नैच्छन्मुक्तिपतेर्मुक्तिं तस्मात्तापमुपेयिवान्॥२९॥ ॥
ध्रुव उवाच॥ ॥समाधिना नैकभवेन यत्पदं विदुः सनंदादय ऊर्ध्वरेतसः। मासैरहं षड्भिरमुष्य पादयोः छायामुपेत्याऽपगतः पृथङ्म
तिः॥३०॥ अहो बत ममानात्म्यं मंदभाग्यस्य पश्यत। भवच्छिदः पादमूलं गत्वा याचे यदंतवत्॥३१॥ मतिर्विदूषिता देवैः पतद्भिरसहिष्णुभिः।
यो नारदवचस्तथ्यं नाग्रहीषमसत्तमः॥३२॥ दैवीं मायामुपाश्रित्य प्रसुप्त इव भिन्नदृक्। तप्ये द्वितीयेऽप्यसति भ्रातृभ्रातृव्यहृ
द्रुजा॥३३॥ मयैतत्प्रार्थितं व्यर्थं चिकित्सेव गतायुषि। प्रसाद्य जगदात्मानं तपसा दुःप्रसादनं। भवच्छिदमयाचेऽहं भवं भाग्यवि
र्जितः॥३४॥ ॥

दूषिता॥३२॥ किंच दैवीमिति। प्रसुप्तः स्वप्नानिव पश्यन् द्वितीये असत्यपि भ्रातैव भ्रातृव्यः शत्रुरिति द्वैतात् हृद्रुजा हृदयशोकेन तप्ये तापमनुभवा
मि॥३३॥ किंच॥ मयाप्रसाद्य यत्प्रार्थितं तद्व्यर्थं प्रार्थितमित्याह। भवच्छिदमिति॥३४॥ ॥

ना॰ सकारा २

रा॰ च॰ तु॰

२१

एतदेव स्पष्टीकृतमाह। स्वराज्यं निजानंदं प्रयच्छतः सकाशाद् दलिमानः क्षीणपुण्येन मया लिक्षितः याचितं क्षीणेन मत्पुण्येनेति वा दृष्टांत एवसर्वं वृत्तः। यथा धनः
ईश्वरात् चक्रवर्तिनः। फलीकारान् सतुषतंडुलकणान् याचते तद्वत्। ३५ ॥ एवं निस्पृहत्वं तत्स्पष्टमित्याह। तस्मात् संविना अन्यमर्थं मात्मनो नवै वां छति
यद्दृष्टौ यैव लवेन मनसः स्पृहिर्ये प्रांते ३६ प्रस्तुतमाह। आकर्ण्येति सपरेत्य स्त्वा आगतमाकर्ण्य यथा नम्र हृदये विश्वासं न चकार। अलङ् समममलङ्कृ
तइति मत्वा ॥ ३७ ॥ एष त्वविरत इति देवर्षेर्वाक्यं ग्रहाय ॥ ३८ ॥ ब्राह्मणादिभिः पर्यस्त सः परिष्टृतः ३९ ॥ अस्य राज्ञो महिष्यो मध्ये रत्नमं निधायैकामे वशिष्टिको

आराज्यं यच्छतो मौढ्यान्मानो मे लिक्षितो बुताईश्वरात् क्षीणपुण्येन फलीकारानिवाधनः ॥ ३५ ॥ मैत्रेय उवाच ॥ नैवैमुकुंदस्य पदारविं
दयो रजोजुषस्तात भवादृशाजनाः वांछंति तद्दास्यमृतेर्थमात्मनो यदृच्छया लब्धमनः समृद्धयः ३६ आकर्ण्यात्मजमायांतं संपरेत्य यथा
गतं। राजनत्रश्रद्दधे भद्रमभद्रस्य कुतो मम ॥ ३७ ॥ श्रद्धाय वाक्यं देवर्षेर्हर्षवेगेन धर्षितः। वार्ताहर्तुरतिप्रीतो हारं प्रादान्महाधनं ३८ ॥ सद
श्वं रथमारुह्य कार्तस्वरपरिष्कृतं। ब्राह्मणैः कुलवृद्धैश्च पर्यस्तो मात्यबंधुभिः ॥ ३९ ॥ शंखदुंदुभिनादेन ब्रह्मघोषेन वेणुभिः। निश्च
क्राम पुरात्तूर्णमात्मजाभीक्षणोत्सुकः ४० ॥ सुनीतिः सुरुचिश्चास्य महिष्यौ रुक्मभूषिते। आरुह्य शिबिकां सार्द्धं उत्तमेनाभिजग्मतुः
॥ ४१ ॥ तं दृष्ट्वोपवनाभ्याश आयांतं तरसा रथात्। अवरुह्य नृपस्तूर्णमासाद्य प्रेमविह्वलः ॥ ४२ ॥ परिरेभेंगजं दोर्भ्यां दीर्घोत्कंठमनाः श्वसन्
विष्वक्सेनांघ्रिसंस्पर्शहताशेषाघबंधनं ॥ ४३ ॥ अथाजिघ्रन्मुहुर्मूर्ध्नि शीतैर्नयनवारिभिः। स्नापयामास तनयं जातोद्दाममनोरथः ॥ ४४ ॥
अभिवंद्य पितुः पादावाशीर्भिश्चाभिमंत्रितः। ननाम मातरौ शीर्ष्णा सत्कृतः सज्जनाग्रणीः ॥ ४५ ॥ सुरुचिस्तं समुत्थाप्य पादावनतमर्भकं। परिष्व
ज्याह जीवेति वाष्पगद्गदया गिरा ॥ ४६ ॥

नरविमानमारुह्य ॥ ४१ ॥ उपवनस्याभ्यासे समीपे ४२ ॥ विष्वक्सेनांघ्रिसंस्पर्शेनाहतमशेषमघबंधनं यस्य ॥ ४३ ॥ जातउद्दामो महान् मनोरथो यस्य ॥ ४४ ॥ अभि
मंत्रितः पितुराशीर्भिः सह तेन सत्कृतसंभाषणः ॥ ४५ ॥ ॥ श्रीरामायनमः ॥ ॥ श्रीगोपालायनमः ॥ ॥ श्रीकृष्णायनमः ॥ ॥

३१

सुतुष्याः प्रीतिर्नासंलावितेत्याहाय स्येतिान मंति। अनुसरंति। अपोयथाश्रयमेवनिम्नं देशमवतरंति॥ ४६॥ अहकुःदधक्रः॥ ४७॥ हेवीरवीरस्तवोक्रवमा
ठः। अलिखिप्यमाना। भ्यांस्त्रनात्सांपयस्वदासुस्राव॥ ४९॥ चिरंनष्टःदर्शनमप्राप्तः रक्षितारक्षिष्यति॥ ५०॥ एवमितिप्रवृहितपित्राधकपलालनं
पराभूप्रपते॥ ५१॥ पुरंवर्णयति। मत्रतः ोतिचतुर्लिमिसष्टंदैः फलमंजीरघुक्तैः पूगानांपोतैर्वीलवृद्धैः तद्दिधैः सष्टंदैः जंपक्षतंप्रतिहारमितिफ त्तुरेण

यस्यप्रसन्नोलगवान्गुणैर्मैत्र्यादिभिर्हरिः। तस्मैनमंतिभूतानिनिम्नमापइवस्वयं॥ ४६॥ उत्तमश्लकावश्रोलावद्यान्प्रेमविह्व
लौऽग्रंगसंगाडुलुलकावृश्रोधंमुहुर्हुहुः॥ ४७॥ सुनीतिरस्यजननीप्राणेलोपिप्रियंसुतं। उपगुह्यजहावाधिंतदंगस्पर्श
निर्वृता॥ ४८॥ पयस्तनाभ्यांसुस्रावनेत्रजैःसलिलैःशिवैः। तदाभिषिच्यमानाभ्यांवीरवीरस्त्वोमुहुः॥ ४९॥ तांशशंसुर्जनाराज्ञी
दिष्ट्यातेपुत्रआर्तिहाप्रतिलब्धश्चिरंनष्टोरक्षितामंडलंभुवः॥ ५०॥ अभ्यर्चितस्त्वयानूनंलगवान्प्रणतार्तिहा। यदनुध्यायि
नोवीराकृत्युंजिग्युःसुदुर्जयं॥ ५१॥ लाल्यमानंजनैरेवंध्रुवंसभ्रातरंनृपः। आरोप्यकरिणीहृष्टःस्तूयमानोऽविशत्पुरं॥ ५२॥ तत्रतत्रो
पसंक्लृप्तैर्लसन्मकरतोरणैः। सवृंदैःकदलीस्तंभैःपूगपोतैश्चतद्विधैः॥ ५३॥ चूतपल्लववासःस्रक्मुक्तादामविलंबिभिः। उ
पस्कृतं प्रतिद्वारंअपांकुंभैःसदीपकैः॥ ५४॥ प्राकारैर्गोपुरागारैःशातकुंभपरिच्छदैः। सर्वतोलंकृतंश्रीमद्विमानशिखरद्युभिः॥ मृ
ष्टचत्वररथ्याट्टमार्गंचंदनचर्चितं। लाजाक्षतैःपुष्पफलैस्तंडुलैर्बलिभिर्युतं॥ ५६॥ ध्रुवायपथिदृष्टायतत्रतत्रपुरस्त्रियः। सिद्धार्थाक्ष
तदध्यंबुदूर्वापुष्पफलानिच॥ ५७॥ उपजह्रुःप्रयुंजानावात्सल्यादाशिषःसतीः॥ ॥

वृषः॥ ५३॥ चूतपल्लवाश्चवासांसिचस्रजश्चमुक्तादामाणिचतेषांविशिष्टंलंबनंमस्ति येषुकुंभेषु॥ ५४॥ गोपुरैरागारैश्चशातकुंभंताः परिकरायेषुवि
मानानामिवशिखरैर्द्युतिर्येषां॥ ५५॥ चत्वरमंगणंरथ्यामहामार्गः। अट्टउपरिसोपरिनिर्मितं। भूमिकामार्गोऽवांतरः मृष्टाःसमार्जिताश्चत्वरादं
योयस्मिन्। सिद्धार्थःश्वेतसर्षपः। अक्षतायवा॥ ॥ उपजह्रुरूपकिरन्सतीःसत्यः॥ ॥

यत्र लवणोन्नमेकं सुन्नरूकप्रदीप आदिमत्योवाप्यः ६३ ओढवयसं प्राप्तयौवनं अनुरक्ताः प्रजा यस्मिन् ६५ प्रवयसं वृद्धम् ६६ ॥ चतुर्थे नवमः ॥
दशमे भ्रातृहंतॄणां यक्षाणां मकरोद्वधं । एकएवा लकांगत्वा तस्य विक्रमतत्पतेोपितोर त्नमिवातिमनाहरंकन्यारत्नं वेतिवा ॥ २ यक्षेणाद्रौ

सुएवं सुहृत्सु गीतानि प्राविशद्भवनं पितुः ॥ ५८ ॥ महामणिव्रातमये सतस्मिन्भवनोत्तमे । लालितो नितरां पित्रा न्यवसद्दिवि देववत् ॥ ५९ ॥ पयःफेननिभाः शय्या दांता रुक्मपरिच्छदाः । आसनानि महार्हाणि यत्र रौक्मा उपस्कराः ॥ ६० ॥ यत्र स्फटिककुड्येषु महामरकतेषु च । मणिप्रदीपा आभांति ललनारत्नसंयुताः ॥ ६१ ॥ उद्यानानि च रम्याणि विचित्रैरमरद्रुमैः । कूजद्विहंगमिथुनैर्गायन्मत्तमधुव्रतैः ॥ ६२ ॥ वाप्यो वैडूर्यसोपानाः पद्मोत्पलकुमुद्वतीः । हंसकारंडवकुलैर्जुष्टाश्चक्राह्वसारसैः ॥ ६३ ॥ उत्तानपादो राजर्षिः प्रभावं तनयस्य तं । श्रुत्वा दृष्ट्वाद्भुततमं प्रपेदे विस्मयं परं ॥ ६४ ॥ वीक्ष्योढवयसं तं च प्रकृतीनां च संमतं । अनुरक्तप्रजं राजा ध्रुवं चक्रे भुवः पतिं ॥ ६५ ॥ आत्मानं च प्रवयसमाकलय्य विशांपतिः । वनं विरक्तः प्रातिष्ठद्विमृशन्नात्मनो गतिं ॥ ६६ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे नवमोध्यायः ॥ ॥ मैत्रेय उवाच ॥ ॥ प्रजापतेर्दुहितरं शिशुमारस्य वै ध्रुवः । उपयेमे भ्रमिं नाम तत्सुतौ कल्पवत्सरौ ॥ १ ॥ इलायामपि भार्यायां वायोः पुत्र्यां महाबलः । पुत्रमुत्कलनामानं योषिद्रत्नमजीजनत् ॥ २ ॥ उत्तमस्त्वकृतोद्वाहो मृगयायां बलीयसा । हतः पुण्यजनेनाद्रौ तन्माता स्य गतिं गता ॥ ३ ॥ ध्रुवो भ्रातृवधं श्रुत्वा कोपामर्षशुचार्पितः । जैत्रं स्यंदनमास्थाय गतः पुण्यजनालयं ॥ ४ ॥ गत्वोदीचीं दिशं राजा रुद्रानुचरसेवितां । ददर्श हिमवद्द्रोण्यां पुरीं गुह्यकसंकुलां ॥ ५ ॥

हिमवति हतः । आज्ञाविनिपाठे पुत्रे त्रस्यगतिं गता इति त्यधर्म उ कोपामर्षः शुचा हदै स्पंतेन ... नितिष्माप्य सभ जैत्रं जयहेतुं । उपएर्जनालयं अलकां
उद्दरानुचरा भूतादयः ॥ ॥ श्रीरामचंद्राय नमः ॥ श्रीकृष्णाय नमः ॥ केशवाय नमः ॥

दध्मैवारितवान्नादेन शंखवादेनेनाहेद्दन्तः ॥ ७ ॥ पदेव्योयज्ञश्चियः ॥ ८ ॥ एकैकं त्रिभिस्त्रिभिः ॥ इत्येवं सर्वांस्त्रयोदशायुतानियद्धान्युगपद्दहनञ्जया
न ॥ ९ ॥ ते पितकर्म्मी सहमाना युगमविध्यन्माद्विगुणं यथा स्वनिषङ्गैः प्रतिकर्तुमिच्छन्तः विचित्रवाजैः विचित्रपदैः ॥ ११ ॥ धारासंपातेन छन्नो गिरिव

दध्मौ शंखं ... दाहुः खं दिशश्चानुनादयन्नायेनोद्विग्नदशः ॥ तत्र पदेव्योऽत्र सत्र भृशम् ॥ ९ ॥ ततो निःकम्पबलिना उपदेव महासु
राः ॥ असहं तत्संतिनादमतिपेतुरुदायुधाः ॥ सतानापततो वीरानुग्रधन्वा महारथः ॥ एकैकं युगपत्सर्वान्हर्षणी त्रिभिस्त्रिभिः ॥ ते
वैललाटलग्नैस्तैरिषुभिः सर्वा एव हि ॥ मत्वाऽनिरस्तमात्मानमाशंसन्तेकमत्तस्य जयं ॥ १९ ॥ ते पिवाणुमुष्यंतः पादस्पर्शमिवोरगाः ॥ शरैरविध्य
न्युगपद्द्विगुणं प्रविकीर्षवः ॥ २० ॥ ततः परिघनिस्त्रिंशैः प्रासशूलपरश्वधैः ॥ शक्त्यृष्टिभिर्भुशुंडीभिश्चित्रवाजैः शरैरपि ॥ २१ ॥ अस्पव
र्षन्प्रकुपिताः सरथं सहसारथिं ॥ इच्छंतस्तत्प्रतीकर्तुमयुतानां त्रयोदश ॥ २२ ॥ श्रीमानपादिः स तदा शस्त्रवर्षेण भूरिणा ... याहदृश
त छन्नः आसारेण यथा गिरिः ॥ २३ ॥ हाहाकारस्तदैवासीत्सिद्धानां दिवि पश्यतां ॥ हतोऽयं मानवः सूर्यो मग्नः पुण्यजनार्णवे ॥ २४ ॥ नदद्भ
स्तु यातुधानेषु जयकाशिषु धौ उदतिष्ठद्रथस्तस्य नीहारादिव भास्करः ॥ २५ ॥ धनुर्विस्फूर्जयन्धुयंद्विषतां खेदमुद्वहन् ॥ अस्त्रैर्घो
व्यधमद्धाणैर्घनानीकमिवानिलः ॥ तस्यते वापनिर्मुक्ताः तिग्मा वर्म्माणि रक्षसां ॥ कायान्निर्विविशुस्तिग्मा गिरीनशनयो यथा ॥ ॥

नदद्भ दृश्यतस्सूर्यतुल्यः ॥ पश्चाद्यातुधानेषु राक्षसेषु जयकाशिषु जितं जितमिति जयप्रकाशकेषु सत्सु ॥ पा ॥ व्यधमन्नू संचूर्णयामास ॥ २६ ॥ वर्मा
णि कवचानि ॥ २७ ॥ ॥

ति

ना॰च॰
३३

शिरःप्रमुखैरास्तृताः प्रकीर्णै रेजुरिति द्वयोरन्वयः प्रायः बाहुल्येन विवृक्णाः संछिन्ना अवयवा येषां ॥२१॥ आततायिनं शस्त्रपाणिं ॥२२॥ इति ब्रुवति
त्वत्रापि न मायिनामित्यादेरनुषंगः चित्ररथो ध्रुवः । यत्तः यत्नवान् प्रतियोगः पुनरुद्योगः तस्माच्छंकितः । न खलु तो वायोर्हेतोः विस्फुरंत्यस्तडितो
यस्मिन् तेन त्रासयंतं स्तनयित्नुघोषेण नयोयस्मिन् ॥२३॥ ववृषुः निपेतुरित्यर्थः । न सृजति शरीरमित्यसृक् गिरिश्लेष्माद्यमिदं सः पुरुषं च मार्षमेदो सि

भल्लैः संछिद्यमानानां शिरोभिश्चारुकुंडलैः । ऊरुभिर्हेमतालाभैर्दोर्भिर्वलयवल्गुभिः ॥१९॥ हारकेयूरमुकुटैरुष्णीषैश्च महाधनैः ।
आस्तृतास्ता रणभुवो रेजुर्वीरमनोहराः ॥२०॥ हतावशिष्टा इतरे रणाजिराद्रक्षोगणाः क्षत्रियवर्यसायकैः । प्रायो विवृक्णावयवा विदुद्रुवुर्मृगेंद्रविक्रीडितयूथपा इव ॥२१॥ अपश्यमानः स तदाततायिनं महामृधे कंचन मानवोत्तमः । पुरीं दिदृक्षन्नपि नाविशद्द्विषां न मायिनां वेद चिकीर्षितं जनः ॥२२॥ इति ब्रुवंश्चित्ररथो घनानीकेन सर्वतः । विस्फुरत्तडिता दिक्षु त्रासयत्स्तनयित्नुना ॥२३॥ ववृषू रुधिरौघासृक्पूयविण्मूत्रमेदसः । निपेतुर्गगनादस्य कबंधान्यग्रतोऽनघ ॥२४॥ ततः खेऽदृश्यत गिरिर्निपेतुः सर्वतो दिशः । गदापरिघनिस्त्रिंशमुशलाः साश्मवर्षिणः ॥२५॥ अहयोऽशनिनिश्वासा वमंतोऽग्निं रुषाक्षिभिः । अभ्यधावन् गजा मत्ताः सिंहव्याघ्राश्च यूथशः ॥२६॥ समुद्र ऊर्मिभिर्भीमः प्लावयन् सर्वतो भुवं । आससाद महाह्रादः कल्पांत इव भीषणः ॥२७॥ एवंविधान्यनेकानि त्रासनान्यमनस्विनां । ससृजुस्तिग्मगतय आसुर्या माययासुराः ॥२८॥ ध्रुवे प्रयुक्तामसुरैस्तां मायामतिदुस्तरां । निशम्य तस्य मुनयः शमाशंसन् समागताः ॥२९॥ ॥ मुनय ऊचुः ॥ ॥ औत्तानपाद भगवांस्तव शार्ङ्गधन्वा देवः क्षिणोत्ववनतार्तिहरो विपक्षान् । यन्नामधेयमभिधाय निशम्य चाद्धा लोकोऽञ्जसा तरति दुस्तरमंग मृत्युम् ॥३०॥ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे दशमोऽध्यायः ॥ ॥
×७ थः स्वसारथिं यत्तः परेषां प्रतियोगशंकितः । शुश्राव शब्दं जलधेरिवेरितं नभस्वतो दिक्षु रजोऽन्वदृश्यत ॥२२॥ क्षणेनाच्छादितं व्योम ७ ×

अस्याग्रतो निपेतुः ॥२४॥ साश्मवर्षिणं अश्मसहितं यद्वर्षं तद्वंतः ॥२५॥ अशनिवन्निश्वासो येषां ॥२६॥ त्रासनानि भयंकराणि तिग्मा क्रूरा गतिः प्रवृत्तिर्
येषां असुरराक्षसाः ॥२८॥ हि रहरांतरत्वेन यद्वा एवोच्यंते । तस्य शं कल्याणं आशंसन् प्रार्थितवंतः । तव विपक्षान् शत्रून् शत्रून्नाशयतु अद्धा साक्षात् अंजसा सु

राम
३३

एकादशे तु यक्षाणां क्षयं दृष्ट्वा मनुः स्वयम्। आगत्य वारयामास ध्रुवं तत्त्वोपदेशतः। गदतां वचनमुपदेशमिव निशम्य उपस्पृश्य नारायणनिर्मितं नारा
यणास्त्रं संदधे केशा रागादयो यथा॥ किंच॥ तस्यार्षास्त्रं ध्रुव इत्यपेक्षितं नारायणास्त्रमस्त्रं प्रयुंजतः सतः सुवर्णमयाः पुंखाः मूलभागा येषां कलहंसानां वाससोऽपि पक्षा येषां
तेषां तेनशरा विनिःसृता इति॥ उपरिष्टाच्छिलीमुखं हणन् ३ प्रधने युद्धे उन्नद्धा उच्छ्रिता॥४॥ फणा येषां ते सर्पाः॥ ऐष्यक्ये चाणोर्निकृत्ता बाह्वादयो येषां तान्पर

मैत्रेय उवाच॥ ॥ निशम्य गदतामेवमृषीणां धनुषि ध्रुवः॥ संदधेऽस्त्रमुपस्पृश्य यन्नारायणनिर्मितम्॥ १ ॥ संधीयमान एतस्मिन्माया
गुह्यकनिर्मिताः॥ क्षिप्रं विनेशुर्विदुर क्लेशा ज्ञानोदये यथा॥ २ तस्यार्षास्त्रं धनुषि प्रयुंजतः सुवर्णपुंखाः कलहंसवाससः। विनिःसृता आविवि
शुर्द्विषद्बलं यथा वनं भीमरवाः शिखंडिनः॥ ३ ॥ तैस्तिग्मधारैः प्रधने शिलीमुखैरितस्ततः पुण्यजना उपद्रुताः॥ ३॥ तमभ्यधावन्कुपिता उदायुधाः
सुपर्णमुन्नद्धफणा इवाहयः॥ ४॥ स तान्पृषत्कैरभिधावतो मृधे निकृत्तबाहूरुशिरोधरोदरान्। निनाय लोकं परमर्कमंडलं व्रजंति निर्भिद्य यमूर्ध्व
रेतसः॥ ५ तान्हन्यमानानभिवीक्ष्य गुह्यकाननागसश्चित्ररथेन भूरिशः। औत्तानपादिं कृपया पितामहो मनुर्जगादोपगतः सहर्षिभिः॥
६॥ ॥ मनुरुवाच॥ ॥ अलं वत्सातिरोषेण तमोद्वारेण पाप्मना। येन पुण्यजनानेतानवधीस्त्वमनागसः॥ ७ नास्मत्कुलोचितं तात कर्मै
तत्सद्विगर्हितं वधो यदुपदेवानामारब्धस्तेऽकृतैनसां॥ ८ नन्वेकस्यापराधेन प्रसंगाद्बहवो हताः। भ्रातुर्वधाभितप्तेन त्वयांग भ्रातृवत्स
ल॥ ९ नायं मार्गो हि साधूनां हृषीकेशानुवर्तिनां। यदात्मानं पराग्गृह्य पशुवद्भूतवैशसं॥ १०॥ ॥ श्रीहंसाय नमः॥ ॥ ॥

लोकं निनाय कथंभूतं ऊर्ध्वरेतसः संन्यासिनोऽर्कमंडलं निर्भिद्य यं व्रजंति तं लोकं॥ ५ ॥ अनागसो निरपराधान्॥ ६॥ तमसो नरकस्य द्वारेण येन रोषेण॥
७ ॥ ननु मद्भ्रातृहंतारः कथमकृतैनसो तत्राह। नन्विति। सत्यं यद्यपराधेन वै तदुचितं न तु बहूनां प्राह। नायमिति। पराक् गृह्य परात्मत्वेनात्मानं गृहीत्वा
पशवो यथा देहाभिमानादन्योन्यं घ्नंति तथा भूतानां वैशसं हिंसेति यत्॥ १० ॥ ॥ श्रीराम॥ ॥ श्रीराम॥ ॥ श्रीराम॥ ॥

त्वं च ब्रामेसाधुः स इदानीं कथमन्यथा कृतवानित्याह। सर्वभूतात्मभावेनेति द्वाभ्याम्॥१०॥ अनुध्यातः हरेः विज्ञातो वा हृदि स्थितः॥ तत्पुंसां हरिदासानामपि सा धु
वेन संमतः॥ सतां व्रतमेवाह॥११॥ महत्सु तितिक्षयानीचेषु करुणया समेषु मैत्र्या अखिलेषु जंतुषु समत्वेन च ततः कृतार्थो भवतीत्याह॥१२॥ संप्रसन्ने सति गुणैर्वि
मुक्तो न एव तत्कार्येण जीवेन लिंगशरीरेण निर्मुक्तः सन् निर्वाणं सुखात्मकं ब्रह्म स्वरूपं प्राप्नोति। अहं हतो मंगी हत्यो क्तं ॥ इदानीं तु नात्मनो भ्रातृपुत्रादि संबंधः
नवान्योन्यं हंतृत्वादिकमपीत्याह। दशभिः॥१३॥ भूतैः पंचभिरारब्धैर्देहाद्याकारेण परिणतैर्योषित्पुरुष इति पुरुषश्चेति प्रसिद्धः॥ तयोर्व्यवायान्मैथुना

पृ॰ पाठः

सर्वभूतात्मभावेन भूतावासं हरिं भवान् आराध्याप दुराराध्यं विष्णोस्तत्परमं पदम्॥१०॥ स त्वं हरेरनुध्यातस्तत्पुंसामपि संमतः॥ कथं
त्ववद्यं कृतवाननुशिक्षन्सतां व्रतम्॥११॥ तितिक्षया करुणया मैत्र्या चाखिलजंतुषु समत्वेन च सर्वात्मा भगवान्संप्रसी
दति॥१२॥ संप्रसन्ने भगवति पुरुषः प्राकृतैर्गुणैः। विमुक्तो जीवनिर्मुक्तो ब्रह्म निर्वाणमृच्छति॥१३॥ भूतैः पंचभिरारब्धैर्यो
षित्पुरुष एव हि। तयोर्व्यवायात्संभूतिर्योषित्पुरुषयोरिह॥१४॥ एवं प्रवर्त्तते सर्गः स्थितिः संयम एव च। गुणव्यतिक
राद्राजन्मायया परमात्मनः॥१५॥ निमित्तमात्रं तत्रासीन्निर्गुणः पुरुषर्षभः। व्यक्ताव्यक्तमिदं विश्वं यत्र भ्रमति लोहवत्

त्संभूतिरन्ययोर्योषित्पुरुषयोरिह संसारे भवति॥१४॥ एवं नाचत्सर्गः प्रवर्त्तते। एवं पालकाकारेण परिणतैस्तैरेव स्थितिः॥ हंतृदेहाकारपरिणतैः संयमः॥ सर्व
परमात्मनो मायया गुणानां व्यतिकरात् ननु स्वतः। ननु जडानां देहानां गुणानां वा कथं सर्गादि हेतुत्वं तत्राह॥१५॥ निमित्तमात्रं पुरुषर्षभ ईश्वरः। यत्र य
स्मिन्निमित्ते सति कार्यकारणात्मकं विश्वं भ्रमति परिवर्त्तते। यथा अयस्कांते। निमित्ते सति लोहं प्रवर्त्तते तद्वत्॥१६॥ ॥

ननु सर्वेत्र निमित्तं तर्हि तस्य विशेषाभावात्कथं देवसर्गादिवैषम्यं तत्राह। सखल्विति। कालशक्त्या क्रमेण गुणानां प्रवाहः क्षोभः तेन विभक्तं सत्त्वादि विषयं वीर्यं शक्तिर्यस्य। ननु कालोपि गुणक्षोभक एव क्षोभ्यश्च यदि तत्राह। चेष्टा कालशक्तिः दुर्विभाव्या अचिंत्या। ननु पित्रादिः सृजति पालयति राजादिः निहंति च चोरादिः। तत्त्वीश्वरस्य तत्राह। १७। स इति। जनेन पित्रादिना जनं पुत्रादिं जनयन् मृत्युना अंतकं चोरादिकं तं मृत्युहेतुना मारयन्नंतकरः स्वयं तु अनंतो नादिरव्ययः अक्षीणशक्तिः। अयं तावत्पित्रादयोऽन्यतरत्वात् आदिमंतो न स्वातंत्र्येण कारणं किंत्वीश्वर एव तत्रियंता सर्वकारणमिति। न चैवं कुर्वतो पि वैषम्यप्रसक्तिः पक्षपाताभावादित्याह द्वाभ्यां

सखल्विदं भगवान्कालशक्त्या गुणप्रवाहेण विभक्तवीर्यः। करोत्यकर्त्तैव निहंत्यहंता चेष्टा विभूम्नः खलु दुर्विभाव्या॥१७॥ सोनंतोऽंतकरः कालोऽनादिरादिकृदव्ययः। जनं जनेन जनयन्मारयन्मृत्युनांतकम्॥१८॥ न वै स्वपक्षोस्य विपक्ष एव वा परस्य मृत्योर्विशतः समं प्रजाः। तं धावमानमनुधावंत्यनीशा यथा रजांस्यनिलं भूतसंघाः॥ आयुषोऽपचयं [illegible] तथैवोपचयं विभुः। उभाभ्यां रहितः स्वस्थो दुःस्थस्य विदधात्यसौ॥२०॥ ॥ ॥

॥१९॥ न वा इति मृत्यु रूपस्यास्य यथा तचति तथा प्रजाः कर्म्मभूता विशतः तस्य साम्येपि मृतेषु फलवैषम्यं तत्कर्म्मतः [illegible]दिति सदृष्टांतमाह। तं धावंतमनु अनीशाः कर्म्माधीना भूतसंघा धावंति। अनिलं धावंतमनु रजांसि इव तत्र यथा रजसां तमःप्रकाशजलाग्न्यादिप्रवेशेपि नानिलस्य वैषम्यं एवमीश्वरस्यापीति भावः॥१९॥ अपचयं अकालमृत्युं उपचयं कालमृत्योः परिहारः। यद्वा अपचयं मशकादौ उपचयं देवादौ स्वस्थश्चासौ उपचयापचयाभ्यां रहितोऽसौ विभुर्दुःस्थस्य कर्माधीनस्य विदधाति॥२०॥ ॥

श्री

जडत्वादिना

नाच० ३५

एवंभूते वैश्वरः सर्ववादिसंमतः विवादस्तु नाममात्रइत्याह। केचिदिति पुंसः कामं वात्स्यायनादयः नास्त्यः श्रुतिश्चाकामो कार्षीत् कामः करोति कामः कर्ता कामः कारयिते त्यादि। ननु कर्मादीनां स्वरूपतोऽपि भिन्नत्वात् कथमेकमत्वं तत्राह ॥ २१ ॥ अव्यक्तस्याप्रतएवाप्रमेयस्य। तथाऽपि सत्त्वे हेतुः नानाशक्तीनां महदादीनामुदयो यस्मात्। आदिकीर्षितमेव नाव च्चोऽपि न वेद अथ स्वस्य संभवो यस्मात् तमीश्वरं को वेदन कोऽपि वेद। अद्धेति पाठे साक्षात् अतस्तत्त्वज्ञानात् वा द्विशोऽशवि वाद इत्यर्थः। तथा च श्रुतिः को अद्धा वेद क इह प्रवोचत् कुत आयाता कुत इयं विसृष्टिः अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूवेत्यादि। ईश्वरवादस्य

सूर्य

केचित्कर्म वदंत्येनं स्वभावमपरे नृप। एके कालं परे दैवं पुंसः काममुतापरे ॥ २१ ॥ अव्यक्तस्या[illegible]प्रमेयस्य नानाशक्त्युदयस्य च। न वै चिकीर्षितं तात को वेदा[illegible]थ स्वसंभवम् ॥ २२ ॥ न चैते पुत्रक भ्रातुर्हंतारो धनदानुगाः। विसर्गादानयोस्तात पुंसो दैवं हि कारणम् ॥ २३ ॥ स एव विश्वं सृजति स एवावति हंति च। अथापि ह्यनहंकारान्नाज्यते गुणकर्मभिः ॥ २४ ॥ एष भूतानि भूतात्मा भूतेशो भूतभावनः। स्वशक्त्या मायया युक्तः सृजत्यत्ति च पाति च ॥ २५ ॥ तमेव मृत्युममृतं तात दैवं सर्वात्मनोपेहि जगत्परायणं। यस्मै बलिं विश्वसृजो हरंति गावो यथा वै नसि दामयंत्रिताः ॥ २६ ॥ ॥

प्रकृतोपयोगमाह ॥ २२ ॥ न चैते भ्रातुर्हंतारः उक्तमेव हेतुमनुवदति। विसर्गादानयोर्मृत्युजन्मनोः यद्वा विसर्गः सृष्टिः आदानं संहारः दैवमीश्वर एव हि कारणं। तथापि निर्लेपतामाह ॥ २३ ॥ स एवेति। अनहंकारत्वे हेतुमाह ॥ २४ ॥ एष इति। सम्यमीश्वर एव कर्ता तथाऽप्यहंकारादिमयान सक्तुं शक्यमिति चेदत आह ॥ २५ ॥ तमेवेति। वक्तुर्तिः मृत्युममृतं क्रमानां च मृतां उपेहि शरणं गच्छ। तमेवेत्यवधारणे हेतुः यस्मै नसि नासिकायां दामस्त्रिर्वद्धा गाव इव। विश्वसृजोऽपि नामभिर्यंत्रिता बद्धाः संतो बलिं हरंति तत्कारितं कर्म कुर्वंतीत्यर्थः ॥ २६ ॥ ॥

राम ३५

...का नां

तदाराधनं च तत्त्वतस्तु शक्यमेवेत्याह। यः पंचवर्षः स त्वं यमाराध्य त्रिलोक्या मूर्द्धि पदं स्थानं लेभे लब्धवानसि। इदानीं तमेवात्मनि अवलोकयेत्यत्र तरेण वयः। प्र-
[illegible]ः। प्रत्यं विश्वद्धाणि यस्मिन् क्रियाविशेषणं वा हरिं ध्यायंतं प्रत्याह। अंगाध्वमुक्तविरोधे आत्मनि मनसि व्यणा श्रितं अवस्थितं आत्मदृक्रूपं दृष्टिः स-
न्नुश्रयं लेदोयस्मिन्नत दिढं लेदमसदेव विश्वं यस्मिन्नु प्रतीयते तं। तदन्वेषणफलमाह॥ २७॥ त्वं तदान्वेषणकाल एव। उपदेशसारमाह॥ २९॥ संय

यः पंचवर्षो जननीं त्वं विहाय मातुः सपत्न्या वचसा भिन्नमर्मा। वनं गतस्तपसा प्रत्यगक्षमाराध्य लेभे मूर्द्धि पदं त्रिलोक्याः॥ २७॥
तमेनमंगात्मनि मुक्तविग्रहे व्यपाश्रितं निर्गुणमेकमक्षरं। आत्मानमन्विच्छ विमुक्तमात्मदृग्यस्मिन्निदं भेदमसत्प्रतीयते॥ २८॥ त्वं प्रत्यगात्मनि तदा भगवत्यनंत आनंदमात्र उपपन्नसमस्तशक्तौ। भक्तिं विधाय परमां शनकैरविद्याग्रंथिं विभेत्स्यसि ममाहमिति प्ररूढम्॥ २९॥ संयच्छ रोषं भद्रं ते प्रतीपं श्रेयसां परं। श्रुतेन भूयसा राजन्नगदेन यथामयम्॥ ३०॥ येनोपसृष्टात्पुरुषाल्लोक उद्विजते भृशम्। न बुधस्तद्वशं गच्छेदिच्छन्नभयमात्मनः॥ ३१॥ हेलनं गिरिशभ्रातुर्धनदस्य त्वया कृतम्। यज्जघ्निवान्पुण्यजनान्भ्रातृघ्नानित्यमर्षितः॥ ३२॥ तं प्रसादय वत्साशु संनत्या प्रश्रयोक्तिभिः। न यावन्महतां तेजः कुलं नोऽभिभविष्यति॥ ३३॥ एवं स्वायंभुवः पौत्रमनुशास्य मनुर्ध्रुवम्। तेनाभिवंदितः साकमृषिभिः स्वपुरं ययौ॥ ३४॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे एकादशोऽध्यायः॥ ॥

च्छेति द्वाभ्यां प्रतीपं प्रतिकूलं श्रेयसां अगदेनौषधेन यथा आरोगं नियच्छति॥ ३०॥ येन रोषेण अथ स्पष्टात् व्याप्ता अन्यत्र त्वया कार्यमित्याह हेलनमिति द्वाः॥ ॥
यद्यतः जघ्निवान् घातितवान्॥ ॥ चतुर्थे एकादशः॥ ॥

३ मायया युक्तं विरहितं सगुणं निर्गुणं भेदेन ॥५॥

भा॰ च॰ ३६

द्वादशे धनदेनातिनंदितः पुरमागतः । यज्ञैरिष्ट्वा हरेः स्थानमारुरोहेति कीर्त्यते ॥ वैशसाद्धिंसाया निवृत्तं ज्ञात्वा ॥१॥ क्षत्रियदायाद क्षत्रियपुत्र ॥ अत्यजः त्यक्तवान् ॥ त्वं वा नासि । न च वैरस्य कारणमस्तीत्याह । न त्वं वानिति ॥ अप्यय भावयोः मृत्युजन्मनोः कथं तर्हि हतेत्यादि बुद्धिस्तत्राह । आत्मा ति प्रकाशत जायत इत्यर्थः ॥३॥ अत्र ध्यानाद्देहानुसंधानान्मायया धिया बंधः विपर्ययो दुःखादि ॥४॥ तत्तस्माद्गच्छ गत्वा च भगवंतं भजस्व फ तरेणान्वयः । सर्वभूतात्मको विग्रहो यस्यो

मैत्रे

मैत्रेय उवाच ॥ ध्रुवं निवृत्तं प्रतिबुध्य वैशसादपेतमन्युं भगवान्धनेश्वरः । तत्रागतश्चारणयक्षकिंनरैः संस्तूयमानोऽभ्यवदत्कृतां
जलिं ॥ धनद उवाच ॥ भो भोः क्षत्रियदायाद परितुष्टोऽस्मि तेऽनघ । यस्त्वं पितामहादेशाद्वैरं दुस्त्यजमत्यजः ॥ न भवानवधीद्यक्षान्न यक्षा
भ्रातरं तव । काल एव हि भूतानां प्रभुरप्ययभावयोः ॥३॥ अहं त्वमित्यपार्था धीरज्ञानात्पुरुषस्य हि । स्वाप्नीवाभात्यतद्ध्यानाद्यया बंधविपर्ययौ
॥४॥ तद्गच्छ ध्रुव भद्रं ते भगवंतमधोक्षजम् । सर्वभूतात्मभावेन सर्वभूतात्मविग्रहं । भजस्व भजनीयांघ्रिमभवाय भवच्छिदम् । युक्तं विर
हितं शक्त्या गुणमय्यात्ममायया ॥६॥ वृणीहि कामं नृप यन्मनोगतं मत्तस्त्वमौत्तानपदेऽविशंकितः । वराहोऽम्बुजनाभपादयोरनंतरं
त्वां वयमंग शुश्रुम ॥७॥ मैत्रेय उवाच ॥ स राजराजेन वराय चोदितो ध्रुवो महाभागवतो महामतिः । हरौ स वव्रेऽचलितां स्मृतिं यया तर
त्ययत्नेन दुरत्ययं तमः । तस्य प्रीतेन मनसा तां दत्त्वैडविडस्ततः । पश्यतोंतर्दधे सोपि स्वपुरं प्रत्यपद्यत ॥९॥ अथायजत यज्ञेशं क्रतुभि
र्भूरिदक्षिणैः । द्रव्यक्रियादेवतानां कर्म कर्मफलप्रदं ॥१०॥ सर्वात्मन्यच्युतेऽसर्वे तीव्रौघां भक्तिमुद्वहन् । ददर्शात्मनि भूतेषु तमेवावस्थितं विभुं
॥११॥ तमेवं शीलसंपन्नं ब्रह्मण्यं दीनवत्सलम् । गोप्तारं धर्मसेतूनां मेनिरे पितरं प्रजाः ॥१२॥ षट्त्रिंशद्वर्षसाहस्रं शशास क्षितिमंडलं ।
भोगैः पुण्यक्षयं कुर्वन्नभोगैरशुभक्षयम् ॥१३॥

शा तद्ध्या

र धनो

वं ती २

राम ३६

निर्भय:

मम संकोचेनाविशंकितः । अनंतरं अतिनिकटं ॥ स वराय चोदित इत्यनुवादरूपं पृथग्वाक्यं
अतः स च वव्रे इति तत्तुल्यस्यापौनरुक्त्यं । द्रव्यक्रियादेवतानां कर्मसाध्यफलरूपं कर्मफलप्रदं चेत्यर्थः । सर्वस्यात्मनि । असर्वे सर्वोपाधिवर्जिते ॥ अभोगैर्यज्ञा
द्यनुष्ठानैः ॥१३॥

वत्सरैः सदायामासंवत्सरांसम्मिन्नुतं कालं त्रिवर्गसाधकानीत्वा अविचलानि संयतानीन्द्रियाणि यस्य ॥१४॥ इदं देहादि भगवन्मायया आत्म
नि स्थितस्मिन् रचितं मन्यमानः अत्रा विद्यार्द्ध प्रेक्षितमति अविद्यारचितेति ॥ आत्मा देहः आत्मादि मायिकमपि पुनः कालेनोपसृष्टमनित्य
मा कलय्य विवित्य विशालां बदरिकाश्रमं । तत्र तत्कृतमष्टांगयोगमाह । तस्यां शिववार्द्धकं विगाह्य पवि विगाह्य प्रविश्य पतित्वा नादि नियमाङ्गमाः
विशुद्धकरणः इति शमादयो यमाश्रासनादीनि स्फुटमेवोक्तानि । जितो मरुत्प्राणो येन आ आहृतान्यक्षाणि येन भगवतः प्रतिरूपे स्थूलरूपे

एवं स सर्वं कालं महात्मा विचलेन्द्रियश्च त्रिवर्गाय यियिकं नीत्वा पुत्रायाद्धान्नृपासनं ॥१४॥ मन्यमान इदं विश्वं मायारचितमात्मनि । अविद्यारचि
तस्वप्नगंधर्वनगरोपमम् ॥ आत्मानं स्वं पत्यस्तुहृदो बलमृद्धकोशमंतःपुरं परिविहारसुवश्चरम्याः भूमंडलं जलधिमेखलमाकलय्य कालोप
सृष्टमिति स प्रययौ विशालाम् ॥१६॥ तस्यां विशुद्धकरणः शिववार्विगाह्य बद्धासनो जितमरुन्मनसाहृताक्षः । स्थूले दधार भगवत्प्रति
रूप एतच्चध्यायंस्तदव्यवहितो व्यसृजत्समाधौ ॥१७॥ भक्तिं हरौ भगवति प्रवहन्नजस्रमानंदबाष्पकलया मुहुरर्द्यमानः । विक्लिद्यमान
हृदयः पुलकाचिताङ्गो नात्मानमस्मरदसाविति मुक्तलिङ्गः ॥१८॥ स ददर्श विमानाग्र्यं नभसोऽवतरद्ध्रुवः । विभ्राजयद्दश दिशो राका
पतिमिवोदितं ॥१९॥ तत्रानु देवप्रवरौ चतुर्भुजौ श्यामौ किशोरावरुणाम्बुजेक्षणौ । स्थितौ वटस्य गदां सुवाससौ किरीटहाराङ्गदचा

तन्मनो दधार ध्यायन् ध्येयत्वेदृश्यः सन् समाधौ स्थितः ततस्थूलं व्यसृजत् ॥१७॥ एवमजस्रं नित्यं हरौ स ... रुकुंडलौ ॥२०॥ ॥ ॥
प्रकर्षेण वहन् अत्र सोऽयं वोऽहमित्यात्मानं नैस्मारयतो मुक्तो लिंगशरीराभिमानः । तत्र हेतवः आनंदबाष्पकलया बिंदुप्रवाहेणाभिभूय
मानविक्लिद्यमानं द्रवद्हृदयं यस्य पुलकैर्व्याप्तमंगः अनंतरं देवप्रवरौ ददर्शेत्यनुषंगः ... गदामवष्टभ्य स्थितौ किरीटादिभिः सहितेवारुणीकुंडलयोः ॥

स्य स्क२ गः

नाच०
३०

उत्तमगायः पुण्यश्लोकास्तस्य किंकरौ तौ विज्ञाय मधुद्विषः पार्षद्प्रधानाविति हेतोः साध्वसेन संभ्रमेण विस्मृतः पूजाक्रमः केवलं तस्य नाम
नितरां ननाम ॥२१॥ सुभद्रं ते इति सशरीरस्यैव विष्णुपदारोहणादिति प्रायः ॥ अतीतृपत् तर्पितवान् ॥२३॥ आवां तस्य पार्षदौ ॥२४॥ सुदुर्जयत्वे
हेतुः सूरयः समर्था योऽपि यत्प्राप्य केवलमधः स्थिताः पश्यंति यच्चंद्रादयः प्रदक्षिणं यथा भवति एवं परिक्रामंति ॥२५॥ तदातिष्ठ अधि

पा — दनं — व

मू विज्ञाय तावुत्तमगायकिंकरावभ्युत्थितः साध्वसविस्मृतः क्रमः ॥ ननाम नामानि गृणन्मधुद्विषः पार्षत्प्रधानाविति संहतां
जलिः ॥२१॥ तं कृष्णपादाभिनिविष्टचेतसं बद्धांजलिं प्रश्रयनम्रकंधरम् ॥ सुनंदनंदावुपसृत्य सस्मितं प्रत्यूचतुः पुष्करनाभसंमतौ ॥२२॥
सुनंदनंदावूचतुः ॥ ॥ भो भो राजन्सुभद्रं ते वाचं नोऽवहितः शृणु ॥ यः पंचवर्षस्तपसा भवान्देवमतीतृपत् ॥२३॥ त
स्याखिलजगद्धातुरावां देव~~[illegible]~~वस्य शार्ङ्गिणः ॥ पार्षदाविह संप्राप्तौ नेतुं त्वां भगवत्पदं ॥२४॥ सुदुर्जयं विष्णुपदं जितं
त्वया यत्सूरयोऽप्राप्य विचक्षते परं ॥ आतिष्ठ जगतां वंद्यं तद्विष्णोः परमं पदं ॥२६॥ एतद्विमानप्रवरमुत्तमश्लोकमौलिना ॥ उपस्थापित
मायुष्मन्नधिरोढुं त्वमर्हसि ॥२७॥ ॥ मैत्रेय उवाच ॥ ॥ निशम्य वैकुंठनियोज्यमुख्ययोर्मधुच्युतं वाचमुरुक्रमप्रियः ॥ कृ
ताभिषेकः कृतनित्यमंगलो मुनीन्प्रणम्याऽशिषमभ्यवादयत् ~~[illegible]~~ यत् ॥२८॥ परीत्याभ्यर्च्य धिष्ण्याग्र्यं पार्षदा
वभिवंद्य चाइयेष तदधिष्ठातुं बिभ्रद्रूपं हिरण्मयम् ॥२९॥ ~~X~~ ॥ तत्ते परमं आतिष्ठ तच्चंद्रदिवाकरादयो ग्रहर्क्षताराः परियंति दक्षि
× ५ णं ॥२५॥ अनास्थितं ते पितृभिरन्यैरप्यंग कर्हिचित् ~~[illegible]~~ ४ ॥ × ॥

तिष्ठ ॥२६॥ अधिरोढुं त्वमपि सशरीर एव नान्यथा प्रायमेव ॥२७॥ मधुच्युतं मधुरं वाचं ... पार्षदाग्र्यं ... यस्यां तां ... वाणीमित्य
र्थः ॥ कृतं नित्यकर्म मंगलं चालंकरणं येन अभ्यवादयत् वाचयामास ॥२८॥ तदेव रूपं हिरण्मयं बिभ्रत् सत् इयेष ऐच्छत् ॥२९॥ ॥

राम
३०

टीनो हित्वाऽऽश्रमं संमन्त्रि त्रिपिष्टपं यास्यामीत्यनुस्मरन् ॥ व्यवसितं मतिप्रायं व्यवसायोऽध्यवसायं ज्ञात्वा ॥ ३२ ॥ देवयानेन तु देवमार्गेण विमानेनेति वा ॥ मुनीन् सप्तर्षीन् पि ॥ ततः परस्ताद्यद्विष्णोः पदं तदस्य गात्रं क्व वा गुप्तिर्यस्य सः ॥ ३४ ॥ यद्भ्राजमानं मनु यस्य त्रु वा लोकाः विभ्राजंते ॥ येन नुग्रहा निर्दयाः पापाः ते यत्र नाव्रजन् न गतवंतः ॥ ३५ ॥ अच्युतप्रियाश्च बांधवा येषां ॥ ३७ ॥ अनिमिषं अनलसं ज्योतिषां चक्रं यस्मिन्नाहितं आर्पितं सद्भ्रमति ॥ मेढ्यामाहितो गंतारवे गोगणो वा मणइव ॥ ३८ ॥ आतोद्यं

तदा दुंदुभयो नेदुर्मृदंगपणवादयः । गंधर्वमुख्याः प्रजगुः पेतुः कुसुमवृष्टयः ॥ ३० ॥ स च स्वर्लोकमारोक्ष्यन् सुनीतिं जननीं ध्रुवः । अ[illegible]न्वस्मरदगं हित्वा दीनां यास्ये त्रिविष्टपं ॥ ३१ ॥ इति व्यवसितं तस्य व्यवसाय सुरोत्तमौ । दर्शयामासतुर्देवीं पुरो यानेन गच्छतीं ॥ ३२ ॥ तत्र तत्र प्रशंसद्भिः पथि वैमानिकैः सुरैः । अवकीर्यमाणो ददृशे कुसुमैः क्रमशो ग्रहान् ॥ ३३ ॥ त्रिलोकीं देवयानेन सोऽतिव्रज्य मुनीनपि । परस्ताद्यत् ध्रुवगति[illegible]र्विष्णोः पदमथाभ्यगात् ॥ ३४ ॥ यद्भ्राजमानं स्वरुचैव सर्वतो लोकास्त्रयो ह्यनु विभ्राजंत एते । यन्नाव्रजन् जंतुषु येऽननुग्रहा व्रजंति भद्राणि चरंति येऽनिशम् ॥ ३५ ॥ शांताः समदृशः शुद्धाः सर्वभूतानुरंजनाः । यांत्यंजसाऽच्युतपदमच्युतप्रियबांधवाः ॥ ३६ ॥ इत्युत्तानपदः पुत्रो ध्रुवः कृष्णपरायणः । अभूत्त्रयाणां लोकानां चूडामणिरिवामलः ॥ ३७ ॥ गंभीरवेगोऽनिमिषं ज्योतिषां चक्रमाहितं । यस्मिन् भ्रमति कौरव्य मेढ्यामिव गवां गणः ॥ ३८ ॥ महिमानं विलोक्यास्य नारदो भगवानृषिः । आतोद्यं वितुदन् श्लोकान् सत्रेऽगायत्प्रचेतसां ॥ ३९ ॥ नारद उवाच ॥ नूनं सुनीतेः पतिदेवतायास्तपःप्रभावस्य सुतस्य तां गतिं । दृष्ट्वाऽभ्युपायानपि वेदवादिनो नैवाधिगंतुं प्रभवंति किं नृपाः ॥ ४० ॥

वीणां वितुदन् वादयन् प्रचेतसां ब्रह्मसत्रे भगवन्माहात्म्यप्रसंगेन ध्रुवमहिमप्रतिपादनपरान् त्रीन् श्लोकान् गायत् ॥ ३९ ॥ नूनमिति ॥ पतिरेव देवता यस्यास्तस्याः सुतस्य यस्तपः प्रभावस्तस्य तां गतिं फलं अधिगंतुं वेदवदनशीला ब्रह्मर्षयोऽपि नैव प्रभवंति ॥ अभ्युपायान् भगवद्धर्मान् दृष्ट्वाऽपि किं पुनर्नृपाः ॥ ४० ॥

भा० ४०
३८
स्कं

तपःप्रभावं गतिं च विशिनष्टि द्वाभ्यां। गुरुदाराः पितृपत्नी सुरुचिः। तस्या वाक्यशरैर्भिन्नेन हृदयेन वनं यातः सन्नजितमपि यो जिगाय वशीकृतवान् ॥४१॥ तस्याधिरूढं तेन प्राप्तं पदं यो भुवि क्षत्रबंधुः क्षत्रियो सर्वोऽपि सः। तमनु वर्षसमूहैरपि आरोढुमिच्छेदपि किं तद्धर्मेण संकल्पोऽप्यशक्यो हरत आरोहणमित्यर्थः। कथंभूतं पदं। षट्पंचवर्षाणि यस्य सः। अल्पैरेवाहोभिः वैकुंठं प्रसाद्य तस्य पदमवापत् ॥४२॥ उद्दामं उन्नतं यशो यस्य ॥४३॥ धनादेर्निमित्तभूतोऽयं

यः पंचवर्षो गुरुदारवाक्शरैर्भिन्नेन यातो हृदयेन दूयता। वनं मदादेशकरोऽजितं प्रभुं जिगाय तद्भक्तगुणैः पराजितं ॥४१॥ यत्क्षत्रबंधुर्भुवि तस्याधिरूढमन्वारुरुक्षेदपि वर्षपूगैः। षट्पंचवर्षो यदहोभिरल्पैः प्रसाद्य वैकुंठमवाप तत्पदम् ॥४२॥ मैत्रेय उवाच ॥ एतत्तेऽभिहितं सर्वं यन्मां त्वं परिपृष्टवान्। ध्रुवस्योद्दामयशसश्चरितं संमतं सतां ॥४३॥ धन्यं यशस्यमायुष्यं पुण्यं स्वस्त्ययनं महत्। स्वर्ग्यं ध्रौव्यं सौमनस्यं प्रशस्यमघमर्षणम्। श्रुत्वैतच्छ्रद्धयाभीक्ष्णमच्युतप्रियचेष्टितं। भवेद्भक्तिर्भगवति यया स्यात्क्लेशसंक्षयः ॥४५॥ महत्त्वमिच्छतां तीर्थं श्रोतुः शीलादयो गुणाः। यत्र तेजस्तदिच्छूनां मानो यत्र मनस्विनां ॥४६॥ प्रयतः कीर्तयेत्प्रातः समवाये द्विजन्मनाम्। सायं च पुण्यश्लोकस्य ध्रुवस्य चरितं महत् ॥४७॥ पौर्णमास्यां सिनीवाल्यां द्वादश्यां श्रवणेऽथवा। दिनक्षये व्यतीपाते संक्रमेऽर्कदिनेऽपि वा ॥४८॥ श्रावयेच्छ्रद्दधानानां तीर्थपादपदाश्रयः। नेच्छंस्तत्रात्मनात्मानं संतुष्ट इति सिध्यति ॥४९॥ ज्ञानमज्ञाततत्त्वाय यो दद्यात्सत्पथेऽमृतं। कृपालोर्दीननाथस्य देवास्तस्यानुगृह्णते ॥५०॥ इदं मया तेऽभिहितं कुरूद्वह ध्रुवस्य विख्यातविशुद्धकर्मणः। हित्वार्भकः क्रीडनकानि मातुर्गृहं च विष्णुं शरणं यो जगाम ॥५१॥ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे ध्रुवाख्यायां द्वादशोऽध्यायः ॥१२॥ ॥

राम
३८

ध्रुवस्थैर्यमापकं। प्रशस्यं प्रशंसार्हं। अघमर्षणं पापनाशनं ॥४४॥ अच्युतप्रियस्य ध्रुवस्य चेष्टितं श्रुत्वा यो वैश्यस्त्वरन् ॥४५॥ तीर्थं महत्त्वावाप्तिस्थानं गुणाः यत्र भवंति ॥४६॥ समवाये सभायां ॥४७॥ नेच्छन्निष्कामः। तत्र ध्रुवचरणे आत्मनैवात्मानं प्रति संतुष्टो भवतीति हेतोः सिद्धिं प्राप्नोति किंच सत्पथे भगवन्मार्गे अमृतं तत्प्रज्ञानं यो दद्यात् ॥५०॥ ध्रुवस्य चरितं मयाभिहितं मातुर्गृहं च हित्वा ॥५१॥ चतुर्थे द्वादश ॥१२॥ ॥

तितै तस्यभक्ति

एवंपंचभिरध्यायैर्ध्रुवचर्यानुवर्णिता। अथैकादशभिरध्यायैः पृथुचारित्रमुच्यते। तत्र त्रयोदशे वंशे पृथोर्जन्म ध्रुवान्वयेऽङ्गो वेनपिताऽभूत्कोऽप्यनुगत इतीर्यते। प्ररूढो भावो र
तिर्यस्य। अन्ववाये वंशे नारदेन प्रचेतसां वर्णिताः कथाः प्रस्तुतन्महिमानमाह मन्य इति देवस्य दर्शनं येन सः हरेः परिचर्याप्रकारः क्रियायोगः पंचरात्रे येन प्रोक्तः।
॥३॥ स्वधर्मशीलैः प्रचेतोभिः। ध्रुवस्य वंशे ते जाता इति वक्तुं ध्रुवस्य वंशमनुक्रामति ॥५॥ ध्रुवस्येत्यादिना। पितुः सार्वभौमश्रियं नैच्छत्स राजा अधिरा

सूत उवाच ॥ ॥ निशम्य कौषारविणोपवर्णितं ध्रुवस्य वैकुंठपदाधिरोहणं। प्ररूढभावो भगवत्यधोक्षजे प्रष्टुं पुनस्तं विदुरः प्रचक्र
मे ॥ ॥ श्रीविदुर उवाच ॥ ॥ के ते प्रचेतसो नाम कस्यापत्यानि सुव्रत। कस्यान्ववाये प्रख्याताः कुत्र वा सत्रमासत ॥२॥ मन्ये महाभागव
तं नारदं देवदर्शनं। येन प्रोक्तः क्रियायोगः परिचर्याविधिर्हरेः ॥३॥ स्वधर्मशीलैः पुरुषैर्भगवान्यज्ञपूरुषः। पूज्यमानो भक्ति
मता नारदेनेरितः किल ॥४॥ यास्ता देवर्षिणा तत्र वर्णिता भगवत्कथाः। मह्यं शुश्रूषवे ब्रह्मन् कार्त्स्न्येनाचष्टुमर्हसि ॥५॥ मै
त्रेय उवाच ॥ ॥ ध्रुवस्य चोत्कलः पुत्रः पितरि प्रस्थिते वनं। सार्वभौमश्रियं नैच्छदधिराजासनं पितुः ॥६॥ स जन्मनोपशांतात्मा
निःसंगः समदर्शनः। ददर्श लोके विततमात्मानं लोकमात्मनि ॥७॥ आत्मानं ब्रह्मनिर्वाणं प्रत्यस्तमितविग्रहं। अवबोधरसैकात्म्य
मानंदमनुसंततं ॥८॥ अव्यवच्छिन्नयोगाग्निदग्धकर्ममलाशयः। स्वरूपमवरुंधानो नात्मनोऽन्यं तदैक्षत ॥ ॥

जासनं च। अनिच्छायां हेतुमाह ॥६॥ स इति चतुर्भिः ॥७॥ आत्मानं स्वरूपभूतं ब्रह्मावबोधानन्दात्मकं ध्रुवन्नजानन् आत्मनो नान्यं तदैक्षत। स्वयं तु सर्वस्माद
न्यः सन्। कथंभूतं ब्रह्म निर्वाणं शांतं अवबोधरसेनैकात्म्यं यस्य कथंभूतः ॥ अव्यवच्छिन्नो योगः स एवाग्निस्तेन दग्धः कर्ममलः आशयो यस्य सः ॥

मं
स्क
वीसनो १

भा॰ पु॰ ४ टी॰

जडादीनामिवाकृतिर्यस्य तथाभूतो लक्षितः अतन्मतिः न तेषामिव मतिर्यस्य सर्वज्ञत्वात् । प्रशांतार्चिः यवीयान् वत्सरो नाम तस्य यस्याग्नेस्तद्वत् स्थितः १० यवीयांसं वत्कला त्कनिष्ठं ११ इष्टा प्रिया भार्या १२ ॥ निशिथः निशीथः १४ सर्वतेजा ॥ स चक्षुः पुत्रं मनुं सुतमवाप मनोः महिषीं नड्वला विरजान् सुतान् पुरुकुत्सं

जडांधबधिरोन्मत्तमूकाकृतिरतन्मतिः । लक्षितः पथि बालानां प्रशांतार्चिरिवानलः १० मत्वा तं जडमुन्मत्तं कुलवृद्धाः समंत्रिणः । वत्सरं भूपतिं चक्रुर्यवीयांसं भ्रमेः सुतं ११ स्ववीथिर्वत्सरस्येष्टा भार्यासूत षडात्मजान् । पुष्पार्णं तिग्मकेतुं च इषमूर्जं वसुं जयं १२ ॥ पुष्पार्णस्य प्रभा भार्या दोषा च द्वे बभूवतुः । प्रातर्मध्यंदिनं सायं इति ह्यासन् प्रभासुताः १३ प्रदोषो निशिथो व्युष्ट इति दोषासुतास्त्रयः । व्युष्टः सुतं पुष्करिण्यां सर्वतेजसमादधे ॥ १४ ॥ स चक्षुः सुतमाकूत्यां पत्न्यां मनुमवाप ह । मनोरसूत महिषी विरजान्नड्वला सुतान् १५ ॥ पुरुं कुत्सं त्रितं द्युम्नं सत्यवंतमृतं व्रतं । अग्निष्टोममतीरात्रं प्रद्युम्नं शिबिमुल्मुकं १६ उल्मुकोऽजनयत्पुत्रान् पुष्करिण्यां षडुत्तमान् । अंगं सुमनसं ख्यातिं क्रतुमंगिरसं गयं १७ ॥ सुनीथांगस्य या पत्नी सुषुवे वेनमुल्बणं । यद्दौःशील्यात्स राजर्षिर्निर्विण्णो निरगात्पुरात् १८ यमंग शेपुः कुपिता वाग्वज्रा मुनयः किल । गतासोस्तस्य भूयस्ते ममंथुर्दक्षिणं करं १९ अराजके तदा लोके दस्युभिः पीडिताः प्रजाः । जातो नारायणांशेन पृथुराद्यः क्षितीश्वरः २० ॥ विदुर उवाच ॥ तस्य शीलनिधेः साधोर्ब्रह्मण्यस्य महात्मनः । राज्ञः कथमभूद्दुष्टा प्रजा यद्विमना ययौ २१ ॥ किं वांहो वेन उद्दिश्य ब्रह्मदंडमयूयुजन् । दंडव्रतधरे राज्ञि मुनयो धर्मकोविदाः ॥ २२ ॥ नावध्येयः प्रजापालः प्रजाभिरघवानपि । यदसौ लोकपालानां बिभर्त्योजः स्वतेजसा ॥ २३ ॥ ॥

नड्वलादश सुतान् असूत १५ अंगविदुषा वागेव वज्रं येषां मथने हेतुः १९ अराजक इति आद्यः अनयामादीनां तेन रचितत्वात् २० यद्यस्याः प्रजाया हेतोर्विमनाः सन्ययौ २१ किं च अंहः अपराधं वेन उद्दिश्य आलक्ष्य । यतोऽयं धर्म इत्याह २२ नावध्येयः अवज्ञेयो भवति २३

नी

राम

३९

परावरविदां मध्ये अतिश्रेष्ठः ॐ लावी पुत्रः काम्यकर्मणा वलादापादितो न सुखाय लवेदितिधी तत्रांगस्य पुत्रोत्पत्तिक्रममाह ॥ २४ ॥ अंग इत्यार
दिना ॥ २६ ॥ अयातयामा निअगतवीर्याणि ॥ २७ ॥ यद्देगृहीत मोनोऽपि वाचं व्यसृजत् प्रायुंक्त ॥ २९ ॥ आहूता आहूताः ग्रहान् सोमपात्रा
णि ॥ ३० ॥ इह यज्ञे न गृह्णंति । इह जन्मनि तावन्मनाक् ईषदपि अघं न स्थितं कथं विज्ञातं स्यादघस्य सद्य एव प्रायश्चित्तैः क्षालनात् किंतु प्रा

पव४

एतदाख्याहि मे ब्रह्मन् सुनीथात्मजचेष्टितं । श्रद्दधानाय भक्ताय त्वं परावरवित्तमः ॥ २४ ॥ मैत्रेय उवाच ॥ ॥ अंगोऽश्वमेधं
राजर्षिराजहार महाक्रतुं । नाजग्मुर्देवतास्तस्मिन् आहूता ब्रह्मवादिभिः ॥ २५ ॥ तमूचुर्विस्मितास्तत्र यजमानमथर्त्वि
जः । हवींषि हूयमानानि न ते गृह्णंति देवताः ॥ २६ ॥ राजन् हवींष्यदुष्टानि श्रद्धयासादितानि ते । छंदांस्ययातयामानि यो
जितानि धृतव्रतैः ॥ २७ ॥ न विदामेह देवानां हेलनं वयमण्वपि । यन्न गृह्णंति भागान् स्वान् ये देवाः कर्मसाक्षिणः ॥ २८ ॥ मैत्रेय उ
वाच ॥ ॥ अंगो द्विजवचः श्रुत्वा यजमानः सुदुर्मनाः । तत्प्रष्टुं व्यसृजद्वाचं सदस्यांस्तदनुज्ञया ॥ २९ ॥ नागच्छंत्याहुता देवा न गृ
ह्णंति ग्रहानिह । सदसस्पतयो ब्रूत किमवद्यं मया कृतं ॥ सदसस्पतय ऊचुः ॥ ॥ नरदेवेह भवतो नाघं तावन्मनाक् स्थित
म् । अस्त्येकं प्राक्तनमघं यदिहेदृक् त्वमप्रजः ॥ ३१ ॥ तथा साधय भद्रं ते आत्मानं सुप्रजं नृप । इष्टस्ते पुत्रकामस्य पुत्रं दा
स्यति यज्ञभुक् ॥ ३२ ॥ तथा स्वभागधेयानि ग्रहीष्यंति दिवौकसः । यद्यज्ञपुरुषः साक्षादपत्याय हरिर्वृतः ॥ ३३ ॥ ॥

क्तनमेकमघमस्ति यद्यस्मात् ईदृक् गुणाधिकोऽपि त्वं प्रजारहितः ॥ ३१ ॥ अतो यथा देवा हविर्गृह्णंति तथाऽऽत्मानं सुप्रजं साधय कथं
साधनीयं तदाहुः ॥ ३२ ॥ तथा सति स्वभागान् ग्रहीष्यंति पद्यतो हरिः साक्षात् वृतः स्यात् । अतस्तेन सह सर्वे देवा आगमिष्यंतीत्यर्थः ॥ ३३ ॥

स

म

ता॰च॰
४०

नच तितुष्ठान्नकामानूहरिः कथं दधातत्राह्णातां स्नानिति ॥ ३४ ॥ प्रज्ञानयेषु जोत्पन्नयेशिपिविष्टायपशुषु यज्ञपेण प्रविष्टायानथा वश्रुतिः। यज्ञो वैविष्णुः पशवः शिपिर्यज्ञ एव पशुषु प्रतितिष्ठतीति ॥ ३५ ॥ तस्मादितियोग्पतयाग्रेः। पत्नै प्रादात ॥ ३७ ॥ पुमांसं स तेनेतितथातत्राशपत्फः स काशान्। गर्भमादधे अप्रजा सती ॥ ३८ ॥ माता महं मृत्फो मृत्योर्हि पुत्री सुनीथा ॥ ३९ ॥ मृगयुर्लुब्धकासत्तातं दृष्टावेनोऽ सावागच्छतीति जनः स

तां स्नान्नकामान्नहरिर्दध्यावयान्नयान्नकामयतेजनः। आराधितोयथैवैषतथा पुंसां फलोदयः ॥ ३४ ॥ इति व्यवसितो विप्रास्तस्य यज्ञः प्रजानयो रोडाशं निरवपन्नशिपिविष्टाय विष्णवे ॥ ३५ ॥ तस्मात्तु उषउ न स्थो हेममाल्यमलाम्बरः। हिरण्मयेन पात्रेण सिद्धमादाय पायसम् ॥ ३६ ॥ स विप्रान्तु मतो राज्ञा गृहीत्वांऽञ्जलिनौदनं। अवघ्राय मुदायुक्तः प्रादात्पत्न्याउदारधीः ॥ ३७ ॥ सा तत्पुंसवनं राज्ञी प्राश्यवै पत्फ्राद्धे। गर्भं काल उपावृत्ते कुमारं सुषुवे ऽप्रजा ॥ ३८ ॥ स बाल एव पुरुषो मातामहमनुव्रतः। अधर्मांशोद्भवं मृत्युं तेनाभवदधार्मिकः ॥ ३९ ॥ स शरासनमुद्यम्य मृगयुर्वनगोचरः। हंत्यसाधुर्मृगान्दीनान्वेनोऽसावित्यरौज्जनः ॥ ४० ॥ आक्रीडे क्रीडतो बालान्वयस्यानतिदारुणः। प्रसह्य निरनुक्रोशः पशुमारममारयत् ॥ ४१ ॥ तं विचक्ष्य खलं पुत्रं शासनैर्विविधैर्नृपः। यदा न शासितुं कल्पो भृशमासीत्सुदुर्मना ॥ ४२ ॥ प्रायेणाऽभ्यार्चितो देवो ये ऽप्रजा गृहमेधिनः। कदपत्यभृतं दुःखं ये न विंदंति दुर्भरं ॥ ४३ ॥ यतः पापीयसी कीर्तिरधर्मश्च महान्नृणां। यतो [illegible] विरोधः सर्वेषां यतो [illegible] आधिरनंतकः ॥ ४४ ॥ कस्तं प्रजापदेशं वै मोहबंधनमात्मनः। पंडितो बहु मन्येत यदर्थाः क्लेशदा गृहाः ॥ ४५ ॥ ॥

वेनोऽभूत्सौ निरनुक्रोशः ॥ ४१ ॥ आक्रीडे क्रीडास्थाने बालान्पशूनिवामारयत् ॥ ४१ ॥ विचक्ष्य दृष्ट्वा। दुर्मनसस्तस्य कुपुत्रनिंदावाक्यान्याह ॥ ४२ ॥ प्रायेणेति त्रिभिः। अप्रजा ये नैरस्यार्चितः। तत्र हेतुः। कुत्सितैरपत्यैः संभृतं धारयितुमशक्यं दुःखं न विंदंति ॥ ४३ ॥ सर्वेषां स [illegible] आधि मानसी व्यथा ॥ तिप्रजापदेशं पुत्रनाम मम अन्नमपि आत्मनो मोहैर्नवं बंधनं। यदर्थाः यन्निमित्ताः क्लेशदा गृहाः सवंति ॥ ४५ ॥ ॥ ॥

५ नौ ४

वा

राम
४०
स

॥४४॥

दुर्गे

इदानीं निर्वेदहेतुत्वेन कुत्सितमेवापत्यमभिनंदति। कदपत्यमिति। शुचां पदात् शोकानां स्थानात् स्वरत्वे हेतुः। निर्विद्येतेति। तत्कुतः। यतो कदपत्या गृहाः क्लेशनिवहाः स्युरिति ॥४६॥ महतामुदयानां विभूतीनामुदयो यस्मिंस्तस्माद् गृहात् ॥४७॥ यावेनं सुतं प्रसुप्तां प्रजाः पुरोहितादयश्च विचिक्युः अन्वेषितवंतः। तं तु तत्रैव संतमपि नापश्यन्निति दृष्टांतेनाह। यथेति ॥४८॥ साश्रवः रुदंतः। भर्तृविप्लवं नाशं अदर्शनमित्यर्थः ॥ ॥इति चतुर्थे त्रयो

सुवं प्र

कदपत्यं वरं मन्ये सदपत्याच्छुचां पदात्। निर्विद्येत गृहान्मर्त्यो यत्क्लेशनिवहा गृहाः ॥४६॥ एवं स निर्विण्णमना नृपो गृहा न्निशीथ उत्थाय महोदयोदयात्। अलब्धनिद्रोऽनुपलक्षितो नृभिर्हित्वा गतो वेनसुवं प्रसुप्ताम् ॥४७॥ विज्ञाय निर्विद्य गतं पतिं प्रजाः पुरोहितामात्यसुहृद्गणादयः। विचिक्युरुर्व्यामतिशोककातरा यथा निगूढं पुरुषं कुयोगिनः ॥४८॥ अलक्षयंतः पदवीं प्रजापतेर्हतोद्यमाः प्रत्युपसृत्य ते पुरीम्। ऋषीन्समेतानभिवंद्य साश्रवो न्यवेदयन्पौरव भर्तृविप्लवम् ॥४९॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे त्रयोदशोऽध्यायः ॥ ॥ मैत्रेय उवाच ॥ भृग्वादयस्ते मुनयो लोकानां क्षेमदर्शिनः। गोप्तर्यसति वै नॄणां पश्यंतः पशुसाम्यताम् ॥१॥ वीरमातरमाहूय सुनीथां ब्रह्मवादिनः। प्रकृत्यसंमतं वेनमभ्यषिंचन्पतिं भुवः ॥२॥ श्रुत्वा नृपासनगतं वेनमत्युग्रशासनम्। निलिल्युर्दस्यवः सद्यः सर्पत्रस्ता इवाखवः ॥३॥ स आरूढनृपस्थान उन्नद्धोऽष्टविभूतिभिः। अवमेने महाभागान्स्तब्धः संभावितः [illegible] ॥

दशः ॥ ॥चतुर्दशे तु दुष्पुत्रत्यागे गते द्विजैः। अतिषिक्तस्य वेनस्य रोषान्निर्विधिवध्यते ॥ क्षेमदर्शिनः क्षेमचिंतकाः पशुसमानत्वं पश्यंतः ॥१॥ अमात्यादीनां प्रकृतीनामसंमतमपि। पाठांतरे प्रकृत्या स्वभावेनासंमतं ॥२॥ चोराणां नाव भुवः ॥३॥ आरूढं स्थानं राजासनं येन। अष्टविभूतिभिः लोकपालैश्वर्यैः ॥४॥

स्वलं: ॥ ॥एवं मदांध उत्सिक्तो निरंकुश इव द्विपः ॥ पर्यटन् रथमास्थाय कंपयन्निव रोदसी ॥५॥ न यष्टव्यं न दातव्यं न होतव्यं द्विजाः क्वचित्। इति न्यवारयद्धर्मं भेरीघोषेण सर्वतः ॥६॥

ग

स्वलं:

रा॰च॰
४१

सत्रिणः मिलिताः संतः ७ मूलतस्त्वाग्रतश्च दीप्ते प्रज्वलिते काष्ठे तन्मध्यवर्त्तिनां पिपीलिकादीनां यथाऽत्ययनो व्यसनं एवं तस्करेभ्यः पालकाद्बडुः
खं प्राप्तमित्यर्थः ॥ तदेवाहुः ॥ अराजकस्यादिति अतदर्हः राज्यानर्हः ॥ अस्माकमप्यनिष्टं जातमित्याहुः अहेर्यथा पयः पोषः क्षीरेण पोषणं पालक

ल २

अहोऽत्ययतः प्राप्तं लोकस्य व्यसनं महत् । अस्माकमफलयनो दीप्तेऽद्भिव तरूरूपालयोः ॥ ८ ॥ अराजकस्यादेषकतोरआत्तद्
र्हणः ॥ तस्यवाऽस्य सर्वतः ॥ वेणास्यावेद्य मुनयो दुर्लं तस्य विचेष्टितं ॥ विमृश्य लोकव्यसनं कश्यपोऽवुः स्म स
त्रिणः ॥ ७ ॥ अहोऽत्ययतः प्राप्तं लोकस्य व्यसनं महत् । दारुण्यफलयनो दीप्तेऽद्भिव तरूरूपालयोः ॥ ८ ॥ अराजकस्यादेषकतोरा
जा तदर्हणः । ततोऽप्यासीद्भयं त्वद्य कथं स्यात्स्वस्ति देहिनाम् ॥ ९ ॥ अहेरिव पयः पोषैकस्याप्यनर्थभृत् । वेनः प्रकृत्यैव खलः सु
नीथागर्भसंभवः ॥ १० ॥ निरूपितः प्रजापालः स जिघांसति वै प्रजाः । तथाऽपि सांत्वयेमामुं नास्मांस्तत्पातकं स्पृशेत् ॥ ११ ॥ तद्वि
द्विद्भिरसद्वृत्तो वेनोऽस्माभिः कृतो नृपः । सांत्वितो यदि नो वाचं न ग्रहीष्यत्यधर्मकृत् ॥ १२ ॥ लोकधिक्कारसंदग्धं दहिष्यामः स्व
तेजसा । एवमध्यवसायेनं मुनयो गूढमन्यवः ॥ १३ ॥ उपव्रज्याब्रुवन्वेनं सांत्वयित्वा च सामभिः ॥ ॥ मुनय ऊचुः ॥ ॥ नृपवर्य नि
बोधैतद्यत्ते विज्ञापयाम भोः । आयुःश्रीबलकीर्तीनां तव तात विवर्द्धनं ॥ १४ ॥ धर्म आचरितः पुंसां वाङ्मनःकायबुद्धिभिः । लो
कान्विशोकान्वितरत्यथानन्त्यमसंगिनाम् ॥ १५ ॥ स ते मा विनशेद्वीर प्रजानां क्षेमलक्षणः । यस्मिन्विनष्टे नृपतिरैश्वर्यादवरोहति ॥ ॥

पाल

की

राम
४१

स्यादनर्थं वितरति पुष्णाति तदेवाहुः वेनइति १० निरूपितः नियुक्तोऽस्माभिः सांत्वयेम उपपत्तिभिः प्रार्थयिष्यामः तस्य पातकं । स्वस्य तन्त्रा
नकस्पर्शहेतुः ११ तत्पातकं विद्वद्भिः १२ गूढमन्युर्येषां १३ सामभिः प्रियोक्तिभिः १४ निष्कामानां आनंत्यं मोक्षमपि १५ मा विनशेत् मा वि
नश्यतु ॥ १५ ॥ १६ ॥

असाधवो ये अमात्यास्तेभ्यः यथा यथाशास्त्रं ॥१७॥ सर्वान् लोकान् अतत्पालान् अमरान् अतत्रापकान्यज्ञांश्च संगृह्णाति नियच्छतीति तथा तं विचित्रैः इज्यायज्ञ
दिभिः नवायसमृद्धये देशाः तद्वासिनो जना राष्ट्रं तदुभये दुग्धवर्त्तितं ॥२१॥ युष्मद्विषये तव देशो हरेः कलांशाः सुराः तेषां सुराणां हेलनमवज्ञा ॥२२॥ वा

हविकुं

राजन्नसाध्वमात्येभ्यश्चोरादिभ्यः प्रजा नृपः। रक्षन्यथा बलिं गृह्णन्निह प्रेत्य च मोदते ॥ यस्य राष्ट्रे पुरे चैव भगवान्यज्ञपूरुषः। पूज्य
ते स्वेन धर्मेण जनैर्वर्णाश्रमात्मकैः ॥१८॥ तस्य राज्ञो महाभाग भगवान्भूतभावनः। परितुष्यति विश्वात्मा तिष्ठतो निजशासने
१९॥ तस्मिंस्तुष्टे किमप्राप्यं जगतामीश्वरेश्वरे। लोकाः सपालाः ह्येतस्मै हरंति बलिमादृताः ॥२०॥ तं सर्वलोकामरयज्ञसंग्र
हं त्रयीमयं द्रव्यमयं यज्ञैर्विचित्रैर्यजतो भवाय ते राजन्स्वदेशाननुरोद्धुमर्हसि ॥२१॥ यज्ञेन युष्मद्विषये द्विजातिभिर्वितायमाने
न सुराः कला हरेः। स्विष्टाः सुतुष्टाः प्रदिशंति वांछितं तद्धेलनं नार्हसि वीर चेष्टितुं ॥२२॥ वेन उवाच ॥ बालिशा बत यूयं
वै अधर्मे धर्ममानिनः। ये वृत्तिदं पतिं हित्वा जारं पतिमुपासते ॥२३॥ अवजानंत्यमी मूढा नृपरूपिणमीश्वरं। नानुविंदंति ते
भद्रमिह लोके परत्र वा ॥२४॥ को यज्ञपुरुषो नाम यत्र वो भक्तिरीदृशी। भर्तृस्नेहविदूराणां यथा जारे कुयोषितां ॥२५॥ विष्णु
र्विरिंचो गिरिश इंद्रो वायुर्यमो रविः। पर्जन्यो धनदः सोमः क्षितिरग्निरपांपतिः ॥२६॥ एते चान्ये च विबुधाः प्रभवो वरशापयोः।
देहे भवंति नृपतेः सर्वदेवमयो नृपः ॥२७॥ तस्मान्मां कर्मभिर्विप्रा यजध्वं गतमत्सराः। बलिं च मह्यं हरत मत्तोऽन्यः को ग्रभुक् पुमान्
२८॥ मैत्रेय उवाच ॥ इत्थं विपर्ययमतिः पापीयानुत्पथं गतः। अनुनीयमानस्तद्याच्ञां न चक्रे भ्रष्टमंगलः ॥२९॥ ॥

लिशा अज्ञाः वृत्तिदं अन्नादिप्रदं मां हित्वा ॥२३॥ भर्तृस्नेहो विदूरे येषां ॥२५॥ देहे भवंति नृपतेः अतो नृपतिरेवेश्वरः इतरे तदंशा इति भावः। बलिं च
करादिकं। अग्रभुक् अराध्यः ॥२९॥ ॥

य

श्री

तेनासत्कृताः स्म्रार्यां याश्चार्यां ॥ २१ ॥ परिवृद्धीतविनिंदितं । अस्मलं वेनं विनाकृत घ्नतामाकुर्गं यदनुग्रहविषयः सन्नीदृशमैश्वर्यं प्राप्तः ॥ २२ ॥ पूर्वं
रुदमन्यवः इदानीं रूढमन्यवः । हुंकृतैः हुंकारैः ॥ २३ ॥ आश्रमपदं प्रति ऋषिभिर्गते रागमन्ने कृते । विद्यायोगेन मंत्रसहितयाक्षुन्नया ॥ २४ ॥ पुत्र
व आर्षः सरस्वत्याः सलिले आप्लुता इत्यर्थः ॥ २५ ॥ महोत्पातान् ... दस्युभ्यो न भवेद्भुव इत्याहुश्च ॥ २६ ॥ एवं मृशंत आर्यः हि

इतिते सत्कृतास्तेन हि द्विजाः पंडितमानिना । भग्नायां भव्ययाच्ञायां तस्मै विदुर चुक्रुधुः ॥ २९ ॥ हन्यतां हन्यतामेष पापः प्र
कृतिदारुणः । जीवन् जगदसावाशु कुरुते भस्मसात् ध्रुवं ॥ ३० ॥ नायमर्हत्यसद्वृत्तो नरदेववरासनं । योधियज्ञप
तिं विष्णुं विनिंदत्यनपत्रपः ॥ ३१ ॥ कोवेनं परिचक्षीत वेनमेकमृते शुभं । प्राप्त ईदृशमैश्वर्यं यदनुग्रहभाजनः
॥ ३२ ॥ इत्थं व्यवसिता हंतुमृषयो रूढमन्यवः । निजघ्नुर्हुंकृतैर्वेनं हतमच्युतनिंदया ॥ ३३ ॥ ऋषिभिः स्वाश्रमपदं
गते पुत्रकलेवरं । सुनीथा पालयामास विद्यायोगेन शोचती ॥ ३४ ॥ एकदा मुनयस्ते तु सरस्वत्सलिलाप्लुताः । हुत्वाग्नीन्सत्कथाः
चक्रुरुपविष्टाः सरित्तटे ॥ ३५ ॥ वीक्ष्योत्थितान्महोत्पातानाहुर्लोकभयंकरान् । अप्यभद्रमनाथाया दस्युभ्यो न भवेद्भुवः
॥ ३६ ॥ एवं मृशंत ऋषयो धावतां सर्वतो दिशं । पांसुः समुत्थितो भूरिश्चोराणामभिलुंपतां ॥ ३७ ॥ तदुपद्रवमाज्ञाय लोकस्य
वसु लुंपतां । भर्तर्युपरते तस्मिन्नन्योन्यं च जिघांसतां ॥ ३८ ॥ चोरप्रायं जनपदं हीनसत्त्वमराजकं । लोकान्नावारयन् छ
क्ता अपि तद्दोषदर्शिनः ॥ ॥

ताः । तदा धावतां चोराणां भूरिः पांसुः समुत्थितः ॥ ३७ ॥ तदा तेषां लोकस्य धनं लुंपतां जिघांसतां चोपद्रवमाज्ञाय ॥ ३८ ॥ तथा चोरप्राय
मराजकं हीनसत्त्वं च जनपदमाज्ञाय शक्ता अपि वारणे दोषदर्शिनोऽपि जना लुंपतो लोकान्नावारयन्नित्यन्वयः ॥ ॥

श्री

ग

शङ्कानां क्षत्रियाणाम वारणे दोष इति किं वक्तव्यं समदृगपि ब्राह्मणोऽपि यद्दीनानां समुपेक्षको भवेत् तदा हि तस्यापि ब्रह्मतपः स्रवति। अतः उपेक्षा दोषपरिहाराय नानां घोत्यादि चिनिश्चित्य महीपते तूर्णं स तरसा मममंथुरित्यब्रवीत्॥ संस्थानं तु नाशं तु पू। यद्वा क्षत्रियएव लुंपतो लोकान् आवारयन् कृतार्थभूता। हुंकारैरेव वैनं निवारयेत् शङ्का अपि तत्कि। तस्मिन्निवारणे तन्मरणादि दोषदर्शिनः। न बोदासत वीरेयं तुं तं दीनोपेक्षायां तपो हानिप्रसंगात्। नचोच्यं तन्निवारकं राजानं मन्त्रं कुर्वन् अंगवंशोच्छेदस्यानर्हत्वात्। अतो वेन स्पेव देहं ममंथुरिति येज्येवा हुक्कोवामनः तमेवाह॥ ४२ काकइव कृष्णः महत्यौहन्नूकपोलप्रांतो यस्या। ह्रस्वौ पादौ यस्य

ब्राह्मणः समदृक् शीतोदीनानां ह्युपेक्षकः स्रवतेब्रह्म तस्यापि भिन्नभांडात्पयो यथा॥ ४०॥ नांगस्य वंशो राजर्षेरेष संस्थातुमर्हति। अमोघवीर्यहि नृपा वंशेऽस्मिन्केशवाश्रयाः॥ ४१॥ विनिश्चित्यैवमृषयो विपन्नस्य महीपतेः। ममंथुरूरुं तरसा तत्रासीद्बाहुको नरः॥ ४२॥ काककृष्णोऽतिह्रस्वांगो ह्रस्वबाहुर्महाहनुः॥ ह्रस्वपान्निम्ननासाग्रो रक्ताक्षस्ताम्रमूर्द्धजः॥ ४३॥ तं तु तेवनतं दीनं किं करोमीति वादिनं। निषीदेत्यब्रुवन् तात स निषादस्ततोऽभवत्॥ ४४॥ तस्य वंश्यास्तु नैषादा गिरिकाननगोचराः। येनाहरज्जायमानो वेनकल्मषमुल्बणं॥ ४५॥ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे पृथुचरिते नैषादोत्पत्तिर्नाम चतुर्दशोऽध्यायः॥ ॥ मैत्रेय उवाच॥ ॥ अथ तस्य पुनर्विप्रैरपुत्रस्य महीपतेः। बाहुभ्यां मथ्यमानाभ्यां मिथुनं समपद्यत॥ १॥ तद्दृष्ट्वा मिथुनं जातमृषयो ब्रह्मवादिनः। ऊचुः परमसंतुष्टा विदित्वा भगवत्कलां॥ २॥

स्य॥ ४५॥ गिरिकाननं वनगोचरः। अयोनमनुष्यादिप्रवेशो येषां ते तत्र हेतुः येन कारणेनासावहरत् ततस्तस्य वंश्यास्तथाभूताः॥ ॥ चतुर्थे चतुर्दशः॥ ॥ ततः पंचदशे विप्रैर्मंथनाद्वेनबाहुतः। जातस्य पृथोर्लक्ष्मलिप्तेकार्हणादिकं॥ ॥ राम॥ श्रीकृष्णाय नमः॥ ॥ ॥ ॥

नं १ पो

नवन

न्यं

पा

ला॰च॰
४२

च्र१

किमुतुरित्यतआह। एषइति चतुर्भिः। लक्ष्म्याः संस्तुतिः कला। ३ अयंयः शुमानू सतु महाराजो भविष्यति। ४ सुदती शोभनं दंतवती। गुणानांभू
षणानांच भूषणाभूषणरूपा। अवतंसधत्ती सर्दत्वेन न भजंती भविष्यति। ५ अत्र हेतुः एषइति। लोकस्य रिरक्षया रिरक्षयिषया। ६ म्रक्षिचैत्र

अषयकतुः ॥ एषविष्णोर्भगवतः कला भुवनपालिनी। इयंच लक्ष्म्याः संस्तुतिः पुत्रुषस्या ऽनपायिनी। ३ अयंतु प्रथमोराज्ञां
पुमानूप्रथयिता यशः। पृथुर्नाम महाराजो भविष्यति पृथुश्रवाः। ४ इयंच देवी सुदती गुणभूषणभूषणा। अर्चिर्नाम वरारोहा पृ
थुमेवावरुंधती। ५ एषसाक्षाद्धरेरंशो जातो लोकरिरक्षया। इयंच तत्परा हि श्रीरनुजज्ञे ऽनपायिनी। ६ प्रशंसंति स्म तं विप्रा गं
धर्वप्रवराजगुः। मुमुचुः सुमनोधाराः सिद्धा नृत्यंति स्वस्त्रियः। ७ शंखतूर्यमृदंगाद्या नेदुर्दुंदुभयो दिवि। तत्र सर्व उपाजग्मुर्देव
र्षिपितृणां गणाः। ८ ब्रह्मा जगद्गुरुर्देवैः सहासृत्य सुरेश्वरैः। वैन्यस्य दक्षिणे हस्ते दृष्ट्वा चिह्नं गदाभृतः। ९ पादयोररविंदं
चतं वै मेने हरेः कलां। यस्याप्रतिहतं चक्रं अंशः स परमेष्ठिनः। १० तस्याभिषेक आरब्धो ब्राह्मणैर्ब्रह्मवादिभिः। अभिषेचनि
कान्यस्मै आजह्रुः सर्वतो जनाः। ११ सरित्समुद्रा गिरयो नागा गावः खगा मृगाः। द्यौः क्षितिः सर्वभूतानि समाजह्रुरुपायनं॥
१२ सोभिषिक्तो महाराजः सुवासाः साध्वलंकृतः। पत्न्यार्चिषा ऽलंकृतया विरेजे ऽग्निरिवापरः। तस्मै जहार धनदो हैमं वीरव
रासनं। वरुणः सलिलस्रावमातपत्रं शशिप्रभं। १४ वायुश्च वालव्यजने धर्मः कीर्तिमयीं स्रजं। इंद्रः किरीटमुत्कृष्टं दंडं
संयमनं यमः। १५॥ ॥

म्र॰ सोन्वर्त्यंतिस्म ८ देवैः सहासृत्य आगत्य। वैन्यस्य पृथोः चिह्नं रेखात्मकं चक्रं ९ अप्रतिहतं रेखांतरैरविच्छिन्नं यस्य चिह्नं स परमेष्ठिनः। रस्यांशः। १० अ
भिषेचनिकानि अभिषेकसाधनानि १३ हे वीर वरमासनं। सलिलस्य स्रावो यस्मात्। १४ द्वेवालव्यजने। १५॥ ॥श्रीराम॥ ॥

ज
ध
वे४

त्म

स्त्रा
४२

ब्रह्ममयं ब्रह्मकवचं तत्पत्नी श्रीः श्रियं संपदम् ॥ १६ ॥ दशचंद्राकाराणि बिंबानि कोशे यस्य तं असिं खड्गं । शतचंद्रं चर्म्म । रूपाश्रयं अतिसुंदरं ॥ १७ ॥ अज
स्य गोः छागस्यांगानि निर्मितं चापं । योगमय्यौ पादस्पर्शमात्रेण लीलया देशप्रापिके ॥ १८ ॥ नाट्यादिकौशलं स्वविद्या आत्मानं स्वं प्रलयं ॥ १९ ॥ तं स्तोतुमुपस्थितः
॥ २० ॥ स्तावकान् स्तोतुमुद्यतान् अलिकत्वं ज्ञात्वा ॥ २१ ॥ लोके स्पष्टगुणस्य सतो मे कीर्तिः स्यात् अधुना हि किमाश्रयो मे स्तवो योज्यताम् । अतो वो
गिरो धुना मयि वितथा मा भूवन् । यद्वा लोके अधुनाऽस्पष्टगुणस्य मे किमाश्रयः स्तवः स्यात् । अतएव क्रियमाणः स्तवः स्यात् । अतो

ब्रह्मा ब्रह्ममयं वर्म भारती हारमुत्तमं । हरिः सुदर्शनं चक्रं तत्पत्न्यव्याहतां श्रियं ॥ १६ ॥ दशचंद्रमसिं रुद्रः शतचंद्रं तथांबिका ।
सोमोऽमृतमयानश्वान् त्वष्टा रूपाश्रयं रथं ॥ १७ ॥ अग्निराजगवं चापं सूर्यो रश्मिमयानिषून् । भूः पादुके योगमय्यौ द्यौः पु
ष्पावलिमन्वहं ॥ १८ ॥ नाट्यं सुगीतं वादित्रमंतर्द्धानं च खेचराः । ऋषयश्चाशिषः सत्याः समुद्रः शंखमात्मजं ॥ १९ ॥ सिं
धवः पर्वता नद्यो रथवीथीर्महात्मनः । सूतोऽथ मागधो वंदी तं स्तोतुमुपतस्थिरे ॥ २० ॥ स्तावकांस्तानभिप्रेत्य पृथुर्वैन्यः प्रतापवान् ।
मेघनिर्ह्रादया वाचा प्रहसन्निदमब्रवीत् ॥ २१ ॥ पृथुरुवाच ॥ भोः सूत हे मागध सौम्य वंदिन् लोकेऽधुनास्पष्टगुणस्य मे
स्यात् । किमाश्रयो मे स्तव एष योज्यतां मा मय्यभूवन्वितथा गिरो वः ॥ २२ ॥ तस्मात्परोक्षेऽस्मदुपश्रुतान्यलं करिष्यथ
स्तोत्रमपीच्यवाचः । सत्युत्तमश्लोकगुणानुवादे जुगुप्सितं न स्तवयंति सभ्याः ॥ २२ ॥

मृदन्यस्य योज्यतां न तु मे वितथा निमानाय भवेरित्यर्थः ॥ २२ ॥ तस्मात्परोक्षे कालांतरे स्पष्टेषु गुणेषु सत्सु अस्माकमुपश्रुतानि यशांसि प्रति
स्तोत्रं मूलमत्यर्थं करिष्यथ हे अपीच्यवाचः मधुरगिरः भोः सत्ये प्रेरिता वयं त्वामेव स्तुम इति चेत् । तत्राह । उत्तमश्लोकस्य गुणानुवादे
कार्ये सति जुगुप्सितमर्वाचीनं न स्तावयंति ॥ २३ ॥ श्रीराम ॥ ॥

भा॰च॰
४४

ननुसंस्ताविते रेवगुणै रात्मानंजनस्तावयतीतिचेत् ॥ तत्राह महत इति गुणानात्मनि संपादयितुं शक्तोऽपि सतो गुणाननु संलापनालापमात्रेण कः स्ताव
येत्। यद्वा आदावेव सतोऽपि कः स्तावयते भूत एवं च स्व्यातिसिद्धेः। अन्यस्तु मिथ्यागुणस्तुतिश्लाघी मंद इत्याह। त इति। यद्यपि शास्त्रालापादिकम
करिष्यत् तर्ह्यस्य ते विद्यादयो गुणा अभविष्यन्निति क्रियातिपत्त्या विप्रलब्धो जनानामवहासं वेदाकिंच ॥ २४ ॥ प्रभवोपि विश्रुता अपि ह्रीमंतो जुगु
प्संति। वेति दृष्टांतः। यथाऽतिस्तुत्या क्रियमाणं पौरुषं विगर्हितं ब्राह्मणवधादि पौरुषं निंदंति। तथा उचितामतिस्तुतिं न सहंत इत्यर्थः ॥ २५ ॥ वरीमभि

महद्गुणानात्मनि कर्तुमीशः कः स्तावकैः स्तावयतेऽसतोऽपि। तेस्याभविष्यन्निति विप्रलब्धो जनावहासं कुमतिर्न वेद ॥ २४ ॥ प्रभवो ह्या
त्मनः स्तोत्रं जुगुप्संत्यपि विश्रुताः। ह्रीमंतः परमोदाराः पौरुषं वा विगर्हितं ॥ २५ ॥ वयं त्वविदिता लोके सूताद्यापि वरीमभिः। क
र्मभिः कथमात्मानं गापयिष्याम बालवत् ॥ २६ ॥ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे पृथुचरित्रे पंचदशोऽध्यायः ॥
॥ ॥ मैत्रेय उवाच ॥ ॥ इति ब्रुवाणं नृपतिं गायका मुनिचोदिताः। तुष्टुवुस्तुष्टमनसस्तद्वागमृतसेवया ॥ १ ॥ नालं वयं ते महिमानु
वर्णने यो देववर्योऽवततार मायया। वेनांगजातस्य च पौरुषाणि ते वाचस्पतीनामपि बभ्रमुर्धियः ॥ २ ॥

रिति दीर्घमाघोलवितप्रधानश्चायं निर्देशः। वरिष्ठैः कर्मभिरविदिता इत्यर्थः ॥ २६ ॥ ॥ चतुर्थे पंचदशः ॥ ॥ षोडशे सर्वलोकेशैः सस्तुतं
तार्थयाचितो। मुनिप्रयुक्ताः सूताद्याः स्तुवंति स्मेति वर्ण्यते। गायकाः सूतादयः ॥ १ ॥ नालं समर्थाः। यो भवान्। अवतारे ब्रह्मयस्याधिकं
माकृः। वेनस्यांगाज्जातस्य ते पौरुषाणि प्रति अवितर्क्यते षां ब्रह्मादीनामपि धियो बभ्रमुः। कृतः पुनर्वयं तद्वर्णने समर्था भवेम ॥ २ ॥
श्रीकृष्णाय नमः ॥ ॥ श्रीरामचंद्राय नमः ॥ ॥ श्रीकृष्णाय नमः ॥ ॥ श्रीरामाय नमः ॥ ॥

तया

४४

अ४

अथापि यथावद्वर्णयितुमशक्ता अपि कथामृते सादराः॥ मुनिर्लिंगपदेशं योगबलेन हृदि प्रकाशनं तदतिक्रम्य वितन्महि विस्तारं यामः॥ ३ ॥ [illegible] ततो स्व देहे लोकपालानां तन्मूर्तिः॥ काले काले विहर्त्ता। यथा भगवान् पालनयोषणानुरंजनादिकार्यानुसारेण [illegible] यज्ञादिप्रवर्त्तनेन ब्राह्मणसहितं वृष्ट्यादिना च भूर्लोकस्य हितं यथा भवति। तथा। सूर्यादितनुधारणमेवाह दृष्टिभिः॥ वसुधनं करादानकाले आदत्ते दुर्भिक्षादिकाले विमुंचति च अष्टौ मासान् सूर्यो यथा वसु जलमादत्ते विसृजति च वर्षासु तद्वत्। मस्तके पादेनाक्रमतो महात्मनां भूतानामतिक्रमं सहिष्यते। क्षितेर्वृत्तिः॥ सर्वसहनं साहसि निर्यस्यास्मित था॥ ७ ॥ देवे अवर्षति प्रकटांगताः॥ प्राणयासांताः प्रजाः स्वयं वृष्टिं कृत्वा रक्षिष्यति अत्र हेतुः॥ आसौ नारदेववपु

अथाप्युदारः स भवस्य ध्येयो हरेः॥ कलावतारस्य कथामृतार्थिभिः॥ यथोपदेशं मुनिभिः प्रचोदिताः॥ श्लाघ्यानि कर्माणि वयं वितन्महि एष धर्मभृतां श्रेष्ठो लोकं धर्मेऽनुवर्त्तयन्। गोप्ता च धर्मसेतूनां शास्ता तत्परिपंथिनां॥ ४ ॥ एष वै लोकपालानां बिभर्त्येकस्तनौ तनूः॥ काले काले यथा भागं लोकयोरुभयोर्हितं॥ ५ ॥ वसु काल उपादत्ते काले चायं विमुंचति। समः सर्वेषु भूतेषु प्रतपन् सूर्यवद्विभुः॥ ६ ॥ तितिक्षत्यक्रमं वैन्य उपर्याक्रमतामपि। भूतानां करुणः शश्वदार्त्तानां क्षितिवृत्तिमान्। देवे वर्षत्यसौ देवो नरदेववपुर्हरिः॥ कृच्छ्रप्राणाः प्रजा ह्येष रक्षिष्यत्यंजसेंद्रवत्॥ ७ ॥ आप्याययत्यसौ लोकं वदनामृतमूर्त्तिना। सानुरागावलोकेन विशदस्मितचारुणा॥ ९ ॥ अव्यक्तवर्त्मैष निगूढकार्यो गंभीरवेधा उपगुप्तवित्तः॥ अनंतमाहात्म्यगुणैकधामा पृथुः प्रचेता इव संवृतात्मा॥ १० ॥

हरिरिति॥ ७ ॥ वदनमेवामृतमूर्त्तिश्चंद्रस्तेन। सानुरागावलोको यस्मिन् विशदं स्मितं तेन चारुणा। अत्र च क्वचिद्वर्त्तमाननिर्देशो वर्त्तमानसामीप्ये वर्त्तमानवद्वेति। भूतनिर्देश आशंसायां भूतवच्चेति द्रष्टव्यः॥ ९ ॥ न व्यक्तं वर्त्म प्रवेशनिर्गममार्गो यस्य निगूढं निष्पन्नं पूर्वमविज्ञातं कार्यं यस्य तच्च कार्यं गंभीरं किमर्थमेतत् कृतमित्यन्यैरज्ञाताभिप्रायं विधत्ते इति तथा। उपगुप्तं रक्षितं वित्तं यस्य। अनंतमाहात्म्यश्चासौ गुणानामेकधाम च विलक्षणं यस्मिन्। अनंतमहात्म्योपेता गुणा एकं धाम स्थानं यस्येति वा। संवृतात्मा संवृतमूर्त्तिः॥ समुद्र इव रत्नेन चकुरेण

नो: १

राश्रो॥ स्य ३ अंदयमिति २

दुरासदं मनसाऽपि प्राकृमशक्य॥ डुर्द्विषदृश्शत्रुलिः सोदुमशक्यो विद्गत्वत्योत्त्रपेणालिलविन्नुमशक्य॥ वेनएवारणि स्माडुत्थितः॥ २२ चारणेर्गु
प्तस्त्वैः प्रपश्यन्नपि सुक्षेतिनि दादीनुदासीन इव वर्तिष्युते। यथा देहिनामध्यक्षोऽविहात आत्मभूतो वायु॥ अत्रात्मा तद्धत ॥ २३ आत्मद्विषां सुतमिति श्रुतयह
एवं सूत्रात्मजस्तास्पर्धी॥ धर्मपथे यथ मर्षे तेष्ठित॥ चक्रं आज्ञासेनावारध्य स्ववाचक्रामानसवलमलिव्याप्य प्रवर्तते। किं पर्यंतमित्यत आहा त्रकोरश्मि
गणैर्याव न्नयति तावत ॥ २४ ॥ यद्यस्माद्रंजयिष्यति अथतस्मात् मनोरंजनैहेतुलिरसुंराजानमाडु॥ मनोरंजनकैरिति चेष्टितविशेषणं वा॥ ६ मात

दुर्वादीडुर्विषह आसन्नोऽपि विद्गत्वतानै वालिलवितुं शक्यो वेनारण्यप्रहितो नलः॥ २१ अंतर्वहिश्चरत्तानां पश्यन्नु कर्माणि चारणैः॥ उदासी
न इवाध्यक्षो वायुरात्मेव देहिनां ॥ २२ ॥ नाहं यदंडयत्येषसुतमात्मद्विषामपि दंडयत्यात्मनं मन्ये स्वधर्मपथे स्थित॥ २३ ॥ अस्माप्रतिहं
तचक्रो पृथ्वी रामानसम्बलात्तू। वर्तते लगवानूर्को य्यावत्पतिगोगणे॥ ॥ २४ ॥ रंजयिष्यति यल्लोकमयमात्मविचेष्टितै॥ अथा सु
मा हूराजानं मनोरंजनकैः प्रजा॥ ॥ २५ ॥ दृ॰ व्रतः॥ सत्यसंधो व्रह्मण्यो हृद्ध सेवकः॥ शरण्यः सर्वभूतानां मानौदो दीनवत्सलः॥ ॥ २६ ॥
मा हूराजानं मनोरंजनकैः प्रजा॥ ॥ २५ ॥ देहिनामात्मवत्प्रेष्ठ॥ सुहृदां नंदि
मातृलक्तिः प्रस्त्री सुपत्न्यामर्द इवात्मनः॥ प्रजा सुपितृवत्स्निग्धः॥ किंकरो ब्रह्मवादिनां ॥ २७ ॥ देहिनामात्मवत्प्रेष्ठ॥ सुहृदां नंदि
वर्द्धनः॥ मुक्तसंगः संगो यं दंडपाणिरसाधुषु ॥ २८ ॥ अयं तु साक्षाद्भगवान्त्र्यधीशः कूटस्थ आत्मा कलयाऽवतीर्णः॥ यस्मिन्नविद्यार
ग वितनिरर्थकं प्रपश्यंति नानात्वमपि प्रतीतं ॥ २९ ॥

री वलक्तिर्लजनेयस्य। आत्मनो देहस्यार्द्ध इव पत्न्यां प्रीतिमानू ॥ २० नंदिं सुखं वर्द्धयतीति तथा। मुक्तसंगोऽप्रकृष्ट॥ संगो यस्य। दंडपाणिरि
वित्यपराधानुपेक्षेण मुच्यते। नाहं द्दा मित्यत्र पक्षपातालावः॥ ॥ २८ ॥ अयं विविति तु शब्देन निः प्रमत्वं दर्शयति। को सावात्मात
माह। यस्मिन्नतीतमपि नानात्वमर्थशून्यं पश्यति ॥ २९ ॥ ॥ श्रीरामचंद्राय नमः॥ ॥ श्री ॥ श्री॥ ॥॥

२

जन्मे पिंडे थ

श्रीवदयादेस्त्वत्पर्यंतं गोप्ता गोपायिष्यति। तदर्थं पर्यस्यते पर्यं इष्यति प्रदक्षिणीकरिष्यतीत्यर्थः॥ २०॥ अस्मै तथा प्रदक्षिणं कार्ह्ते मस्यंते ज्ञास्यंति तस्य यशश्चरंत्य उदाहरंत्यः कीर्त्तयंत्य॥ २॥ इड इत्याद्रीञ्जिलिंदत्त॥ २१ लांगूल मत्युन्नमय्यपयथा मृगेंद्रश्चरति तथा धनुर्विस्फार्य यन्न्य

घ

अयं तु वो मंडलमोदयाद्रेर्गोप्तैकवीरो नरदेवनाथः॥ आस्थाय जैत्रं रथमात्तचापः पर्यस्यते दक्षिणतो यथार्कः॥ २०॥ अस्मै नृपालाः किल तत्र तत्र बलिं हरिष्यंति सलोकपालाः॥ मंस्यंति एषां स्त्रिय आदिराजं चक्रायुधं तद्यश उद्धरंत्यः॥ २१ अयं महीं गां दुदुहेऽधिराजः प्रजापतिर्वृत्तिकरः प्रजानां। यो लीलयाद्रीन्स्वशरासकोट्या भिंदन्समां गामकरोद्यथेंद्रः॥ २२॥ विस्फूर्जयन्नाजगवं धनुः स्वयं यदाचरत्क्ष्मामविषह्यमाजौ। तदा निलिल्युर्दिशि दिश्यसंतो लांगूलमुद्यम्य यथा मृगेंद्रः॥ २३॥ एषोऽश्वमेधाञ्छतमाजहार सरस्वती प्रादुरभावि यत्र। अहार्षीद्यस्य हयं पुरंदरः शतक्रतुश्चरमे वर्तमाने॥ २४॥ तत्र तत्र गिरस्तास्ता इति विश्रुतविक्रमः॥ श्रोष्यत्यात्माश्रिता गाथाः पृथुः पृथुपराक्रमः॥ २६॥ दिशो विजित्याप्रतिरुद्धचक्रः स्वतेजसोत्पाटितलोकशल्यः॥ २७॥ मैत्रेय उवाच॥ एवं स भगवान्वैण्यः ख्यापितो गुणकर्म्मभिः॥ छंदयामास तान्कामैः प्रतिपूज्याभिनंद्य च॥ ५॥ श्री॥ इति श्रीभाग॰ चतुर्थस्कंधे षोडशोऽध्यायः॥ ॥ १

सुरासुरेंद्रैरुपगीयमानमहानुभावो भविता पतिर्भुवः॥ २

ण

दक्ष्मामचरत॥ २४॥ यत्र प्रादुरभाविप्रादुर्भूता कर्म्मकाले रिचिरे तत्रोऽहार्षीत्॥ विश्रुता विक्रमाय स्य गाथाः॥ एवं धाम॥ २६॥ उपगीयमानो महानुभावो यस्य॥ २७॥ २८॥ ॥ चतुर्थे षोडशः॥ ॥ ततः स प्रदशे लोकक्षुधा: प्रशमयत्पृथुः॥ अग्रसवीजां महीं हंतुं यत्नो लीत्यातया ॥ ततः। छंदयामास तोषितवान्॥ १॥

॥ एष स्वयं समोऽपवने सम्मेत्स सनत्कुमार् स्वगगतं तमेकं॥ आराध्य भक्त्यालभतामलं तत् स्रानं यतो ब्रह्म परं विदंति॥ २५॥ न

घ

घ+हं

न

वृत्तमात्मान्पुरोधसः पुरोहितां श्रेणीः तैलिकतांबूलकादीन्पौरविशेषान् प्रकृतीः नियोगिनः १ दोहनं पात्रं २ मेध्यं यज्ञार्हं ३ सविज्ञानं
अपरोक्षज्ञानसहितं ४ पूर्वदेहः पृथ्ववतारः तत्कथाश्रयं श्रवो यशः ५ ॥ अदुह्यत् दुग्धवान् ७ ॥ जनतायाश्च पोषित्या मंत्रितो नियुक्तः
नं ३

ब्राह्मणप्रमुखान्वर्णान्भृत्यामात्यपुरोधसः। पौरान्जानपदान्श्रेणीः प्रकृतीः समपूजयत् १ ॥ विदुर उवाच ॥ कस्मा
द्धारगोरूपं धरित्री बहुरूपिणी। यां दुदोह पृथुस्तत्र को वत्सो दोहनं च किं २ ॥ प्रकृत्या विषमा देवी कृता तेन समा कथं।
तस्य मेध्यं हयं देवः कस्य हेतोरपाहरत्। सनत्कुमाराद्भगवतो ब्रह्मन्ब्रह्मविदुत्तमात्। लब्ध्वा ज्ञानं सविज्ञानं राजर्षिः कां
गतिं गतः ४ ॥ यच्चान्यदपि कृष्णस्य भवान्भगवतः प्रभोः। श्रवः सुश्रवसः पुण्यं पूर्वदेहकथाश्रयं ५ ॥ भक्ता
य मेऽनुरक्ताय तव चाधोक्षजस्य च। वक्तुमर्हसि योऽदुह्यद्वैन्यरूपेण गामिमां ६ ॥ सूत उवाच ॥ चोदितो विदुरेणै
वं वासुदेवकथां प्रति। प्रशस्य तं प्रीतमना मैत्रेयः प्रत्यभाषत ७ ॥ मैत्रेय उवाच ॥ यदाभिषिक्तः पृथुरंग विप्रैरामंत्रितो
जनतायाश्च पालः। प्रजा निरन्ने क्षितिपृष्ठ एत्य क्षुत्क्षामदेहाः पतिमभ्यवोचन् ८ ॥ वयं राजन् जाठरेणाभितप्ता
यथाग्निना कोटरस्थेन वृक्षाः। त्वामद्य याताः शरणं शरण्यं यः साधितो वृत्तिकरः पतिर्नः। तन्नो भवानीहतु रातवे
ऽन्नं क्षुधार्दितानां नरदेवदेव। यावन्न नंक्ष्यामह उज्झितोर्जा वार्तापतिस्त्वं किल लोकपालः १० ॥ मैत्रेय उवाच ॥ पृथुः प्र
जानां करुणं निशम्य परिदेवितं। दीर्घं दध्यौ कुरुश्रेष्ठ निमित्तं सोऽन्वपद्यत ॥

तदा निरन्ने क्षितितले सति क्षुधाक्षामाः क्षीणा देहा यासां ताः
यत्नेन संपादितः तं त्वां शरण्यं याताः ९ ननु स्मा... प्रजाः पतिं पृथुमभ्यवोचन् ८ जाठरेणाग्निनाऽभितप्ताय साधितः विप्रैर्म
विकायाः पतिः १० परिदेवितं विलापं निमित्तं हेतुं अन्वपद्यत ज्ञातवान् ॥ ... यत्नं करोतु। उज्झितोर्जाः त्यक्तान्नाः सत्य वृत्तिर्या जी
॥ समा ॥

त
न
४६

पृथिव्यादयोऽपि पृथिवीज्ञानियस्त्वानीति व्यवसितो निश्चितवान् ॥ १२ ॥ मृगयुर्मा द्रुता अनुगता मृगीव ॥ १४ ॥ रोदसी द्यावापृथिव्यौ तयोरंतरं संरेषितं ॥ अनुपृष्ठतः उद्यतमायुधं येन सो धर्मज्ञ इति मतः स त्वं वा नू योषां मां कथमहनिष्यत् हनिष्यति ॥ १९ ॥ अजरां दृढां स्वामि धारयिष्यति ॥ २० ॥

इति व्यवसितो बुध्या प्रगृहीतशरासनः। संदधे विशिखं भूमेः क्रुद्धस्त्रिपुररिपुर्यथा ॥ १२ ॥ प्रवेपमाना धरणी निशाम्योदायुधं च तं। गौः सत्यपाद्रवद्भीता मृगीव मृगयुद्रुता ॥ १३ ॥ तामन्वधावत्तद्वैन्यः कुपितोऽत्यरुणेक्षणः। शरं धनुषि संधाय यत्र यत्र पलायते ॥ १४ ॥ सा दिशो विदिशो देवी रोदसी चांतरं तयोः। धावंती तत्र तत्रैनं ददर्शानूद्यतायुधं ॥ १५ ॥ लोके नाविंदत त्राणं वैन्यान्मृत्योरिव प्रजाः। त्रस्ता तदा निववृते हृदयेन विदूयता ॥ १६ ॥ उवाच च महाभागं धर्मज्ञापन्नवत्सल। त्राहि मामपि भूतानां पालनेऽवस्थितो भवान् ॥ १७ ॥ स त्वं जिघांससे कस्माद्दीनामकृतकिल्बिषां। अहनिष्यत्कथं योषां धर्मज्ञ इति यो मतः ॥ १८ ॥ प्रहरंति न वै स्त्रीषु कृतागःस्वपि जंतवः। किमुत त्वद्विधा राजन्करुणा दीनवत्सलाः ॥ १९ ॥ मां विपाट्याजरां नावं यत्र विश्वं प्रतिष्ठितं। आत्मानं च प्रजाश्चेमाः कथमंभसि धास्यसि ॥ २० ॥ श्रीपृथुरुवाच ॥ वसुधे त्वां वधिष्यामि मच्छासनपराङ्मुखीं। भागं बर्हिषि या वृंक्ते न तनोति च नो वसु ॥ २१ ॥ यवसं जग्ध्यनुदिनं नैव दोग्ध्यौधसं पयः। तस्यामेवं हि दुष्टायां दंडो नात्र न शस्यते ॥ २२ ॥ त्वं खल्वोषधिबीजानि प्राक्सृष्टानि स्वयंभुवा। न मुंचस्यात्मरुद्धानि मामवज्ञाय मंदधीः ॥ २३ ॥ अमूषां क्षुत्परीतानामार्तानां परिदेवितं। शमयिष्यामि मद्बाणैर्भिन्नायास्तव मेदसा ॥ २४ ॥

बर्हिषि यज्ञे या सती देवतारूपेण भागं वृंक्ते लब्ध्वापि धान्यादिकं ॥ २१ ॥ गोरूपेण त्वयवसं तृणं जग्धि अत्सीत्यर्थः पयस्तु नैव दोग्धि दुग्धं न भवति अस्मिन्नपराधे ॥ २२ ॥ आत्मनि देहे रुद्धानि। मद्वधे सर्वथा अन्नं न स्यादिति चेत्तत्राह ॥ २३ ॥ अमूषां प्रजानां। मेदसा मांसेन ॥ २४ ॥

च॰ ३॰

४७

यदुक्तं पोषां कथं हनिष्यतीति तत्राह। भूमानि जितस्य वधोऽवध एवायन्नोक्तं कथमंतस्त्रिधास्यतीति तत्राह। २५। त्वामिति तिलशः तिलशमाणानि
खंडानीत्येवं भूत्वा मत्कृतां नीत्वा मन्मयीं मूर्त्तिं बिभर्त्तिः हातात तु ल्पत्वमुच्यते नतु मत्तांत स्य मन्मयी मूर्त्तिरिति। शुद्ध सत्वमत्तं देवं तकस्मा
दति दारुणां वीक्ष्य माणे इत्थं पृथ्वी तुष्टाव कत्रणोक्लिलिः। २७। मायया विन्यस्तार विता नाना घोरा दितन वो येना गुणा त्मने गुणमयत्वे नप्रती
यमानाय वस्तुतस्तु निर्धूता निरस्ता द्रव्यक्रियाकारके ३० अधिभूताध्यात्माधि दैवेषु विल्लमो हंकारः तन्निमित्ता ऊर्म्मयो रागद्वेषादयश्च य

पुमान् यो षिद्धुत क्लीबज्ञोऽसंलावनोऽधमः भूते षु निरनुक्रोशो नृपाणां तद्वधोऽवधः। २५। त्वां स्तब्धां दुर्मदां नीत्वा मायागां
तिलशः शरैः। आत्मयोगबलेनेमां धारयिष्याम्यहं प्रजाः। २६। एवं मन्युमयीं मूर्त्तिं कृतांतमिव बिभ्रतीं। प्रणता प्रांज
लिः प्राह मही संजातवेपथुः। २७। धरोवाच॥ नमः परस्मै पुरुषाय मायया विन्यस्त नाना तनवे गुणात्मने। नमः स्वरूपानु
भवेन निर्धूत द्रव्यक्रियाकारक विभ्रमोर्मये। २८। येनाहमात्मायतनं विनिर्मिता धात्रा यतोऽयं गुणसर्गसंग्रहः। स एव मां हंतुमुदा
युधः स्वराडुपस्थितोऽन्यं शरणं कमाश्रये। २९। य एतदादावसृजच्चराचरं स्वमाययात्माश्रययाविकर्यया तयैव सोऽयं
किल गोप्तुमुद्यतः कथं नु मां धर्म्मपरो जिघांसति॥ ३०॥ ॥ श्रीकृष्णाय नमः॥ ॥

स्मिन् तस्मै। अहो सर्वजीवाश्रयत्वेन स्रष्टां मां कथं हंतुं प्रवर्त्तितइत्याह। २८। येन विधात्रा आत्मानां जीवानामायतनमहं विनिर्मिता यतश्चय
स्मां मयि गुणसर्गस्य चतुर्विध भूतग्रामस्य संग्रहः धारणं। स्वराट् स्वतंत्रः सृष्टि संहारककर्त्ताऽहमेवेति। २९। तथापि प्रजापालने प्रवृत्त
स्य मद्वधोऽनुचित एवेत्याह य एतदादिति। आत्माश्रयया जीवविषयिण्या॥ ३०॥ ॥ श्रीकेशवाय नमः॥ ॥ श्रीराम॥ ॥

+ शुद्धसत्वमत्तं देवं तकस्मादति दारुणां वीक्ष्यमाणे इत्थं पृथ्वी तुष्टाव कत्रणोक्लिलिः॥ २७ +

स

३

१

कर्यया

४७

अतो दुर्ज्ञेयमीश्वरचेष्टितमित्याह॥ अनन्नमिति॥ अकृतात्मभिः विचित्रहृचित्तैः अयं ईश्वरः स्वतंत्रः अकरोत् ब्रह्माणं परत इति तेन ब्रह्मणा चराचरमकाएव नाय स्व
त्मत एकः परतो मायया अनेकः॥ तस्मादचिंत्यशक्तये केवलं नमस्कुर्मि हे॥ २२॥ सर्गादि जन्मस्थितिलयं अस्य जगतः अनुत्तरेण हि अनुवर्तते करोति॥ इ
व्याणि महाभूतानि क्रिया इंद्रियाणि कारकादेवाः चेतना बुद्धिः आत्मा हेकारः तैः स्वशक्तिरूपैः समुन्नद्धा सम्यक् त्वाविदग्धाः शक्तयो यस्य प्राणिनां भा

नूनं बत ते शश्वत् समीहितं जनेभ्यः न्यायमाया दुर्ज्ञेयया कृतात्मभिः अनलक्ष्यते यस्त्वं अकरोद कारयद्यो नेकाएकः परतस्त्वं ईश्वरः॥ २२॥ स
र्गादि योऽस्यानुत्तरेण हि शक्तिर्ईश्वरक्रियाकारकचेतनानात्मभिः॥ तस्मै समुद्धविदग्ध शक्तये नमः परस्मै पुरुषाय वेधसे॥ २४॥
स वै त्वयानात्मविनिर्मितं जगत् भूतेंद्रियांतःकरणात्मकं विलो॥ संस्थापयिष्णुरज मांरसातलादभ्युज्जहार लसआदि
सूकरः॥ अपां उपस्थे मयि नाव्यवस्थिताः प्रजा लवान घोर रक्षिपुं किल॥ स वीर्यमूर्तिः समभूद्धराधरो यो मां पयस्युग्रशरो
जिघांसति॥ २५॥ श्रीकृष्णाय नमः॥ ॥ रामचंद्राय नमः॥ ॥ गोपालाय नमः॥ ॥ रामेश्वराय नमः॥

२

रणार्थं मां रसातलादुद्धृत्येदानीं प्रजारक्षणे प्रवृत्तस्य मम वधो न युक्त इति स कारुण्यमाह त्वयां॥ २२॥ हे अजयः सृष्टवान् स एव त्वं वा
न् स्वनिर्मितं चराचरं जगत् संस्थापयितुं आदिसूकरः सन्मामभ्युज्जहार॥ २३॥ स एव धराधरो वराहो॥ अपामुपस्थे उपरिम
यि नाविआधारभूतायामवस्थिताः प्रजाः रक्षितुमिच्छुः वीरमूर्तिः पृथुरूपः समभूत्॥ य एवंभूतः स त्वं पयस्ति निमित्ते मां जिघांससीति
चित्रमित्यर्थः॥ २४॥ श्रीराम॥ ॥

भा॰ च॰

तस्मादीश्वरचेष्टितं दुर्ज्ञेयमिति कैमुत्यन्यायेनोपसंहरति नूनमिति। तस्येश्वरस्य गुणसर्गरूपया मायया मोहितं चित्तमेव वर्त्म येषां मोहिता नि चित्तवर्त्मानि येषां ते
मिति चातैर्जनैः ईश्वराणां हरिलक्षणानामेवैतावदीहितं न ज्ञायते किं पुनस्तस्य परमेश्वरस्य। अत ऐश्वरा एव ते सोपि न मए वकेवलं। वीराणां जिते
न्द्रियाणां यशः कुर्वंतीति ये ते स्तेभ्यः। यथा वीराणां यशो वर्द्धते तथा चेष्टतां न तु पृथोरिष्टमिति साधः॥ ३६॥ चतुर्थे सप्तदशः॥ ॥ अष्टादशे महीवाक्याद्दत्त
पात्रादिभेदतः। पृथ्व्यादिभिः स्वस्व मरणः सा च दुग्धा वितीर्यते॥ १॥ हे अलिलोप्रतीयहाते देवअति अलयं यथा लवत्येवं मन्युं संनियच्छ। आवि

४८

धी

नूनं [ ] जनैरीहितमीश्वराणामस्मद्विधैस्तद्गुणसर्गमायया न ज्ञायते मोहितचित्तवर्त्मभिस्तेभ्यो नमो वीरयशस्करेभ्यः॥ ३५॥
इति॥ ॥भागवते महापुराणे चतुर्थस्कंधे पृथुविजये धात्रीनिग्रहे सप्तदशोध्यायः॥ ॥ श्रीमैत्रेय उवाच॥ ॥ इत्थं पृथुमभि
ष्टुय रुषा प्रस्फुरिताधरं पुनराहावनिर्भीता संस्तभ्यात्मानमात्मना। संनियच्छाभिभो मन्युं निबोध श्रावितं च मे। सर्वतः
सारमादत्ते यथा मधुकरो बुधः॥ २॥ अस्मिन् लोकेथवामुष्मिन् मुनिभिस्तत्त्वदर्शिभिः। दृष्टा योगाः प्रयुक्ताश्च पुंसां श्रेयःप्रसिद्धये
॥ ३॥ तानातिष्ठति यः सम्यगुपायान् पूर्वदर्शितान्। अवरः श्रद्धयोपेत उपेयान् विंदतेंऽजसा॥ ४॥ताननादृत्य योऽविद्वानर्थानारभते
स्वयं। तस्य व्यभिचरंत्यर्था आरब्धाश्च पुनः पुनः॥ ॥ श्रीरामाय नमः॥ ॥

नू

तं विज्ञापितं नेन महावाक्येनादरः कर्त्तव्यः इत्याहाबुधो हि सर्वतः सारमादत्ते मयि जीर्णा ओषधीरुपायेन गृह्णातीति वक्तुमुपायेन सर्वं सिध्य
तीनान्यथेत्याह॥ २॥ अस्मिन्निति त्रिभिः। पुंसां श्रेयसः पुरुषार्थस्य प्रसिद्धये अस्मिल्लोके कृष्यादयः अमुष्मिंल्लोकेऽग्निहोत्रादयो
योगा उपाया दृष्टाः प्रयुक्ता अनुष्ठिताश्च॥ ३॥ पूर्वैर्दर्शितान्। अवरोऽर्वाचीनः॥ ४॥ अविद्वानविद्वान पीति वा व्यभिचरंति न सिध्यंति
॥ ॥ १८॥ श्रीरामाय नमः॥ ॥

चौ

ते

४८

सहेतुकमुपायमाह पुरेति षड्भिः ॥ ६ ॥ लब्धाभिरिति राजसामान्याभिप्रायेण अपालिताश्चोराद्यनिवारणेन अनादृताश्च यज्ञादिप्रवर्त्तनाभावात् । यज्ञार्थं अग्रस्तं गिलितवती । अन्यथा ऽधृतव्रतैः भुक्ता न प्रसोष्यंते । ततश्च यज्ञादयो न सिध्येरन्निति भावः ॥ ७ ॥ क्षीणा जीर्णाः ॥ ८ ॥ वत्सं दोहनं दोहपात्रं ॥ ९ ॥ दोग्धारं चोपकल्पय । धोक्ष्ये प्रपूरयिष्यामि । भूतानामभीप्सितमन्नं । ऊर्जस्वत् बलप्रदं ॥ १० ॥ अपगतेऽपि वर्षर्तौ यथा मे सर्वतो वर्त्ततोऽप्रसंगाद् अर्थांतरमाह ॥ ११ ॥

पुरा सृष्टा ह्योषधयो ब्रह्मणा या विशांपते । भुज्यमाना मया दृष्टा असद्भिरधृतव्रतैः ॥ ६ ॥ अपालितानादृता च भवद्भिर्लोकपालकैः । चोरीभूतेऽथ लोकेऽहं यज्ञार्थेऽग्रसमोषधीः ॥ ७ ॥ नूनं ता वीरुधः क्षीणा मयि कालेन भूयसा । तत्र दृष्टेन योगेन भवानादातुमर्हति ॥ ८ ॥ वत्सं कल्पय मे वीर येनाहं वत्सला तव । धोक्ष्ये क्षीरमयान् कामाननुरूपं च दोहनं ॥ ९ ॥ दोग्धारं च महाबाहो भूतानां भूतभावन । अन्नमीप्सितमूर्जस्वद्भगवान् वांछते यदि ॥ १० ॥ समां च कुरु मां राजन् देववृष्टं यथा पयः । अपर्त्तावपि भद्रं ते उपावर्त्तेत मे विभो ॥ ११ ॥ इति प्रियं हितं वाक्यं भुव आदाय भूपतिः । वत्सं कृत्वा मनुं पाणावदुहत्सकलौषधीः ॥ १२ ॥ तथापरे च सर्वत्र सारमाददते बुधाः । ततोऽन्ये च यथाकामं दुदुहुः पृथुभाविताम् ॥ १३ ॥ ऋषयो दुदुहुर्देवीमिंद्रियेष्वथ सत्तमा । वत्सं बृहस्पतिं कृत्वा पयश्छंदोमयं शुचि ॥ १४ ॥ कृत्वा वत्सं सुरगणा इंद्रं सोममदूदुहन् । हिरण्मयेन पात्रेण वीर्यमोजो बलं पयः ॥ १५ ॥

तथेति । यथा पृथुः । एवं सर्वत्र वाक्ये परेऽपि सारमाददतो प्रस्तुतमनुवर्त्तयति । ततोऽन्ये च आप्यादयः पंचदश दुदुहुः । पृथुना भावितां वशीकृतां ॥ १३ ॥ देवीं पृथ्वीं वाङ्मनःश्रवणेषु वेदग्रहणादिंद्रियाणां पात्रत्वं ॥ १४ ॥ सोमममृतं । वीर्यं मनःशक्तिं । ओज इंद्रियशक्तिं । बलं देहशक्तिं च । तदेव पयः ॥ १५ ॥

११९

भा॰च॰
४९

सुरां आसवं वा तालादि मद्यं १५ मधु वा सौभगं सौंदर्यं तत्सहितं १६ काव्यं पितॄणामन्नं आमपात्रे अपक्वे मृन्मये अधुक्षत दुदुहुः १७ संकल्पनामयीं अणिमादिसिद्धिं ये विद्याधरादयस्ते खेचरत्वादिरूपां विद्यां दुदुहुः १८ अन्ये च किंपुरुषादयः अंतर्धाने नाद्भुतात्मनां संबंधिनीं मायां धारणामयीं संकल्पमात्रप्रभवां १९ भूतेशो रुद्रः स एव वत्सो येषां क्षतजं रुधिरं तदेवासवं २० अहयो निष्फणा दंदशू-

दैतेया दानवा वत्सं प्रह्लादमसुरर्षभम् । विधायादूदुहन्क्षीरमयःपात्रे सुरासवं १५ गंधर्वाप्सरसोऽधुक्षन्पात्रे पद्ममये पयः । वत्सं विश्वावसुं कृत्वा गांधर्वं मधु सौभगं १६ वत्सेन पितरोऽर्यम्णा कव्यं क्षीरमधुक्षत । आमपात्रे महाभागाः श्रद्धया श्राद्धदेवताः १७ प्रकल्प्य वत्सं कपिलं सिद्धाः संकल्पनामयीं । सिद्धिं नभसि विद्यां च ये च विद्याधरादयः १८ अन्ये च मायिनो मायामंतर्धानाद्भुतात्मनां । मयं प्रकल्प्य वत्सं ते दुदुहुर्धारणामयीं १९ यक्षरक्षांसि भूतानि पिशाचाः पिशिताशनाः । भूतेशवत्सा दुदुहुः कपाले क्षतजासवं २० तथाहयो दंदशूकाः सर्पा नागाश्च तक्षकं । विधाय वत्सं दुदुहुर्बिलपात्रे विषं पयः । पशवो यवसं क्षीरं वत्सं कृत्वा च गोवृषं । अरण्यपात्रे चाधुक्षन्मृगेंद्रेण च दंष्ट्रिणः २२ क्रव्यादाः प्राणिनः क्रव्यं दुदुहुः स्वे कलेवरे । सुपर्णवत्सा विहगाश्चरं चाचरमेव च २३ वटवत्सा वनस्पतयः पृथग्रसमयं पयः । गिरयो हिमवद्वत्सा नानाधातून्स्वसानुषु २४ सर्वे स्वमुख्यवत्सेन स्वे स्वे पात्रे पृथक्पयः । सर्वकामदुघां पृथ्वीं दुदुहुः पृथुभाविताम् ॥ १९ ॥

काः वृश्चिकादयः सर्पाः सफणाः नाग एव कद्रुसंततिजा नागाः विषं पात्रे मुखे २१ यवसं तृणं ॥ गोवृषं वृषभं ऋषभं ... गोदेणेत्युत्तरेण-न्वयः २२ क्रव्यं मांसं । चरं कीटादि । अचरं फलादि । अनुक्तसंग्रहार्थमाह सर्वे स्वजातीयो मुख्यस्तेन वत्सेन ॥ ॥१८॥ ॥

ना:
४९

॥२४॥

उपसंहरति एवमिति। पृथुं प्रतीष्टमन्नं तमेव क्षीरत्वेन दुदुहुः। दोहपात्राणि इमां पृथ्वीं ॥२७॥ धनुष्कोट्यग्रेण गिरिकूटानि चूर्णयन् राजराट् राजा ॥२९॥ ग्रामाः छदादि शून्याः। पुरो हट्टादिमत्यः। ता एव महत्यः पत्तनानि। दुर्गाणि विविधानि यथा वक्ष्यति। औदकं पार्वतं वार्क्षमैरिणं धान्वनं तथेति। घोषान् आभीराणां निवासान्। व्रजान् गवां निवासान्। शिबिरं सेनानिवासस्थानं तत्सहितान्। आकरान् स्वर्णादिस्थानानि। खेटाः कर्षकग्रामाः खर्वटाः पर्वतप्रान्तग्रामाः

एवं पृथ्वादयः पृथ्वीमन्नादाः स्वन्नमात्मनः। दोहवत्सादिभेदेन क्षीरभेदं कुरूद्वह। ततो महीपतिः प्रीतः सर्वकामदुघां पृथुः। दुहितृत्वे चकारेमां प्रेम्णा दुहितृवत्सलः ॥२७॥ चूर्णयन् स्वधनुःकोट्या गिरिकूटानि राजराट्। भूमण्डलमिदं वैन्यः प्रायश्चक्रे समं विभुः। ॥२८॥ अथास्मिन् भगवान् वैन्यः प्रजानां वृत्तिदः पिता। निवासान् कल्पयांचक्रे तत्र तत्र यथार्हतः ॥२९॥ ग्रामान् पुरः पत्तनानि दुर्गाणि विविधानि च। घोषान् व्रजान् सशिबिरान् आकरान् खेटखर्वटान् ॥३०॥ प्राक् पृथोरिह नैवैषा पुरग्रामादिकल्पना। यथासुखं वसन्ति स्म तत्र तत्राकुतोभयाः ॥३१॥ ॥इति श्रीभागवते महापुराणे चतुर्थस्कन्धे पृथुविजये अष्टादशोऽध्यायः॥ ॥श्रीमैत्रेय उवाच॥ ॥अथादीक्षत राजा तु हयमेधशतेन सः। ब्रह्मावर्ते मनोः क्षेत्रे यत्र प्राची सरस्वती ॥१॥ तदभिप्रेत्य भगवान् कर्मातिशयमात्मनः। शतक्रतुर्न ममृषे पृथोर्यज्ञमहोत्सवम् ॥ ॥

तां पृथ ॥३२॥ चतुर्थे ऽथ विंशे ॥ जैनविंशेऽश्वमेधाङ्गाश्वस्यापहरणात् पृथोः। इन्द्रं हन्तुं प्रवृत्तस्य धात्रा वारणमुच्यते। हयमेधशतेन निमित्तेन अदीक्षत अदीक्षितोऽभूत्। शताश्वमेधसंकल्पमकरोदित्यर्थः। ब्रह्मावर्ते सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरं तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते। आत्मनो यः स्वंपकं मेधसंकल्पमकरोत् कर्मातिशेत इत्यतिशयं अभिप्रेत्य ज्ञात्वा तदिति तं पृथोर्यज्ञहोत्सवं न ममृषे न सेहे ॥ २ ॥

दीक्षत २

पत्र

सा॰ व॰ ५०

अतिशयमेव दर्शयति । यत्रेति सप्तभिः । साक्षादन्वभूयत प्रत्यक्षेण दृष्टः ॥ ३ ॥ सिद्धादयश्च तं हरिमन्वीयुरित्युत्तरेणान्वयः ॥ ६ ॥ धर्मदुघा हविर्दोग्ध्री धेनुः सती
॥ ७ ॥ ऊहुः वहंति स्म सर्वरसान् इक्षुद्राक्षादिरसान् । क्षीरं दधि च अन्नं च पानकादि गोरसो घृतं तक्रं च तान् ॥ भूरीणि विवृतानिव वर्ष्माणि येषां ते फलादिभारे
यंते । मधुच्युतः मधुस्राविणः संतः ॥ चतुर्विधं लद्यं लेह्यं चोष्यं लेह्यं च । अधोक्षज ईशो नाथो यस्य । परमउदयो ऽतिवृद्धिर्यस्मिन् । तत्कर्म असूयन्

यत्र यज्ञपतिः साक्षाद्भगवान् हरिरीश्वरः ॥ अन्वभूयत सर्वात्मा सर्वलोकगुरुः प्रभुः ॥ ३ ॥ अन्वितो ब्रह्मशर्वाभ्यां लोकपा
लैः सहानुगैः ॥ उपगीयमानो गंधर्वैर्मुनिभिश्चाप्सरोगणैः ॥ ४ ॥ सिद्धा विद्याधरा दैत्या दानवा गुह्यकादयः ॥ सुनंदनं
दप्रमुखाः पार्षदप्रवरा हरेः ॥ ५ ॥ कपिलो नारदो दत्तो योगेशाः सनकादयः ॥ तमन्वीयुर्भगवता ये च तत्सेवनोत्सुकाः
॥ ६ ॥ यत्र धर्मदुघा भूमिः सर्वकामदुघा सती ॥ दोग्धिस्माऽभीप्सितानर्थान् यजमानस्य भारत ॥ ७ ॥ ऊहुः सर्वरसान्नद्यः
क्षीरदध्यन्नगोरसान् ॥ तरवो भूरिवर्ष्माणः प्रासूयंत मधुच्युतः ॥ ८ ॥ सिंधवो रत्ननिकरान् गिरयोऽन्नं चतुर्विधं ॥ उपाय
नमुपाजह्रुः सर्वे लोकाः सपालकाः ॥ ९ ॥ इति चाधोक्षजेशस्य पृथोस्तु परमोदयं ॥ असूयन् भगवानिंद्रः प्रतिघातमची
करत् ॥ १० ॥ चरमेणाश्वमेधेन यजमाने यजुष्पतिं ॥ वैन्ये यज्ञपशुं स्पर्द्धन्नपोवाह तिरोहितः ॥ ११ ॥ तमत्रिर्भगवानैक्षत्त्वरमाणं विहा
यसा ॥ आमुक्तमिव पाखंडं यो ऽधर्मे धर्मविभ्रमः ॥ १२ ॥

असहमानः प्रतिघातं विघ्नं चकारेत्यर्थः ॥ १० ॥ वैन्ये यज्ञपतिं विष्णुं यजमाने सति स्पर्द्धमानः इंद्रस्तिरोहितः सन्नपहृतवान् ॥ ११ ॥ त्वरमाणं धा
वंतं । आमुक्तं प्रतिमुक्तं अपिनद्धं आपिनद्धवत् । सन्नद्धो वर्मितः ॥ आमुक्त इत्यमरसिंहः । पाखंडवेषं कवचमिव गृहीतवंतमित्यर्थः ॥ अ
धर्मे धर्मविभ्रमः धर्मो ऽयमिति भ्रांतिकारी यः ॥ १२ ॥

रा॰ रा॰ ५२

राम ५०

न मुंचति स्म ॥१४॥ हन्तवे हन्तुं यज्ञहनं यज्ञहन्तारं ॥१५॥ तस्मै हित्वा अन्तर्धानं कृत्वा ॥१७॥ विचक्ष्य दृष्ट्वा ॥१८॥ उपसृज्य सृष्ट्वा तेन छन्नः सन् चषालो यूपाग्रे निक्षिप्तः का-
ष्ठकंकणः तद्युक्तात् यूपात् हिरण्यनिर्मिता रशना यस्य तं ॥१९॥ नाबाधत हन्तुं नेच्छेत् ॥२०॥ शरञ्चार यन्नासहितमेवो हृत्वा रूपाणि आन्नातवानित्यर्थः विभुः समर्थः ॥२१॥ अव-
द्यं निंदितं श्वेपं मेहत्वज्ञा जगृहुः। तदेव पाषंडनामनि उच्चार दर्शयति ॥२२॥ यानीति बहुवचनेन चान्यान्यपि गृहीतानीत्युक्तं तत्र जातपाषंडमार्गाः प्रवृत्ता इत्याह

सु १

अचिरेण चोदितो हन्तुं पृथुपुत्रो महारथः। अन्वधावत्तं संक्रुद्धस्तिष्ठ तिष्ठेति चाब्रवीत् ॥१३॥ तं तादृशाकृतिं वीक्ष्य मेने धर्मं शरीरिणं। जटिलं भ-
स्मनाच्छन्नं तस्मै बाणं न मुंचति ॥१४॥ वधान्निवृत्तं तं भूयो हन्तवेऽत्रिरचोदयत्। जहि यज्ञहनं तात महेन्द्रं विबुधाधमम् ॥१५॥ एवं वैन्यसुतः प्रोक्तस्त्वरमा-
णं विहायसा। अन्वद्रवदभिक्रुद्धो रावणं गृध्रराडिव ॥१६॥ सोऽश्वं रूपं च तद्धित्वा तस्मा अन्तर्हितः स्वराट्। वीरः स्वपशुमादाय पितुर्यज्ञमुपेयिवान् ॥१७॥
तत्तस्य चाद्भुतं कर्म विचक्ष्य परमर्षयः। नामधेयं ददुस्तस्मै विजिताश्व इति प्रभो ॥१८॥ उपसृज्य तमस्तीव्रं जहाराश्वं पुनर्हरिः। चषालयूपतश्छन्नो
हिरण्यरशनं विभुः ॥१९॥ अत्रिः संदर्शयामास त्वरमाणं विहायसा। कपालखट्वांगधरं वीरो नैनमबाधत ॥२०॥ अत्रिणा चोदितस्तस्मै संदधे विशि-
खं रुषा। सोऽश्वं रूपं च तद्धित्वा तस्थावन्तर्हितः स्वराट् ॥२१॥ वीरश्चाश्वमुपादाय पितृयज्ञमथाव्रजत्। तदवद्यं हरे रूपं जगृहुर्ज्ञानदुर्बलाः ॥२२॥ यानि रू-
पाणि जगृहे इन्द्रो हयजिहीर्षया। तानि पापस्य खंडानि लिंगं खंडमिहोच्यते ॥२३॥ एवमिन्द्रे हरत्यश्वं वैन्ययज्ञजिघांसया। तद्गृहीतविसृष्टेषु पाखंडेषु मतिर्नृ-
णां ॥२४॥ धर्म इत्युपधर्मेषु नग्नरक्तपटादिषु। प्रायेण सज्जते भ्रान्त्या पेशलेषु च वाग्मिषु ॥२५॥ ॥राम॥ ॥राम॥ ॥राम॥ ॥राम

॥२३॥ एवमिति तेन गृहीतेषु त्यक्तेषु च विसृष्टेषु ॥२४॥ नग्ना जैना रक्तपटा बौद्धाः आदिशब्देन कापालिकादयः तेषु उपधर्मेषु धर्माभासेषु धर्म एवायमिति मतिः सज्जते
इति द्वयोरन्वयः पेशलेषु आपाततोरम्येषु। वाग्मिषु हेतूक्तिचतुरेषु ॥२५॥ ॥राम॥ ॥राम॥ ॥राम॥ ॥

शक्रवधेऽभिसंधितं कृताभिप्रायं प्रचोदितात् पशोर्हिंसादन्यस्य वधस्तु न युज्यते। तद्वधं तु वयं करिष्याम इत्याहुः। २७। वयमिह यज्ञनाशकं त्वत्की-र्त्या विहतप्रभमिंद्रमाह्वयामहे। कैः। अयातयामैः अगतवीर्यैः आह्वानमंत्रैः। अनंतरमेव तं त्वाहितं जुहवाम होष्यामः। २८। आसमंतात् पृथोः क्रतुपतिं स्रुहस्ते-येषां तान्। यमिंद्रं यज्ञेन जिघांसथ यज्ञेनेष्टाः सर्वे सुरा यस्य तनवः। स इंद्रो भवतां वधार्हो न भवति। यद्यस्माद्यज्ञो नामायमिंद्रो भगवत्तनुः। अवतारः। ततः सप्तम अन्यत्कल्पांतु वेर्यज्ञो भूत्वा जायत। इयामाद्यैः सुरगणैः इत्यात्मायं स्वांतरमितिभक्तत्वात्। अतो बलीयसा तेन सख्यमेव का-

तदभिज्ञाय भगवान् पृथुः पृथुपराक्रमः। इंद्राय कुपितो बाणमादत्तोद्यतकार्मुकः। २६। तमृत्विजः शक्रवधाभिसंधितं विचक्ष्य दुष्प्रेक्ष्यमसह्यरंहसं। निवारयामासुरहो महामते न युज्यतेऽत्रान्यवधः प्रचोदितात्। २७। वयं मरुत्वंतमिहार्थनाशनं ह्वयामहे त्वच्छ्रवसा हतत्विषं। अयातयामोपहवैरनंतरं प्रसह्य राजन् जुहवाम तेऽहितं। २८। इत्यामंत्र्य क्रतुपतिं विदुरास्यर्त्विजो रुषा। स्रुग्घस्तान् जुह्वतोऽभ्येत्य स्वयंभूः प्रत्यषेधत। २९। न वध्यो भवतामिंद्रो यद्यज्ञो भगवत्तनुः। यं जिघांसथ यज्ञेन यस्येष्टास्तनवः सुराः। ३०। तदिदं पश्यत महद्धर्मव्यतिकरं द्विजाः। इंद्रेणानुष्ठितं राज्ञः कर्मैतद्विजिघांसता। ३१। पृथुकीर्तेः पृथोर्भूयात्तर्ह्येकोनशतक्रतुः। अलं ते क्रतुभिः स्विष्टैर्यद्भवान्मोक्षधर्मवित्॥ ॥

र्यं। अन्यथा भूयश्च पाखंडं प्रवर्त्स्यतीत्याशयेनाह। ३०। तदिदमिंद्रेणानुष्ठितं महदन्यायं पश्यत। किमित्यपेक्षायामाह। धर्मस्य व्यतिकरं विपर्ययं पाखंडरूपं। तर्हि किमत्र युक्तमित्यत आह। ३१। पृथुकीर्तेरिति। एकेनोनं शतं यस्मिन्नृतादृशः क्रतुः क्रतुप्रयोगः पृथोर्भूयात्। पृथुरिति पाठे एकोनशतं क्रतवो यस्य तादृशोऽपि महेंद्रात् पृथुकीर्तिर्भूयादित्यर्थः। तदेवमृत्विजः प्रत्यक्तवा। पृथुं प्रत्येवाह। अलमिति। ॥ ॥७॥

आत्मनैवात्मने महेंद्राय रोषं कर्त्तुं नार्हसि । तत्र हेतुः उत्सलावपीति । तथापि क्रतुसमाप्तिमिव ध्यायं तं प्रत्याह ॥ ३३ ॥ अस्मिन्नपि ज्वविध्रवितांमास्महाथाः ।
यद्यस्मादेव हतं कार्यं कर्त्तुं ध्यायतो मनः । तन्निश्चितं अति उत्सृष्टं सत् अंधंतमो मोहो विशति न तु शांतिं लभते ॥ ३४ ॥ अतएव तव क्रतुर्विरमतात निवृंक्ष्व ।
किं न निवार्यते । अत आह । यतो देवेषु दुराग्रहो लवतीति । यत्र क्रतौ । ईंद्रदुराग्रहः दुराग्रहं मनर्थं परिपश्येत्याह ॥ ३५ ॥ एलिरिंद्रैलोपसृष्टे हेरधिष्ठिते । हारि

नैवात्मने महेंद्राय रोषमाहर्त्तुमर्हसि । उत्सलावपि हिलदंतं उत्तमश्लोकविग्रहौ ॥ ३३ ॥ मास्मिन्नु महाराज कथाश्चितां निशाम याऽस्मच्च अहृतात्मा । यस्य ध्यायतो देवहतं तु कर्त्तुं मनोऽति उत्सृष्टं विशते तमोंऽधं ॥ ३४ ॥ क्रतुर्विरमतामेष देवेषु दुरवग्रहः । धर्मव्यतिक ऐषत्र पाखंडैरिंद्रनिर्मितैः । एलिरिंद्रोपसंसृष्टैः पाखंडैर्हारिभिर्जनं । ह्रीयमानं विचक्ष्वैनं यस्य यज्ञध्रुग् गमुत्सृष्टः ॥ ३६ ॥ लवान् परित्रातुमिहावतीर्णो धर्मं जनानां समयानुरूपं । वेनापचारादवलुप्तमद्य तद्देहतो विष्णुकलासि वैण्य ॥ ३७ ॥ सत्वं विमृश्यास्य भवं प्रजापते संकल्पनं विश्वसृजां पिपीहि । ऐंद्रीं च मायामुपधर्ममातरं प्रचंडपाखंडपथं प्रभो जहि ॥ ३८ ॥ श्रीमैत्रेय उवाच ॥ ॥ इत्थं स लोकगुरुणा समादिष्टो विशांपतिः । तथा च कृत्वा वात्सल्यं मघोनापि च संदधे ॥ ३९ ॥ ॥

रया

लिखिताकर्षकेः यइंद्रः ते अश्वं सुप्तातीति तथा इति नस्पृष्टेः । ततो मम किमिति चेत् । तत्राह ॥ ३६ ॥ लवानिति द्वाभ्यां सांख्ययोगादिना सिद्धान्
नुरूपं धर्मं विण स्यान्यायात् लुप्तं परित्रातुं तद्देहाद्धि ह्लोः कलैव त्वं भवती एकोऽसि ॥ ३७ ॥ अस्य विश्वस्रोऽइवं विचार्य ये उत्पादितोऽसि ते षां विश्वसृ
जां संकल्पनां अर्थमाहि संकल्पं पिपीहि आर्षश्रयोगः पूरयेत्यर्थः । प्रचंडो यः पाखंडमार्गः सैवैंद्री माया उपधर्मजननी तां जहि ॥ ३८ ॥ त
थाकृत्वा यज्ञात्र हं हित्वा वात्सल्यं प्रेहं च कृत्वाइंद्रेण सह संधानं च कृतवान् ॥ ३९ ॥ ॥

ना

यज्ञायदुह्यतीतितथा

ला-च

ततमवलम्ब्य संबंधिस्नानं येन तस्मै। उष्टानां वा कथं वयेति ॥ ४ ॥ एकोनविंशे ॥ ॥ विंशे तु विष्णुना साक्षात्पृथोर्यज्ञेऽनुशासनं। वरदानप्रसंगेन प्रीतिश्चान्यो-
न्यमीर्यते। मघवता साकं इंद्रेण सह वर्तमानः। आत्मानं त्वां क्षमां कारयतोऽमुष्य ॥ २ ॥ यर्हि यस्मात्कलेवरमात्मा न भवति अतस्तदभिमानेन भूतानि नाभिद्रु-
ह्यंति ॥ ४ ॥ अविद्यामूलपाज्ञानं ततः कामः ततः कर्म तैरारब्ध इति विद्वानत एव प्रतिबुद्ध आत्मज्ञ अस्मिन्देहे नानुषज्जते। तथा पितृत्वादिममत्वेन भूतद्रो-

५२

क्षतावल्लब्धथ्यानाय श्रद्धावे भूरिकर्मणे। वरान्ददुस्ते वरदा ये तद्बर्हिषि तर्पिताः ॥ विप्राः सत्याशिषस्तुष्टाः श्रद्धया लब्धदक्षिणाः। आशि-
षो युयुजुः क्षत्तरादिराजाय सत्कृताः ॥ ४२ ॥ त्वयाहूता महाबाहो सर्व एव समागताः। पूजिता दानमानाभ्यां पितृदेवर्षिमानवाः ॥ ४२ ॥ इ-
ति श्रीभागवते महापुराणे चतुर्थस्कंधे पृथुविजये एकोनविंशोध्यायः ॥ ॥ ऋषिरुवाच ॥ ॥ भगवानपि वैकुंठः साकं मघवता
विभुः। यज्ञैर्यज्ञपतिस्तुष्टो यज्ञभुक्तमभाषत ॥ १ ॥ ॥ श्रीभगवानुवाच ॥ ॥ एष तेऽकार्षीद्भंगं हयमेधशतस्य ह। क्षमापय-
त आत्मानममुष्य क्षंतुमर्हसि ॥ २ ॥ सुधियः साधवो लोके नरदेव नरोत्तमाः। नाभिद्रुह्यंति भूतेभ्यो यर्हि नात्मा कलेवरं ॥ ३ ॥ पुरु-
षा यदि मुह्यंति त्वादृशा देवमायया। श्रम एव परं जातो दीर्घया वृद्धसेवया ॥ ४ ॥ अतः कायमिमं विद्वानविद्याकामकर्मभिः।
आरब्ध इति नैवास्मिन्प्रतिबुद्धोऽनुषज्जते ॥ ५ ॥ असंसक्तः शरीरेऽस्मिन्नमुनोत्पादिते गृहे। अपत्ये द्रविणे वापि कः कुर्यान्म-
मतां बुधः ॥ ६ ॥ एकः शुद्धः स्वयंज्योतिर्निर्गुणोऽसौ गुणाश्रयः। सर्वगोऽनावृतः साक्षी निरात्मात्मात्मनः परः ॥ ७ ॥ य एवं संत-
मात्मानमात्मस्थं वेद पूरुषः। नाज्यते प्रकृतिस्थोऽपि तद्गुणैः स मयि स्थितः ॥ ८ ॥ ॥

म

मं

५२

देहेऽण्वसंगो भवेन्नत्याह ॥ ५ ॥ असंसक्त इति। प्रतिबोधक्रममेवाह एक इति द्वाभ्यां। असावात्मा आत्मनो देहात्परः भिन्नः तत्र व-
वधा वैलक्षण्येन भेदं साधयति। एक इति न बलिः प्रदेशः। देहो हि बालयुवादिभेदादनेकः। मलिनश्च जडश्च सगुणश्च सप्रकारणभूतगुणाश्रितश्च प-
रिच्छिन्नश्च गृहादिलिप्तश्च दृश्यश्च। असौ त्वात्मा तु नैवं। अतो भिन्नः ॥ आत्मस्थं स्वदेहस्थोऽपि तद्विकारैर्न लिप्यते। यतः समयि ब्रह्मणि स्थितः ॥

७॥

वा ॥ १

स्वस्मिंस्थितं सतं वेद स प्रकृतिस्थोपि ॥ २

ति

इयमवस्थाकस्योत्पद्यत इत्यपेक्षायामाह। यः स्वधर्मेनैवतुर्लिंश्याहिविशदाशयः प्रसन्नमनाः तदा परित्यक्तगुणः सतसम्यग्दर्शनो भूत्वा शांतिमश्नुते। शांतिमेवाह। मम सम्यगोदासीन्येनावस्थानमेव ब्रह्म तदेव कैवल्यमश्नुते। सम्यग्दर्शनमेवाह। २० उदासीनमेवात्मानं द्रव्यज्ञानक्रियात्मानं देहज्ञानकर्मेंद्रियमनसां मध्ये इवस्थितमात्मानं यो वेद संसारिणः कथं कूटस्थत्वमत आह। लिंगस्य लिंगस्य देहस्य गुणप्रवाहः संसारं लिप्तत्वे हेतुः। द्रव्याद्यात्मकत्वस्य। तत्र चेतनाविदाभासः। अतो दृष्टाश्रुतप्राप्तासु हर्षशोकादिभिर्निर्विक्रि

यः स्वधर्मेनैर्मांनित्यंनिराशीः श्रद्धयान्वितः लजातेशनकेस्व स्वमनोराजन्प्रसीदति परित्यक्तगुणः सम्यक् दर्शनो विशदाशयः। शांतिमेसमवस्थानं ब्रह्म कैवल्यमश्नुते॥ २०॥ उदासीनमिवाध्यक्षं द्रव्यज्ञानक्रियात्मनां। कूटस्थमिममात्मानं यो वेदाप्नोति शोभनं॥ २१॥ लिंगस्य लिंगस्य गुणप्रवाहो द्रव्यक्रियाकारकचेतनात्मनः। दृष्टासु संपत्सु विपत्सु सूरयो न विक्रियंते मयि बद्धसौहृदाः॥ २२॥ समः समानोत्तममध्यमाधमः सुखे च दुःखे च जितेंद्रियाशयः। मयोपक्लृप्ताखिललोकसंवृतः विधत्स्व रक्षाणं॥ २३॥ श्रेयः प्रजापालनमेव राज्ञो यत्सांपरायेसुकृतात्षष्टमंशं। हर्तान्यथाहृतपुण्यः प्रजानामरक्षिता करहारोघमत्ति॥ २४॥ ॥

दृ० ३ विपत्सु सूरयो।

यंतोऽस्य त्वं च सूरिः अतः सुखे दुःखे च समः सनू समानाश्वतम मध्यमाधमाय स्वजितानींद्रियाणाशयः स्वयेन सर्वं अखिललोकरक्षाणं विधत्स्व कथं। मे केन मया कुतोऽत्र कं तत्राह। मया यैश्वरेण उपक्लृप्ता संपादिता ये खिललोका अमात्यादयस्तैः संवृतः। न सुरक्षणं दंडादिसापेक्षं अतस्त्वयोन्यहाय पुण्यं करिष्यामिति वेदत आह। २३॥ श्रेय इति। यद्यस्मात्सांपराये परलोके प्रजाभिः कृतात्सुकृतात् षष्टमंशं हर्ता हरति। अरक्षणे दोषमाह। अन्यथा प्रजाभिर्हृतपुण्यं यस्सः प्रजानामघमत्तिपापं भुंक्ते। अन्यथेत्यस्य विवरणं। करहार

संवृतो विधत्स्व सर्वं रक्षिलोक२

॥११॥

भाग॰ टीका॰ स्कं॰ ४

भा॰च॰

५२

न६ न्य प्रा

एवं च मोऽन्योऽप्यनापासेन लब्धैर्दिष्पतीत्याह। द्विजाग्र्याणामनुमतश्चासावनुवृत्तश्च परंपराप्राप्तो यो धर्मः स एव प्रधानं मुख्यं कामो तस्मासंगिकौ यस्य अन्यतमः अतिशयेनान्यो धर्मादिष्वनासक्त इत्यर्थः। एकपद्यपाठे धर्मप्रधानावनुवृत्तौ मोऽर्थकामौ यस्येत्यर्थः। अस्याः पृथिव्याः अविता सन् अल्पेन कालेन गृहागतान् सनकादीनुद्रक्ष्यसि। अनुरक्तो लोको यस्मिन् सः॥ १५ ॥ मत्तमत्तः सकाशात्कंचिद्वरं वृणीष्व गुणशमादयः शीलं निर्मत्सरत्वादिस्तावः तैरहं यंत्रितो वशीकृतः। तदाह। हि तैस्तं मखादिभिर्नाहं सुलभः। यतः समं चित्तं येषां तेषु वर्तितुं शीलं यस्य सोऽहं॥ १७॥

एवं द्विजाग्र्यानुमतानुवृत्तधर्मप्रधानोऽन्यतमोऽवितास्याः। ह्रस्वेन कालेन गृहोपयातान् द्रष्टासि सिद्धाननुरक्तलोकः॥ १५॥ वरं च मत्कंचन मानवेंद्र वृणीष्व तेऽहं गुणशीलयंत्रितः। नाहं मखैर्वै सुलभस्तपोभिर्योगेन वा यत्समचित्तवर्ती॥ १६॥ मैत्रेय उवाच॥ स इत्थं लोकगुरुणा विष्वक्सेनेन विश्वजित्। अनुशासित आदेशं शिरसा जगृहे हरेः॥ १७॥ स्पृशंतं पादयोः प्रेम्णा व्रीडितं स्वेन कर्मणा। शतक्रतुं परिष्वज्य विद्वेषं विससर्ज ह॥ १८॥ भगवानथ विश्वात्मा पृथुनोपहृतार्हणः। समुज्जिहानया भक्त्या गृहीतचरणांबुजः॥ १९॥ प्रस्थानाभिमुखोऽप्येनमनुग्रहविलंबितः। पश्यन्पद्मपलाशाक्षो न प्रतस्थे सुहृत्सतां॥

न

स्पृशंतं पादयोः स्पृशंतं स्वेन कर्मणा अश्वापहरणेन व्रीडितं प्रेम्णा परिष्वज्य॥ १८॥ भगवान् प्रस्थानाभिमुखोऽप्यनुग्रहेण विलंबितः सन्नेनं प्रतस्थे प्रयाणं न कृतवानित्यन्वयः। कथंभूतः उपहृतं अर्पितमर्हणं यस्मै सः समुज्जिहानया समुद्गच्छंत्या वर्धमानया भक्त्या गृहीते चरणांबुजे यस्य सः पद्मपलाशवदक्षिणी यस्य तथाभूतः सन् एनं पृथुं पश्यन्॥ २०॥

५२

भगवत्स्वरूपातिरेकसुखात्स्पर्शसुखोद्रेकमाह स इति द्वाभ्यां। बाष्पविक्लवत्वेन तूष्णीमवस्थितः सन् अमुं हरिं हृदोपगुह्याधादनुष्ठितवान्॥२१॥
अतृप्तयोर्दृशोर्गोचरं विषयभूतां पदा क्षितिं स्पृशंतमित्यनेनावधानं खलु देवाः पादाभ्यां स्पृशंति अतः श्रीकृष्णप्रेमपरवशो नूनं हरिरात्मानं विस्मृ
तवानिवेति। अत एव स्खलनपरिहारायैव गरुडस्यांसे उन्नते स्कंधे विन्यस्तं हस्ताग्रं येन तं। वरं वृणीष्वेति यदुक्तं तदसहमान आह॥२२॥ हे वि
भो वरदानां ब्रह्मादीनामीश्वरात् वरप्रदानां तेश्वरात्सकाशात् बुधः कथं वरान्वृणीते। कीदृशान् गुणैर्विक्रियत इति गुणविक्रियो हंसा

जो

स आदिराजो रचितांजलिर्हरिं विलोकितुं नाशकदश्रुलोचनः। न किंचनोवाच स वाष्पविक्लवो हृदोपगुह्यामुमधाद
वस्थितः॥२१॥ अथावमृज्याश्रुकला विलोकयन्नतृप्तदृग्गोचरमाह पूरुषं। पदा स्पृशंतं क्षितिमंस उन्नते विन्यस्त
हस्ताग्रमुरंगविद्विषः॥२२॥ पृथुरुवाच॥ ॥वरान्विभो त्वद्वरदेश्वराद्बुधः कथं वृणीते गुणविक्रियात्मनां। ये
नारकाणामपि संति देहिनां तानीश कैवल्यपते वृणे न च॥२३॥ न कामये नाथ तदप्यहं क्वचिन्न यत्र युष्मच्चरणा
बुजासवः। महत्तमांतर्हृदयान्मुखच्युतो विधत्स्व कर्णायुतमेष मे वरः॥ ॥२४॥

ये इति

स्ता

हे ईश एवात्मा येषां ब्रह्मादीनां स एव धिनः देहाभिमानिनां भोग्यानि तानि वा तथापि बुध एव न वृणीतीत्यर्थः। अज्ञस्य त्वदप्रीत्याहो बुध एवा
हमपि न वृणे इति सर्वथा याप चकारः। कैवल्यपत इति संबोधनात्कैवल्यं वरिष्यतीति माशंकीत्याह॥२३॥ नेति। महत्तमानामंत
र्हृदयात् मुखद्वारेण निर्गतो भगवत्पदांभोजमकरंदो यशः। श्रवणादिसुखं यत्र नास्ति तादृशं चेत्कैवल्यं तर्हि तत् क्वापि कदाचिद
पि न कामये तदाह। यशः श्रवणाय कर्णानामयुतं विधत्स्व ननु कोप्येवं न वृतवान् किमनुपपितयेत्याह। एष मे वरः॥ ॥२४॥ ॥

तर्हि किं कामयसे?

ननु तर्हि कैवल्यालाभे रागद्वेषाद्याकुलानां लक्ष्मीसुखमपि निंदितमित्याशंक्याह । स इति भवत्पदांभोजसुधायाः कणेन लेशेन तत्संबंधी यो अनिलः सए
वद्दूरादपि किंचिद्यशःश्रवणमात्रमित्यर्थः । विस्मृततत्त्ववर्त्मनां कुयोगिनामस्माकमपि पुनः स्मृतिं आत्मज्ञानं वितरति अतो न खलु लक्ष्मी
नां रागादिसेवनवशात् अतो नोऽस्माकं सारग्राहिणां मन्ये विरलं लक्ष्म्यावेव मोक्षादि सर्वं सुखांतर्भावादिति भावः । ननु तर्हि मुक्तिफले वत्त्व
न फलं विहाय साधने भवतः को मम आग्रह इत्याशंक्याह । २५ हे सुश्रव मंगलकीर्ते शिवं यशः सतां संगमे यः सकृदपि यदृच्छया

स उत्तमश्लोक महन्मुखच्युतो भवत्पदांभोजसुधाकणानिलः । स्मृतिं पुनर्विस्मृततत्त्ववर्त्मनां कुयोगि
नां नो वितरत्यलं वरैः ॥२॥ यशः शिवं सुश्रव आर्यसंगमे यदृच्छया चोपशृणोति ते सकृत् । कथं गुण
ज्ञो विरमेद्विना पशुं श्रीर्यत्प्रवव्रे गुणसंग्रहेच्छया ॥ २६ ॥ अथाभजे त्वाखिलपूरुषोत्तमं गुणाल
यं पद्मकरेव लालसः । अप्यावयोरेकपतिस्पृधोः कलिर्न स्यात्कृतत्वच्चरणैकतानयोः ॥ २७
श्रीकृष्णायनमः ॥ ॥

पि उपशृणोति गुणज्ञः श्रेष्ठः पशुं विना कथं विरमेत् गुणातिशयं सूचयति श्रीर्यशः एव प्रकर्षेण वृतवती गुणानां सर्वपुरुषा
र्थानां संग्रहेच्छा यस्मिन् समाहारः स्यादितीच्छया । अतो लक्ष्मीरिवान्यवरत्यागेन त्वामेवाहं भजे इत्याह । २६ अथेति । लालसः उत्सुकः सनूनं
मर्मणि क्रियमाणे यथेष्टेन सह कलिः एवं लक्ष्म्यापि किं लक्ष्म्या सह कलिः स्यादिति वितर्कयति । एकस्मिन्पत्यौ स्पर्धमानयोरावयोः
अपि किं कलिर्न स्यादिति का क्वावितर्कः सर्वपर्यायेन सेवायां न स्यात् । नैवं कृतत्वच्चरणयोरेवैकतानः मनो विस्तारो ययोस्त
तयोः ॥ २७ ॥ ॥ राम ॥ ॥

रत्न॰ ला॰ ७

भवत्ववाक्षिप्त तथापि लज्जेयमेवेत्याह। जगज्जनन्यां वैशसं विरोधः स्यादेव तत्र हेतुः यस्याः कर्मणि नः समीहितं इच्छा भवति तथापि इयं विरोधेमत्यल्पात्रवदत्रापि मत्सरस्य
पात्र एव स्यादित्याह। फल्गु तुच्छमपि उरु बहु करोषि यतो दीनेषु वत्सलः। स्वे धिष्ण्ये रूपे एवाभिरतस्य तया किं प्रयोजनं तां नाद्रियस इत्यर्थः। यतस्त्वं दीनवत्सलः [illegible] ॥ अत एव निष्कामा अपि अथ ज्ञानानंतरमपि त्वां भजंति कथंभूतं मायागुणानां विभ्रमो विलासस्तस्योदयः कार्यं निरस्तो यस्मिंस्तं। ते किमर्थं भजंति। तत्राह। भवत्पदानुस्मरणादृते विनान्यत्तेषां निमित्तं फलं न विद्मः। शौनकैः प्रलोभनं च कृपालोस्तवानुचितमित्याशयेनाह [illegible] ॥ मन्य इति। उरु होते वाचाते त्वायदि जनो

॥२८॥

॥२५॥

जगज्जनन्यां जगदीश वैशसं स्यादेव यत्कर्मणि नः समीहितं करोषि फल्ग्वप्युरु दीनवत्सलः स्व एव धिष्ण्येऽभिरतस्य किं तया ॥२८॥
भजंत्यथत्वामत एव साधवो व्युदस्तमायागुणविभ्रमोदयं। भवत्पदानुस्मरणादृते सतां निमित्तमन्यद्भगवन्न विद्महे ॥२९॥ मन्ये
गिरं ते जगतां विमोहिनीं वरं वृणीष्वेति भजंतमात्थ यत्। वाचा नु तंत्या यदि ते जनोऽसितः कथं पुनः कर्म करोति मोहितः॥३०॥
त्वन्मायया द्धा जन ईश खंडितो यदन्यदाशास्त ऋतात्मनोऽबुधः यथा चरेद्बालहितं पिता स्वयं तथा त्वमेवा-
र्हसि नः समीहितुम् ॥३१॥ मैत्रेय उवाच ॥ इत्यादिराजेन नुतः स विश्वदृक्तमाह राजन्मयि भक्तिरस्तु ते दिष्ट्येदृशी धीर्म-
यि ते कृता यया मायां मदीयां तरति स्म दुस्त्यजां ॥३२॥ तत्त्वं कुरु मयादिष्टमप्रमत्तः प्रजापते। मदादेशकरो लोकः सर्वत्राप्नोति शोभ-
नं ॥३२॥ ॥श्रीरामचंद्राय नमः॥ कृष्णाय नमः॥ ७ ॥श्रीरामचंद्राय नमः॥ ॥

स्थय

[illegible] असितः बद्धः कस्मात् तर्हि पुनः पुनः फलैर्मोहितः सन्कथं कर्म करोति ३० त्वन्माययाखंडितस्य त्वया पुनः खंडनं न कर्तव्यं किंतु हितं
चेष्टितव्यमित्याह त्वन्माययाद्धा अतात्मनः त्वत्तः खंडितः पृथक्कृतः। यद्यतोऽन्यत्स्त्र्यादिकमाशास्ते। अतः स्वयं अविज्ञापित एव हितं चे-
ष्टितुमर्हसि ॥३१॥ ॥श्रीरामाय नमः॥ ॥श्रीकृष्णाय नमः॥ ॥श्रीकेशवाय नमः॥ ७ ॥गोपालाय नमः॥ ७ ॥

वाग्वित्तांजलिभिर्भक्तितः पूजिताः संतः वैकुंठानुगताः पार्षदाश्च ॥ ३६ ॥ अदृष्टाय लोकचक्षुषम् अतिक्रांताय संदर्शितः आत्मा येन तस्मै ॥ ३७ ॥ चतुर्थे विंशः ॥ ॥ एकविंशे तु पृथुना प्राज्ञाना मनुशासनं । महासत्रे सुरादीनां महासदसि वर्ण्यते । पुरं प्रयाविल्ल क्रांतनुरमजु वर्णयति मै

मैत्रेय उवाच ॥ ॥ इति वैन्यस्य राजर्षेः प्रतिनंद्यार्थवद्वचः । पूजितोनुगृहीत्वैनं गंतुं चक्रेच्युतो मतिं ॥ ३४ ॥ देवर्षिपितृगंधर्वसिद्धचारणपन्नगाः । किन्नराप्सरसो मर्त्याः खगा भूतान्यनेकशः । यज्ञेश्वरधिया राज्ञा वाग्वित्तांजलिभक्तितः । सभाजिता ययुः सर्वे वैकुंठानुगतास्ततः ॥ ३६ ॥ भगवानपि राजर्षेः सोपाध्यायस्य चाच्युतः । हरन्निव मनोमुष्य स्वधाम प्रत्यगात्स्वकं ॥ ३७ ॥ अदृष्टाय नमस्कृत्य नृपः संदर्शितात्मने । वासुदेवाय देवानां देवाय स्वपुरं ययौ ॥ ३८ ॥ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे विंशोध्यायः ॥ ॥ मैत्रेय उवाच ॥ ॥ मौक्तिकैः कुसुमस्रग्भिर्दुकूलैः स्वर्णतोरणैः । महासुरभिभिर्धूपैर्मंडितं तत्र तत्र वै । चंदनागुरुतोयार्द्ररथ्याचत्वरमार्गवत् । पुष्पाक्षतफलैस्तोक्मैर्लाजैरर्चिर्भिरर्चितं ॥ २ ॥ सवृंदैः कदलीस्तंभैः पूगपोतैः परिष्कृतं । तरुपल्लवमालाभिः सर्वतः समलंकृतं ॥ ३ ॥ प्रजास्तं दीपबलिभिः संभृताशेषमंगलैः । अभीयुर्मृष्टकन्याश्च मृष्टकुंडलमंडिताः ॥ ४ ॥ शंखदुंदुभिघोषेण ब्रह्मघोषेण चर्त्विजां । विवेश भवनं वीरः स्तूयमानो गतस्मयः ॥ ५ ॥ पूजितः पूजयामास तत्र तत्र महायशाः । पौरान्जानपदांस्तांस्तान्प्रीतः प्रियवरप्रदः ॥ ६ ॥ स एवमादीन्यनवद्यचेष्टितः कर्माणि भूयांसि महान्महत्तमः । कुर्वन् शशासावनिमंडलं यशः स्फीतं निधायारुरुहे परं पदं ॥ ७ ॥ ॥

क्तिकैरिति त्रिभिः । चंदनागुरुतोयैरार्द्रा रथ्यादयः यस्मिन् तत् । तोक्मैर्हरितयवैः अंकुरैरिति वा । अर्चिर्भिर्दीपैः ॥ ३ ॥ संभृतानि अशेषाणि मंगलानि दध्यादीनि तैः सह अभिजग्मुः । मृष्टा उज्ज्वलाः कन्याश्च ॥ ४ ॥ गतस्मयो निरहंकारः ५ प्रियान्वरान्प्रददातीति तथा ॥ ६ ॥ गुणैर्महांतः अत एव महत्तमः पूज्यतमः ॥ ७ ॥ ॥

श्री

गुणैर्विजृंभितं प्रवृत्तं गुणवत्सु सभाजितं सत्कृतं यशो गृणंतं मैत्रेयमर्चयन्प्राह हा सदस्पते शौनक लब्धानशेषसुराणामर्हणानि येन सः किं भक्त्वा दिति शेषः श्रवणेत्सुक्यमाविःकुर्वन्नु प्रार्थयते ॥९॥ को न्विति यस्य विक्रमः पृथ्वीदोहनं तस्योच्छिष्टं तल्लब्धं कामं तन्मे स्य कर्म वद ॥१०॥ प्राचीनकर्माणि आरब्धानेव बुभुजे । न तु भोगार्थं कर्माणि करोतीति तदपि भोगेन पुण्यक्षयेण छयान्नु सुखास क्षयेत्यर्थः ॥११॥ अस्खलित आप्रति

सूत उवाच ॥ तदादिराजस्य यशो विजृंभितं गुणैरशेषैर्गुणवत्सभाजितं । क्षत्ता महाभागवतः सदस्पते कौषारविं प्राह गृणंतमर्चयन् ॥१॥ विदुर उवाच ॥ सोऽभिषिक्तः पृथुर्विप्रैर्लब्धाशेषसुरार्हणः । बिभ्रत्स वैष्णवं तेजो बाह्वोर्याभ्यां दुदोह गां ॥२॥ को न्वस्य कीर्तिं न शृणोत्यभिज्ञो यद्विक्रमोच्छिष्टमशेषभूपाः । लोकाः सपाला उपजीवंति काममद्यापि तन्मे वद कर्म शुद्धं ॥३॥ मैत्रेय उवाच ॥ गंगायमुनयोर्नद्योरंतरा क्षेत्रमावसन् । आरब्धानेव बुभुजे भोगान्पुण्यजिहासया ॥१॥ सर्वत्रास्खलितादेशः सप्तद्वीपैकदंडधृक् । अन्यत्र ब्राह्मणकुलादन्यत्राच्युतगोत्रतः ॥१३॥ एकदासीन्महासत्रदीक्षा तत्र दिवौकसां । समाजो ब्रह्मर्षीणां च राजर्षीणां च सत्तम ॥१३॥ तस्मिन्नर्हत्सु सर्वेषु स्वर्चितेषु यथार्हतः । उत्थितः सदसो मध्ये ताराणामुडुराडिव ॥१४॥ प्रांशुः पीनायतभुजो गौरः कंजारुणेक्षणः । सुनासः सुमुखः सौम्यः पीनांसः सुद्विजस्मितः ॥१५॥

हत आदेश आज्ञा यस्य सः सप्तद्वीपेष्वेक एकदंडं धारयतीति तथा किं सर्वत्र नेत्याह ब्राह्मणकुलव्यतिरेकेण अच्युतगोत्र वैष्णवकुल्यो येषां वैष्णवानां तद्व्यतिरेकेण च ॥१२॥ एकदा तस्य महासत्रदीक्षा आसीत् तत्र सत्रे देवादीनां समाज आसीदित्यर्थः ॥१३॥ तस्मिन्नृज्येषु स्वर्चितेषु सत्सु । सदसो मध्ये उत्थितः सत्सु मंततः सुमेरुः तेषिषु श्लोके नाद्वयम् ॥१४॥ प्रांशुः उन्नतः पीनौ चायतौ च दीर्घौ भुजौ यस्य । कंजं च तदरुणे ईक्षणे यस्य । शोभना द्विजाः स्मितं च यस्य ॥१५॥

सा॰च॰ ५६ स्य गा

त्वमेकआद्यःपुरुषःसुप्तशक्तिस्तयारजःसत्वतमोविभिद्यते।महानहंखंमरुदग्निवार्धराःसुरर्षयोभूतगणाइदंय
तः॥६३॥सृष्टंस्वशक्त्येदमनुप्रविष्टश्चतुर्विधंपुरमात्मांशकेन।अथोविदुस्तंपुरुषंसंतमंतर्भुंक्तेहृषीकैर्म
धुसारघंयः॥६४॥सएषलोकानतिचंडवेगोविकर्षसित्वंखलुकालयानः।भूतानिभूतैरनुमेयतत्वोघनावली
र्वायुरिवाविषह्यः॥६५॥ श्रीरामचंद्रायनमः॥ ॥

घा
१५

नेत्याहासंख्यामधुमक्षिकाभ्रामरिःसृष्टंमधुवसुगल्पकंविषयसुखमविहन्नःसतयोर्भुंक्तेतंजीवंविदुश्चतथाचश्रुतिः।तयोरन्यःपिप्पलंस्वाद्व
त्त्यैनश्ननन्नन्योअभिचाकशीतीतिनिर्णीतंचगुहांप्रविष्टावात्मानौहितदर्शनादित्यत्रातवसर्वनियंतुःकृतःसंसारइत्याह।यःस्वशक्त्येदंसृष्ट
वान्॥६४॥सएषत्वंखलुभूतैरिवभूतानिमेघपंक्तीर्वायुरिवकालयन्नविचालयन्लोकान्विकर्षसिसंहरसिअनुमेयतत्वश्चलक्ष्यस्व
रूपः॥६५॥ राम

ला॰च॰
७२

विकर्षणप्रकारमाह। प्रमत्तमिति। इतिकृत्यं एवमेवमिदं कर्त्तव्यमिति चिंतयोच्चैः प्रमत्तं। तत्र हेतुर्विषयेषु लालसं आतिकामुकां प्राप्तेपि विषयेषु प्रवृद्धलोभं। अंतकस्त्वमतिपद्यसे। आक्रामसि। क्षुधा लेलिहानः जिह्वया ओष्ठप्रांतौ स्पृशन् सर्पो मूषकमिव॥ ६६॥ अतः कस्त्वत्पदाब्जं त्यजेत। पंडितस्त्यजेत। कथं भूतः। यस्त्वां वा वर्मी नोऽनादरेण न व्ययमानं केतनं शरीरं यस्य सः। यदस्माकं गुरुर्ब्रह्मार्चति। स्मेति सर्वेषां ह्योतृणां वाक्यं। विशंकया नाशशंकया। विनोपपत्तिमिति हृदि विश्वासेन मनवश्चतुर्दशैतिस्म। उपसंहरति अथेति उडुलयेन ध्रुवं। अतः नक्तं तच्छिद्रं इयं य

प्रमत्तमुच्चैरितिकृत्यचिंतया प्रवृद्धलोभं विषयेषु लालसं। त्वमप्रमत्तः सहसाऽभिपद्यसे क्षुल्लेलिहानोऽहिरिवाखुमंतकः॥ ६६॥ कस्त्वत्पदाब्जं विजहाति पंडितो यस्तेऽवमानव्ययमानकेतनः। विशंकयास्मद्गुरुरर्चति स्म यद्विनोपपत्तिं मनवश्चतुर्दश॥ ६७॥ अथ त्वमासि नो ब्रह्मन्परमात्मन्विपश्चितां। विश्वं रुद्रभयध्वस्तमकुतश्चिद्भया गतिः॥ ६८॥ इदं जपत भद्रं वो विशुद्धा नृपनंदनाः। स्वधर्ममनुतिष्ठंतो भगवत्यर्पिताशयाः॥ ६९॥ तमेवात्मानमात्मस्थं सर्वभूतेष्ववस्थितं। पूजयध्वं गृणंतश्च ध्यायंतश्चासकृद्धरिं॥ ७०॥ योगादेशमुपासाद्य धारयंतो मुनिव्रताः। समाहितधियः सर्व एतदभ्यसताहृताः॥ ७१॥ इदमाह पुरास्माकं भगवान्विश्वसृक्पतिः। भृग्वादीनामात्मजानां सिसृक्षुः संसिसृक्षतां॥ ७२॥ ते वयं नोदिताः सर्वे प्रजासर्गे प्रजेश्वराः। अनेन ध्वस्ततमसः सिसृक्ष्मो विविधाः प्रजाः॥ ७३॥ अथेदं नित्यदा युक्तो जपन्नवहितः पुमान्। अचिराच्छ्रेय आप्नोति वासुदेवपरायणः॥ ७४॥ ॥

स्यांता हृशीगतिरसि। योगादेशं नामैतत्स्तोत्रं उपासाद्य पाठतः प्राप्य मनसा धारयंतश्च अभ्यासेन जपत॥ ७१॥ विश्वसृजां पतिर्ब्रह्मा॥ ७२॥ सिसृक्ष्मः सृष्टवंतः॥ ७३॥॥ सुक्तः एकायविंशः॥ ॥ ॥ श्रीरामायनमः॥ ॥

तुं
ति
त्य
७२

श्री नू

ज्ञानमेवनौर्यस्य॥७५॥ योऽधीयानो नलवति शुचिः सोऽत्र द्याचक्षणाद्दरैः सैन्वरः च्छिरः सत्वा महीनं नो वर्तते न गीता न एकएव बल्लभः प्रियस्य आश्रयस्य स्मात् ॥ एकापव
बल्लभः प्रियमाश्रयस्य सामर्थ्य ॥ ७७ ॥ कल्ये उषसि । तपश्चरतां तपसोऽते ईप्सितं प्राप्स्यथ ॥ ॥ चतुर्थे चतुर्विंशः ॥ ॥ प्रचेतःसुतपस्सुतत्पित्रे नारदो घृणी ।
प्राचीनवर्हिषोऽध्यात्मं परोक्षेण हपंचलिंशे पुरंजनकथाव्याजात् पंचविंशे तु नारदः ॥ आत्मनो बुद्धिसंगेन विविधा मोहसंसृतिः ॥ प्रचेतःसुतप

श्रेयसामिह सर्वेषां ज्ञानं निःश्रेयसं परं सुखं तरति दुष्पारं ज्ञाननौर्व्यसनार्णवं ॥ ७५ ॥ य इमं श्रद्धया युक्तो मद्गीतं भगवत्स्तवं ।
अधीयानो दुराराध्यं हरिमाराधयत्यसौ ॥ ७६ ॥ विंदते पुरुषोऽमुष्माद्यद्यदिच्छत्यसत्वरं मद्गीतगीतात्सुप्रीतात् श्रेयसामेकव
ल्लभात् ॥ ७७ ॥ इदं यः कल्य उत्थाय प्रांजलिः श्रद्धयान्वितः । शृणुयाच्छ्रावयेन्मर्त्यो मुच्यते कर्मबंधनैः ॥ ७८ ॥ गीतं मयेदं
नरदेवनंदनाः परस्य पुंसः परमात्मनः स्तवं । जपंत एकाग्रधियः तपो महच्चरध्वमंते तत आप्स्यथेप्सितं ॥ ७९ ॥ इति
श्रीभागवते महापुराणे चतुर्थस्कंधे ॥ रुद्रगीतं नाम चतुर्विंशोऽध्यायः ॥ ॥ श्रीमैत्रेय उवाच ॥ ॥ इति संदिश्य भगवान्
वर्हिषदैरभिपूजितः पश्यतां राजपुत्राणां तत्रैवांतर्दधे हरः ॥ रुद्रगीतं भगवतः स्तोत्रं सर्वे प्रचेतसः । जपंतस्ते तपस्तेपुर्वर्षा
णामयुतं जले ॥ २ ॥ प्राचीनवर्हिषं क्षत्तः कर्मस्वासक्तमानसं । नारदोऽध्यात्मतत्त्वज्ञः कृपालुः प्रत्यबोधयत् ॥ ३ ॥ श्रेयस्त्वं कतम
द्राजन्कर्मणात्मन ईहसे । दुःखहानिः सुखावाप्तिः श्रेयस्तन्नेह चेष्यते ॥ ४ ॥ राजोवाच ॥ ॥ न जानामि महाभाग परं कर्माप
विद्धधीः । ब्रूहि मे विमलं ज्ञानं येन मुच्येय कर्मभिः ॥ ५ ॥ गृहेषु कूटधर्मेषु पुत्रदारधनार्थधीः न परं विंदते मूढो भ्राम्यन्संसा
रवर्त्मसु ॥ ॥ ६३

धी — नू — चेत ४

स्त्रीवंतप्यमानेषु नारदः पुरंजनकथाकूटेनाह प्राचीनवर्हिषे ॥ प्रचेतःसु तपश्चरत्सु नारदः प्राचीनवर्हिषं बोधितवानित्याह ततः प्रचेतसां क
मुसमाप्येव ततिउ ईर्षमाह ॥ २ ॥ प्राचीनवर्हिषमिति ॥ श्रेयः फलं ईहसे इच्छसि । इह कर्मणि तदुभयं नेष्यते विचारकैः परं श्रेयः मोक्षः कर्म
तिरपविद्धा विक्षिप्ता धीर्यस्य । किं च गृहेषु स्थितः उत्तरादिष्वेव पुत्रादिषु धीर्यस्य ॥ ॥

भा॰च॰ कर्म्मफलेषु वैराग्यमुत्पाद्य ब्रह्मविद्यामुपदेष्टुं ये गानुलाबेनयज्ञपशून्प्रत्यक्षं प्रदर्शयन्हिंसालो इति संज्ञापितान्मारितान् ७ एते त्वां संपरेतं मृतं सं
प्रतीक्षंते वैशसं त्वत्कृतां पीडां स्मरंतः। ततस्त्वं अयःकूटैर्लोहयंत्रमयैः शृंगैश्छिंदंति छेत्स्यंति ८ अत्र अस्मिन्संकटे निस्तारकम इतिहासं कथयिष्या
मि। तत्र जीवस्य विषयासक्त्या संसारः स चेश्वरानुग्रहेण निवर्तत इति। वक्ष्यति विपर्ययं गृहीतस्य सा क्रोधपित्र मशक्त्या राजर्षे तातमिवाह। आसीदि
ति पुरंजनादीन्नामभयमेवेतः पंचमेधा यथा व्याख्यास्यति तथापि दुरवग्रहणाय यथोपयोगं किंचिद्व्याख्यास्यामः। तत्र स्वकर्मलिंगं पुरं जनयतीति पु
रंजनो जीवः। न विज्ञातं नाम यस्य न च विज्ञातं चेष्टितं यस्य स ईश्वरस्तस्य सखा। यद्वा विज्ञातं वेष्टितं जीवप्रेरणादिलक्षणं यस्य। जीवपारतंत्र्यस्या

श्रीनारद उवाच॥ ॥लोलोप्रजापते राजन्पशून्पश्य त्वयाऽध्वरे। संज्ञापिताञ्जीवसंघान्निर्घृणेन सहस्रशः॥ ७ ॥एते त्वां
संप्रतीक्षंते स्मरंतो वैशसं तव। संपरेतमयःकूटैश्छिंदंत्युत्थितमन्यवः॥ ८ ॥अत्र ते कथयिष्येऽमुमितिहासं पुरातनं। पुरं
जनस्य चरितं निबोध गदतो मम। आसीत्पुरंजनो नाम राजा राजन्बृहच्छ्रवाः। तस्याविज्ञातनामासीत्सखाविज्ञातचेष्टितः॥ १०॥
सोऽन्वेषमाणः शरणं बभ्राम पृथिवीं प्रभुः। नानुरूपं यदाविंददभूत्स विमना इव॥ ११ ॥न साधु मेने ताः सर्वा भूतले यावतीः पु
रः। कामान्कामयमानोऽसौ तस्य तस्योपपत्तये॥ १२ ॥स एकदा हिमवतो दक्षिणेष्वथ सानुषु। ददर्श नवभिर्द्वार्भिः पुरं लक्षि
ये तलक्षणां॥ १३ ॥ ॥

त्मुलवसि द्रष्टव्यात्॥ ९॥ शरणं लोगायतनं देहं॥ ११॥ यावत्यः पुरस्तासु तस्य कामस्योपपत्तये प्राप्तौ साधु न मेने। भोगाद्यादिदेहानामैहिकपारलौकिकलोगलो
गप्तत्वासावाद्यात न घा च च्छ्रुतिः। ता स्योप्राणानयज्ञा अश्रुवद्व वै नोऽयमलमिति तान्स्वोप्यमानयज्ञा अश्रुवदन्नवै नोऽयमलमिति॥ १२॥ हिमवतो दक्षि
णेषु सानुषु कर्मक्षेत्रे भारतवर्षे। पुरं मनुष्यशरीरं लक्षितानि द्रष्टानि सर्वाणि लक्षणानि यस्यां। अंधपंग्वादिदोषरहितमित्यर्थः॥ १३॥ ॥

क्षि

७३

नं॰ कं॰ चि॰ १ वै॰ १

नि

तामद्भुवर्णयति त्रिभिः । प्राकारेति । अथ नृपः किं वित्साहशमवलंब्य कथा सौंदर्याय प्राकारादीनि वर्णयते । परिखैरिति उंश्च मीर्षे । अन्यानि गवाक्षाः । त्वगादयः
शरीरावयवाः प्राकारादिषु रावयवत्वेन रूप्यंते । स्वर्णादिशृंगैः शिखरैर्युक्ताये गृहाः तैः संकुलामिति । आधारादित्वक्राणि गृहाणि शृंगाणि
वराजसादिवत् लावाविवक्षिताः । नीलादिभिः रत्नैः आहर्म्यस्थलीयस्यां अरुणैर्माणिक्यं स्थलीहृदयं । नाभी नीलादिलावेन रूप्यंते त अहिप्रयत्न
स्तनावा । भोगवती नागानां पुरीमिव । सत्ता समाजेक्षानं चत्वरं यत्र नुःपथैः रथ्या राजमार्गैः आक्रीडायतनं द्यूतादिस्थानं आपणो हट्टैः ।
चैत्यं सनानां विश्रामस्थानं ध्वजेषु पताका आलिभिः युक्तां । अत्र च विषयनिष्ठबुद्धियोगे न जीवदेहसंबंध इति विविक्तया विषयवर्गवाह्योप

प्राकारोपवनाट्टालपरिखैः रत्नतोरणैः । शाखोपरौप्यायसैः शृंगैः संकुलां सर्वतो गृहैः ॥ २४ ॥ नीलस्फटिकवैडूर्यमुक्तामर
कतारुणैः । रत्नैः प्रहर्म्यस्थलीं दीप्तां श्रिया भोगवतीमिव ॥ २५ ॥ सभाचत्वररथ्यालिराक्रीडायतनापणैः । चैत्यध्वजपता
कालियुक्तां विद्रुमवेदिभिः ॥ २६ ॥ पर्यास्त वाह्योपवने दिव्यद्रुमलताकुले । नदद्विहंगालिकुलकोलाहलजलाशये ।
॥ २७ ॥ हिमनिर्झरविप्रुष्मत्कुसुमाकरवायुना । चलत्प्रवालविटपनलिनीतटसंपदि ॥ २८ ॥ नानारण्यमृगव्रातैरनाबाधैर्मु
निवृतैः । आहूतं मन्यते पान्थो यत्र कोकिलकूजितैः ॥ २९ ॥ यदृच्छयाऽगतीतत्र ददर्श प्रमदोत्तमां ॥ ॥

स्व

वर्नतेन नृपस्थितिं तद्विशेषान्वयस्य चंदनादीन्विद्रुमलतादिलावेनाशेषश्चत्वालंकारः । वाह्योपवने प्रमादां ददर्शेति । वक्ष्यर्थे नान्वयः । नदतां
विहंगालिकुलानां कोलाहलो येषु ते जलाशया यस्मिन् । हिमनिर्झराणां विप्रुषो विंदवः तद्वता कुसुमाकरसंबंधिना वायुना चलंतः प्रवालावि
टपाः शाखाश्च येषां तैः हृत्वे नलिनीनां सरसीनां तटेषु संपत्समृद्धिर्यस्मिन् । अनाबाधैः तत्कृतवाधारहितैः मुनिवृत्तैरहिंस्त्रैः । आत्मानमाहूतं
मन्यते यत्र । तत्र प्रमदोत्तमां विवेकवतीं बुद्धिं च ददर्श यदृच्छयाऽगतामिति तयोः संबंधस्य दुर्निरूपत्वं दर्शयति ॥ ॥ ९ ॥

ली

विषय

तामनुवर्णयति सार्द्धैश्चतुर्भिः। दशभिर्ज्ञानकर्मेन्द्रियैः। एकैकं प्रत्येकं शतं अनंतान्द्दन्नयुक्तासां नायकैः। प्रतिभिः सहापांगंतरे नायिकाश्रियो येषां ते॥ २०॥ पंच
शीर्षाणि हत्त्रयो यस्य तेन अहिना प्राणेन प्रतीहारेण पालकेन गुप्तां। कषसं लग्नोरं। गंधज्ञानादिभिर्बुद्ध्यवयवैः चुनासत्वादि रूप्यते॥ २१॥ समंविन्य
स्तौ रचितौ कर्णौ तास्यां कुंडलश्रीसां दधती॥ २३॥ अन्नमयं हि सौम्य मन इतियत्कुलं तद्वस्पेत्यादिश्रुत्यनुसारेण श्यामामिलक्ष्मीं। नूपुरैर्वक्रेण
तस्यां नूपुरेण पदांगुलीयकानामप्युपलक्षणाद्बहुवचनं। व्यंजितं कैशोरं यौवनोपक्रमो यया तस्यां। समौ वृत्तौ च॥ २४॥ तामाहेति तयोः संवादोक्तिः

स्तुत्यैर्दशभिरायांतीमेकैकशतनायकैः॥ २०॥ पंचशीर्षाहिनागुप्तां प्रतीहारेण सर्वतः। अन्वेषमाणां स्पष्टलमध्यौढंकामनू
पिणीं॥ २१॥ सुनासां सुदतीं बालां शुकपोलां वराननां। समविन्यस्तकर्णाभ्यां बिभ्रतीं कुंडलश्रियं। पिशंगनीवीं सुश्रोणीं श्यामां
कनकमेखलां। पद्भ्यां क्वणद्भ्यां चलतीं नूपुरैर्देवतामिव॥ २३॥ स्तनौ व्यंजितकैशोरौ समवृत्तौ निरंतरौ। वस्त्रांतेन निगूहंतीं व्रीड
या गजगामिनीं॥ २४॥ तामाह ललितं वीरः सव्रीडस्मितशोभनां। स्निग्धेनापांगपुंखेन स्पृष्टः प्रेमोद्भ्रमद्भ्रुवा॥ २५॥ का त्वं कंजपलाशा
क्षि कस्यासीह कुतः सति। इमामुपपुरीं भीरु किं चिकीर्षसि शंस मे॥ २६॥ क एतेनुपथा ये त एकादश महाभटाः। एता वा ललनाः
सुभ्रु कोयं तेहिः पुरःसरः॥ २७॥

संबंधदार्ढ्याय अपांग एव पुंखो मूलप्रांतो यस्य क्रुद्धस्य बाणस्य तेन स्पृष्टो विद्धः। प्रेम्णा उद्भ्रमंती भ्रूर्धनुःस्थानीया यस्मिन्नूतेन॥ २५॥ कुतः स्थानादि
आगता। असि इह सति। पुर्याः समीपस्थां उपपुरीभूतां मां लब्ध्या किं कर्तुमिच्छसीत्यर्थः॥ २६॥ तव ये नुपथाः अनुवर्तिन एते को एकादश महाभ
टा इह ललनात्वेन वक्ष्यमाणा ये पंचदश प्राणास्तौ बुद्धैर्मनसः पृथगुपादानं बुद्धिपरिचारकेंद्रियसहायतया तत्परिचारकत्वविवक्षया॥ ॥१०॥

त्वंद्गी किं पतिं धर्मं विविद्गती। अथवा लवानी पतिं शिवं विविद्गती किंवा क सरस्वती पतिं ब्रह्माणं रमा वा पतिं विष्णुं ऋषि रिव संयता सती कथं
भूतं पतिं त्वदं डिका मेणै वत्वत्कृत या त्न दंडिका मुन यैव आ प्ताः समस्ताः का मा येन तं। हे वरो उ आ सां मध्ये त्व मन्यत मा ऽपि न स्तुवति। यतो भुवि स्तु
का न हि देवता भुवं स्तु शंति। वीरवरेण मया परं वंकृतं ॥ २९ ॥ यद्यस्मात्त्वा पा गेन विषं डितमि डियं मनो यस्य तं मां मनो लवावा वृते। अथ तस्मा
दनु गृहाण स ब्रीडं यद्भावेन प्रेम्णा स्मितं तेन विद्व मंती यो ध्रुः तयात पट्ट ष्टो प्रेरितः॥ ३०॥ यद्रीड एव संमुखं नलवति तदा नन मुखं यमे दर्शय

त्वं ब्रीलं दान्यस्यः यवा यमा पतिं विचिन्वती किं मुनिं वद्दहो वनो। त्वदं डिका मा ऽपसमस्त का मं क्व पद्मको शः पतितः कण्यात
॥ २८ ॥ ना सा व रो र्वन्युत मा भुवि स्तु कपुरी मि मां वीरवरेण मा कां। अर्हस्य लं कर्तुमद स्व कर्मणा लोकां परं ब्रीरिव यन्न पुंसा ॥ २९ ॥
यदेष मा पां गवि खं तंडियं सब्री ड सावस्मितविलमङ्गवा। त्वयोपदृष्टो लगवान्मनो लवः प्रवाधते या नुगृहाण शो लने ॥ ३० ॥ त्व
मानन मुग्धु सुता र लोचनं व्यालं बिनीला लक वृंद संहतं। उन्नीय मे दर्शय वल्गु वाचकं यद्ब्रीडया नाति मुखं त्वविस्मिते ॥ ३१ ॥
इक्षेप्स रं जनं तारी या चमानमधीरवत्। अत्य वंत तवी रं हसं ती वीरमाहिता ॥ ३२ ॥ न वि दा मव यं सम्यक् कर्त्तारं प्रपर्षल
आत्मन श्च परस्यापि गोत्रं नामच यत्कृतं ॥ ३३ ॥ इहा द्य संत मात्मानं विदा मनततः पारो। येने यं निर्म्मिता वीर पुरी शरणमात्मनः
॥ ३४ ॥ ॥

शो लने भ्रुवो यस्मिन्। सुतारे शो लनैक नी निके लोचने यस्मिन् व्यालं बिनो दीर्घ्य येनीला अलका स्तेषां वृंदेन संहतं तावल्लू नि भ्रवकानि वा क्यानि य
स्मिन् ॥ ३१ ॥ हे वीर। सा ऽपि तं दृष्ट्वा मोहिता सती तमाहा यत्त्वहं कस्य सीत्यनेन कस्य पुत्री गोत्र ज्ञेती का अमिति च किंनामा सी ति। तत्रा हा ॥ ३२
आत्मनो मम परस्य त वा पि कर्त्तारं सम्यग्न विद्मः। गोत्रनाम च यत्कृतं तव ति तं च न विद्मः आत्मनो मम शरणमियं पुरी येन निर्मिता तं च न
विद्मः ॥ ३४ ॥ राम ॥

यत्स्तुष्टं कएते अनुपथा इति तत्राह। एत इति। अस्मिं नाम गोत्रादि ॥ ३५ ॥ यदत्रागतोऽसि एतद्दिष्ट्या लद्धं तावशं ग्राम्यान् इंद्रियग्रामाः हर्म्यं। तदुद्वहिष्यामि सं पाद
यिष्यामि। सुवंधुलिः सखीति च ॥ ३६ ॥ समाः संवत्सराः। मनुष्यदेहप्रवेशाद्व्रतमितः सा। यद्वत्रिंशल्लावत्वात्रिंशत्रिनिंद्रा पूर्वकं तत्संगमहिनंदति पुं
वलिः ॥ ३७ ॥ त्वत्तोऽन्यं कं तु रमये। ... नेष्टिकं। अकोविदं अनिषिद्धसुखत्यागिनं संपरायो मृत्युस्तद्दनलिमुखं परलोकचिंताशून्यं। अश्वस्तन
विदं श्व इदं कार्यं भविष्यमिती हलोकेवि ता ऽभून्यं। पशुतुल्यं ॥ ३८ ॥ अत्र गार्हस्थ्ये प्रज्ञानंदः पुत्रसुखं अमृतं मोक्षः। केवलिनो यतयः ॥ ३९ ॥ ए

एतमस्वायः सख्यो मे नरनार्यो ऽसमानदाः। सुप्तायां मयि जागर्ति नागोऽयं पालयन् पुरीं ॥ ३५ ॥ दिष्ट्यागतोऽसि लद्धं ते ग्राम्यान्कामा
न् लीप्ससे। उद्वहिष्यामि तांस्तेऽहं स्वबंधुभिररिंदम ॥ ३६ ॥ इमां त्वमधितिष्ठस्व पुरीं नवमुखीं विभो। मयोपनीतान् गृह्णानः कामा
न्भोगान् शतं समाः ॥ ३७ ॥ कं नु त्वदन्यं रमये ह्यरतिज्ञमकोविदम्। असंपरायाभिमुखमश्वस्तनविदं पशुं ॥ ३८ ॥ धर्मो
ह्यत्रार्थकामौ च प्रजानंदोऽमृतं यशः। लोका विशोका विरजा यान्न केवलिनो विदुः ॥ ३९ ॥ पितृदेवर्षिमर्त्यानां भूतानामात्म
नश्च हि। क्षेम्यं वदंति शरणं भवेऽस्मिन् यद्गृहाश्रमः ॥ ४० ॥ का नाम वीर विख्यातं वदान्यं प्रियदर्शनं। न वृणीत पतिं प्राप्तं मादृशी त्वा
दृशं स्वयं ॥ ४१ ॥ कस्या मनस्ते भुवि भोगिभोगयोः स्त्रिया न सज्जेद्भुजयोर्महाभुज। योऽनाथवर्गाधिमलं घृणोद्धतस्मितावलोके
न चरत्यपोहितुं ॥ ४२ ॥ श्रीनारद उवाच ॥ इति तौ दंपती तत्र समुद्य समयं मिथः। तां प्रविश्य पुरीं राजन्मुमुदाते शतं
समाः ॥ ४३ ॥

हाश्रम इति यत एतच्च क्षेम्यं हं शरणमाश्रयं वदंति ॥ ४२ ॥ भोगिभोगयोः सर्पदेहाकारयोस्तव भुजयोर्यन्न सज्जेत एवंभूतकस्याः स्त्रियो मनः स्यात्
न कस्या अपि। योऽनाथवर्गादीनस्तोमाधिं अलमत्यर्थं अपोहितुं सर्वत्र चरति। केनापोहितुं। घृणया उद्धतः अतिशयि
तो यः स्मितपूर्वकोऽवलोकस्तेन ॥ ४३ ॥ समुद्य समुदीर्य हि समाः संवत्सरान् ॥ ॥

७५

तत्र ॥४४॥ स्या ... ॥४३॥

तत्र जाग्रदवस्थां संक्षेपेणाह। उपगीयमाण इति। शुश्रावस्थामाहाद्भ्रंदिनीहृदयाकाशं छायाप्रस्थाम्भुनौनिद्रायौ। इदानीं नवद्वारस्य दर्शनपूर्वकं जाग्रदवस्थां प्रपंचयति सप्तेति यावदध्यायसमाप्तिः ॥४४॥ तस्याः पुरस्तु परिष्कृताः द्वाः सप्त। कृताः इति। पाठे सप्त ताः। नेत्रे नासिके श्रोत्रे मुखं चेति सप्त। अधो द्वे द्वारौ गुदलिंगे यः कश्चनेति। आत्मनः सम्यगविज्ञानादनियन्त्वाद्वेति सुसप्त पंचद्वारस्य पौरस्त्याः पूर्वदिग्लवाः ॥४६॥ पिद्योतवदल्पप्रकाशा वामनेत्ररूपा। आविःप्रकटं मुखं यस्याः सा वक्तृप्रकाशा दक्षिणा नेत्रलक्षणा तस्माद्दक्षिणो ऽपि ईआत्मनो वीर्यवत्त्वं इति। श्रुतेः। भ्राजल वा

उपगीयमानो ललितं तत्र वा यत्कैटभक्रीडन्नुपरिष्टतश्रीलिहृदिनीमादिशन्तु चौ ॥४३॥ सप्तोपरिष्टाता द्वारः पुरस्त्रस्यास्तद्वे अधः। पृथक् विषयगत्यर्थं तस्यांयः कश्चनेश्वरः ॥४५॥ पंचद्वारस्य पौरस्त्या दक्षिणैकातथोत्तरा। पश्चिमे द्वे अमूषां ते नामानि नृप वर्णये ॥४६॥ खद्योताविर्मुखी च प्राक्द्वारावेकत्र निर्मिते विभ्राजितं जनपदं याति ताभ्यां द्युमत्सखः। नलिनी नालिनी च प्राग्द्वारावेकत्र निर्मिते। अवधूत सखस्ताभ्यां विषयं याति सौरभं ॥४८॥ मुख्या नाम पुरस्ताद्द्वास्तयाऽऽपणबहूदनौ विषयौ याति तत्र

रसज्ञविपणान्वितः ॥ ॥१॥ ॥श्रीरामाय नमः॥ ॥

प्रतत्र प्रकाशाधिक्यात् एकत्र संलग्ने। विभ्राजितं रूपं द्युमत्सखश्चक्षुः संहितः ॥४७॥ नलनालशब्दो छिद्रवचनो तद्वती नलिनी नालिनी च नासे दक्षिणनासिके। अत्रापि संज्ञा भेदादेव कार्यन्यूनाधिक्यं पूर्ववत् ज्ञेयं। अवधूतो वायुरिति तो घ्राणः सौरभं गंधं। मुख्या प्रधाना आस्यं आपणो तया लापणं बहूदनं श्चित्रमन्नं। वक्ष्यो दनस्यानुक्तिः परोक्षवादत्वात् रसज्ञः रसनेन्द्रियं विपणो वागिन्द्रियं ताभ्यामन्वितः ॥४९॥ ॥

य। घा।

निर्ऋतिर्नाम पश्चाद्द्वास्तया याति पुरंजनः॥ वैशसं नाम विषयं लुब्धकेन समन्वितः॥५३॥

दि ती

दक्षिणेनेति चन ह्वतीयाकिंतु दक्षिणस्यां दिशीत्यस्मिन्नर्थे तद्धितोऽप्यमेन प्रत्ययो ऽव्ययसंज्ञः। एवमुत्तरेणेति॥ अथ मर्थ्यं पंचानां विषयानाम
न्यतो नवगतानां प्रकाशनायालमितिपंचालं शास्त्रं श्रवणकाले चैव लाक्षिक्या दक्षिणकर्णः पुष्पं प्रवर्त्तते। शास्त्रं च प्रथमं श्रोतव्यं कर्म
कांडमित्येतावतासाम्येन प्रवृत्तं संज्ञस्य कर्मकांडस्य दक्षिणकर्णेन श्रवणमिष्यते। ततस्तदर्थमनुष्ठाय पितृलोकं गच्छतः पितृलोकप्राप
कं पितृयानं प्रपद्यते तदनेन प्रकारेण पितृणामाह्वानमनेन लब्धतीति पितृहूर्दक्षिणकर्णः॥५०॥ एवं तर्हि प्रवृत्तेनोत्तरः कर्णो देवहूस्तथा
चव्याख्यास्यति। पितृहूर्दक्षिणः कर्ण उत्तरो देवहूः स्मृतः प्रवृत्तं च निवृत्तं च शास्त्रं पंचालसंज्ञिकं। पितृयानं देवयानं श्रोतात्श्रुतधरादनु

पितृहूर्नृप पुर्या द्वार्दक्षिणेन पुरंजनः राष्ट्रं दक्षिणपंचालं याति श्रुतधरान्वितः॥५१॥ देवहूर्नाम पुर्या द्वा उत्तरेण पुरंजनः
राष्ट्रमुत्तरपंचालं याति श्रुतधरान्वितः॥५२॥ आसुरी नाम पश्चाद्द्वास्तया याति पुरंजनः ग्रामकं नाम विषयं दुर्मदेन समन्वि
तः॥५३॥ अंधावमीषां पौराणां निर्वाक्पेशस्कृतावुभौ अक्षण्वतामधिपतिर्याभ्यां याति करोति च॥५४॥ स यर्ह्यंतःपुरग
तो विषूचीनसमन्वितः मोहं प्रसादं हर्षं वा याति जायात्मजोद्भवं॥५५॥

दितिप्रश्च आसुराणामिंद्रियाणामासामेषामियमासुरी शिश्नद्वारा ग्रामकं ग्राम्यसुखं जनानां कुत्सुखं व्यवायाख्यं दुर्मदेन गुह्येंद्रियेण निर्ऋतिर्नाम गुदः
मृत्युद्वारत्वात्। वैशसं मलविसर्गं लुब्धकेन पायुना। तेनोत्क्रांतस्य दुःखप्राप्तेर्लुब्धकसाम्य॥५३॥ अमीषां मध्ये निर्वाक्पादौ पेश
स्कृत हस्तौ तावुभावंधौ। छिद्रासावात्। स्वतो ज्ञानक्रियाशक्त्यभावत्वा। अत एव तांद्रियवतां देहानामधिपतिः पुरंजनः। बुद्धींद्रिय
साध्यक्रियाः सर्वेषां तत्सं वात्तः॥५४॥ अंतःपुरं हृदयं गतः। विषूचीनं सर्वतो मुखं मनः। मोहप्रसादहर्षाख्यमः सत्वरजःकार्याणि जा
यात्मजाद्धिः। आत्मजा इंद्रियपरिणामाः सद्भवं॥ ॥

७६

दु

जल्पंत्या ल्पेंदृयंत्यां ॥ पण ॥ आसंतीं आसीनां दृश सर्वाश्व संगत्वादिलक्षणा प्रकृतिर्बुद्धावो वंचिताय स्यां सर्वथा प्रकृत्या वंचित इति वा निछन् अनिछन् क्लैब्यात् नृपाप एवस्थात् ॥ ६२ ॥ चतुर्थे पंचविंशः ॥ ॥ षड्विंशे मृगयाव्याजात्स्वप्नजागरणोक्तितः । सुषुप्तिर्या गयोगात्सा संसृतिः साप्रपंच्यते । तदेव मात्मनउपाधिक्रतां सुषुप्तावस्थां जाग्रदवस्थां वीक्षेदानीं स्वप्नावस्थामाहा सएकदेतिदशलिः । महानिष्टासोधनुः यस्य तत्त्वलोकृत्वा दृष्टिर्निवेशीयस्य सरथमारुह्य पंचप्रस्थं वनमगादिति तृतीयेनान्वयः । रथं तदो नीमेव विहृतस्वप्नदेहं जाग्रद्देहस्य शतसंवत्सरोप लोग्यपूर्णत्वेनोक्तत्वात् । पंचज्ञानेंद्रियाण्यश्वा यस्य । आशुगं शीघ्रगति दीर्घ अहंता ममते ईषे दंडिके यस्य । द्वे पुण्य पापे चक्रे यस्य एकं प्रधान मक्षो

एवं कर्म्मसु संसक्तः कामात्मा वंचितो बुधः । महीषी यद्यदीहेत तत्तदेवान्ववर्त्त ॥ ५६ ॥ क्वचित्पिबंत्यां पिबति मदिरां मदविह्वलः । अश्नंत्यां क्वचिदश्नाति जक्षंत्यां सह जक्षिति ॥ ५७ ॥ क्वचिद्गायति गायंत्यां रुदंत्यां रुदति क्वचित् । क्वचिद्धसंत्यां हसति जल्पंत्यामनुजल्पति ॥ ५८ ॥ क्वचिद्धावति धावंत्यां तिष्ठंत्यामनुतिष्ठति । अनुशेते शयानायामन्वास्ते क्वचिदासतीं ॥ ५९ ॥ क्वचिच्छृणोति शृण्वंत्यां पश्यंत्यामनुपश्यति । क्वचिज्जिघ्रति जिघ्रंत्यां स्पृशंत्यां स्पृशति क्वचित् ॥ ६० ॥ क्वचिच्च शोचतीं जायामनुशोचति दीनवत् । अनुहृष्यति हृष्यंत्यां मुदितामनुमोदते ॥ ६१ ॥ विप्रलब्धो महिष्यैवं सर्वप्रकृतिवंचितः । नेछन्नुकरोत्यज्ञः क्लैब्यात्क्रीडामृगो यथा ॥ ६२ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे पुरंजनोपाख्याने पंचविंशोध्यायः ॥ ॥ श्रीनारद उवाच ॥ ॥ स एकदा महेष्वासो रथं पंचाश्वमाशुगं । द्वीषं द्विचक्रमेकाक्षं त्रिवेणुं पंचबंधुरं ॥ एकरश्म्येकदमनमेकनीडं द्विकूबरं । पंचप्रहरणं सप्तवरूथं पंचविक्रमं ॥ २ ॥

यस्य त्रयो गुणा वेणवो ध्वजाय स्य । पंचप्राणा वंधुराणि वंधनानि यस्य । एकं मनो रश्मिः प्रग्रहो यस्य एका बुद्धिर्दमनः सूतो यस्य तं च तं च । एकं हृदयं नीडं रथिन उपवेशस्थानं यस्मिन् । द्वौ शोकमोहौ कूबरौ युगवंधनस्थानं यस्य । पंच शब्दादयो विषयाः प्रक्रियंते प्रक्षिप्यंते यस्मिन् । अस्य व्याख्यानं लविष्यतीति पंचेंद्रियार्थप्रक्षेप इति । सप्तधातवो वरूथा रक्षार्थं चर्मा द्यावरणानि यस्य । पंच कर्मेंद्रियाणि

वाम्य

सा॰च॰
७७

तेषु

हेमोपस्कारंसौवर्णालंकरणं। स्वर्णवर्मा वर्म्मकवचं रजोगुणात्मकः। अक्षकृत्येषुधिः इषुधिर्निषंगः। अनंतवासनो अहंकारोपाधिः। एकादशो मनोरूपश्चमू
नाथः सेनापतिर्यस्य। वासनामयस्य मनसः प्रगृहत्वात्संकल्पविकल्पात्मकस्य हृदयत्वेन वक्ष्यमाणस्य चमूनाथत्वमिति विभागः। पंचाश्च
हादयो विषयाः प्रख्याः सानवो यस्मिन् तद्वनं लज्जनीयदेशमगात्। अनेन गृहीता इषवो रागद्वेषादिरूपाः कार्मुकं च लोभाद्यभिनिवेशरूपं यन
। जायां विवेकवतीं बुद्धिं विहाय। अतदर्हां त्यागो हेतुः। मृगपतद्दतिमृगा विषया [illegible] आत्मसाक्षे लोभासक्तिः तेन लालसा तिस्पृहा य
स्य॥४॥ वाणैः रागादिभिः वनेषु लज्जनीयदेशेषु वनगोचरान् लज्जनीयविषयान् अन्यहनन् आत्मसाक्षितवान्। कथापक्षेतु स्पष्टमेवानेका

हेमोपस्कारमारुह्य स्वर्णवर्माऽक्षकृत्येषुधिः। एकादशचमूनाथः पंचप्रस्थमगाद्वनं॥ २३॥ चचार मृगयां तत्र दृप्त आत्तेषुका
र्मुकः। विहाय जायामतदर्हां मृगव्यसनलालसः॥ ॥ २४॥ आसुरीं वृत्तिमाश्रित्य घोरात्मा निरनुग्रहः। न्यहनन्निशितैर्वा
णैर्वनेषु वनगोचरान्॥ २५॥ तीर्थेषु प्रतिदृष्टेषु राजा मेध्यपशून्वने। यावदर्थमलं लुब्धो हन्यादिति नियम्यते॥ २६॥

सुरीं वृत्तिमाश्रित्येति किमिति मृगया निंद्यते कथापक्षे तावद्यज्ञो विहितैव साक्ष्यात्मपक्षेऽपि जीवस्य विषयभोगो विहित एवेत्याशंक्याह। प
तीर्थेष्विति त्रिभिः। अयं भावः। न हि मृगया विधीयते रागप्राप्तत्वात्। किंतु नियम्यते तत्र वृत्तिः संकोच्यते। नियममेव षड्भिर्दर्शयति। यद्यलम
त्यर्थं लुब्धो रागी सन् हन्यात्तर्हि तीर्थेषु श्राद्धादिषु च तत्रापि प्रतिदृष्टेषु प्रख्यातेषु वननित्यश्राद्धादिषु। तत्रापि राजैव मेध्यानेव वनए
व यावदुपयोगमेवेति एवं जीवस्य विषयसेवाऽपि यावदुपयोगं न यथेष्टमिति नियम एवेत्यर्थः॥ ॥

७७

पु

अतो नावश्यकत्वमित्याह य इति। एवं नियतं कर्म विद्वान् तेनेत्युपलक्षणं तेनान्येन वा कर्मणैव मनुष्ठितेन यत् ज्ञानं भवति तेन ज्ञानेनेहैव ना
सौऽनुष्ठाता न लिप्यते। अन्यथा नियमोल्लंघने न अतः करणशुद्ध्यभावात् कर्तृत्वाभिमानमात्ररूढः कर्मलिप्सुर्बध्यते। ततश्च गुणप्रवाहे पति
तोऽधो व्रजति। प्रासंगिकं परिसमाप्य पुनर्मृगयामेवानुवर्त्तयति। तत इति। दिनावसानेऽपदीयेषांतैः विहंगैर्वाना ३६। करुणात्मानोऽच्चपात्रुनांदुः
सहः। तदेवं श्रवणावश्या दर्शिता इदानीं पुनरपि विवेकवत्याद्युद्यारममाणस्य पुत्रादिसंततिं प्रपंचयिष्यन् कथासौंदर्यायतस्याः श्रवण्यकु

य एवं कर्म नियतं विद्वान् कुर्वीत मानवः। कर्मणा तेन राजेंद्र ज्ञानेन स न लिप्यते ॥ १७॥ अन्यथा कर्म कुर्वाणो मानारूढो निब
ध्यते। गुणप्रवाहपतितो नष्टप्रज्ञो व्रजत्यधः। तत्र निर्भिन्नगात्राणां चित्रवाजैः शिलीमुखैः। विह्वलोऽभूद्दुःखितानां दुःस
हकरुणात्मनां ॥ १९॥ शशान् वराहान् महिषान् गवयान् सशल्लकान्। मेध्यान् स्वपात्रविविधान् विनिघ्नन् श्रममध्यगात् ॥
२०॥ ततः क्षुत्तृट्परिश्रांतो निवृत्तो गृहमेथिवान्। हातस्नानोचिताहारः संविवेश गतक्लमः ॥ २१॥ आत्मानमर्हयांचक्रे धूपाले
पस्रगादिभिः। साध्वलंकृतसर्वांगो महिष्यामादधे मनः ॥ तृप्तो हृष्टः सुदृप्तश्च कंदर्पाकृष्टमानसः। न व्यचष्ट वरारोहां गृहि
णीं गृहमेधिनीं ॥ २३॥ अंतःपुरस्त्रियोऽपृच्छद्विमना इव वेदिषत् ॥ २३॥ अपि वः कुशलं रामाः सेश्वरीणां यथा पुरा। न दृश्ये
तर्हि रोचंते गृहेषु गृहसंपदः ॥ २४॥ यदि न स्यात् गृहे माता पत्नी वा पतिदेवता। व्यंगे रथ इव प्राज्ञः को नामाऽऽसीत दीनवत् ॥

पितायास्तनयं प्रस्तावसहितमाह। १९। तत इत्यारभ्याध्यायसमाप्ति। आईयिवान् आगतः। हातं स्नानमुचितआहारश्च येन। संविवेश
शय्यामाश्रितः ॥ २२॥ गृहमेधिनीं सात्त्विकीं बुद्धिं राजस्यां बुद्ध्यां वर्त्तमानो नापश्यत्। वेदिषत् हे प्राचीनबर्हिः ॥ २३॥ अंतःपुरस्त्रियस्तत्सहच
रीः सेश्वरीणां स्वामिनीसहितानां यथा पुरेत्यादि पृथग्वाक्यं। व्यंगे चक्रादिहीने ॥ ॥ २५॥ ॥
रीः

सा॰च॰

७८

निरवशेषे आवरणरहिते २७ अवधूतां त्यक्तदेहादरां तत्संगे नोन्मथितं व्याकुलं ज्ञानं यस्य २८ प्रेमभरं रलः अरुणयकोपक्षस्य लिंगं कुटिलदृष्ट्यादि
यस्मिन्न लब्धवान्। उत्संगो मीरोप्य लालितां २० कृतमागो अपराधो येस्तेषु। आत्मसात्कृत्वा अस्मीद्दृष्टीनो ऽयमिति मत्वा शिक्षार्थं दंडं न कुर्वंति तेषु
त्यामंदत्वागमः २१ यतः परमो ऽनुग्रहो दंडः यस्तु दंडितो विषीदति सो ऽज्ञ इत्यहावालइति। वं धुकृत्यं शिक्षाकरणं। अमर्षणः क्रोधी। २२ हे
मुदिति हे सुभ्रु हे मनस्विनि सा त्वं अस्माकं स्वामिनी। अतः स्वानां सुखप्रदर्शयकीदृशं अनुरागसारेण क्रीडयायो विलंवः मंथरतातेन विलसत्

का वर्त्तते सा ललना मदंगं तं वै व्यसनार्णवे या मामुद्धरते प्रज्ञां दीपयंती पदे पदे २६ रामाकृ तु श॥ ॥ नरनाथ न जानीमस्त्व प्रियाय
ध्यै वसुधि। भूतले निरवशेषशयानां पश्य पश्य तत् २७ पुरं जनं त्र महर्षीन् निरीक्ष्य ऽवधूतां भुवि तत्संगोन्मथितज्ञानो वैक्लव्यं प
रमं ययौ। २८ सा त्वया नूनं [illegible] यावाचा हृदयेन चदृयता। प्रेयस्यापि भ्रम सेरंसेलिंग मात्मनि नानास्यगात् २९ अनुनिन्ये ऽथ शनकैवी
रो ऽनुनयकोविदः। पस्पर्शपादयुगलमाह चोत्संगलालितां २० नूनं त्व ऽकृतपुण्यास्ते भृत्यायेष्वीश्वरा ऽस्तु लोकृतागः स्वात्मसा
त्कृत्वा शिक्षार्थदंडंन कुर्वते २१ परमोनुग्रहो दंडो भृत्येषु प्रभुणार्पितः। वालो न वेद तत्त्वंगि वंधुकृत्यममर्षणः २२ सा त्वं सुखं
सुदति सुभ्रु ऽनुरागसारक्रीडाविलंबविलसद्हसितावलोकं। नीलालकालिलिरुपस्कृतमुत्तसरेस [illegible] प्रदर्शय मनस्विनि वल्गुवा
क्यम् २३ तस्मिन्नुदधेद ममहं तववीरपत्नि यो ऽन्यत्र भूसुरकुलात्कृतकिल्बिषस्तं। पश्ये न वीतभयमुन्मुदितं त्रिलोक्याम
न्यत्र वै मुररिपो रितरत्र दासात् २४ स्वानां

हसितावलोको यस्मिन्नु नीलाश्चलकाएवालयस्तेरुपस्कृतं भूषितं। उज्ञानासिकं वल्गुवाक्यं यस्मिन्नुतत् २३ हे वीरपत्नि वीरस्य मम सार्ये
यस्ते कृतापराधस्तस्मिन्नहं ब्राह्मणकुलादन्यत्र अन्यस्मिन्नु मुररिपुदासादितरत्र वदमं दधे दंडं करोमि। किंभूतं विगतभयं उच्चैर्मुदितं
त्रिलोक्यां अन्यत्र वै लोकत्रयाद्बहिरपि न पश्यामि। मद्भयादेवासौ मरिष्यतीत्यर्थः २

वा ५९ सं गतं पौं स्य

तेव न्नामितः पूर्वं कदाचिदपि वितिलकं न पश्यामि। संरंभेण कोपावेशेन भीमं भयंकरं अविमृष्टं अनुज्ज्वलं अपेतरागं स्नेहशून्यं। तथा ते सुजातौ शोभनौ स्तनाव
पि शोकाश्रुभिरुपहतौ न पश्यामि। तथा बिंबफलाकारमधरं च विगतः कुंकुमपंकतुल्यस्तांबूलरागो यस्मात् तादृशं न पश्यामि। इदानीं तु तत् एवं जातमिति शेषः।
पाठांतरे एवंभूतं मुखं स्तनौ च पश्यन् शं न विंदामीत्यन्वयः। विगतः कुंकुमपंकरागो यस्मात् तमिति स्तनयोर्विशेषणं॥ २५ ॥ तत्तस्माद्धेतोः किल्बिषमपराधो येन
तस्य किल्बिषमेवाह। स्वैरं स्वातंत्र्येण त्वामपृष्ट्वा मृगयां गतस्य। दिवो देवनं क्रीडा तोषं रति ददातीति देवरः कांतः तं कामवेगेन विस्रस्त [illegible] धैर्यं यस्मात् भजति
कामयमाना कृत्ये वक्तुं योग्ये अर्थे कान भजेत॥ २६॥ ॥ चतुर्थे षड्विंशः॥ ॥ सप्तविंशे प्रियासक्त्या विस्मृतात्मनः। कालकन्या कृपाख्यानेन

वक्त्रं न ते वितिलकं मलिनं विहर्षं संरंभभीममविमृष्टमपेतरागं। पश्ये स्तनावपि शुचोपहतौ सुजातौ बिंबाधरं विगतकुं
कुमपंकरागम्॥ २५॥ तन्मे प्रसीद सुहृदः कृतकिल्बिषस्य स्वैरं गतस्य मृगयां व्यसनातुरस्य। का देवरं वशगतं कुसु
स्य माश्त्रवेगविस्रस्तवेगविस्रस्तपौंस्नमुशती न भजेत कृत्ये॥ २६॥ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे
पुरंजनोपाख्याने षड्विंशतितमोध्यायः॥ ॥ श्रीनारद उवाच ॥ इत्थं पुरंजनं सध्र्यग्वशमानीय विभ्रमैः
पुरंजनी महाराज रेमे रमयती पतिं॥ १॥ ॥ श्रीरामाय नमः॥ ॥

योज राः रोगाद्यैः कदीर्यते तात देवं जीवस्याज्ञानयादिकथासौंदर्येणात्यंतमपार्थिवश्च पत्नस्तस्मात्तन्निमित्तां संसारपरंपरां निरूपयितुमाह। इत्थमिति। अत्र प्रतिप
दं कथं विदध्यात्मपदे [illegible]ऽधि तं शक्य मेव। श्रीनारदेन तु जीवस्य स्त्री उत्तुषु वासनादार्ढ्येन विचित्रा संसृति र्वर्तितीत्येतावदेव कथातात्पर्यं दर्शितं। क्वचित्तु
मानू क्वचिच्च श्रीकावित्रो नयम धीः देवो मनुष्य स्त्रीर्य्यग्वा यथा कर्मगुणं लभ इति वदता। तत्रादौ तु स्त्रीनसंसृतिरध्यायत्रयेणोक्ता। ततश्च केना
ध्यायेन स्त्रीत्वेन प्रतिपद श्रे ईश्वरप्रसादलब्धज्ञानेन मोक्ष इत्युक्तं। तत एवं देवपथोपयोगं व्याख्यातमिति पंचाध्यायारंभः प्रतीयते। प्रतिपदं व्याख्या
त्मयोजनात्तद्दुर्घटा [illegible] मनिः प्रयोजनाचेतिप्रोदि प्रख्यापनमनाहत्य यथोपयोगमेव व्याख्यास्यामः। सध्र्यक् सम्यक्। विभ्रमैर्विला
सैः॥ ॥१॥ ॥

नम
उ स्तात १

हातेब्रह्मस्यमनंमंगलंकुंकुमसिंदुरादिलिप्रस्यापा २ उपगूढ॰ परिरब्धा कंधरा तस्यायेनार हएकांते अनुमंत्रैः अनुकूलैः गुह्यभाषणैः अकृष्टा चेतनाविवेकोयस्य। कालरंह॰ आयुर्वयं। अमदे वपरिग्रहोन ज्ञानसाधनंयस्य ३ महार्हतल्पे उत्तमैः शय्यायां शयानः। महिष्याभुजउपधिः उपधानमुच्छीर्षकं यस्य। अविसर्गपाठे शनक्रियाविशेषणं तां महिषीमेव उरुश्रेष्ठार्थममन्यत न उयन्निजं रूपं ब्रह्मतत्त्वं

सराजामहिषीराजन्सुस्नातां रुचिराननां। कृतस्वस्त्ययनां तृप्तामभ्यनंदद्उपागतां॥ २॥ तयोपगूढः परिरब्धकंधरो रहोऽनुमंत्रैरपकृष्टचेतनः। नकालरंहो बुबुधे दुरत्ययं दिवानिशेति प्रमदापरिग्रहः॥ ३॥ शयान उन्नद्धमदो महामना महार्हतल्पे महिषीभुजोपधिः। तामेव वीरो मनुते परं यतस्तमोभिभूतो न निजं परं च यत्॥ ४॥ तयैवं रममाणस्य कामकश्मलचेतसः। क्षणार्धमिव राजेंद्र व्यतिक्रांतं नवं वयः॥ ५॥ तस्यामजनयत्पुत्रान्पुरंजन्यां पुरंजनः। शतान्येकादश विराडायुषोऽर्धमथात्यगात्॥ ६॥ दुहितॄर्दशोत्तरशतं पितृमातृयशस्करीः। शीलौदार्यगुणोपेताः पौरंजन्यः प्रजापते॥ ७॥ स पंचालपतिः पुत्रान्पितृवंशविवर्धनान्। दारैः संयोजयामास दुहितॄः सदृशैर्वरैः॥ ८॥ ॥

तमसाअज्ञानेनाभिभूतोयतः॥ ५॥ पुत्रान् इंद्रियपरिणामान्। दशोत्तरशतं दुहितॄः संख्या उत्तरे स्वोन्यूनत्वेन ग्राह्या सौंदर्यार्थं। विराडूर्ध्वं आयुषोऽर्धमित्याधर्मिकथा सौंदर्यार्थमेवा पुरंजनकन्याः वा पौरंजन्यः हे प्रजापते ७ दारैः परिणामांतरहिताहितसंतानैः वरैः वितविषयभोगैः॥ ॥ ८॥ ॥

दुहितॄः दशोत्तरं बुद्धिवृत्तीः पुत्रसंख्या च बाहुल्यमात्रविवक्षया २

पुत्राणां पुत्राः कर्माणि पंचालेषु शब्दादिविषयेषु ॥ ९ ॥ तेषु पुत्रादिषु तेषामपि ये स्निग्धहाराः पुत्रा स्नेषु च ॥ ११ ॥ पुत्रकेषु आत्महितेषु कर्मसु अनवहितस्य सवैकालः जरासमयः ॥ १२ ॥ चंडवेगः संवत्सरेण वर्तमाणे नोपलक्षितः गंधर्वादिवसाः ॥ १३ ॥ गंधर्व्यो रात्रयः तादृशी तादृश्यः मैथुन्यः दिवसैर्मिथुनीभूय स्थिताः सिता श्यामिता शुक्लकृष्णपक्षीयाः परिभ्रमणेन सर्वैः कामैः सह विनिर्मितां पुरीमपहरति ॥ १४ ॥ प्राजागरः प्राणः ॥ १५ ॥ विंशत्या वसह ॥ १६ ॥ स्वसे

पुत्रावीसवन्पुत्राः एकैकस्य शशतं शतं ये वै पौरंजनो वंशः पंचालेषु समेधितः तेषु तडिच्छुहारिषु गृहको शान्तु जीविषु निन्दनेन ममत्वेन विषयेषु बध्यत ॥ १० ॥ ईजे च क्रतुभिर्घोरैर्दीक्षितः पशुमारकैः ॥ देवान् पितॄन् भूतपतीन् नानाकामो यथा भवान् ॥ ११ ॥ युक्तेष्वेवं प्रमत्तस्य कुटुंबासक्तचेतसः ॥ आससाद स वै कालो यो प्रियः प्रिययोषिताम् ॥ १२ ॥ चंडवेग इति ख्यातो गंधर्वाधिपतिर्नृप ॥ गंधर्वास्तस्य बलिनः षष्ट्युत्तरशतत्रयं ॥ १३ ॥ गंधर्व्यस्तादृशीरस्य मैथुन्यश्च सितासिताः ॥ परिवृत्त्या विलुंपंति सर्वकामविनिर्मिताम् ॥ १४ ॥ ते चंडवेगानुचराः पुरंजनपुरं यदा ॥ हर्तुमारेभिरे तत्र प्रत्यषेधत् प्रजागरः ॥ १५ ॥ स सप्तभिः शतैरेको विंशत्या च शतं समाः ॥ पुरंजनपुराध्यक्षो गंधर्वैर्युयुधे बली ॥ १६ ॥ क्षीयमाणे स्वसंबंधे एकस्मिन् बहुभिर्युधा ॥ चिंतां परां जगामार्तः सराष्ट्रपुरबांधवः ॥ १७ ॥ स एव पुर्यां मधुभुक् पंचालेषु स्वपार्षदैः ॥ उपनीतं बलिं गृह्णन् स्त्रीजितो नाविदद्भयं ॥ कालस्य दुहितां काचित् त्रिलोकीं वरमीच्छती ॥ पर्यटंती न बर्हिष्मन् प्रत्यनंदत कश्चन ॥ ॥ ९ ॥ श्रीरामाय नमः ॥ ॥

बंधे स्वसंबंधिनि क्षीयमाणे ॥ १७ ॥ स एवं मधुभुक् कर्णाद्युपलक्षितो स्वपार्षदैरिंद्रियैः नाविंदन् नालोचितवान् ॥ १८ ॥ कालस्य दुहिता जरा अस्मिता तां न प्रत्यनंदन् नैच्छत ॥ बर्हिष्मन् हे प्राचीनबर्हि ॥ ॥ श्रीरामाय नमः ॥ ॥ ९ ॥ ॥

४७

सा॰च॰

८०

पूर्वेययातिपुत्रायतेनदत्तासतीवरमदात्‌।ययातिःशुक्रशापाज्जरांप्राप्यपुत्राउवाचइमांगृह्णीतेतितांजयेष्ठाश्चत्वारोनजगृहुः।पूरुस्तुजग्
हे।भूरिस्म्राजनस्वतातोययातिस्त्वस्मैराज्यंददाविति।जरेवादादिस्तुक्तं।२१।प्रत्याख्यातवतिमयिसंरब्धःक्रोधंकृत्वानैकत्रस्थातुमर्हसीतिशा
पमदात्‌।२२।अथयोव्यावयच्छयवनीक्षेषामीश्वरंलयनामानंचक्रे।२३।हेवीरत्वामीप्सितंपतिंवृणे।नरिष्यतिमनश्पति।२४।लोकतोवेदतश्च
यद्देयंत्वेनग्राह्यत्वेनचरूपनंतंप्राप्तंतच्चयाच्यमानंयोनददातियश्चदीयमानंनेच्छतिनरक्रःतिइमोद्वौकर्मभूतावशोचंतिसंतः।२५।उत्तषे

तु

दोर्सर्गपेनात्मनैलोकेविश्रुताडुर्भगेतिसार्योष्टाराजर्षिर्वृत्तादात्पूरवेवरम्‌।२०।कदाचिदटमानासाब्रह्मलोकान्महींग
तं।वव्रेदृहद्रुतंमांउजानतीकाममोहिता।२१।मयिसंरब्धेक्रोधमदाशापंसुदुःसहं।स्थातुमर्हसिनैकत्रमद्यातुश्च
विस्तुखोमुने।२२।ततोविहतसंकल्पाकन्यकायवनेश्वरं।मयोपदिष्टमासाद्यवव्रेनाम्नाभयंपति।२३।अथलंय

न

वनानांत्वावृणेवीरेप्सितंपतिं।संकल्पस्त्वयिभूतानांकृतःकिलनरिष्यति।२४।द्वाविमावनुशोचंतिबालावसदवग्र
हौ।यल्लोकशास्त्रोपरतंनराति।नतदिच्छति।२५।अथोमज्जश्वमांसडंलजंतीमेदयाकृत।एतावान्पोरुषोधर्मोयदार्ता
नडुकंपते।२६।कालकन्योदितवचोनिशम्ययवनेश्वरः।चिकीर्षुर्देवगुह्यंससस्मितंतामलाषत।२७।मयानिरूपि
तस्त्वंसंपतिरात्मसमाधिना।नाभिनंदतिलोकोऽयंत्वामलंडामसंमती।२८।त्वमव्यक्तगतिर्भुंक्ष्वलोकंकर्मविनिर्मि

८०

तं॥ ॥रामायनमः॥ ॥

एकर्णव्योधर्म्मःपौरुषःदेवगुह्यंमरणंतद्धिप्राणिनांवैराग्यानुदयायदेवैर्गोप्यते।२७।उत्स्यंतवात्मसमाधिनाज्ञानदृष्ट्यायाथ्व
मानोऽयंलोकस्त्वांनेच्छति।अतोव्यक्तगतिःकृतःप्राप्तेत्पलक्षितगतिःसतीलोकमाक्रम्यभुंक्ष्व।एवंसर्वोपिलोकस्त्वपतिःस्या
दित्यर्थः॥ ॥९॥ ॥

७७।

नचैवं त्वया शंकनीयं मां प्रतिकूलां लोको हनिष्यतीति यस्मात्त्वमेव प्रजानां नाशं करिष्यसीत्याह। या मदीया यवन पृतना तया युक्ता। किंच। २९। प्रज्वा
र इति। मारको वैष्णवो ज्वरः। माहेश्वरस्य व्याध्यंतःपातित्वात्। लीमाघोराः सैनिका यस्य ॥ ३०॥ चतुर्थे सप्तविंशः ॥ ॥ अष्टाविंशे तु वैदर्भ्याख्याने नष्ट्री
विचिंतया। स्त्रीत्वं प्राप्तस्य दैवेन कदाचिन्मुक्तिरुच्यते। इदानीं तु पुरंजनस्य तु देहत्यागपूर्वकं स्त्रीत्वप्रकारमाह। सैनिका इत्यादि राजसिं
हस्य वेश्मनीयंते। नादिष्टं दैवं कुर्वंति अधिकुर्वंतीति तथा। मृत्योरादेशकारिण इति वा ॥ १॥ जरत्पन्नगेन जीर्णप्राणेन पालिता ॥ २॥ द्वार्भिः चतु

याहि मे पृतनायुक्ता प्रजानाशं प्रणेष्यसि ॥ २९॥ प्रज्वारोयं मम भ्राता त्वं च मे भगिनी भव। चराम्युभाभ्यां लोकेस्मिन्नव्यक्तो
भीमसैनिकः ॥ ३०॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे पुरंजनोपाख्याने सप्तविंशतिमोध्यायः ॥ ॥ श्रीनारद उवा
च ॥ ॥ सैनिका भयनाम्नो ये बर्हिष्मन् दिष्टकारिणः। प्रज्वारकालकन्याभ्यां विचेरुरवनीमिमाम् ॥ १॥ त एकदा तु र
भसा पुरंजनपुरीं नृप। रुरुधुर्भौमभोगाढ्यां जरत्पन्नगपालितां ॥ २॥ कालकन्यापि बुभुजे पुरंजनपुरं बलात्। य
याभिभूतः पुरुषः सद्यो निःसारतामियात् ॥ ३॥ तयोपभुज्यमानां वै यवनाः सर्वतो दिशं। द्वार्भिः प्रविश्य सुभृशं प्रा
र्दयन् सकलां पुरीं ॥ ४॥ तस्यां प्रपीड्यमानायामभिमानी पुरंजनः। अवापोरुविधांस्तापान् कुटुंबी ममताकुलः ॥ ५॥ क
न्योपगूढो नष्टश्रीः कृपणो विषयात्मकः। नष्टप्रज्ञो हृतैश्वर्यो गंधर्वयवनैर्बलात् ॥ ६॥ विशीर्णां स्वपुरीं वीक्ष्य प्रतिकू
लाननादृतान्। पुत्रान्पौत्रानुगामात्यान् जायां च गतसौहृदां ॥ ७॥

रादिरोगरूपेण प्रविश्य ॥ ४॥ कन्यया जरयोपगूढः सन्। ततस्त्रिभिः श्लोकैर्यं न लेभ इति तृतीयेनान्वयः। हृतैश्वर्यः ज्ञानादिषु शक्तेः ॥ ६॥ प्रतिकूलान्। अनपे
क्षितविषयप्रापणान्। अनादृतान्। आदरमकुर्वाणान्। स्वाधीनत्वाभावात्। अनुगा इंद्रियाणि। अमात्या इंद्रियदेवाः। गतसौहृदां अध्यवसायाभावात्
॥ ७॥ राम ॥

व
रु

ना॰ च॰
८१ त

अरिरिविद्विष्ट्रादिरिर्दूषिता नृप । कालकन्यया हेतुभूतया यातयामा निःसारान् अपि कामान् अभिलषन् । विगता आत्मनो गतिः पारलौकिकी ऐहिकी च नाऽदिष्टेह श्रूयस्य अहिहादिति वा पाठः ॥ १९ ॥ स राजा पुरंजनो हा तुं ऽश्वचक्रमेऽउपक्रांत वानिति हृयोरन्वयः । अनिकामतः अनिच्छया अपि । सपरिच्छेदः अन्त्यवर्गसहितः । कुटुंबेन दीव्यतीति कौटुंबिकः । कुटुंबविन्यासंधिनेत्रविवर्जितः । सान्वयः पुत्रादिसहितः ॥ २० ॥ यवनैरुपरुद्धान्यायतनानि यस्य स तथा पुरं

आत्मानं कन्यया ग्रस्तं पांचालान् अरिदूषितान् । दुरंतचिंताम् आपन्नो न लेभे तत्प्रतिक्रियां ॥ १९ ॥ कामान् अभिलषन् दीनो यातयामांश्च कन्यया । विगतात्मगतिस्नेहः पुत्रदारांश्च लालयन् ॥ गंधर्वयवनाक्रांतां कालकन्योपमर्दितां । हातुं प्रचक्रमे राजा तां पुरीम् अनिकामतः ॥ २० ॥ तदा पुरंजनपुरोऽग्रजो ज्वाला ॥ प्रज्वारः प्रत्युपस्थितः । ददाह तां पुरीं कृत्स्नां भ्रातुः प्रियचिकीर्षया ॥ २१ ॥ तस्यां संदह्यमानायां सपौरः सपरिच्छदः । कौटुंबिकः कुटुंबिन्या उपातप्यत सान्वयः ॥ २२ ॥ यवनोपरुद्धायतनो ग्रस्तायां कालकन्यया । पुर्यां प्रज्वारसंसृष्टः पुरपालोऽन्वतप्यत ॥ २३ ॥ न शेके सोऽवितुं तत्र पुरुकृच्छ्रोरुवेपथुः । गंतुमैच्छत् ततो वृक्षकोटरादिव सानलात् ॥ २४ ॥ शिथिलावयवो यर्हि गंधर्वैर्हृतपौरुषः । यवनैररिभी राजन्नुपरुद्धो रुरोद ह ॥ २५ ॥ दुहितॄः पुत्रपौत्रांश्च जामिजामातृपार्षदान् । स्वत्वावशिष्टं यत्किंचिद्गृहकोशपरिच्छदं ॥ २६ ॥ अहं ममेति स्वीकृत्य गृहेषु कुमतिर्गृही । दध्यौ प्रमदया दीनो विप्रयोग उपस्थिते ॥ २७ ॥ लोकांतरं गतवति मय्यनाथा कुटुंबिनी । वर्तिष्यते कथं त्वेषा बालकान् अनुशोचती ॥ २८ ॥ न मय्यनाशिते भुंक्ते नास्नाते स्नाति मत्परा । मयि रुष्टे सुसंत्रस्ता भर्त्सिते यतवाग्भयात् ॥ २९ ॥

लो
त्वा
ग्र ८१

लः ॥ २१ ॥ पुरुकृच्छ्रे तेन उरुवेपथुर्यस्य । वृक्षकोटरादिव सर्पः । कंठेन उपरुद्धे रुरोद इत्युक्तं पुत्रेषु अभिनिवेशकार्यं । दुहित्रादीन् दध्यावित्युत्तरेणान्वयः । जामयो भगिन्यः । स्वत्वमात्रेणावशिष्टं लोकस्य भोगक्षमं । गेहदाराः । ध्यानमेवाह ॥ २८ ॥ अनाशिते अभोजिते भर्त्सिते भर्त्सनकृतौ यतवाग्भवति ॥ २९ ॥

॥२०॥

अविज्ञं अविवेकिनं मो क्षपिते दे शांतरगाते । एहमेधीयं वर्त्म गृहधर्म्मं अपि किं नेष्यति अनुवर्त्तयिष्यति । धुक्तामेततापतो वीरसूः पुत्रवती [illegible] किं वा मह्यं इह गृहमसहमाना मरिष्यति वे त्यर्थः । नविद्यते परम यनं मार्गं यो यस्य अपरायणाः पुत्राः कन्याश्च । यद्वा अप्रा ः कन्या त्रलिंगानो येषां २१ अतदर्हणं वक्ष्यतमम स्वपस्मत्वात् । एवं पयदा [illegible] ये ध्यानं नीयमानं मृदा अत्रपथाः प्राणा इंद्रियाणि वतथा च श्रुतिः । तमुत्क्रामं

प्रबोधयतिमा विज्ञं मुषितेशोककर्षिता । वर्त्मैतदृहमे धीयं वीरसूरपि नेष्यति २० कथं नुदारकादीनां दोर्की अपरायणाः वर्त्तिष्यंते मयि गते भिन्ननाव इवोदधौ २१ एवं कृपणया बुद्ध्या शोचं तमतदर्हणं । यहीतं [illegible] तधीरेन लयनामा ऽस्यपद्यत २२ पशुवद्यवने रेषनीयमान श्च कं रूपं अन्व इव नत्रुपथाः शोचं तो भृश मातुरा श २३ पुरी विहा ग्रोपगत उपलब्धो भुजंगमश यदात मेवानुपुरीविशीर्णा प्रकृतिं गता २४ विकृष्यमाणः प्रसर्भं यवने नवलीयसा । नाविंदत्तमसा विष्टः सखायं सुहृदं पुरः २५ तं यज्ञपशवो नेन संज्ञप्ता ये ऽदयालुना । कुठारैश्छिंदुः क्रुद्धाः स्मरंतो मीवमस्य तत् २६ अनंतपारे तमसि मग्नो नष्टस्मृतिः समाः । शाश्वती रनुभूयार्त्तिं प्रमदा संगदूषितः २७

तं प्राणो ऽनूत्क्रामति प्राणमनूत्क्रामंतं सर्वे प्राणा अनुक्रामंतीति २३ प्रकृतिं महाभूतात्मतां २४ नविंदत्त न सस्मार पुरः पूर्वं स खायं संतमीश्वरं २५ अदयालुना कामस्य कर्म्म प्रियेसं ज्ञप्ता हताः । अमीवं पापं क्रोधं वा शाश्वतीः समाः बह्वीर्निमनु भूय । २७

पत्र

स्कं ४

सा॰ब॰

८२

पुरं

अंतकाले तां भार्यामेव मनसा स्मरन् अनंतरं विदर्भस्य वेश्मनि प्रमदोत्तमा बभूव अतः पुरस्मितत्वकारणं एतावदेव प्रज्ञातोपयोगि विवक्षितं स्त्रीध्यानेन स्त्रीत्वं प्राप्तावपि पतिव्रताध्यानेन पूर्वाभ्यस्तेन च धार्मिकाद्विदर्भाज्जन्माभूत्। धार्मिकसंगेन च विशुद्धस्य भागवतेन मलयध्वजेन संगो भूत्। ततोवि स्मृतिः ततो वैराग्यं तत्संगमेव सतीरूपं पतिं प्राप्ता ति धर्मेण ततो भगवत्प्रसादलब्धज्ञानेन मोक्ष इति। अन्यत्तु कथालंकारमात्रं तथा पि किंचित्तत्सामान्येन व्याख्यास्यामः। विदर्भस्य विशिष्टदर्भोपलक्षितस्य कर्मठस्य राजसिंहस्य धर्मेण हि प्रजापालनेन यज्ञादिना च क्षत्रियाराजं तेतेषु श्रेष्ठस्य वेश्मनि॥२८॥ मलयोपिलक्षिते दक्षिणे देशे ध्वजश्च दर्शनीयः। स हि श्री विष्णुरक्षप्रधानो देशः तत्र मुख्यः महा भागवत इत्यर्थः। पंडानि च यस्य बुद्धिः तामर्हतीति पांड्यः स उपयेमे उरं जनो भागवत संगं प्राप्त इत्यर्थः॥२९॥ आत्मजां श्रीकृष्णसेवाशु

तामेव मनसा गृह्णन् बभूव प्रमदोत्तमा। अनंतरं विदर्भस्य राजसिंहस्य वेश्मनि॥२८॥ उपयेमे वीर्यपणां वैदर्भी मलयध्वजः। युधि निर्जित्य राजन्यान् पांड्यः परपुरंजयः॥२९॥ तस्यां स जनयांचक्र आत्मजामसितेक्षणां। यवीयसः सप्त सुतान् सप्त द्रविडभूभृतः॥३०॥ एकैकस्याभवत्तेषां राजन्नर्बुदमर्बुदं। भोक्ष्यते यद्वंशधरैर्मही मन्वंतरं परं॥३१॥

चित्तसंगेन भगवद्धर्मे तु चिरं भूदित्यर्थः। असितस्य श्रीकृष्णस्येक्षणं यस्यां तां यवीयसः सप्त सप्तसुतान् श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनं। अर्चनं वं दनं दास्यमिति सप्तविध कार्यात्। सख्यात्म निवेदनयोस्तु पदार्थज्ञानोत्तरकालत्वात् सप्त च भगवते वो त्तरः। शास्त्रोपदेष्टृ मा ण्यं तदिदानीमनुत्पन्नः सप्तेत्युक्तं भगवद्धर्मेषु च्यात श्रवणकीर्तनादिकं जातमित्यर्थः। द्रविडभूमिपालकान्। द्रविडभूमिहिंस्रवणादि सप्तस्विरेव सुरक्षिता ऽभी ति भक्तीद्भः॥३०॥ अर्बुदमिति श्रवणादीनां प्रत्येकमनेकप्रकाराः सद्वृत्तित्यर्थः। तदुक्तं। सप्तियोगो वहुविधो मार्गैर्भामिनि भाव्यत इति। येषां वं शधरैः यतः प्रवृत्तैः संप्रदायपरैर्देशकालमा महीमन्वंतरं ततः परं च भोक्ष्यते अविद्या कामकर्मरूपा परिरक्षिष्यते॥३१॥

अ

मा

८२

भा

अगस्त्य अगानि निःक्षिप्यानि अंगानि स्यापयति संघातयतीत्यगस्त्यो मनः सप्राक्प्रथमजातां दुहितरं कृष्णसेवात्मविभुमुपयेमे। तस्या मनं कृष्णे दृढां रतिं बबंधेत्यर्थः। दृढव्रतानि शमदमादीनि व्रतानि यया तां रतिं। दृढेस्यः सत्यलोकादिलोगेभ्योऽपि च्युतस्तद्दुहितः भक्तस्मरतादिहामुत्र लोगविरागो जात इत्यर्थः। इध्मानि श मदमकत्वान्मुनिः कथंभूतः इध्मवाह आत्मजोऽयस्य सः। तद्धि ज्ञानार्थं समुत्तमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमित्यादिश्रुतिप्रसिद्ध समिद्वहनोपलक्षिता गुरूपसत्तिर्वैराग्यादभूदित्यर्थः। न ह्यविरक्तस्य गुरूपसत्तिः संभवति। कथाप्रबन्धो यथाश्रुतमेव ३२ विभज्य तनयेभ्यः क्ष्मां वि भज्य तत्र श्रवणादिलक्षितेऽदं अवबुध्य। इदानीं वरंजनस्य लीलावंशाप्तस्य सर्वतो विरक्तस्य पतिरेव गुरुः स्त्रीणामिति वचनात्पतिसेवया गुरुशुश्रूषा प्रका

अगस्त्यः प्राग्दुहितरमुपयेमे धृतव्रतां। यस्यां दृढच्युतो जात इध्मवाहात्मजो मुनिः॥ विभज्य तनयेभ्यः क्ष्मां राजर्षिर्मलयध्वजः॥ आरिराधयिषुः कृष्णं स जगाम कुलाचलं॥ ३२ हित्वा गृहान् सुतान् भोगान् वैदर्भी मदिरेक्षणा। अन्वधावत पाण्ड्येशं ज्योत्स्नेव रजनीकरं ३३ तत्र चंद्रवसा नाम ताम्रपर्णी वटोदका। तत्पुण्यसलिलैर्नित्यमुभयत्रात्मनो मृजन्॥ ३४ कंदाष्टिभिर्मूलफलैः पुष्पपर्णैस्तृणोदकैः॥ वर्त्तमानः शनैर्गात्रकर्षणं तप आस्थितः॥ ३५ शीतोष्णवातवर्षाणि क्षुत्पिपासे प्रियाप्रिये। सुखदुःखे इति द्वंद्वान्यजयत्समदर्शनः॥ ३६ तपसा विद्यया पक्वकषायो नियमैर्यमैः। युयुजे ब्रह्मण्यात्मानं विजिताक्षानिलाशयः

३७॥ ॥राम॥॥

रं दर्शयितुमाह हित्वेत्यादिना मनोदयश्चत्यं तेन यं येनामदयतीति मदिरमीक्षणं यस्याः ३३ तत्र चंद्रवसाद्यानघः तासां पुण्यैः सलिलैः उभयत्र अंते बहिश्चात्मनो मलं क्षालयन् तपं आस्थित इत्युत्तरेणान्वयः ३४ अस्यते भूमौ क्षिप्यत इत्यष्टिर्वीजं ३६ विद्यया उपासनया पक्वकषायः दग्धकामादिवासनः। युयुजे आत्मनो ब्रह्मतां तावं यो मास। अक्षाणींद्रियाणि अनिलः प्राणः आशयश्चित्तं विजिता अक्षादयो येना ३७ ॥ ॥ रामाय नमः॥ ॥

सए ४५ २

सा॰च॰

८३

आस्ते स्मा वर्षशतमिति ज्ञानस्पष्टः साध्यतां दर्शयति। अत एव लक्षितं कृतवानित्याह। वासुदेवे रति भुञ्जन् अन्यदेहादिकं न वेद ॥ ३८ ॥ स एवंप्रवर्त्तमानः
आत्मन्यात्मानं विद्वान् अन्यस्मानुपरराम। कथं विद्वान् व्यतिरिक्ततया देहादिव्यतिरिक्तत्वेनालोकितः। व्यापकतया देहादिप्रकाशकत्वेन। ननु देहा
द्याकारो विमर्श एतत्प्रकाशयतीति न तु निराकार आत्मा। अत आह। आमर्शस्यापि साक्षिणं अयं तावत्। विमर्शो नाम अन्तःकरणवृत्तिः सा च जडत्वाद
तत्प्रकाश्यैवेति। यथाह स्वप्ने मम भेदं शिरश्छिन्नमित्यादि प्रतीतौ तद्व्यतिरिक्तमात्मानं वेत्ति तद्वत्। केन विद्वानित्याह ॥ ३९ ॥ साक्षाद्धरिरेव गुरुः तेन

आस्ते स्मार्षिरिवैकत्र दिव्यं वर्षशतं स्थिरः। वासुदेवे भगवति नान्यद्वेदोद्वहन्रतिं ॥ ३८ ॥ स व्यापकतयात्मानं व्यतिरिक्त
तयात्मनि। विद्वान् स्वप्न इवामर्शसाक्षिणं विरराम ह ॥ ३९ ॥ साक्षाद्भगवतोक्तेन गुरुणा हरिणा नृप। विशुद्धज्ञा
नदीपेन स्फुरता विश्वतोमुखं ॥ ४० ॥ परे ब्रह्मणि चात्मानं परं ब्रह्म तथात्मनि। ईक्षमाणो विहायेक्षामस्मादुपर
राम ह ॥ ४१ ॥ पतिं परमधर्मज्ञं वैदर्भी मलयध्वजं। प्रेम्णा पर्यचरद्धित्वा भोगान्सा पतिदेवता ॥ ४२ ॥

ये

नोक्तेन सर्वतोमुखं यथा तथा स्फुरता अनवच्छिन्नेन ज्ञानेन तदेवाह ॥ ४० ॥ परे इति ब्रह्मैवाहं न संसारीति ब्रह्मणि आत्मन ईक्षणेन शोकादिनिवृत्तिः अ
हमेव ब्रह्मेत्यात्मनि ब्रह्मण ईक्षणेन ब्रह्मपारोक्ष्यनिवृत्तिः। आत्मव्यतिहारेणेक्षमाण अस्मात् संसारादुपरराम न त्वेवमपि जीवस्य कृतो ब्रह्म
तापत्तिः। ईक्षणस्य व्यवधायकत्वादित्याशंक्याह। ईक्षां विहाय दग्धेंधनानलवत् स्वयमेवोपशान्तिरित्यावः ॥ ४२ ॥

८३

ति

उपपतिं पत्युः समीपे। यद्वा पत्युः किं चिन्मात्रं न्यूनात् तस्मा नासती वला संवित्यर्थः। अपोधिके वेति कर्मप्रवचनीयः। तद्योगे च द्वितीया। शांतमंगा रा वह्निम नल त्तु प शांता मुह्ना ह्वा ला ग्यथा लाति तद्वत्। ४३ तदानीमपि स्वच्छि रमासनं यस्य भूत एवं जानती। यदा तदा यथा पूर्वमसेवत ४४ पत्युरवि मर्षयती यदा तस्मिन्न वा दूषणं नापश्यत्। ४५ एवं भूपति सहितं अन्रु लिरासिष्य ४६ कृत्वं धरल्पः अधार्मिके रुत्ति येस्पाइपि ४७ अव र्तयन्नप्रवर्तयामास ४८ तस्मां निधाय अग्निदाने नादीप्य च ४९ पूर्वतरः। अनादिरीश्वरः सखा। हासुपर्णावितिश्रुतेः। सामाडि

वीरवासा व्रतस्नामावेणीभूतशिरोरुहा वला तु पपतिं शांता शिखा शांतमिवानलं। ४३। अजानती प्रियतमं यदोपरतमंग ना। सुस्थिरासनमासाद्य यथा पूर्वमुपारत्। ४४ यदा नोपाल लेता धावू ष्माणं पत्युरर्चती। आसीत्स विग्रहद्दया यूथभ्रष्टा मृगीयथा। ४५ आत्मानं शोचती दीनं एवं धुंविक्ला वाष्पलिः। स्मना वा सिव्य विपिने सु स्वरं प्रत्तु रोदसा। ४६ उत्तिष्ठोत्तिष्ठ रा जर्षे इमामुदधिमेखलां। दस्युभ्यः कृत्वं वंकस्यो विस्पतीपाउ मर्हसि ४७ एवं विलपती वाला विपिने तु गता पतिं। पति तापादयोर्लत्तु हृदंत्य श्रूण्यवर्तयत् ४८ चितिं दारु मयीं कृत्वा तस्यां पत्युः कलेवरं। आदीप्य चाष्टे मरणे विलपंती मनो दधे। ४९ तत्र पूर्वतरः कश्चित् सखा ब्राह्मण अवीवान्। सांत्वयन्वल्गुना साम्ना तामाह रुदतीं प्रलो। ५० का त्वं कस्यासि को वायं शयानो यस्य शोचसि। जानासि किं सखायं मां येनाग्रे विचचर्थ हा। ५१ अपि स्मरसि चात्मानमविज्ञातसखं सखे। हि

त्वामां पदमविछन्नलोम लोगरतो गतः। ५२।।

यद्वाक्येन संबोधयन्नापन्नयं शोचसि। अग्रे सृष्टेः पूर्वं विवचर्थ मयि स्थितत्वेन सख्यसुखमनुभूतवानसि ५१ यद्यपि मां न जानासि तथाप्यात्मानं स्वामविज्ञातसखं अविज्ञातः कश्चिन्मे सखा आसीदित्येवं किं स्मरसि सख इति संबोधननिर्देशः प्राक्तन स्नेहस्मरणाय। सख्यं स्मारयन्न वियोगकृतमनर्थमाह हित्वेति सार्धैः षड्भिः पदं स्थानं ५२ श्रीरामायनमः रामा॥

सा॰ च॰

८४

हृद्याः

हंसोऽमुद्धो मानसं हृदयमयनं यस्य योग्यं कथा पक्षे मानससरसि स्थितो पक्षिणा व भूतां ज्ञातो भ्रीकं गृहं अंतरा विनै वा श हृद एवार्थः सहस्रपरिवत्सरा त्तम हाप्रलयोपावास्ता । हि वं धोया म्पे सुखे मतिर्य स्या । क्रियामाययाः । पंचारामा उपवनानि यस्मिन् । नवद्वाराणि प्राणछिद्राणि यस्मिन् । एकः प्राणः पालो यस्मिन् । त्रीणि शुष्यिः स्व भिज्ञा सि कोष्ठानि प्राकारा यस्मिन् । षट् कुलानि भ्रूलीष्ट विषय समर्पका वणि जो ज्ञानेंद्रिय मनांसि यस्मिन् । पंचविपणा हट्टा । कर्मेंद्रियाणि यस्मिन् । पंचभूतानि प्रकृतिः उपादान कारणं यस्यां त्री बुद्धिरेव हृद्पतिः स्वामिनी यस्मिन् । अत्र यमेवेमं श्लोकं व्याचष्टे । पंचेंद्रियार्थ इति । षट्कुलमिति ~~....~~ एक पालमिति । स्पष्टत्वान्न व्याख्यातं भूतान्येव ■ प्रकृति उपादा

हंसावहं च त्वा च त्वं चार्यसखा वायो मानसाय नो भूताम् अंतरावौकः सहस्रपरिवत्सरान्नाम् पञ्चसत्वं विहाय मां च भोगतो ग्राम्यमति र्मही ॥ क्विरणी पदमङ्गात्तीः कयापि निर्मितं क्रियाः ॥ ५४ ॥ पंचारामं नवद्वारमेकपालं त्रिकोष्ठकं । षट्कुलं पंचविपणं पंच प्रकृति स्त्रीधवं ॥ ५५ ॥ पंचेंद्रियार्था आरामा द्वारः प्राणा नव प्रभो ॥ ते जो व■■ निकोष्ठानि कुलमिंद्रिय संग्रहः ॥ ५६ ॥ वि पणस्तु क्रियाशक्तिर्भूत प्रकृतिरव्यया । शक्त्य धीशः पुमांस्त्वत्र प्रविष्टो नावबुध्यते । तस्मिंस्त्वं रामया स्पृष्टो रममाणोऽश्रु तस्मृतिः । तत्संगादीदृशीं प्राप्तो दशां पापीयसीं विभो । न त्वं विदर्भदुहिता नायं वीरः सुहृत्तव ॥ न पतिस्त्वं पुरंजन्या रुद्धो न वमुखे यथा । माया ह्येषा मया सृष्टा यत्पुमांसं स्त्रियं सतीम् । मन्यसे नोभयं यद्वै हंसौ पश्यावयो गतिम् ॥

नंयस्य स्त्री धवमित्यस्य व्याख्यानं शक्तिरधीशाय स्यात ह्यथ सन्नित्यर्थः स्पष्टः अलिभूतः अतो न विद्यते कृतेवत्यस्मृतिर्यस्य । तत्त्वम् पदिशति न त्वमिति चतुर्भिः । सुहृत्पतिः । नवद्वारे पुरे या रुद्धो सि तस्याः त्वमीसंपूर्वं जन्मनि यदमन्यथा इदानी च सती स्त्रीत्वं यं यन्मन्यसे एषा माया यत उभयमपि वस्तुतो नास्ति यस्मादावां हंसो शुद्धो ॥ नो आवयोर्वर्तमानां गतिं स्वरूपं पश्य ॥

२ ननु विदर्भदुहितृत्वादिकं प्रसक्ते पादयत्यानं कथमानघ मानं दर्शितमाह ।

सृ॰

६

८४८

दसितत्राह।

ॐ२

भि

तत्वंपदार्थयोरभिन्नदेशेनैक्यमाहाहमिति हेसखे अहमेव भवान् । उपचाराद्वारयति नचान्य इति ब्यतिहारोपदेशः अन्यथा न्यत्र काल्पितोपायः स्त्रिदमंतरमन्यात्तर्हि किं तयोरभावयोरन्यत्वमसर्वज्ञत्वसर्वज्ञत्वादिधर्मभेदश्च तत्राहयथेति आत्मानं देहमादर्शेनिर्मितं महांतं स्थिरं चावेक्षते परस्पर कुपितं दीपरीतं विद्याविद्योपाधिकृतोधर्मभेद इत्यर्थः । तद्व्यभिचारेण ईश्वरवियोगेन । कथा मात्रमिति बुद्धिं वारयति बर्हिष्मन्निति पारोक्ष्येण राजकथामिषेण तत्र हेतुः

अहं भवान्नचान्यस्त्वं त्वमेवाहं विचक्ष्व भोः । न नौ पश्यंति कवयश्छिद्रं जातु मनागपि । यथा पुरुष आत्मानमेकमादर्शचक्षुषोः
द्विधा भूतमवेक्षेत तथैवांतरमावयोः । एवं समानसो हंसो हंसेन प्रतिबोधितः । स्वस्थस्तद्व्यभिचारेण नष्टामाप पुनः स्मृतिं । ब
र्हिष्मन्नेतदध्यात्मं पारोक्ष्येण प्रदर्शितं । यत्परोक्षप्रियो देवो भगवान् विश्वभावनः ॥ ॥ इतिश्रीभागवते महापुराणे च
तुर्थस्कंधेष्टाविंशतिमोध्यायः ॥ ॥ प्राचीनवर्हिरुवाच ॥ ॥ भगवंस्ते वचोस्माभिर्न सम्यगवगम्यते । कवयस्तद्विजानं
ति न वयं कर्ममोहिताः ॥ ॥ श्रीनारद उवाच ॥ ॥ पुरुषं पुरंजनं विद्याद्यद्व्यनक्त्यात्मनः पुरं । एकद्वित्रिचतुष्पादं
बहुपादमपादकं । योविज्ञाताहृतस्तस्य पुरुषस्य सखेश्वरः ॥ ॥

यद्यस्मात् ॥ ॥ चतुर्थेष्टाविंशः ॥ ॥ एकोनविंशे परोक्षार्थव्याख्यानेनोपसंहृतां श्रीसंगतो भवस्त्रीशसंगान्मुक्तिरितिस्फुटीकवयस्तदध्यात्म
विदः । व्यनक्ति लिंपति चेतनीकरोतीत्यर्थः । यद्वा व्यनक्ति प्रकटयति । ततश्च स्वकर्मणा पुरं जनयतीति पुरंजनपदं व्याख्यातं भवति ।
एकद्व्यादयः पादा यस्य । अविज्ञातशब्देनाहृतः । व्याहृतः । उक्तो यः स ईश्वरः ॥ ॥

टो

सा॰ च॰ अविज्ञातनामनिरुक्तिः ॥ यद्यस्मात्तुं लिर्निर्भि[illegible]दियोगेन न विज्ञायते ॥ २ ॥ तत्र तेषु पुरेषु मध्ये । अक्षादिरिंद्रियैः पंचवृत्तिर्वायुं च शिरांसर्पद्व
प्राणाः । एकादश महा सह इत्यनेनैकादश महान् लथैनाधक[illegible]संदर्शयति इह देहलयस्य तन्मनः । नवखानि द्वाराणि यस्य । क्रमत
स खइत्यादेरर्थसंक्षेपेणाह । यस्मिन्निंद्रियसंयुतः स आत्मा तासु द्वारि दैहियाति इति । पुरः पूर्वभागे हृताः । नेत्रे इति रूपमिति च चक्षुषि

८५

[illegible]विज्ञायते ते एतिर्न्नामलिर्वाक्रियाग्रणेश यदाजिघ्र[illegible]पुत्रपश्यकाज्ञेन प्रकृतेर्गुणान्नानवद्वारं हि हस्तांघि तत्रामनुत
साघ्रिति ॥ २ ॥ बुद्धिं उपमदीविद्यात् ममाहमिति यत्कृतौ । यामधिष्ठाय देहेस्मिन्नूपमानं भुंक्ते । हिगुणान् । सखाय इंद्रिय
गुणा ज्ञानं कर्म्म च यत्कृतौ सख्यस्य इतय ॥ प्राण ॥ पंचवृत्तिर्यथोरगः ॥ इह इहलं मनोवि[illegible]डु सयेंद्रियनायकोपंचाला ॥ पंच
विषया ॥ यन्मध्ये नवखं पुरं । अक्षिणी नासिके कर्णौ मुखशिश्नगुदाविति द्वे द्वे द्वारौ च बहिर्यातिय स्मादिंद्रिय संयुतः ॥ अक्षिणी
नासिके आस्यमिति पंचपुरः ॥ कृताः ॥ दक्षिणा दक्षिण ॥ कर्णौ उत्तरा चोत्तरः ॥ ह्रतः ॥ पश्चिमे अधोद्वारो गुदं शिश्नमिहोच्य
ते । खद्योता ॥ विर्मुखी वात्र नेत्रे एकत्र निर्मिते । रूपं विभ्राडिति तं तास्यां विचष्टे च चक्षुषेश्वर ॥ नलिनी मालिनी नासे गंधः सौर
भ उच्यते ॥ २१ ॥ घ्राणोवधूतो मुख्यास्यं विपणो वाग्रसविद्रसः ॥ ॥

खद्योतादीनां व्याख्यातं शेषोऽनुवादः ॥ ईश्वरः प्रभुरंजनः ॥ नासे इति व्याख्या । अवधूनोतीत्यवधूतो वायुस्तदात्मकेनोच्छ्वासेन सह कद्ध
न त्वात् घ्राणोवधूतः ॥ आस्यमिति व्याख्यारसज्ञविपणोक्षित इत्यत्र रसज्ञशब्दनिर्दिष्टस्य रसविदित्यनुवादः ॥ रसइति व्याख्यार
सनेंद्रियमित्यर्थः ॥ विपणो वाग्रसविद्रस इत्येव पाठः । आर्षत्वान्न दोषः ॥ ॥

पि॰ २
धा
८५

न्वि॰ २

टी २ — द्वे

ग्रंथः ग्रन्थं ॥ २१ ॥ २२ ॥ २३ ॥ ग्रामकमित्यस्यानुवादः ग्रामिणां रतिरिति तस्य व्याख्यात्व्यायमिति ॥ २४ ॥ २५ विषुवीनपदार्थानुवादो विभुविरिति ॥ २५ ॥ तद्गुणैर्मनोगुणैस्त
मः सत्वरजोभिः महिषीय ग्रहीहेतेत्यादेरर्थं संगृह्याह ॥ यथा बुद्धिः श्रुत्वे विक्रियते जागृतिविकरोति वाइंद्रियाणि परिणामयति तस्यागुणैरज्ञो लिप्त
आत्मा तथा तथा तस्याद्वृत्तीः दर्शनस्पर्शनाद्याः केवलमुपद्रष्टेव स[illegible]लादनु कार्यते ॥ आरुगमित्येतद्व्याचष्टे ॥ संवत्सरस्येवा त्रति हतोरगोवेगः
प्रती[illegible]तोयस्य सि संवत्सरस्य ॥ २ व क्षतक्षम्र गतिः ॥ अप्र शरीरादेर्बुद्ध्या वेववि हृन्नत्वेन देशांतरगत्यसावात् ॥ पाठांतरे संवत्सरस्य तत्कालं वयश्चता

आपणेव्यवहारोविचित्रमंधोबहूदनां पितृहूर्दक्षिणः कर्णः उत्तरो देवहूः स्मृतः ॥ प्रवृत्तं च निवृत्तं च शास्त्रं पंचालसंज्ञितं ॥ २२ ॥
पितृयानं देवयानं श्रोत्राच्छ्रुतधराद्व्रजेत् ॥ आसुरीमेढ्रमर्वाग्द्वार्व्यवायो ग्रामिणां रतिः ॥ २३ ॥ उपस्थो दुर्मदः प्रोक्तो निर्ऋति
र्गुद उच्यते ॥ वैशसं नरकं पायुर्लुब्धकोंधौ तु मे शृणु ॥ २४ ॥ हस्तपादौ पुमानाभ्यां युक्तो याति करोति च ॥ अंतःपुरं च हृदयं विषूचि
र्मन उच्यते ॥ २५ ॥ तत्र मोहं प्रसादं वा हर्षं प्राप्नोति तद्गुणैः ॥ यथा विक्रियते [illegible] गुणक्तो विकरोति वा ॥ २६ ॥ तथा तथोपद्रष्टा
त्मा तद्वृत्तीरनुकार्यते ॥ देहो रथस्त्विंद्रियाश्वः संवत्सररयोगतिः ॥ २७ ॥ द्विकर्मचक्रस्त्रिगुणध्वजः पंचासुबंधुरः ॥ मनोरश्मि
र्बुद्धिसूतो हृन्नीडो द्वंद्वकूबरः ॥ २८ ॥ पंचेंद्रियार्थप्रक्षेपः सप्तधातुवरूथकः ॥ आकूतिर्विक्रमो बाह्यो मृगतृष्णां प्रधावति ॥ एका
दशेंद्रियचमूः पंचसूनाविनोदकृत् ॥ संवत्सररंहः डंबेगः कालो येनोपलक्षितः ॥ ॥

त्यांगतिर्यस्येति हीषमित्यस्य व्याख्या ॥ त्रिगुणध्वज इति त्रिवेणुपदव्याख्या ॥ पंचप्रहरणमित्येतद्व्याचष्टे पंचेंद्रियार्थप्रक्षेप इति ॥ पंचेंद्रियैः सूनाविनोदमिव
न्यायेन विषयसेवां करोतीति पंचसूनाविनोदकृत् ॥ अनेन नवचारमृगयां तत्रेत्यादि व्याख्यातं ॥ ॥

नारदेनकृता द्विचक्रमित्यस्य व्याख्या द्विकर्मचक्र इति धा

यथा
सूत्र
यथा
टी २
टी २

स्वरयशास्त्र   पि ८

भा०च०

परिहृत्य परिभ्रमणेन भगिनीविना गृहे लोकानां कृपाय चरः संचारिणः भूतानामुपसर्गपीडायां आशु शीघ्रमृत्युहेतुः१ स्योवेगोऽस्य प्रहारस्येतिप्रश हृत्वाख्या। पाठांतरे भूतहृत्ता: ज्वरयः। अनेनचचरित्रितु पञ्च इत्यपि पदं व्याख्यातं। द्विविधः शीतोष्णत्वभेदेन प्रवेशने दात्रा। एवं परोत्त्वेनोक्रम र्थं व्याख्याय सर्वकथा तात्पर्यमाह। एवमित्यादि विरसकमेणेत्यंते न। आधिदैविकादिति दुःखैः। क्लिश्यमानो मे माहमितिदेहे शतावर्षा णि शेते वर्णितः इति ह योरत्नयम् अशनापिपासादीनां प्राणधर्मान्नूघ्नत्वादानींद्रियधर्मान्नकामोधर्मान्निर्गुणं त्रा तेन न्यायसे कामलव

२ तच्चाहानीह गंधर्वागंधर्वौराजयक्ष्मा तासहंत्वाह: परिक्रांत्याषसुन्नरशतत्रयं ॥२२॥ कालकन्याजरा सान्वातलोकेऽस्ति नात्ति नदति। सारंज गृहे हत्युः कृपायययवनेश्वरः। आध यो व्याधयस्तस्य सेनिकायवनाश्वराः। भूतोपसर्गाश्चरयः। प्रज्ञारोहि वि धीज्वरः॥२३॥ एवं बहुविधैर्दुःखैर्दैवभूतात्मसंभवैः। क्लिश्यमानः शतं वर्षं देहे देही तमोवृतः॥२४॥ प्राणेंद्रियमनोधर्माना त्मन्यध्यस्य निर्गुणः। शेते कामलवान्ध्यायन्ममाहमिति कर्मकृत्॥२५॥ यदात्मानमविज्ञाय भगवंतं परं गुरुं। पुरुषस्तु विषज्जेत गुणेषु प्रकृतेः स्वदृक्॥२६॥ गुणाभिमानी स तदा कर्माणि कुरुतेऽवशः। शुक्लं कृष्णं लोहितं वा यथाकर्माभिजाय ते॥२७॥ शुक्लात्प्रकाशभूयिष्ठाँल्लोकानाप्नोति कर्हिचित्। दुःखोदर्कान्क्रियायासांस्तमःशोकोत्कटान्क्वचित्॥२८॥ क्व चित्पुमान्स्त्री च क्लीबः क्वचिन्नोभयमंधधीः देवो मनुष्यस्तिर्यग्वा यथाकर्मगुणं भवः॥२९॥

विषयसुखलेशान्ध्यायन्कर्म करोति। ततः किं भवति। आह। यदेति द्वाभ्यां। स्वदृक् स्वप्रकाशः। स्वतो वापि शुक्लं। सात्विकं कृष्णं तामसं लोहितं राजसं यथा कर्म तथा जायते। तदेवाह। शुक्लादिति द्वाभ्यां। प्रकाशभूयिष्ठान्येषु। दुःखमुदर्के उत्तरफलं येषु क्रिया यया आयासो येषु तान्लोहितात्

तमःशोकोत्कटान् कृष्णादिति ज्ञेयं। नोभयं नपुंसकं यथा कर्म्म गुणं कर्म्मगुणानतिक्रम्य॥ ॥२९॥ ॥

नियम २
धीरमनो०

८६

८६

तेषु दैववशेन सुखदुःखप्राप्तीतीति स दृष्टांतमाह। हालसां क्षुधापरीतो व्याप्तः सारमेयः श्वा ह्रदं दंडेन ताडनं ॥२३॥ कामश्चाप्याशयो यस्मान्न तु तर्हि सुखदुःखसं
लवान् दुःखस्य च प्रतीकारसंभवान्नैकांततो हेयत्वं तत्राह ॥२४॥ दुःखेष्विति। दुःखस्य प्रतीकारस्याभावन्नास्तिस्याद्वेन्नस्य तस्य प्रतिक्रिया तथाऽपि [illegible] विधेषु दुःखेषु
मध्ये एकतरेणापि दुःखेन व्यवच्छेदो वियोगो नास्ति। प्रतिक्रियाणामपि दुःखरूपत्वादिति सदृष्टांतमाह ॥२५॥ यथाहीति। दुःखस्य मूलभूतानि तु कर्माणि
प्रतिक्रियादिकर्माणि नैव निवर्तंत इत्याह ॥ [illegible] ॥ नैकांततः। अत्यंतं स वा स नैकेवलं ज्ञानरहितं अविद्यया उपसृतं प्राप्तं। अतो विशेषान्न निवृत्तिर्निव

र्तते परीतो यथा दीनः सारमेयो गृहं गृहं। चरन्विंदति यद्दिष्टं दंडमोदनमेव वा ॥२४॥ तथा कामाशयो जीवस्तत्र तत्र यथा स्वकर्मकृ।
उपर्यधो वा मध्ये वा याति दिष्टं प्रियाप्रियं। दुःखेष्वेकतरेणापि दैवभूतात्महेतुषु। जीवस्य न व्यवच्छेदः स्याच्चेत्तत्तत्प्रतिक्रिया
॥२५॥ यथा हि पुरुषो भारं शिरसा गुरुमुद्वहन्। तं स्कंधेन स आधत्ते तथा सर्वाः प्रतिक्रियाः ॥२६॥ नैकांततः प्रतीकारः कर्म
णां कर्म केवलं। द्वयं ह्यविद्योपसृतं स्वप्ने स्वप्न इवानघ। अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते। मनसा लिंगरूपेण स्वप्ने विचर
तो यथा ॥२७॥ अथात्मनोऽर्थभूतस्य यतोऽनर्थपरंपरा। संसृतिस्तद्व्यवच्छेदो भक्त्या परमया गुरौ ॥ ॥

नैकत्वमिति सार्धं। अत्र दृष्टांतः स्वप्ने दृष्टः स्वप्नः प्रबोधं विना यथा तं स्वप्नमत्यंतं न प्रतीकरोतीत्यर्थः ॥२८॥ ननु तर्हि ज्ञानविलसितत्वेन संसृतिहे
तोर्देहादेरसत्त्वात्किं तन्निवर्तनप्रयासेनात्राह। अर्थे हीति। लिंगरूपेण तु पाधिभूतेन। तदेव संसृतिप्रकारमुक्त्वा तन्निवृत्तिप्रकारमाह। अथ तस्मा
त्पुरुषार्थभूतस्यैवात्मनः यतोऽज्ञानात्मनः सा वाऽनर्थपरंपरारूपा संसृतिस्तद्विनिवृत्तिस्तस्य व्यवच्छेदो गुरुरूपे वासुदेवे भक्त्यैव ॥ ॥

भा॰च॰
८७

ननु संसृतिनिवृत्तिर्वैराग्यपूर्वकाज्ज्ञानादेव न तु तरति शोकमात्मविदित्यादिश्रुतेस्तत्राह। वासुदेव इति। सध्रीचीनेन समीचीनेन प्रकारेणान
न्वसौ महाफलो भक्तियोगः कथं स्यादत आह॥३७॥ स इति। अच्युतस्य कथामाश्रित्य वर्तमानो ऽचिरात्स्यात्। कस्य स्यात्तदाह। शृण्वतः। अधीयान
स्य च। कुत्र स्यात्तदाह॥३८॥ यत्रेति भगवतो गुणानुकथने श्रवणे च व्यग्रं सत्वरं चेतो येषां तैः। ननु साधुसंगं विनाप्येवं हरिकथाश्रव
णादिना भक्तिर्भवेदित्याशंक्याह महतामिति॥३९॥ तस्मिन् स्थाने महद्भिर्मुखरिताः कीर्तिताः मधुभिदश्चरित्रमेव पीयूषं तदेव शिष्यत इ
ति शेषोपास्य सारोंश रहितस्तद्वाहिन्य इत्यर्थः। अवितृषः अलंबुद्धिशून्याः संतः गाढैः सावधानैः कर्णैर्ये ताः सरितः पिबंति

वासुदेवे भगवति भक्तियोगः समाहितः। सध्रीचीनेन वैराग्यं ज्ञानं च जनयिष्यति॥ ३७॥ सोऽचिरादेव राजर्षे स्यादच्युतकथाश्रयः।
शृण्वतः श्रद्दधानस्य नित्यदा स्यादधीयतः॥ ३८॥ यत्र भागवता राजन् साधवो विशदाशयाः। भगवद्गुणानुकथनश्र
वणव्यग्रचेतसः॥ ३९॥ तस्मिन्महन्मुखरिता मधुभिच्चरित्रपीयूषशेषसरितः परितः स्रवंति। ता ये पिबंत्यवितृषो नृप गाढकर्णै
स्तान्न स्पृशंत्यशनतृड्भयशोकमोहाः॥ ४०॥ एतैरुपद्रुतो नित्यं जीवलोकः स्वभावजैः। न करोति हरेर्नूनं कथामृतनिधौ रतिं।
॥४१॥ प्रजापतिपतिः साक्षाद्भगवान् गिरिशो मनुः। दक्षादयः प्रजाध्यक्षा नैष्ठिकाः सनकादयः॥ ४२॥ मरीचिरत्र्यंगिर
सौ पुलस्त्यः पुलहः क्रतुः। भृगुर्वसिष्ठ इत्येते मदंता ब्रह्मवादिनः॥ ४३॥ अद्यापि वाचस्पतयस्तपोविद्यासमाधिभिः। पश्यंतो
ऽपि न पश्यंति पश्यंतं परमेश्वरं॥ ४४॥

सेवंते। अशनशब्देन क्षुल्लक्ष्यते अशनादयस्तान्न स्पृशंति भक्तिरसिकाननुबाधंत इत्यर्थः। सत्संगमंतरेण स्वयमेव कथादि तन्नादौ बालस्यादिना रसावे
शादेरभावाच्च तृप्तिपाशाद्यतिभूतस्य भक्तिर्न संभवतीत्याह। एतैरिति। भगवदनुग्रहमंतरेण कुनकस्यापि ज्ञानं न संभवतीति कैमुत्यन्यायेन
ह प्रजापतिः प्रजापतिपतिर्ब्रह्मा। मदंताः अहं नारदोंऽते येषां ते॥ [illegible] तपो विद्यासमाधिभिरुपायैः पश्यंतो विविच्यंतोऽपि पश्यंतं सर्व

॥ श्री ॥ वाचांपतये

८७

ना ब्र

कुत इत्यत आह। शब्दब्रह्मणि वेदे उरुविस्तारे यस्य अर्थतोपि पारं भूम्यतेस्मिन् वर्त्तमानाः मंत्राणां लिंगैर्वर्ह्निहस्त्वादिगुणयुक्ताविविधदेवताभिधानसामर्थ्यैः परिछिन्नमेवेन्द्रादिरूपं तत्कर्म्मणा येन भजंतः परमेश्वरं न विदुः। तर्ह्यनु कोनाम कर्म्मत्यागं इष्टा हित्वा परमेश्वरमेव भजेत् इत्यत आह। ४५। यदा यमनुगृह्णाति अनुग्रहे हेतुः आत्मनि भावितः सानु तदा नूनं लोके लोकव्यवहारे वेदे वेदकर्म्ममार्गे परिनिष्ठितां मतिं त्यजति ४६। अर्थकाशिषु परमार्थत्वेन प्रकाशमानेषु तुच्छार्थबुद्धिं मा कृथाः। पुरोचनाय केवलं श्रोत्रप्रियेषु न स्पृष्टं वस्तु यैस्तेषु वेदेन स्वर्गादिसाधनत्वेनोक्तानि कर्म्माणीति वेदवादिनो वदंति। कथमस्पृष्टवस्तुत्वमित्यपेक्षायां तत्राह। ये धूम्रधियो मलिनबुद्धयः

शब्दब्रह्मणि दुःपारे चरंत उरुविस्तरे। मंत्रलिंगैर्व्यवछिन्नं भजंतो न विदुः परं ॥ ४५ ॥ यदा यस्यानुगृह्णाति भगवानात्मभावितः। स जहाति मतिं लोके वेदे च परिनिष्ठितां। तस्मात्कर्म्मसु वर्हिष्मन्नज्ञानादर्थकाशिषु। मार्थदृष्टिं कृथाः श्रोत्रस्पर्शिष्वस्पृष्टवस्तुषु ॥ ४७ ॥ स्वं लोकं न विदुस्ते वै यत्र देवो जनार्द्दनः। आहुर्धूम्रधियो वेदं सकर्म्मकमतद्विदः ॥ ४८ ॥ आस्तीर्य दर्भैः प्रागग्रैः कार्त्स्न्येन क्षितिमंडलं। स्तब्धो वृहद्वधान्मानी कर्म्म नावैषि यत्परं ॥ ४९ ॥ तत्कर्म्म हरितोषं यत्सा विद्या तन्मतिर्यया। हरिर्देहभृतामात्मा स्वयं प्रकृतिरीश्वरः ॥ ५० ॥ तत्पादमूलं शरणं यतः क्षेमो नृणामिह ॥ ५१ ॥ ॥ श्रीराम ॥ ॥

यः सकर्म्मकं कर्म्मपरं वेदमाहुस्ते अतद्विदः अवेदज्ञाः यतस्ते स्वं स्वरूपभूतं लोकं आत्मतत्त्वं वेदतात्पर्यगोचरं न विदुः यत्र देवोस्ति तं तु महान् सर्वं इत्याह ॥ ४८ ॥ आस्तीर्येति। हे वृहद्वधात् बहुपशुवधात् मानी महान् यज्वाहमित्यहंकारी अत एव स्तब्धः अविनीतः सन् कर्म्म नावैषि परं विद्यास्वरूपं तच्च न वेत्सि ॥ ४९ ॥ नारदः स्वयं कृपया तदुपदिशति ५० हरितोषयतीति हरितोषं यत् तदेव कर्म्म यया तस्मिन् हरौ मतिर्भवति सैव विद्या महाफलत्वात्। कुत इत्यपेक्षायां हरेः परमफलत्वं दर्शयन्नाह हरिरिति। हरिर्देहभृतामात्मा ईश्वरश्च अतत्र हेतुः स्वयं आत्मा तंत्रेण प्रकृतिः कारणं अस्य अतः तत्पादमूलमेव शरणं आश्रयः। यतः यस्मिन् ॥ ५१ ॥ ॥

रू३

नचतद्रजनेप्यन्यत्रजनश्चदुःखंभयंचेत्याहासइति। इतियोवेदसएवविद्वान्सगुरुरेवहरिश्च। उक्तमुपसंहरति। एवंभवतःप्रश्नःसंछिन्नःपरिहृतःअत
देवमात्मनोवंधमोक्षप्रकारेकथारूपकेणकथितेपिनातिनिर्वेदेणविनंतुत्रागमनंपतीक्षमाणंसंततंतत्क्षणमेवचमहालयकंपितसकलमात्रं
गृहाविर्व्वासयिवंहरिणरूपकमाहाश्चेति। वदतोमेवचःशृणु। क्षुद्रमल्पंचरतीति। तथातंअलुब्धा। सुमनसांपुष्पाणांशरणेआश्रमेवाटिकायांमि
थित्वामिथःपरस्परंस्त्रियासहमिलित्वाततेनैवरक्तंआसक्तंषडंघ्रयोभ्रमरास्तेषांसामसुसंगीतेषुलुब्धौकर्णौयस्यतंपरेषामसूनिर्हृतैः। स्त्रीय

सवैप्रियतमश्चात्मायतोनभयमण्वपि। इतिवेदसवैविद्वान्योविद्वान्सगुरुर्हरिः॥५१॥ श्रीनारदउवाच॥ प्रश्नएवंहिसंछिन्नोभव
तःपुरुषर्षभ। अत्रमेवदतोगुह्यंनिशामयसुनिश्चितं॥५२॥ क्षुद्रंचरंसुमनसांशरणेमिथित्वारक्तंषडंघ्रिगणसामसुलुब्धकर्णं। अ
ग्रेवृकानसुतृपोऽविगणय्ययांतंपृष्ठेमृगंमृगयलुब्धकबाणभिन्नं॥५३॥ सुमनःसमधर्म्मिणांशरणआश्रमेपुष्पमधुगंधवत्क्षुद्र
तमंकाम्यकर्म्मविपाकजंकामसुखलवंजैह्वोपस्थादिविचिन्वंतंमिथुनीभूयतदभिनिवेशितमनसंषडंघ्रिगणसामगीतवदति
मनोहरवनितादिजनालापेष्वतितरामतिप्रलोभितकर्णमग्रेवृकयूथवदात्मनआयुर्हरतोऽहोरात्रांतान्कालविशेषानविगणय्य
गृहेषुविहरंतंपृष्ठतएवपरोक्षमनुप्रवृत्तोलुब्धकःकृतांतोंतःशरेणयमिहपराविध्यतितमिममात्मानमहोराजन्भिन्नहृदयं
द्रष्टुमर्हसीति॥५४॥

नसंस्त्रीपर्यंतीत्यसुतृपः। तानविगणय्यअगणयित्वा। लुब्धकस्यबाणेनभिन्नंमृगंमृगयअन्वेषय। श्लोकंप्रकृतंयोजयन्व्याचष्टे। सुमनोभिःसमानोधर्मः
परिणामेविरसत्वंयासांस्त्रीणांमिथित्वेत्यस्यव्याख्यामिथुनीभूयस्त्रीभिःसहेतिशेषः। रक्तमित्यस्यव्याख्यातदभिनिवेशितमनोभिना। असुतृप्स्इ
त्यस्यव्याख्याआयुर्हरतइति। यांतमित्यस्यव्याख्याविहरंतमिति। अंतःनालिकायांगूढेनशरेणपराविध्यतिहृदेवताडयति॥५४॥

उपदेशसारमाह। स इति। विचक्ष्व विचार्य। अंतर्हृदि छिद्रं कर्णयोर्धुनीं नदीमिव बहिर्दृष्टिं चित्ते नियच्छ एतच्च सर्वेंद्रियोपलक्षणार्थं गृहाश्रमं च जहि। कीदृशं। अ
सत्तमानां असतिकामुकानां यानि यूथानि तेषां गाथा वार्त्ता यस्मिन्। जीवानां शरणमीश्वरं। एवं क्रमेण सर्वतो विरम। अर्थांतरं च बहु पूर्वोक्तमर्थमनुवदति। श्रुतं अन्वीक्षि
तं विचारितं। ब्रह्मन् नारद। एतत् त्वदुक्तमात्मतत्त्वं उपाध्यायाः। ये मम कर्मोपदेष्टारः आचार्याः ते न जानंति। अतस्त्वत्तः उपाध्याय उक्तः। तद्वाक्यविरोधेन
त्मतत्त्वेऽसंभावनारूपो महान् संशयः संछिन्नस्त्वया। अत्र कश्चित्संशयो वर्त्तते। यत्रेंद्रियवृत्तीनामप्रवृत्तेर्मुह्यंति। संशयमाह द्वाभ्यां। कर्माणि येन
देहेन करोति तमत्रैव विहाय अमुत्र लोकांतरे कर्मोपस्थापितेनान्येन देहेन जुष्टानि उपभुक्तानि जीवो भुंक्ते प्राप्नोति इति वादः श्रूयते। प्राप्यमुपपन्नं तल्लोका

स त्वं विचक्ष्व मृगचेष्टितमात्मनोंतश्छिद्रं नियच्छ हृदि कर्णधुनीं च चित्ते जह्यंगनाश्रममसत्तमयूथगाथं प्रीणीहि हंसशरणं विरम क्रमेण
॥ ॥ राजोवाच ॥ ॥ श्रुतमन्वीक्षितं ब्रह्मन् भगवान् यदभाषत। नैतज्जानंत्युपाध्यायाः किं न ब्रूयुर्विदुर्यदि। संशयोऽत्र मे विप्र संछि
न्नस्तत्कृतो महान्। ऋषयोऽपि हि मुह्यंति यत्र नेंद्रियवृत्तयः। कर्म्माण्यारभते येन पुमानिह विहाय तं। अमुत्रान्येन देहेन जुष्टानि
स यदश्नुते। इति वेदविदां वादः श्रूयते तत्र तत्र ह। कर्म्म यत्क्रियते प्रोक्तं परोक्षं न प्रकाशते॥ ॥ श्रीनारद उवाच ॥ ॥ येनैवारभते कर्म्म ते
नैवामुत्र तत्पुमान्। भुंक्ते ह्यव्यवधानेन लिंगेन मनसा स्वयं॥ ॥ श्रीरामाय नमः॥ ॥

न्निति। शारीरजैः कर्मदोषैर्याति स्थावरतां नर इति। त्वया चोक्तं शाश्वतीरनुभूय यातनाम् इति। एतच्च कर्तृभोक्तृदेहभेदेन कृतनाशाकृताभ्यागमप्रसंगान्न
संगच्छत इति भावः। संशयांतरमाह। प्रोक्तं वेदोक्तं कर्म क्रियते ज्ञानेः। तच्चानंतरं तत्क्षण एव परोक्षं अदृष्टरूपं सन्न प्रकाशते। अतः कर्मणो नष्टत्वान्न
भोगोऽपि दुर्घट इति भावः। प्रथमस्योत्तरं येनैवेति। अव्यवधानेन कर्तृभोक्तृदेहविच्छेदं विना स्थूलदेहनाशेऽपि मनःप्रधानस्य लिंगदेहस्या
नाशान्नोक्तदोषप्रसंग इत्यर्थः॥ ॥

लिंगदेहविशिष्टस्य लोकान्तरं प्रति न दृष्टां तेन स्पृष्टयाति। शयानमिमं जाग्रद्देहं श्वसन्तं जीवन्तं तत्स्थं स्वप्नं तदभिमानं त्यक्त्वा आत्मनि मनसि संस्काररूपेण हितं कर्म
यथा भुंक्ते तादृशेन शयानदेहसदृशेन कर्मोपस्थापितेन देहेनान्येन वा पश्वादिदेहे [struck through] न तथा लोकान्तरेऽपीति भावः। ननु भवतु नाम लिंग
विशिष्टस्यानेन दृष्टां तेन लोकत्वं कर्तृत्वं तु दानप्रतिग्रहादिषु स्थूलदेहविशिष्टस्यैव दृश्यते तत्राह। ममेते पुत्रादयः असावहं ब्राह्मण इति ब्रुवन् मनसा यद्
देहं गृह्णीयात् तत्त्वतो देहान्तरग्रहणसिद्धं कर्मप्रमाणं गृह्णीयात् येन कर्मणा एवमहंकारगृहीते नष्टे नर्तवो भवति। अन्यथा जन्मानुपपत्तेः। अतो अलिमन्तुर्मनो
विशिष्टस्यैव कर्तृत्वं भुक्तिमानविषयस्य तु देहस्य पुत्रादिदेहवत् द्वारमात्रमिति भावः। यदुक्तं कर्मणो नष्टत्वात् मुत्र लोग इति तत्राह। यथेति। ऽस

शयानमिममुत्सृज्य श्वसन्तं पुरुषो यथा। कर्मात्मन्याहितं भुंक्ते तादृशेनेतरेण वा॥ ममेति मनसा यद्देहं दृशं सावहमिति ब्रुवन्। गृह्णीयात्तत्प्रमाणं स्यात् कर्म येन पुनर्भवः॥ यथानुमीयते चित्तमुभयैरिन्द्रियेहितैः। एवं प्राग्देहजं कर्म लक्ष्यते चित्तवृत्तिभिः॥ नानुभूतं क्वचानेन देहेनादृष्टमश्रुतम्। कदाचिदुपलभ्येत यद्रूपं यादृगात्मनि॥ तेनास्य तादृशं राजन् लिंगिनो देहसंभवम्। श्रद्धत्स्वाऽननुभूतोऽर्थो न मनः स्प्रष्टुमर्हति॥ ५४॥ ॥श्री रामाय नमः॥ ॥

येर्ज्ञानकर्मरूपैरिन्द्रियाणामीहितैः कदाचित् कर्मप्रवृत्तिलिङ्गैश्चित्तमनुमीयते स सत्यपि सर्वेन्द्रियविषयसंबंधे युगपत् ज्ञानानुत्पत्तेः तदुक्तम् युगपत्
ज्ञानानुत्पत्तिर्मनसो लिंगमिति एवं चित्तवृत्तिभिरपि पूर्वदेहजं कर्म लक्ष्यते। तासामपि युगपदनुत्पत्तेः। इतोपि कर्म लक्ष्यत इत्याह।
नानुभूतमिति द्वाभ्याम्। अनेन वर्तमानेन देहेन क्वचन कुत्रचिदपि नानुभूतं अननुभूतं अनुपभुक्तं अदृष्टं अश्रुतं तत्त वय [illegible] द्रूपं यदात्मकं
याद्रूपं यत्प्रकारं एतत्कदाचित्स्वप्नमनोरथादिषु आत्मनि मनसि उपलभ्येत। तेन हेतुनास्य लिंगिनो वासनाश्रयस्य जीवस्य तादृशं तदनुभाव
दियुक्तं पूर्वदेहसंभवं श्रद्धत्स्व निश्चयेन मन्यस्व यतो नानुभूतोऽर्थो मनः स्प्रष्टुं मनसि स्फुरितुमर्हति॥ ॥

पर्वताग्रे समुद्रः निद्राश्रयं ४

भ

किंच मनो दृष्टैव पूर्वरूपाणि शुभाशुभनिमित्तानि शरीराणि सूचयेत इत्याह। मन एवेति। भद्रं त इति सम्यग्वधानार्थमाशिषो भविनं दति। भविष्यतश्च
वं प्राप्स्यतः नैविष्यतः नीचत्वं प्राप्स्यतोपि भावीनिरूपाणि शंसति। मन एवौदार्यकार्पण्यादिहेतुभिः पूर्वमप्येवमेवासमिति पश्चादप्येवमेव भविष्यतीति ज्ञाप
यतीत्यर्थः। ननु कदाचिद्दर्शनानर्हमपि स्वप्ने प्रतीयते यथा पर्वताग्रे समुद्रः दिवा नक्षत्राणि स्वशिरश्छेद इत्यादि तत्राह। अदृष्टमिति। अन्यदे
शाश्रयं न स्त्रीत्वादिकं दिवाश्रसंगादिक्रियाश्रयं शिरश्छेदनाश्रयं निद्रादिदोषेण प्रतीयत इत्यनुमंतव्यं परस्यापितदनुपपन्नं ... त्वादि
ति भावः। ननु दरिद्रः क्वचिदात्मानं महाराजं पश्यति राजा च रंकमात्मानं पश्यति तत्कथमसंभावितं संगच्छेत तत्राह। सर्वइति। आयांति भोगपत्वे

मन एव मनुष्यस्य पूर्वरूपाणि शंसति। भविष्यतश्च भद्रं ते तथैव न भविष्यतः॥ ६८॥ अदृष्टमश्रुतं चात्र क्वचिन्मनसि दृश्यते
यथा तथानुमंतव्यं देशकालक्रियाश्रयं। सर्वे क्रमानुरोधेन मनसींद्रियगोचराः। आयांति वर्गशो यांति सर्वे समनसो जनाः।
सत्वैकनिष्ठे मनसि भगवत्पार्श्ववर्त्तिनि। तमश्चंद्रमसीवेदमुपरज्यावभासते॥ ॥ ९ ॥ ॥

न प्राप्नुवंति यांति च भोगानंतरं। यदि च कश्चिदमना भवेत् तर्ह्येवं न स्यात् न त्वेतदस्तीत्याह। सर्वे समनस इति। अतः सर्वेषां समनस्कत्वान्मनसि
च सर्वार्थानां क्रमेण प्रवेशान्नात्यंतादृष्टचरः कस्यापि कश्चिदर्थोऽस्तीत्यर्थः। तदेवं सर्वैरपि सर्वेर्थाः क्रमेण दृश्यंत इत्युक्तं। इदानीं युगपदपि
सर्वदर्शनं कदाचिद्भवतीत्याह। सत्वैकनिष्ठे भगवत्पार्श्ववर्त्तिनि भगवद्ध्यानपरे मनसि इदं विश्वं उपरज्य संयोगमिव प्राप्यावभासते। प्रतीय
नर्हस्यापि कदाचित्स्यादिति दृष्टांतः। चंद्रमसि उपरज्यत तमः राहुरिति तदिदं स्फुटं मनसि सर्वविषयस्फुरणं योगिप्रत्यक्षमिति प्रसिद्धं॥ ॥
श्रीरामचंद्राय नमः॥ ॥ श्रीगोपालाय नमः॥ ॥

तदेवंस्थूलदेहनाशेऽपिलिंगदेहस्यानाशादन्यःकर्त्तान्योलोकोक्तिदोषोनास्तीत्युक्तं।तत्रैवशंकते।ननुलिंगदेहस्यस्थूलदेहद्वारेणैवकर्त्तृत्वेलोकांतरत्वेननुके
वलस्यतत्रकदाचित्स्थूलदेहाभावेजीवस्यकर्त्तृत्वलोकांतरत्वाभावान्मुक्तिःप्रसज्येततत्राह।अहंममेतिभावःस्थूलदेहसंबंधःपुत्रेषुजीवेनव्यवधीयतेन
विछिन्नोभवतिकिंपर्य्यंतं।सुषुप्त्यादीनांव्यूहः।परिणामोलिंगंयावदस्ति।नआदिमानूअनादिःसन्।स्वापादावहंकाराद्यभावान्नतर्हिछेदमाशंक्याह।हा
स्वांसुषुप्त्यादिषु।उपतापइष्टवियोगादिदुःखेतेषुअहमितिज्ञानंअहंकारःमेहतेनप्रकाशते।प्राणायतनानामिंद्रियाणांविघातात्।इंद्रियैरिदंका

नाहंममेतिभावोयंपुरुषेव्यवधीयते।यावद्बुद्धिमनोक्षार्थगुणव्यूहोह्यनादिमान्॥सुप्तिमूर्छोपतापेषुप्राणायनविघाततः।
नेहतेहमितिज्ञानंमृत्युप्रज्वारयोरपि।गर्भेबाल्येऽप्यपोक्षत्वादेकादशविधंतदा॥लिंगंनदृश्यतेयूनःकुह्वांचंद्रमसोय
हि
था।अर्थेविद्यमानेपिसंसृतिर्ननिवर्त्तते।ध्यायतोविषयानस्यस्वप्नेनर्थागमोयथा।एवंपंचविधंलिंगंत्रिवृत्षोडशविस्तृतं।
य
एषचेतनयायुक्तोजीवइत्यभिधीयते।अनेनपुरुषोदेहानुपादत्तेविमुंचति।हर्षंशोकंभयंदुःखंसुखंवानेनविंदति॥ ॥

रास्यदवस्थाग्रहणेह्यहंकारःस्फुरतिनान्यथेत्यर्थः।गर्भेऽप्यपोक्षत्वान्नाअसंपूर्णत्वात्।प्राणायतनानामितिशेषः।यूनस्तरुणस्यएकादशविधंए
कादशेंद्रियैःस्फुटंलिंगमहंकरणंतन्नदृश्यते।सतोप्यनभिव्यक्तौदृष्टांतः।कुह्वांअमावास्यायांचंद्रमसोलिंगंरूपमिव।तस्मादहंकारास्पदस्यस्थू
लदेहस्याविच्छेदात्तद्भूतार्थाभावेऽपिसंसृतिनिवृत्तिर्नास्तीत्याह।अर्थेहीति।यावल्लिंगंस्थूलदेहाविच्छेदात्संसारानिवृत्तिरित्यर्थः।तंप्रपंचयति
एवमिति।सार्द्धैस्त्रिभिः।पंचविधंपंचतन्मात्रात्मकं।त्रिवृत्त्रिगुणं।षोडशविकारात्मनाविस्तृतं॥ ॥

वे

प्र नि

नचैकं देहं विसृज्य देहांतरं विशात्पूर्वं विदेहता स्यादेवेत्यत आह यथेति नापयाति पूर्वं तृणस्यात्यागात् अपयाति च तृणांतरधारणात् तथा न त्यजेत् अन्यं देहं कर्मणां प्राग्देहारंभकाणां व्यवधानेन विच्छेदेन समाप्त्या प्रकरणार्थमुपसंहरति मन एवेति भवभावनं संसारहेतुः कथं सति तदाह यदेति चरितान् उपभुक्तान् अतः कर्मणि सति मनसंगत्या कृतः कर्म तत्र हि विद्यायां सत्यां अनात्मनो देहादेः कर्म निर्बंधो भवति ७७

यथा तृणजलूकैवं नापयात्यऽपयाति च न त्यजेन्म्रियमाणोपि प्राक् देहाभिमतिं जनः यावदन्यं न विंदेत व्यवधानेन कर्मणां। मन एव मनुष्येंद्र भूतानां भवभावनं। यदाऽक्षैश्चरितान् ध्यायन् कर्माण्याचिनुतेऽसकृत्। सति कर्मण्यऽविद्यायां बंधः कर्मण्यनात्मनः। अतस्तदपवादार्थं भज सर्वात्मना हरिं। पश्यंस्तदात्मकं विश्वं स्थित्युत्पत्यप्यया यतः॥ श्रीमैत्रेय उवाच॥ भागवतमुख्यो भगवान् नारदो हंसयोर्गतिं। प्रदर्श्य ह्यमुमामंत्र्य सिद्धलोकं ततो गमत्। प्राचीनबर्ही राजर्षिः प्रजासर्गाभिरक्षणे। आदिश्य पुत्रानगमत् तपसे कपिलाश्रमे। तत्रैकाग्रमना धीरो गोविंदचरणांबुजं। विमुक्तसंगोनुभजन् भक्त्या तत्साम्यतामगात्। एतदध्यात्मपारोक्ष्यं गीतं देवर्षिणानघ। यः श्रावयेद्यः शृणुयात् स लिंगेन विमुच्यते। एतन्मुकुंदयशसा भुवनं पुनानं देवर्षिवर्यमुखनिःसृतमात्मशौचं। यः कीर्त्यमानमधिगच्छति पारमेष्ठ्यं नास्मिन् भवे भ्रमति मुक्तसमस्तबंधः। अध्यात्मपारोक्ष्यमिदं मयाऽधिगतमद्भुतं। एवं स्त्रियाश्रमः पुंसश्छिन्नोमुत्र च संशयः॥ ॥इति श्रीभागवते महापुराणे चतुर्थस्कंधे एकोनत्रिंशः॥ ॥

विश्वद्रष्टित्यादयो यतो हेतोर्भवंति हंसयोर्जीवेश्वरयोः ७९ पुत्रानादिश्येति पुत्राणामादेशं मंत्रिणामग्रे कथयित्वा ८० ८१ ८२ ८३ आत्मशौचं मनःशोधकं पारमेष्ठ्यं सर्वोत्कृष्टफलप्रदां बुद्धिस्तत्सहितस्य आश्रमोऽहंकारः छिन्नो भवति अमुत्र कर्मफलभोगः कथमिति संशय श्छिन्नः॥ इति चतुर्थे एकोनत्रिंशः॥

भा

२

ह

ता॰च॰ ९१

प्रसंगात्पंचत्रिंशोक्तं वृत्तं प्राचीनबर्हिषश्च वर्णयति च पुनर्द्वात्रिंशे प्रक्रांतं प्रचेतसां ॥ १ ॥ तत्र त्रिंशे तत्प्रश्नः षष्टादीशाद्वरास्ततः। आगत्य वार्क्षीमुद्वाह्य राज्यं चक्रुरितीर्यते। हरिं प्रतोष्य कां सिद्धिमापुः ॥ २ ॥ हे वार्हस्पत्य। कस्याचिद्विद्या यो बृहस्पतेर्मैत्रेयः शिष्य इति ज्ञातव्यं। ते यदृच्छया गिरिशं प्राप्य तस्यैव कैवल्यनाथप्रियस्य गिरिशस्य पार्श्ववर्त्तिनः तदनुगृहीताः संतो नूनं परं मोक्षं प्रापुरेव ततः पूर्वं इह त्वथ वा परत्र किं प्रापुः। उद्गीतजप रूपेण यज्ञेन तपसा च प्रभुं रंजनं हरिं। तेषां तत्तपःक्लेशं ज्ञात्वा कान्त्या शमयन् शांतेन सत्वेन वपुषा आविर्भूतः। सुपर्णस्कंधमारूढ इत्यादिना वर्हिष्मतः।

विदुर उवाच ॥ ॥ ये त्वयाभिहिता ब्रह्मन् सुताः प्राचीनबर्हिषः। ते रुद्रगीतेन हरिं सिद्धिमापुः प्रतोष्य कां। किं बार्हस्पत्येह परत्र वाथ कैवल्यनाथप्रियपार्श्ववर्त्तिनः। आसाद्य देवं गिरिशं यदृच्छया प्रापुः परं नूनमथ प्रचेतसः ॥ ॥ श्रीमैत्रेय उवाच ॥ ॥ प्रचेतसोंतरुदधौ पितुरादेशकारिणः। जपयज्ञेन तपसा पुरंजनमतोषयन्। दशवर्षसहस्रांते पुरुषस्तु सनातनः। तेषामाविरभूत्कृच्छ्रं शांतेन शमयन्रुचा। सुपर्णस्कंधमारूढो मेरुशृंगमिवांबुदः। पीतवासा मणिग्रीवः कुर्वन्वितिमिरा दिशः। काशिष्णुना कनकवर्णविभूषणेन भ्राजत्कपोलवदनो विलसत्किरीटः। अष्टायुधैरनुचरैर्मुनिभिः सुरेंद्रैरासेवितो गरुडकिंनरगीतकीर्त्तिः। पीनायताष्टभुजमंडलमध्यलक्ष्म्या स्पर्द्धच्छ्रियापरिवृतो वनमालयाद्यः। वर्हिष्मतः पुरुष आह सुतान्प्रपन्नान्पर्जन्यनादरुतया सघृणावलोकः ॥ ॥

सुतानाहेति त्रितीयेनान्वयः। कनकमयेन वर्णवता विभूषणेन भ्राजमानं कपोलं वदनं च यस्य। अष्टभिरायुधैः। गरुड एव किंनरः तेन [illegible]पद्रात्मने गीता कीर्त्तिः यस्य। पीनाश्च ते आयताश्च अष्टौ भुजास्तेषां मंडलं समूहः तन्मध्ये स्थितया लक्ष्म्या स्पर्द्धमाना श्रीः शोभा यस्याः तया वनमालया परिवृत आद्यः पुरुष आह। पर्जन्यस्य नाद इव रुतं नादो यस्याः तया वाचा। सघृणोऽवलोको यस्य ॥ ॥

र १

९१

कुना

वरं मे मत्तो वृणीध्वं। सौहार्देन हे सुता अपृथक् धर्मो येषां तेषां संबोधनं वा। परस्परं सौहृदेन तुष्टोऽहं। भूतेषु सौहृदं च भविष्यतीति ते प्रोदास्ये किं पुनर्युष्मभ्य ॥९॥
मिति शेषः। अग्रहीष्ट गृहीतवंतः। अथो इति हेतौ। लोकाननु लोकेषु भविष्यति। यद्वा लोकाननु भविष्यति। व्याप्स्यतीत्यर्थः। आत्मनो वीर्येण
संतानेन। प्रजार्थमादौ भार्यां संपादयति कंडोरिति त्रिभिः। तपोनाशार्थमिंद्रप्रेषितया प्रम्लोचया कंडुनाम्ना ऋषिर्बहुकालं रेमे सा च ततः स्वर्गं
गच्छंती कंडोर्जातं गर्भं वृक्षेषु त्यक्त्वा जगाम तदेतदुक्तं अपविद्धां त्यक्तां। स च सिद्धो वनस्पतीनां राजा सोमः अमृतस्राविणीं देशिनीं तर्जनीं

श्रीभगवानुवाच॥ ॥वरं वृणीध्वं भद्रं वो यूयं मे नृपनंदनाः सौहार्देनाऽपृथक्धर्मास्तुष्टोऽहं सौहृदेन वः॥ योऽनुस्मरति संध्या
यां युष्माननुदिनं नरः। तस्य भ्रातृष्वात्मसाम्यं तथा भूतेषु सौहृदं। ये तु मां रुद्रगीतेन सायं प्रातः समाहिताः। स्तुवंत्यहं कामवरा
न्दास्ये प्रज्ञां च शोभनां। यद्यूयं पितुरादेशमग्रहीष्ट मुदान्विताः॥ अथो व उशती कीर्तिर्लोकाननु भविष्यति। भविता विश्रु
तः पुत्रोऽनवमो ब्रह्मणो गुणैः॥ य एतामात्मवीर्येण त्रिलोकीं पूरयिष्यति। कंडोः प्रम्लोचया लब्धा कन्या कमललोचना। तां चा
पविद्धां जगृहुर्भूरुहा नृपनंदनाः। क्षुत्क्षामाया मुखे राजा सोमः पीयूषवर्षिणीं। देशिनीं रोदमानाया निदधे स दयान्वितः।
प्रजाविसर्ग आदिष्टाः पित्रा मामनुवर्तता। तत्र कन्यां वरारोहां तामुद्वहत मा चिरं। अपृथग्धर्मशीलानां सर्वेषां वः सुमध्यमा। अपृ
थग्धर्मशीलेयं भूयात्पत्न्यर्पिताशया॥ ॥९॥ ॥

तु दत्ता स्वस्या मुखे निदधौ अनेनाप्सरोगर्भसंभवेनामृताहारेण च तस्या लावण्यं कामसंवर्द्धनो गंध्यादिराहि संबोधो क्तो मामनुवर्तमानेन पित्रा नियुक्ताः सं
तः तत्र प्रजासर्गनिमित्ते तामुद्वहत। ननु बहूनां कथमेका भार्या स्यादत आह। अपृथक्धर्मैः शीलं च येषां तेषां च पत्नी भूयात्। अर्पितो भवत्सु
आशयो यया। धर्मशीलयोरैक्यान्महाकाव्ये न दृष्टादृष्टविरोध इति भावः॥ ॥९॥ ॥

ता॰च॰ ९२

या

अहतौजसः अप्रतिहतबलाः संतः पक्वगुणो दग्धकाम आदिमलत्वात् शयो येषां। अतः लोकद्वयभोगात्रिरयपायान्निर्विद्य मत्स्थानं प्राप्स्यथ। ननु गृहेषु प्रवि
ष्टानामस्माकं तु दासेन वंध एव स्यात् कृतम् इत्याह न निर्विद्दोषात् आह। गृहेष्विति। कुशलं मय्यर्पितं कर्म येषां। मद्वार्तया यातो यामः कालो येषां। बहवो नै
ष्ठातृणां गृहे नैव बंध इति। कुतस्तत्राह नच्यवद्दिति। यद्यस्मात्। कथाश्रवणात्। ज्ञः सर्वज्ञो हमीश्वरः। ब्रह्मवादिभिः प्रवक्तृभिर्निमित्तभूतैः श्रोतॄणां हृ
दि हृदये नव्यवत् प्रतिपदं नूतनं च तत्। अयं भावः प्रोमि। ब्रह्मसाक्षात्कारो भवतीत्यर्थः। ननु त्वत्कथाश्रवणे कथं ब्रह्मसाक्षात्कारस्तत्राह। यो हि एत

दिव्यवर्षसहस्राणां सहस्रमहतौजसः। भौमाननुलोकाद्यलोकानन्वैदिव्यांस्त्वग्रहान्नमांश्च थमय्यनपायिन्यात्कृपक्वगुण
शयाः। उपयास्यथ मद्धाम निर्विद्य निरयादतः। गृहेष्वाविशतां चापि पुंसां कुशलकर्मणां। मद्वार्तायातयामानां न बंधाय गृहा म
ताः। नव्यवद्धृदये यज्ञो ब्रह्मैतद्ब्रह्मवादिभिः। न मुह्यंति न शोचंति न हृष्यंति यतो गताः। मैत्रेय उवाच॥ ॥ एवं ब्रुवाणं पुरुषार्थभाज
नं जनार्दनं प्रांजलयः प्रचेतसः। तद्दर्शनध्वस्ततमोरजोमला गिरागृणन्गद्गदया सुहृत्तमं। प्रचेतस ऊचुः। नमो नमः क्लेशनाय नि
रूपितोदारगुणाह्वयाय मनोवचोवेगपुरोजवाय सर्वाक्षमार्गैरगताध्वने नमः॥ ॥ ॐ विनाश

देवब्रह्मा तत्र हे अंग यतो गताः यं मां प्राप्ताः संतः मोहशोकहर्षान्न प्राप्नुवंति। अतो मत्कथाश्रवणेन नव्यवन्मम हृदयाविर्भावादस्यैव ब्रह्मसाक्षा
त्कारत्वात् गृहेषु वसतामपि न बंध इत्यर्थः। पुरुषार्थभाजनं भाजयति प्रापयतीति तथा तं। वेदैः सकलश्रेयःसाधनत्वेन निरूपितान्युदाराणि गुणाह्व
यानि नामानि यस्य। मनोवचसोर्वेगादपि पुरोऽग्रतो जवो वेगो यस्य मनोवचसामगोचर इत्यर्थः। अत एव सर्वेषामक्षाणां मार्गैरंतः अनवग
ताध्वा यस्य तस्मै ते नमः॥ ॥ रामकृष्णाय नमः॥ ॥ म

नि ९२

अनुकंपाइयमेवास्माकं ३

स्वनिष्टयाऽखंडरूपस्थितया भुद्धस्ये अतः शांताय। मनसि निमित्तेसति अपार्थमेवविलसाद्धिस्फुरीरी। तं द्वयं यस्मिन्। गृहीता मायागुणैर्विग्रहा ब्रह्मादिमूर्तयो येना घृत सत्वविशुद्धसत्वरूपाय। संसारं हरतिमेधा ज्ञानं यस्य तस्मै। अयुं क्म हि कृतवंतोवयं। यदुक्तं वरदक्षिणं मितितन्मत सिनिधायाक्रूः। रूपमिति। समस्तानां संस्कृयोयस्मात्। न आविःकृतं प्रकटितं। आतो न्य किमतुकंपितं अनुकंपरमानुकंपेत्यर्थः। कुत इत्यत आह। हे अलंद्ररंधनत्त्र

बुद्धाय शांताय नमः स्वनिष्टया मनस्यपार्थं विलसद्द्वयाय। नमो जगत्स्थाननलयोदयेषु गृहीतमायागुणविग्रहाय २३
नमो विशुद्धसत्वाय हरये हरिमेधसे। वासुदेवाय कृष्णाय प्रभवे सर्वसात्वतां। नमः कमलनाभाय नमः कमलमालिने। नमः कमलपादाय नमस्ते कमलेक्षण। नमः कमलकिंजल्कपिशंगामलवाससे। सर्वभूतनिवासाय नमोऽयुंक्ष्महि साक्षिणे। रूपं भगवता त्वेतदशेषक्लेशसंक्षयं। आविःकृतं नः क्लिष्टानां किमन्यदनुकंपितं। एतावत्त्वं हि विभुभिर्भाव्यं दीनेषु वत्सलैः। यदनुस्मर्यते काले स्वबुद्ध्याऽभद्ररंधन। येनोपशांतिर्भूतानां क्षुल्लकानामपीहतां। अंतर्हितोऽतर्हृदये कस्मान्नो वेद नाशिषः॥ ॥ रामः॥ ॥ २३

मंगलनाशनात्वंप्रत्ययोऽत्रनविवक्षितः। एतावदेव दीनेषु वत्सलैः प्रभुभिर्भाव्यं कार्यं किं तत् तदाह यदिति। अस्मदीया एत इति बुध्याऽन्विते काले नुस्मर्यत इति यत्। त्वया तु रूपमपि दर्शितमिति भावः। येनानुस्मरणेन स्मृतानां तेषां उपाशांतिः सुखं भवति। किंच। क्षुल्लकानामपि भूतानां मंतर्हृदये अंतर्हितः अंतर्यामित्वेन स्थितो भवानीहतां इच्छतां त्वदुपासकानां नोऽस्माकमाशिषः कस्माद्धेतोर्न वेद जानाति वेत्यर्थः॥ ॥

ता॰च॰

९३

नो

तथापि वक्तव्यं चेत् । तर्हि येषामस्माकं भगवान् प्रसन्नः असावेव वरः । भगवत्प्रसाद एवास्माकमीप्सितो वर इत्यर्थः ॥ अपवर्गगुरुः मोक्षमार्गप्रदर्शकः गतिः अ
त एव कृतार्थभूताः ॥ यद्यप्येवं अथापि हे नाथ त्वत्तस्त्वत्तः वरमेकं वृणीमहे कथंभूतात् परतः कारणादपि परात् । अक्षरात्परतः पर इति श्रुतेः ॥ अतो पद्य
पि त्वं दातुं समर्थः न च देयानां त्वद्विभूतीनामंतोऽस्ति । यतो नंतविभूतित्वादनंत इति गीयसे । तथापि यथा सारंगो भ्रमरः पारिजाते सुखेन लब्धे सति सुलल
मप्यन्यत् वृक्षांतरं न सेवते । तथा वयमपि साक्षात्वदंघ्रिमूलं प्राप्य किं किं वृणीमहि न किंचिदित्यर्थः । यद्वा किमप्यन्यदुच्छं किमर्थं वृणीमहि । यद्वाय

असावेव वरोऽस्माकमीप्सितो जगतःपते । प्रसन्नो भगवान्येषामपवर्गगुरुर्गतिः । वरं वृणीमहेथापि नाथ त्वत्परतः परात् । न ह्यंतस्त्वद्विभू
तीनां सोऽनंत इति गीयसे । पारिजातेंजसा लब्धे सारंगोऽन्यन्न सेवते । त्वदंघ्रिमूलमासाद्य साक्षात्किं किं वृणीमहि । यावत्ते मायया स्पृ
ष्टा भ्रमाम इह कर्मभिः । तावद्भवत्प्रसंगानां संगः स्यान्नो भवे भवे । तुलयाम लवेनापि न स्वर्गं नापुनर्भवं । भगवत्संगिसंगस्य म
र्त्यानां किमुताशिषः । यत्रेड्यंते कथा मृष्टास्तृष्णायाः प्रशमो यतः । निर्वैरं यत्र भूतेषु नोद्वेगो यत्र कश्चन । यत्र नारायणः साक्षाद्भ
गवान्न्यासिनां गतिः । संस्तूयते सत्कथासु मुक्तसंगैः पुनः पुनः । तेषां विचरतां पद्भ्यां तीर्थानां पावनेच्छया । भीतस्य किं न रोचेत ताव
कानां समागमः ॥ ॥

स्य

दि वृणीमहि । ~~यद्यन्यदि वृणी~~ महि तर्हि किं किं वृणीमहि । अनंतत्वेन मनोरथानामनवस्थानादित्यर्थः ॥ अत एतावदेव प्रार्थयामहे इत्याहुः । याव
दिति । स्पृष्टाः व्याप्ताः संतो भगवति प्रकृष्टः संयोगो येषां तेषां संगोऽस्माकं स्यात् । ननु राज्यभोगान् स्वर्गापवर्गौ विहाय किमिदं प्रार्थ्यते तत्राहुः
तुलयामेति । भगवत्संगिसंगिनां संगस्य लवेणापि सत्संगस्य श्रैष्ठ्यं प्रपंचयति । यत्रेति त्रिभिः । यत्र येषु यतः येभ्यः कथास्वः निर्वैरं वैराभा
वः । पद्भ्यां पावनेच्छया । संसाराद्भीतस्य ॥ ॥ श्रीरामाय नमः ॥ ॥ ९ ॥ ॥

च ९३

स्मा ।

१ यत्प्रियः सखा　　न्मो　　सं३

सत्संगमफलमस्मान्निरेवाद्भुतमित्याहुः॥ वयंत्विति। तव सखा तस्य भवस्याप्यत्यंतमचिकित्स्यस्य भवस्य जन्मनो मृत्योश्च भिषक्तमं स है द्यं त्वां ग
तिं प्राप्ताः। वा रांतरं वृणुते यन्न इति द्वाभ्यां। नताः नमस्कृताः निरंधसां निराहाराणां सुदस्तं व रुकालो ते परितो षणाय भवत्विति वृणीमहे। अज्ञानामप्य
स्माकं स्तवत क्रतिर्नो ङ्क्ते त्याहुः॥ मनुरिति। यस्य तव महिम्नो न दृष्टपारं ये ते ऽपि त्वां आत्मसमं स्वशक्त्यनुरूपं पश्यत्क वृत्तिश्च यो ते ज्यतः व

वयं तु साक्षाद्भगवन्भवस्य प्रियस्य सख्युः क्षणसंगमेन। सुदुश्चिकित्स्यस्य भवस्य मृत्योर्भिषक्तमं त्वाद्य गतिं गताः स्म॥ यन्नः स्वधीतं गुर
वः प्रसादिता विप्राश्च वृद्धाश्च सदानुवृत्त्या। आर्या नताः सुहृदो भ्रातरश्च सर्वाणि भूतान्यनसूययैव। यन्नः सुतप्तं तप ए
तदीश निरंधसां कालमदभ्रमप्सु। सर्वं तदेतत्पुरुषस्य भूम्नो वृणीमहे ते परितोषणाय। मनुः स्वयंभूर्भगवान्भवश्च ये
न्ये तपोज्ञानविशुद्धसत्वाः। अदृष्टपारा अपि यन्महिम्नः स्तुवंत्यथो त्वात्मसमं गृणीमः। नमः समाय शुद्धाय पुरुषाय
पराय च। वासुदेवाय सत्वाय तुभ्यं भगवते नमः॥ ॥ श्रीमैत्रेय उवाच॥ ॥ इति प्रचेतोभिरभिष्टुतो हरिः प्रीतस्तथेत्या
ह शरण्यवत्सलः। अनिच्छतां यानमतृप्तचक्षुषां ययौ स्वधामानपवर्गवीर्यः। अथ निर्याय सलिलात्प्रचेतस उदन्वतः। वी
क्ष्याकुप्यन्द्रुमैश्छन्नां गां गां रोद्धुमिवोच्छ्रितैः। ततोग्निमारुतौ राजन्नमुंचन्मुखतो रुषा। महीं निर्वीरुधं कर्तुं संवर्तक इवात्यये

नामि　　तो　　॥ राम॥ ॥

यमपि गृणीमः सत्वमूर्तये वासुदेवाय यानं स्वप्रयाणं माणि छपि सतां स्वधामयये। अनपवर्गवीर्यः अकुंठितप्रभाव उदन्वतः सिंधोः सलिलान्निर्यायानिर्ग
त्य गां च गिरिं द्रुमिव उच्छ्रितैर्द्रुमैः। गां महीं छन्नां वीक्ष्य द्रुमेभ्योऽकुप्यत। तदा हि प्राचीनबर्हिषः प्रव्रजितत्वात् राजकं क्रषीणाद्य लावात्द्रुमैर्भूमिश्छ
न्नाऽभूत् निरस्ता वीरुधो ऽपि यस्याः तथाभूतां कर्तुं। संवर्तकः कालाग्निरुद्रः॥ ॥

व नृप्री

स्मृ

गा

ते

मुंच त्

यं॰ ३१

भा॰च॰ ९४ ते

नये दुर्क्रिलितः समर्पयामासुः मारिषां वार्क्षीं अजनयो निर्ब्रह्मात् तस्माज्जातो दक्षः महादेवस्यावज्ञानात् पूर्वम् अजनयोनिजो ब्रह्मपुत्रोपि सन्नू क्षत्रिय जातो यस्यामजनि जातः । प्राक् सर्गे पूर्वदेहे कालेन विद्रुते दैवेन ईश्वरेण चोदितः सन् इष्टाः प्रजाः ससर्ज सदक्ष इति प्रसिद्धः । स्वया उ चा प्रभया ते जग पादत्त आच्छादितवान् । दक्षं कर्मदक्षत्वात् दक्षमब्रुवन् । तमभिषिच्य ब्रह्मनादिर्ब्रह्मा प्रजासर्गरक्षायां युयोज स च दक्षो अन्यान् मरीच्यादीन् तत्र व्यापारेषु नियुक्तवान् ॥ ॥ चतुर्थे त्रिंशः ॥ ॥ एकत्रिंशे कृते दक्षे ध्रुवरं न्यस्य वने सतां । नारदोक्तेन मार्गेण मुक्तिरुक्ता प्रचेतसां । तत

तस्मा साक्रियमाणां ज्ञानद्रुमा वीक्ष्य पितामहः । आगतः शमयामास पुत्रान्बर्हिष्मतो नयैः ॥ तत्रावशिष्टा ये वृक्षा भीता दुहितरं तदा । उज्जह्रुस्ते प्रचेतोभ्य उपदिष्टाः स्वयंभुवा । ते च ब्रह्मण आदेशान्मारिषामुपयेमिरे । यस्यां महदवज्ञानादजन्यजनयोनिजः ॥ चाक्षुषे त्वन्तरे प्राप्ते प्राक्सर्गकालविद्रुतः । यः ससर्ज प्रजा इष्टाः स दक्षो दैवचोदितः ॥ यो जायमानः सर्वेषां तेजस्ते जस्विनां रुचा । स्वयोपादत्त दाक्ष्याच्च कर्मणां दक्षमब्रुवन् । तं प्रजासर्गरक्षायामनादिरभिषिच्य च । युयोज युयुजेन्यांश्च स वै सर्वप्रजापतीन् ॥ इति श्रीभागवते महापुराणे चतुर्थस्कंधे त्रिंशोध्यायः ॥ ॥ श्रीमैत्रेय उवाच ॥ ॥ तत उत्पन्नविज्ञाना आश्वधोक्षजभाषितं । स्मरंत आत्मजे भार्यां विसृज्य प्राव्रजन्गृहात् । दीक्षिता ब्रह्मसत्रेण सर्वभूतात्ममेधसा । प्रतीच्यां दिशि वेलायां सिद्धोभूद्यत्र जाजलिः ॥ ॥१॥ ॥

२ पु २ चा

दिव्यवर्षसहस्राणां सहस्रस्यान्ते उत्पन्नविवेकज्ञाना अधोक्षजोपायासस्थमहामनिर्विघ्नतिरपादत इत्यधोक्षजभाषितं स्मरंत आत्मजे भार्यां विसृज्य प्राव्रजन् ब्रह्मसत्रेण आत्मविमर्शेन दीक्षिताः कृतसंकल्पा दम्भ्रुः सर्वभूतात्मेति मेधा ज्ञानं यस्मिंस्तेन । वेलायां समुद्रतटे । जाजलिनामा ऋषिः ॥ ॥ ९४

निर्ज्जिताः प्राणमनोक्षवचोदृशो येस्तानतः शांता उपरताः समा नाष्टलाधारादारल्पन्तः जवो विग्रहा येषां। ब्रह्मणि योजित आत्मा यैः ॥ सुरासुरे
रीघ्योदृष्टवान्॥ ३ उत्थाय तं प्रणिपत्य यथादेशं यथाविधि पूजयित्वा। आदिष्टं उपदिष्टं यदात्मतत्त्वं न्हृ यितं विस्मृतं ॥ ५ ॥ इति प्रचेतोभिः
पृष्टः। अहो गृहप्रसक्त्या हरिसेवां विना सर्व्वजन्मकर्मादिकं व्यर्थं भूतमिति तान् शोचन्नाह। तज्जन्मेति च उर्भिः यतो जन्मादेर्हरिसेवा ख

तान्निर्ज्जित प्राणमनोवचोदृशो जितासनान्शांत समान् विग्रहान्। परेमले ब्रह्मणि योजितात्मनः सुरासुरेड्यो ददृशे स्म
नारदः ॥ तमागतं त उत्थाय प्रणिपत्याभिनंद्य च। पूजयित्वा यथादेशं सुखासीनमथाब्रुवन्॥ ॥ प्रचेतस ऊचुः ॥
स्वागतं ते सुरर्षेद्य दिष्ट्या नो दर्शनं गतः। तव चंक्रमणं ब्रह्मन्नभयाय यथा रवेः। यदादिष्टं भगवता शिवेनाधोक्षजेन
च। तद्गृहेषु प्रसक्तानां प्रायशः क्षपितं प्रभो। तन्नः प्रद्योतयाध्यात्म ज्ञानं तत्वार्थदर्शनं। येनांजसा तरिष्यामो दुस्तरं भव
सागरं ॥ ॥ श्रीमैत्रेय उवाच ॥ ५ इति प्रचेतसां पृष्टो भगवान्नारदो मुनिः। भगवत्युत्तमश्लोक आविष्टात्माब्रवीन्नृपान् ॥ श्री
नारद उवाच ॥ ॥ तज्जन्म तानि कर्माणि तदायुस्तन्मनो वचः। नृणां येनेह विश्वात्मा सेव्यते हरिरीश्वरः। किं जन्मभिस्त्रिभिर्वेह शौ
क्र सावित्र याज्ञिकैः। कर्मभिर्वा त्रयीप्रोक्तैः पुंसोपि विबुधायुषा। श्रुतेन तपसा किं च वचोभिश्चित्तवृत्तिभिः। बुद्ध्या वा किं निपुण
या बलेनेंद्रियराधसा। किं वा योगेन सांख्येन न्यास स्वाध्याययोरपि। किं वा श्रेयोभिरन्यैश्च न यत्रात्मप्रदो हरिः ॥ ॥

फलम्। अतस्तद्विहीनं सर्व्वं व्यर्थमित्यर्थः। ए शुक्रं संबंधि जन्म विशुद्ध मातापितृभ्यामुत्पत्तिः सावित्रमुपनयनेन। याज्ञिकं दीक्षया। विबुधा
नामिव दीर्घायुषापि ॥ ९ ॥ वचोभिः वाग्विलासैः चित्तवृत्तिभिः नानावधान सामर्थ्यैः इंद्रियाणां राधसा पाटवेन ॥ १० ॥ योगेन प्राणायामा
। सांख्येन देहादिव्यतिरिक्तात्मज्ञानमात्रेण। संन्यासवेदाध्ययना स्याम पि अन्यैरपि व्रतवैराग्यादिभिः श्रेयःसाधनैः ॥ १२ ॥ ॥

सा॰च॰

९५

र्थं न्ये

नन्वेषां नानाफलसाधनानां हरिसेवा तावन्मात्रेण कृतो वैयर्थ्यं तत्राह। श्रेयसां फलानामात्मैव अवधिः पराकाष्ठा। अर्थतः परमार्थतः।
आत्मत्वेनैवार्थ्यं प्रियत्वादित्यर्थः। ननु तत्त्वात्मा वा अवधिः हरेः किमायातं तत्राह। सर्वेषामपीति। आत्मदश्च अविद्यानिरासेन स्वरू-
पाभिव्यंजकः। ऐश्वर्येण पितृरूपेण बलिप्रभृतिभ्य इवात्मप्रदः। प्रियश्च परमानन्दरूपत्वात्॥ २४॥ किंच नानाकर्मभिस्तत्तद्देवता-

श्रेयसामपि सर्वेषामात्मा ह्यवधिरर्थतः। सर्वेषामपि भूतानां हरिरात्माऽऽत्मदः प्रियः। यथा तरोर्मू-
लनिषेचनेन तृप्यन्ति तत्स्कन्धभुजोपशाखाः। प्राणोपहाराच्च यथेन्द्रियाणां तथैव सर्वार्हणमच्यु-
तेज्या॥ ॥ २५ ॥

थे

स्तैर्भिन्नान्यपि फलानि हरिप्रीत्या भवन्ति केवलं तत्तद्देवताराधनेन तु न किंचिदिति सदृष्टान्तमाह यथेति। मूलात्प्रथमविभागाः स्कन्धाः
ततो द्वितीयविभागा भुजाः। तेषामपि उपशाखाः। उपलक्षणमेतत् पत्रपुष्पादयोऽपि तृप्यन्ति न तु मूलमेकं विना स्कन्धनिषेचनेन। प्राणस्योपहारो भो-
जनं तस्मादेवेन्द्रियाणां तृप्तिः न तु तत्तदिन्द्रियेषु पृथक् पृथगन्नलेपनेन। तथाऽच्युताराधनमेव सर्वदेवताराधनं न पृथगित्यर्थः॥

९५

नोचेत्
स्य

कुतः सर्वमूलत्वादिति स दृष्टांतांतरमाह। यथैव वारः जलानि वर्षाकाले सूर्याद्‌ उद्भवंति ग्रीष्मे तस्मिन्नेव प्रविशंति। अस्याप्रसिद्धत्वेन दृष्टांतांतरमा
ह। यथा भूतानि भूमाविति। गुणप्रवाहः वैनाशिकः प्रपंचः ननु हराविव गुणप्रवाहः उक्तो गुणप्रवाहः आधारत्वेन सोपाधिकत्वं हरेः स्यादित्या
शंक्याह। एतदिति। तदेतद्धि स्थाः पदं तस्मादुत्पन्नो जगदात्मनः उपाधेः परं तत्संबंधाख्या धारधेयत्वादौ अपि गगनगंधर्वनगरवत् ज्ञातव्यः। तर्हि
भून्यं तत्राह सकृद्विभातं दीपादिवद्विच्छेद्य ज्ञानघनमित्यर्थः। यथा सवितुः प्रभा सकृत्प्रभातातद्वत्। यज्ज्ञाना घट व्यक्रिया ज्ञानानि तो

यथैव सूर्यात्प्रभवंति वारः पुनश्च तस्मिन्प्रविशंति काले। भूतानि भूमौ स्थिरजंगमानि तथा हरावेव गुणप्रवाहः। एतत्प
देतज्जगदात्मनः परं सकृद्विभातं सवितुर्यथा प्रभा। यथासवोऽजाग्रति सुप्तशक्तयो द्रव्यक्रियाज्ञानभिदाभ्रमात्ययः। यथा
नभस्यभ्रतमःप्रकाशा भवंति भूपा न भवंत्यनुक्रमात्। एवं परे ब्रह्मणि शक्तयस्त्वमू रजस्तमः सत्वमिति प्रवाहः। तेनै
कमात्मानमशेषदेहिनां कालं प्रधानं पुरुषं परेशं। स्वतेजसा ध्वस्तगुणप्रवाहमात्मैकभावेन भजध्वमद्धा॥ ॥

मसत्तैजसवैकारिकाहंकारभेदाः तन्निमित्तो भेदः तमो जगद्भेदः स्तमस्त्वात्ययोनिद्वृद्धिर्भवति। किंलक्षणो हरिरित्याशंक्य लक्षणं वात
स्ये दंड्व्यक्रिये स्यादिनोच्यते न च संगे हरेः कथं प्रपंचोत्पत्तिलयौ तत्राह। यथेति। अभ्रं तमः प्रकाशाः आगमापायिनो रजस्तमः सत्वच्छा
यीया। हे भूपाः प्रचेतसः अमू शक्तयः न भवंति लीयंते इति एवमयं जगत्प्रवाहः तेन सर्वकारणत्वेन हेतुना कालो निमित्तं प्रधानमु
पादानं पुरुषः कर्त्ता एतत्त्रितयात्मकत्वात्सर्वकारणं परमीश्वरं अद्धा साक्षात् भजध्वं। कथं आत्मना एकभावेन अभिन्नत्वेन॥ ॥

भा॰ च॰

९६

साधनमाह। दययेति। शीघ्रं तुष्यति। ततो न कदाचित्त्यजतीत्याह। अपहृतानि निरस्ताः सकला एषणाः कामा यस्मात्स चासावमलश्चात्मा मनः तस्मिन्नु सतां मनसि निरंतरमेधितया भावनयोपहूतः सन्नक्षरो हरिः। छिद्रवत् तत्रत्याकाशवत् ततो न सरति नापयाति हि। किंतु ...वन्। आत्मनो निजजनवशगत्वं स्वस्वाधीनत्वमयन्नवगच्छन्। सतामेव विशेषः सोऽक्षरः सतां दुष्टानामपि न स्पृशतीत्याह। न

दययासर्वभूतेषुसंतुष्ट्यायेनकेनवा। सर्वेंद्रियोपशांत्या च तुष्यत्याशु जनार्दनः॥ अपहृतसकलैषणामलात्मन्यविरतमेधितभावनोपहूतः। निजजनवशगत्वमात्मनोऽयन्न सरति छिद्रवदक्षरः सतां हि॥ न भजति कुमनीषिणां स इज्यां हरिरधनात्मधनप्रियो रसज्ञः। श्रुतधनकुलकर्मणां मदैर्ये विदधति पापमकिंचनेषु सत्सु॥ श्रियमनुचरतीं तदर्थिनश्च द्विपदपतीन्विबुधांश्च यः स्वपूर्णः। न भजति निजभृत्यवर्गतंत्रः कथममुमुद्विसृजेत्पुमान्कृतज्ञः॥ ॥

९६

इति। कुमनीषिणां कुत्सितमतीनां अधना अकिंचनास्त एव आत्मधनाः सभगवद्धनास्ते प्रिया यस्य स रसज्ञः। के कुमनीषिणस्तानाह॥ श्रुतादिनिमित्तैर्मदैर्ये सत्सु पापं तिरस्कारं कुर्वंति। स्वस्वाधीनत्वं प्रपंचयन्नाह। अनुवर्तमानामपि श्रियं तदर्थिनः सकामान् द्विपदपतीन् राज्ञो देवानपि यो नानुवर्तते यतः स्वेनैव पूर्णः। अतः स्वभृत्यवर्गतंत्र एव। एवंभूतममुमीषदपि कथं परित्यजेत॥॥

मिष ५

प्रचेतसः कर्म्मस्तुतानुच्छन्याच्छन्नं मुनीतेरित्यादिभिःक्तवचरिताद्यांसत्रेऽग्रगायत प्रचेतसामित्युक्तत्वात् प्रचेतसां नारदस्य च संवादरूपमेतदाख्यानं तो लिहितो हरेः कीर्त्तनं यस्मिन् ॥ स एष वंशः सोऽणुवर्णितः ॥ यः प्रियव्रतः स्वान् ज्ञातीन् दिदृक्षुः राज्ञां चरितमिति शेषः ॥ ॥ इति श्री भागवते भा

मैत्रेय उवाच ॥ ॥ इति प्रचेतसो राजन्नन्याश्च भगवत्कथाः ॥ श्रावयित्वा ब्रह्मलोकं ययौ स्वायंभुवो मुनिः ॥ ते पि तन्मुखनिर्यातं यशो लोकमलापहं ॥ हरेर्निशम्य तत्पादं ध्यायंस्तद्गतिमाययुः ॥ एतत्तेऽभिहितं क्षत्तर्यन्मां त्वं परिपृष्टवान् ॥ प्रचेतसां नारदस्य संवादं हरिकीर्त्तनं ॥ ॥ श्रुक उवाच ॥ ॥ य एष उत्तानपदो मानवस्यानुवर्णितः ॥ वंशः प्रियव्रतस्यापि निबोध नृपसत्तम ॥ यो नारदादात्मविद्यामधिगम्य पुनर्महीं ॥ भुक्त्वा विभज्य पुत्रेभ्य ऐश्वरं समगात्पदं ॥ इमां तु कौषारविणोपवर्णितां क्षत्ता निशम्याजितवादसत्कथां ॥ प्रवृद्धभावोऽश्रुकलाकुलो मुनेर्दधार मूर्ध्ना चरणं हृदा हरेः ॥ ॥ श्री विदुर उवाच ॥ ॥ सोऽयमद्य महायोगिन् भवता करुणात्मना ॥ दर्शितस्तमसः पारो यत्राकिंचनगो हरिः ॥ इत्यानम्य तमामंत्र्य विदुरो गजसाह्वयं ॥ स्वानां दिदृक्षुः प्रययौ ज्ञातीनां निर्वृताशयः ॥ एतद्यः शृणुयाद्राजन् राज्ञां हर्यर्पितात्मनां ॥ आयुर्धनं यशः स्वस्ति गतिमैश्वर्यमाप्नुयात् ॥ ॥ ॥ इति श्री भागवते महापुराणे चतुर्थस्कंधे प्रचेतसोपाख्यानं नाम एकत्रिंशोऽध्यायः ॥ ॥ ॥

र्थदीपिकायां चतुर्थस्कंधे एकत्रिंशोऽध्यायः ॥ ॥ समाप्तं ॥ ॥ श्री रामाय नमः ॥ ॥ श्री कृष्णाय नमः ॥ ॥ रामचंद्राय नमः ॥ ॥ ॥

३ अकिंचनैर्निरस्तदेहादिभावैर्गीयते इस किंचनाः

॥ चतुर्थस्कंध ॥ ४

॥ मुधोमासादेवस्पद पुस्तकं स्वार्थं परार्थं वेति ॥ ई ॥

[OrderDescription]
,CREATED=05.06.20 13:51
,TRANSFERRED=2020/06/05 at 15:02:45
,PAGES=415
,TYPE=STD
,NAME=S0003083
,Book Name=M-2954-SHRIMAD BHAGWAT SAPTAM SKANDH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF

FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF

FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF

FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF

FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF

FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF

FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF

FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF

FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF

FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF

FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF
,FILE232=00000232.TIF
,FILE233=00000233.TIF

FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF
,FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF
,FILE252=00000252.TIF
,FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF

FILE256=00000256.TIF
,FILE257=00000257.TIF
,FILE258=00000258.TIF
,FILE259=00000259.TIF
,FILE260=00000260.TIF
,FILE261=00000261.TIF
,FILE262=00000262.TIF
,FILE263=00000263.TIF
,FILE264=00000264.TIF
,FILE265=00000265.TIF
,FILE266=00000266.TIF
,FILE267=00000267.TIF
,FILE268=00000268.TIF
,FILE269=00000269.TIF
,FILE270=00000270.TIF
,FILE271=00000271.TIF
,FILE272=00000272.TIF
,FILE273=00000273.TIF
,FILE274=00000274.TIF
,FILE275=00000275.TIF
,FILE276=00000276.TIF
,FILE277=00000277.TIF

FILE278=00000278.TIF
,FILE279=00000279.TIF
,FILE280=00000280.TIF
,FILE281=00000281.TIF
,FILE282=00000282.TIF
,FILE283=00000283.TIF
,FILE284=00000284.TIF
,FILE285=00000285.TIF
,FILE286=00000286.TIF
,FILE287=00000287.TIF
,FILE288=00000288.TIF
,FILE289=00000289.TIF
,FILE290=00000290.TIF
,FILE291=00000291.TIF
,FILE292=00000292.TIF
,FILE293=00000293.TIF
,FILE294=00000294.TIF
,FILE295=00000295.TIF
,FILE296=00000296.TIF
,FILE297=00000297.TIF
,FILE298=00000298.TIF
,FILE299=00000299.TIF

FILE300=00000300.TIF
,FILE301=00000301.TIF
,FILE302=00000302.TIF
,FILE303=00000303.TIF
,FILE304=00000304.TIF
,FILE305=00000305.TIF
,FILE306=00000306.TIF
,FILE307=00000307.TIF
,FILE308=00000308.TIF
,FILE309=00000309.TIF
,FILE310=00000310.TIF
,FILE311=00000311.TIF
,FILE312=00000312.TIF
,FILE313=00000313.TIF
,FILE314=00000314.TIF
,FILE315=00000315.TIF
,FILE316=00000316.TIF
,FILE317=00000317.TIF
,FILE318=00000318.TIF
,FILE319=00000319.TIF
,FILE320=00000320.TIF
,FILE321=00000321.TIF

FILE322=00000322.TIF
,FILE323=00000323.TIF
,FILE324=00000324.TIF
,FILE325=00000325.TIF
,FILE326=00000326.TIF
,FILE327=00000327.TIF
,FILE328=00000328.TIF
,FILE329=00000329.TIF
,FILE330=00000330.TIF
,FILE331=00000331.TIF
,FILE332=00000332.TIF
,FILE333=00000333.TIF
,FILE334=00000334.TIF
,FILE335=00000335.TIF
,FILE336=00000336.TIF
,FILE337=00000337.TIF
,FILE338=00000338.TIF
,FILE339=00000339.TIF
,FILE340=00000340.TIF
,FILE341=00000341.TIF
,FILE342=00000342.TIF
,FILE343=00000343.TIF

FILE344=00000344.TIF
,FILE345=00000345.TIF
,FILE346=00000346.TIF
,FILE347=00000347.TIF
,FILE348=00000348.TIF
,FILE349=00000349.TIF
,FILE350=00000350.TIF
,FILE351=00000351.TIF
,FILE352=00000352.TIF
,FILE353=00000353.TIF
,FILE354=00000354.TIF
,FILE355=00000355.TIF
,FILE356=00000356.TIF
,FILE357=00000357.TIF
,FILE358=00000358.TIF
,FILE359=00000359.TIF
,FILE360=00000360.TIF
,FILE361=00000361.TIF
,FILE362=00000362.TIF
,FILE363=00000363.TIF
,FILE364=00000364.TIF
,FILE365=00000365.TIF

FILE366=00000366.TIF
,FILE367=00000367.TIF
,FILE368=00000368.TIF
,FILE369=00000369.TIF
,FILE370=00000370.TIF
,FILE371=00000371.TIF
,FILE372=00000372.TIF
,FILE373=00000373.TIF
,FILE374=00000374.TIF
,FILE375=00000375.TIF
,FILE376=00000376.TIF
,FILE377=00000377.TIF
,FILE378=00000378.TIF
,FILE379=00000379.TIF
,FILE380=00000380.TIF
,FILE381=00000381.TIF
,FILE382=00000382.TIF
,FILE383=00000383.TIF
,FILE384=00000384.TIF
,FILE385=00000385.TIF
,FILE386=00000386.TIF
,FILE387=00000387.TIF

FILE388=00000388.TIF
,FILE389=00000389.TIF
,FILE390=00000390.TIF
,FILE391=00000391.TIF
,FILE392=00000392.TIF
,FILE393=00000393.TIF
,FILE394=00000394.TIF
,FILE395=00000395.TIF
,FILE396=00000396.TIF
,FILE397=00000397.TIF
,FILE398=00000398.TIF
,FILE399=00000399.TIF
,FILE400=00000400.TIF
,FILE401=00000401.TIF
,FILE402=00000402.TIF
,FILE403=00000403.TIF
,FILE404=00000404.TIF
,FILE405=00000405.TIF
,FILE406=00000406.TIF
,FILE407=00000407.TIF
,FILE408=00000408.TIF
,FILE409=00000409.TIF

FILE410=00000410.TIF
,FILE411=00000411.TIF
,FILE412=00000412.TIF
,FILE413=00000413.TIF
,FILE414=00000414.TIF
,FILE415=00000415.TIF
,